તેઓ શ્રીમદ્‌ના પ્રત્યેક શિષ્યરત્નો એ અનેક ગ્રંથોની રચનાઓ કરેલ છે. તેમાં પાંચમા શિષ્યરત્ન પૂ.આ.શ્રી. સોમસુન્દરસૂરિ મ. તે સમયના સર્વશ્રેષ્ઠ પ્રભાવક મહર્ષિ હતા. તેઓ શ્રીમદ્‌નો જન્મ વિ.સં. ૧૪૩૦માં પ્રલ્હાદનપુર (વર્ત. પાલનપુર)માં થયો હતો. પિતાનું નામ **"સજ્જન"** તથા માતાનું નામ **"માલ્હણદેવી"** હતું. વિ.સં. ૧૪૩૭માં માત્ર સાત વર્ષની ઉંમરે સંસારનો ત્યાગ કરી સંયમનો સ્વીકાર કર્યો હતો. વિ.સં. ૧૪૫૦માં વાચક પદની પ્રાપ્તિ થઈ હતી અને વિ.સં. **૧૪૫૩**માં પાટણ મુકામે ગુરુદેવ પૂ.આ.શ્રી. દેવસુન્દરસૂરિજી મહારાજે એમને આચાર્યપદ આપી પોતાની પાટે સ્થાપીને તપાગચ્છ નાયક બનાવ્યા હતા. વિ.સં. ૧૪૯૯માં તેઓશ્રીનો સ્વર્ગવાસ થયો હતો. તેઓશ્રીનો આત્મા શ્રી સીમંધર પ્રભુના સાનિધ્યમાં પૂર્વમહાવિદેહ ક્ષેત્રમાં સારા કુળમાં ઉત્પન્ન થયો છે એવું અતિશયવાળા સ્થવિર મુનિઓએ કહ્યું હતું. આવો ઉલ્લેખ સોમસૌભાગ્ય મહાકાવ્યના નવમા સર્ગમાં જોવા મળે છે. એ મહાપુરુષ જેવા જ્ઞાની હતા. તેવા જ અપરિશ્રાવી-ગંભીર હતા. તેથી સ્વપક્ષની જેમ જ પરપક્ષના સાધકો તેઓશ્રી પાસે નિઃશંકપણે આલોચના ગ્રહણ કરી શુદ્ધિ સાધતા હતા.

આ મહાપુરુષના જીવન સંબંધી વિશેષ માહિતી પૂ.આ.શ્રી મુનિસુન્દરસૂરિકૃત **"ગુર્વાવલી"** (રચના વિ.સં. ૧૪૬૬), પૂ. શ્રી ચારિત્રરતિ ગણિકૃત **"શ્રી ચિત્રકૂટ મહાવીર પ્રસાદ પ્રશસ્તિ"** (રચના વિ.સં. ૧૪૯૫), પૂ. મુનિ શ્રી પ્રતિષ્ઠાસોમકૃત **"સોમસૌભાગ્ય કાવ્ય"** (રચના વિ.સં. ૧૫૨૪), પૂ. શ્રી સોમચરિત્રગણિકૃત **"ગુરુગુણરત્નાકર"** (રચના વિ.સં. ૧૫૪૧) આદિ ગ્રંથોમાંથી પ્રાપ્ત થાય છે. તેઓશ્રીમદે પોતાના જીવનકાળ દરમ્યાન અનેક ગ્રંથરત્નોની રચના કરેલ છે; તેમાં **'આરાધના રાસ', 'ઉપદેશ માળા બાલાવબોધ', 'યોગશાસ્ત્ર બાલાવબોધ', ષડાવશ્યક બાલાવબબોધ, નવતત્ત્વાદિ બાલાવબોધ** અને તેના **ભાષ્યાદિ 'આવશ્યક નિર્યુક્તિ અવચૂરિ', 'સાધુ સમાચારી કુલક'** ઉપરાંત **કલ્યાણકાદિ અનેક સ્તવો** આદિ અગ્રગણ્ય અનેકગ્રંથોની રચના કરી હતી, જેમાનાં ઘણા ખરાં આજે ઉપલબ્ધ થાય છે.

પ્રસ્તુત **શ્રી ચતુઃશરણ પ્રકીર્ણક અવચૂરિ** (વૃત્તિ) પણ તેઓ શ્રીમદ્‌ની જ એક રચના છે.

જૈન શાસનના મહાપુરુષોની પંક્તિમાં પોતાની વિદ્વત્તા, પુણ્ય પ્રતિભા આદિ ગુણોથી સ્થાન-માન-પ્રતિષ્ઠાને પામનારા આ મહાપુરુષના ચાર શિષ્યો આચાર્યપદને પામેલા હતા. (૧) પૂ.આ.શ્રી. મુનિસુન્દર સૂરિ મ., (૨) પૂ.આ.શ્રી. જયસુન્દરસૂરિ મ., (૩) પૂ.આ.શ્રી. ભુવનસુન્દરસૂરિ મ., (૪) પૂ.આ.શ્રી. જિનસુન્દરસૂરિ મ. જે પ્રભાવક કક્ષાના હતા અને જેમણે અનેક ગ્રંથોનું સર્જન કર્યાના ઉલ્લેખો પ્રાપ્ત થાય છે.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

આ મહાપુરુષના જીવનનો વિસ્તૃત વૃત્તાંત શ્રી સોમસૌભાગ્ય મહાકાવ્ય, ઉ. ધર્મસાગરજી કૃત પટ્ટાવલી, ગુરુગુણ રત્નાકર કાવ્ય, તપાગચ્છ પટ્ટાવલી વગેરેમાં વર્ણવેલ છે, એ પૈકી સંક્ષિપ્ત વૃત્તાંત 'પટ્ટાવલી પરાગ', 'તપાગચ્છ કા ઇતિહાસ ભાગ-૧' વગેરે પુસ્તકોમાં વર્ણવેલ છે. તેમાંથી તારવીને અત્રે સાભાર ગ્રહણ કર્યો છે.

'સોમયુગ'ના તેજસ્વી નક્ષત્ર પૂ.આ.શ્રી ગુણરત્નસૂરિજી મહારાજ

તપાગચ્છની ઉજળી પરંપરામાં બે યુગો સાહિત્યની દૃષ્ટિએ ખાસ નોંધપાત્ર થયા. એક સોમયુગ અને બીજો હીરયુગ. યુગપ્રધાન પૂ.આ.શ્રી સોમસુંદરસૂરીશ્વરજી મહારાજા તેમજ અકબરઅસુરત્રાણ પ્રતિબોધક પૂ.આ.શ્રી હીરસૂરીશ્વરજી મહારાજાના સમયે શ્રમણ સંઘ ખૂબ ફૂલ્યો-ફાલ્યો. આચાર, વિચાર અને પ્રરૂપણા વિષયક ચોક્કસ સ્થિરતા અને કુશળ અનુશાસન મળતાં સાહિત્યની સર્વાત્રિણ નવસર્જન પ્રવૃત્તિ ખૂબ જ જોરશોરથી બની. આ બંને મહાપુરુષોના આસપાસના કાળમાં ખૂબ જ નોંધપાત્ર ગ્રંથોનાં નવનિર્માણ થવાથી જૈન દર્શનની પ્રભાવકતાએ પણ એક અજબ ઊંચાઈ અને આભા પ્રાપ્ત કરી હતી.

ચઉસરણ પયન્નાની લઘુ ટીકાના રચયિતા પૂ.આ.શ્રી ગુણરત્નસૂરિજી મહારાજા 'સોમયુગ'ના એક તેજસ્વી નક્ષત્ર હતા. એમના અંગે જો કે વ્યાપક પ્રમાણમાં પરિચય સામગ્રી મળતી નથી. છતાં યત્ર, તત્ર છુટક યા પ્રશસ્તિ આદિ રૂપે થોડો ઘણો પરિચય જરૂર ઉપલબ્ધ થાય છે.

'શ્રી સોમસૌભાગ્ય મહાકાવ્ય' અને 'ગુર્વાવલી' જેવા ગ્રંથોમાં પૂ.આ.શ્રી દેવસુંદરસૂરિજી મહારાજાની પ્રશંસાના અનેક પદ્યો ઉપલબ્ધ છે, તેમાં એમના પ્રભાવક પટ્ટધરોનો ય ઉલ્લેખ પ્રાપ્ત થાય છે. તેઓશ્રીના અનેક પટ્ટધરો પૈકીના જ એક પૂ.આ.શ્રી ગુણરત્નસૂરિજી મહારાજા છે.

સહસ્રાવધાની પૂ.આ.શ્રી મુનિસુંદરસૂરીશ્વરજી મહારાજાએ પોતાના ગુરુભાઈ થતાં પૂ.આ.શ્રી ગુણરત્નસૂરીશ્વરજી મહારાજાનો ખૂબ ભાવપૂર્ણ પરિચય આપ્યો છે. તેઓ જણાવે છે કે-

- તેઓ વાદવિદ્યામાં કુશળ હતા.
- તેમણે અનેક વાદ જીત્યા હતા.
- તેમની કીર્તિ દેશ-વિદેશમાં ફેલાયેલી હતી.
- કઠિનમાં કઠિન ગ્રંથોમાં તેમની મતિ પ્રવેશ પામતી હતી.
- એમનું ચારિત્ર નિષ્કલંક હતું.
- કોઈને પણ બાધક ન બનવાનો તેમનો અભિગ્રહ હતો.
- ક્યારેય તેમણે ટેકો લીધો ન હતો.
- કોઈ ઉપર તેઓ રોષ ન કરતા.
- વિકથાથી તેઓ દૂર-દૂર રહેતા.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

- સર્વવિદ્યામાં તેમની કુશળતા હતી.
- એઓ કુશળ અધ્યાપક હતા.
- શિષ્યોને તેઓ નિપુણ બનાવતા હતા.
- વ્યાકરણ, સાહિત્ય, આગમ, જ્યોતિષ, તર્ક અને વાદવિદ્યામાં તેઓની અદ્‌ભુત હથોટી હતી.
- સર્વત્ર તેમની પ્રતિભા પ્રસિદ્ધ હતી.
- જ્ઞાનનો પ્રચંડ પુરુષાર્થ હતો.
- નિત્ય અપ્રમત્ત હતા.
- સ્મરણ શક્તિ અતુલ હતી.
- અનેક વિશદ ગ્રંથના તેઓ રચયિતા હતા.

તેમના ગ્રંથો જોતાં ગુરુભાઈ સૂરિજીએ તેમની કરેલી સ્તુતિ સર્વથા સાર્થક છે; એવું સ્પષ્ટપણે જણાઈ આવે છે.

એમનું વિહાર ક્ષેત્ર ગુજરાત, રાજસ્થાન હતું. એમના હાથે જિનપ્રતિમાની અંજનવિધિ થયાના પ્રમાણો પણ મળ્યાં છે.

એમના **સમય** નિર્ણય અંગે ખાસ સાધન મળતાં નથી. છતાં જે ત્રૂટક સાધનો મળ્યાં છે. તેના આધારે તેમનો જીવનકાળ વિ.સં. ૧૪૦૦ થી ૧૪૭૫ સુધીનો હોવો જોઈએ. તેમને સૂરિપદ વિ.સં. ૧૪૪૨ માં પ્રાપ્ત થયું હતું. એવો આધાર મળે છે. તેમના ગુરુભાઈ પૂ.આ.શ્રી કુલમંડનસૂરિજી મહારાજાની સાથે જ તેમને સૂરિપદે પ્રસ્થાપિત કરાયા હતા એવો ઉલ્લેખ પંચાશક ટીકાની વિ.સં. ૧૪૪૨માં જ લખાયેલ પ્રતિની પ્રશસ્તિમાંથી પ્રાપ્ત થયો છે.

એમણે વિવિધ ગ્રંથોની સંરચના કરી હતી. તેમાંના કેટલાકનો સંક્ષિપ્ત પરિચય આ મુજબ છે.

૧-કલ્પાંતર્વાચ્ય : (રચના વિ.સં. ૧૪૫૭) આ ગ્રંથમાં પર્યુષણા પર્વના મહિમાનું નિરૂપણ છે. કલ્પ શ્રવણની વિધિ અને વિવિધ કથાઓ આપવા ઉપરાંત અનેક વિષયો ઉપર ચર્ચા અને નિર્ણય કરેલા છે.

૨-ક્રિયારત્ન સમુચ્ચય : (રચના વિ.સં. ૧૪૬૬) કલિકાલ સર્વજ્ઞ પૂ.આ.શ્રી હેમચંદ્રસૂરિજી મહારાજાના શબ્દાનુશાસનના આધારે ધાતુઓનું વિભાગીકરણ કરીને આ ગ્રંથ બનાવેલ છે. બધા કાળના ધાતુઓના રૂપોના પ્રયોગો તેમજ ઉદાહરણો આપ્યાં છે. આમાં શ્રી સુધર્માસ્વામીજીથી લઈ નિજ ગુરુદેવ સુધીનો પર્વક્રમ પ્રશસ્તિમાં અપાયો છે. આ ગ્રંથ મુદ્રિત છે.

૩-ચતુઃશરણાદિ પ્રકીર્ણક-અવચૂરિ : ચતુઃશરણ, આતુર પ્રત્યાખ્યાન, સંસ્તારક અને ભક્ત પરિજ્ઞા આ ચારે પ્રકીર્ણકો પર વિષમપદ ટિપ્પણ અપર નામ અવચૂરીની રચના તેમણે કરી છે. એમાંની જ પ્રથમ અવચૂરી આ સાથે પ્રગટ થઈ રહી છે. આનો રચના સંવત મળતો નથી.

૪-કર્મગ્રંથ અવચૂરી : (રચના વિ.સં. ૧૪૫૯) તપાગચ્છના દ્વિતીય પટ્ટાલંકાર પૂ.આ.શ્રી દેવેન્દ્રસૂરીશ્વરજી મહારાજાએ નવ્ય પાંચ કર્મગ્રંથો બનાવ્યા હતા. તો પૂ.આ.શ્રી ચંદ્રર્ષિગણિ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

મહત્તરશ્રીજીઓ છઠ્ઠો કર્મગ્રંથ બનાવેલો. તે બધા ઉપર વિષમપદ ટિપ્પણ (અવચૂરી)ની રચના કરી હતી. આ બધી અવચૂરીઓ હજુ અમુદ્રિત છે.

૫-ક્ષેત્ર સમાસ અવચૂર્ણી : પૂ.આ.શ્રી સોમતિલકસૂરિજી મહારાજે રચેલા નવ્ય ક્ષેત્ર સમાસ ગ્રંથ ઉપર તેઓશ્રીએ અવચૂર્ણી રૂપે નાની ટીકા બનાવી છે. આ ગ્રંથ પણ અમુદ્રિત છે. આ ગ્રંથની વિ.સં. ૧૪૮૦ની લખાયેલ પ્રતિ ઉપલબ્ધ થાય છે. જેમાં પ્રશસ્તિ છે.

૬-વાર્સોતિકાવિતંડા વિડંબન પ્રકરણ : અંચલગચ્છના શાસ્ત્રોત્તીર્ણ કેટલાક મતોનું ખંડન કરવા માટે આ પ્રકરણ રચાયેલ છે. આ ગ્રંથમાં રજુ કરાયેલ સાક્ષીઓ, તર્કો, આધારો અને નિરૂપણ શૈલી જોતાં તેમનું આગમજ્ઞાન, ભાષ્ય નિર્યુક્તિ, ચૂર્ણી અને ટીકા સાથે પંચાંગી સિદ્ધાંત પરનું પ્રચંડ પ્રભુત્વ ઝળકી આવે છે. આ ગ્રંથનું બીજું નામ **અંચલમત નિરાકરણ** પણ છે.

૭-ષડ્દર્શન સમુચ્ચય, તર્ક રહસ્ય દીપિકા ટીકા : પૂ.સૂરિપુરંદર શ્રી હરિભદ્રસૂરીશ્વરજી મહારાજાના ષડ્દર્શન સમુચ્ચય મહાગ્રંથની ૮૭ કારિકાઓ ઉપર છ અધિકારોમાં વિસ્તૃત અને વિશદ ટીકા રચી ગ્રંથકારશ્રીજીએ મહદ્ ઉપકાર કર્યો છે.

આ બધા અવલોકનો પર દૃષ્ટિપાત કરતાં સ્પષ્ટપણે જણાય છે કે તેઓશ્રી 'સોમયુગ'ના તો તેજસ્વી નક્ષત્ર હતા જ. પરંતુ આજ પણ તેઓશ્રીની પ્રતિભાનો પ્રકાશ જૈન સંઘને જાણવા માણવા મળી રહ્યો છે.

તેઓશ્રીમદ્ના જ્ઞાનાદિ ગુણ સમૃદ્ધ જીવનને વારંવાર વંદના.

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

પ્રત-દર્શન

પ્રસ્તુત સંપાદનમાં ઉપયુક્ત હસ્તલિખિત પ્રતોના આદ્ય-અંત પૃષ્ઠોની પ્રતિકૃતિઓ અને આદ્ય-અંત વાક્યાંશ અહીં આપવામાં આવેલ છે.

આના નિરીક્ષણથી કઈ કઈ પ્રતિઓનો ઉપયોગ અમે કર્યો છે તેનો ય ખ્યાલ આવશે. અમને મૂળ પ્રતો મળી નથી. પણ તેની ઝેરોક્ષ કરાયેલ નકલો જ મળી હતી. પ્રસ્તુત સંશોધન અને સંપાદન પણ એ ઝેરોક્ષ કોપીઓના આધારે જ શક્ય બન્યું છે.

આ પ્રતો અમને પૂરી પાડનાર ડહેલાનો ઉપાશ્રય અમદા., એલ.ડી. ઈન્સ્ટીટ્યૂટ અમદા., શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર (કોબા અમદા.), શ્રી હેમચન્દ્રાચાર્ય જ્ઞાનમંદિર (પાટણ), ઓરિએન્ટલ રીસર્ચ ઈન્સ્ટીટ્યૂટ - પૂના આદિના જ્ઞાનભંડારો તેમજ ગ્રંથાલયોના વહીવટદારો અને મેળવી આપનારા પૂજ્યો તેમજ સુશ્રાવકોની શ્રુતભક્તિની અમે અનુમોદના કરીએ છીએ. શ્રુતભક્તિમાં કરેલ સહાય નિમિત્તે આભાર દર્શાવીએ છીએ.

- સંપાદક

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भांडारकर ओरिएन्टल रीसर्च ईन्स्टीट्यूट - पूना

नं. १२४

शરૂआत : ।। श्री सर्वज्ञाय नमः ।। अर्हं ।। नत्वा वीरजिनं वक्ष्ये मुग्धोऽपि स्वगुरोर्मुखात्...

अंत : श्री भुवनतुङ्गसूरिस्तस्मात्स्वस्योपकृतिकृते चक्रे । विवरणमात्रमिहातुरप्रत्याख्यानप्रकीर्णस्य ।।३।।...।।४।।

समाप्तातुरप्रत्याख्यानविवरणप्रशस्तिः ।ग्रंथमान-८५०।।श्री।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ડહેલાનો ઉપાશ્રય, જ્ઞાનભંડાર, અમદાવાદ.

નં. ૪૭૮૨

શરૂઆત : अथातुरप्रत्याख्यानावचूरिर्लिख्यते । इह सर्वेषां जीवानां...

અંત : कर्त्तेति ।८४।। इति श्री धर्मघोषसूरिशिष्यश्रीमहेन्द्रसूरिविरचितवृत्त्यनुसारेणश्रीचन्द्रगच्छाधिपभट्टारकप्रभुश्रीपरमगुरुश्री सोमसुन्दरसूरिकृताआतुरप्रत्याख्यानप्रकीर्णकावचूरिः ।छ।। संपूर्णाकृता ।छ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org



શ્રી હેમચન્દ્રાચાર્ય જૈન જ્ઞાનભંડાર, પાટણ.

નં. ૧૦૦૮૫ ડા. નં. ૨૧૬

શરૂઆત : મૂલ-દેસિક્કદેસવિરઓ... અવચૂરિ-અથાતુરપ્રત્યાખ્યાનાવચૂરિર્લિખ્યતે ।। इह सर्वेषां जीवानां नवहस्तकुन्त...

અંત : इति श्री धर्मघोषसूरिशिष्यश्रीमहेन्द्रसूरिशिष्यभुवनतुङ्गसूरिभिः कृतावचूरिः समाप्तः ।। श्रीः।। शुभं भवतु ।छ।। संवत् १५७३ वर्षे वैशाख वदि ७ भूमे लिखितम् ।छ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org



લુહારની પોળ, ઉપાશ્રય - જ્ઞાનભંડાર, અમદાવાદ.

શરૂઆત : અર્હમ્ ।। અથાતુરપ્રત્યાખ્યાનાવચૂરિર્લિખ્યતે । इह सर्वेषां जीवानां...

અંત : इति श्रीधर्मघोषसूरिशिष्यश्रीमहेन्द्रसूरिशिष्यश्रीवीरभद्रसूरिविरचितातुरप्रत्याख्यानावचूर्णिः श्रीसोमसुन्दरसूरि विरचिता ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org



શ્રી કૈલાશસાગરસૂરિ જ્ઞાનભંડાર, કોબા, અમદાવાદ

નં. ૧૧૮૦૪

શરૂઆત : इदमध्ययनं परमपदप्राप्तिबीजभूतत्वात्...

અંત : इदमध्ययनेऽतिदेशकरणादपि ज्ञायतेऽस्याऽपि स एव कर्त्तेति ।।८४।। इति श्रीधर्मघोषसूरिशिष्यश्रीमहेन्द्रसूरिविरचित-वृत्त्यनुसारेण श्रीगच्छेशभट्टारकप्रभुपरमगुरुश्रीसोमसुन्दरसूरिपादैः कृताऽवचूर्णिः समाप्ता । भद्रं भवतु श्रीसंघस्य ।छ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org





श्री हेमचन्द्राचार्य जैन ज्ञानभंडार, पाटण.

नं. १७९८२ डा. नं. ३५८

शરૂआत : अर्हम् ।। चतुःशरणविषमपदविवरणम् । सावद्य० सह अवधेन पापेन वर्त्तन्त इति...

अंत : संस्तारकप्रकीर्णकावचूर्णिः ।। कृतिरियं श्रीगुणरत्नसूरिणाम् । छ।। ग्रन्थाग्राम-९५० । छ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

લુહારની પોળ, ઉપાશ્રય-જ્ઞાનભંડાર, અમદાવાદ.

શરૂઆત : अर्हम् ।। चतुःशरणविषमपदविवरणम् । साव० सह अवधेन पापेन वर्त्तन्त इति...

અંત : संस्तारकप्रकीर्णकावचूर्णिः ।। कृतिरियं श्रीगुणरत्नसूरिणाम् । छ।। शुभं भवतु, कल्याणमस्तु । छ।।
परमगुरुश्रीआणंदविमलसूरिशिष्य पं. श्री धनविमलगणिशिवविमलसिंहविमलपठनार्थम् ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ભાંડારકર ઓરિએન્ટલ રીસર્ચ ઈન્સ્ટીટ્યૂટ - પૂના
નં. ૧૩૬૪

શરૂઆત : अर्हं चतुःशरणविषमपदविवरणम् । सह अवधेन...

અંત : इति प्रकीर्णावचूरि श्रीगुणरत्नसूरिकृता ।।छ।। शुभं भवतु ।। कल्याणमस्तु ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

श्री हेमचन्द्राचार्य जैन ज्ञानभंडार, पाटण.

शરૂआत : अर्हम् ।। चतुःशरणविषमपदविवरणम् ।

अंत : इति संस्तारक प्रकीर्णकावचूरिश्रीगुणरत्नसूरिकृता ।। संवत् १५५९ वर्षे पौष वद ९ बुधे सुलितान नासीर साहिराज्ये मंडपाचलदुर्गे कायस्थश्रीवास्तव्य० महेसलिखितं... ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आगम-

श्रीआतुरप्रत्याख्यानप्रकीर्णकम्

खण्डः-१

- आचार्यश्रीभुवनतुङ्गसूरिकृता वृत्तिः
- आचार्यश्रीसोमसुन्दरसूरिकृता अवचूरिः
- आचार्यश्रीगुणरत्नसूरिकृता अवचूरिः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

।। आद्यमङ्गलम् ।।

नमो अरिहंताणं ।
नमो सिद्धाणं ।
नमो आयरियाणं ।
नमो उवज्झायाणं ।
नमो लोए सव्वसाहूणं ।
एसो पंच नमुक्कारो ।
सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं ।
पढमं हवइ मंगलं ।।१।।

कल्याणपादपारामं, श्रुतगङ्गाहिमाचलम् ।
विश्वाम्भोजरविं देवं, वन्दे श्रीज्ञातनन्दनम् ।।२।।

सर्ववाञ्छितदातारं, मोक्षफलप्रदायकम् ।
शङ्खेश्वरपुराधीशं, पार्श्वनाथं जिनं स्तुवे ।।३।।

अज्ञानतिमिरान्धानां, ज्ञानाञ्जनशलाकया ।
नेत्रमुन्मीलितं येन, तस्मै श्रीगुरवे नमः ।।४।।

ॐकारं बिन्दुसंयुक्तं, नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैव, ॐकाराय नमो नमः ।।५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

।। सर्ववाञ्छित-मोक्षफलप्रदायक-श्रीशङ्खेश्वर-चिन्तामणिपार्श्वनाथाय नमो नमः ।।

।। माया-रसा-दारण-सारसीरं, नमामि वीरं गिरिसारधीरम् ।।

।। त्रैलोक्यबीजं परमेष्ठिबीजं, सज्ज्ञानबीजं जिनराजबीजम् । यन्नाम चोक्तं विदधाति सिद्धिं, स गौतमो यच्छतु वाञ्छितं मे ।।

।। श्रीवीरविभुहस्तदीक्षितवीरभद्रगणिने नमः ।।

।। नमामि नित्यं गुरुरामचन्द्रम् ।।

।। ऐं नमः ।।

आञ्चलिकगच्छीयाचार्य**श्रीभुवनतुङ्गसूरि**कृतवृत्तियुतं,

तपागच्छपूरन्दराचार्य**श्रीसोमसुन्दरसूरि**कृतावचूरिसहितं,

तार्किकरत्नाचार्य**श्रीगुणरत्नसूरि**कृतावचूरिसमन्वितं,

श्रमणभगवत्श्रीमत्महावीरप्रभुशिष्यसौधरत्नरूप**श्रीवीरभद्राचार्य**प्रणीतं

श्रीआतुरप्रत्याख्यानप्रकीर्णकसूत्रम्

देसिक्कदेसविरओ सम्मद्दिट्ठी मरिज्ज जो जीवो ।
तं होइ बालपंडियमरणं जिणसासणे भणियं ।।१।।

देशैकदेशविरतः सम्यग्दृष्टिर्म्रियते यो जीवः ।
तद् भवति बालपण्डितमरणं जिनशासने भणितम् ।।१।।

भाव० नत्वा वीरजिनं वक्ष्ये मुग्धोऽपि स्वगुरोर्मुखात् ।
आतुरप्रत्याख्यानस्य कियत्पदविचारणम् ।।१।।

ननु शास्त्रादौ सर्वत्रेष्टदेवतानमस्कारो दृश्यते । तदत्र तदभावादिदमुद्धाररूपं भविष्यतीति मन्ये। तन्न, पाक्षिकेऽस्याभिधानात् पृथक् प्रकीर्णकमिदम् । तर्हि कथं [न] नमस्कारः ? सत्यं, मनोवाक्कायभेदात् त्रिधा नमस्कारो भवति । ततो यद्यप्यत्र वाचिको न कृतस्तथापि मानसिककायिकौ कृतौ भविष्यतः। किञ्चैतदपि सम्भावयामि - भक्तपरिज्ञाध्ययनकरणानन्तरमेव वीरभद्रेणेदं कृतमिति चेत्कथं ज्ञायते ? "जो भत्तपरिन्नाए" इत्यतिदेशात् भक्तपरिज्ञाचतुःशरणे तु तेन कृते इति व्यक्तमेवास्तीति सर्वं सुस्थम् ।

षण्णां पृथिव्यादिकायानां षष्टांशत्वाद्देशस्त्रसकायव्यपरोपणलक्षणस्तस्यापि सङ्कल्पजारम्भजत्वेन द्विभेदत्वात् । देशस्य त्रसकायस्य एकदेशः संकल्पजनितावृत्तिरूपः तस्याऽपि सापराधनिरपराधत्वेन द्विप्रकारत्वात् । तत्र देशैकदेशमात्रस्य स्वयं हननघातनतया विरतो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निवृत्तो देशैकदेशविरतः । सम्मदिट्ठीत्ति - **सम्यगविपरीता तत्त्वश्रद्धानरूपा दृष्टिर्दर्शनं मतिर्यस्याऽसौ सम्यग्दृष्टिः** । मरिज्जत्ति - **म्रियेत पञ्चत्वमुपयायात्** । जो जीवोत्ति - **यः श्रावकजीवः** । तं होइ बालपंडियमरणं ति - **इह शासने मरणमनेकधा वर्णितम्** । **तथाहि** -

आवीइ ओहि अंतिय वलाइमरणं वसट्टमरणं च ।
अंतोसल्लं तब्भव बालं तह पंडियं मीसं ।।१।। [उत्तरा. निर्यु० २१२]

छउमत्थमरण केवलि-वेहाणस-गिद्धपट्ठ-मरणं च ।
मरणं भत्तपरिण्णा इंगिणी-पाओवगमणं च ।।२।। [उत्तरा. निर्यु० २१३]

तच्चानेकविधमपीह पञ्चधा परिकल्पितम् । तद्यथा - बालबालमरणं, बालमरणं, बालपण्डितमरणं, पण्डितमरणं, पण्डितपण्डितमरणं चेति । तत्र मिथ्यादृष्टेर्बालबाल-मरणम्, अविरतसम्यग्दृष्टेर्बालमरणं, देशयतेर्बालपण्डितमरणं, छद्मस्थयतेः पण्डितमरणं, केवलिनः पण्डितपण्डितमरणम् । तदत्र ग्रन्थे तुलादण्डन्यायान्मध्यग्रहणे आद्यन्तयोरपि ग्रहणं कृतं भवतीति ज्ञेयम् । तदिह यद्देशयतिमरणं तज्जिनशासने **बालपण्डितमरणमिति दृष्टं, शेषशासनेषु बालादिभाषाया एवाभावात् । तत्र सर्वविरतिनियमपरिणामाभावाद्बालं स्थूलप्राणातिपातादिविरमणाच्च पण्डितं बालं च तत्पण्डितं च बालपण्डितं तद्योगा-न्मरणमपि बालपण्डितमित्यर्थः ।।१।।**

सोम० अथातुरप्रत्याख्यानावचूरिर्लिख्यते । इह सर्वेषां जीवानां नवहस्तकुन्तस्याग्रस्येव सकलायुषोऽन्त्यावस्थाऽऽराधनस्यैव सारत्वादनेनाध्ययनेनान्त्याऽवस्थाऽऽराधनस्वरूपमाह-देसिक्क'त्ति - नन्वत्राध्ययने नमस्कारः कस्मान्न कृतः ? उच्यते - वीरभद्रगणिनैव पूर्वं भक्तपरिज्ञा-चतुःशरणे कृत्वेदमध्ययनं कृतं, तेन तत्रोक्त एव नमस्कारोऽत्रापि ज्ञेय एककर्तृकत्वात् । **देसि.त्ति** - षण्णां पृथिव्यादिकायानां षष्ठांशत्वाद् देशस्त्रसकायव्यपरोपणलक्षणस्तस्यापि सङ्कल्पजा-रम्भजत्वेन द्विभेदत्वादेकदेशः सङ्कल्पजस्त्रसविनाशनिवृत्तिरूपः पुनस्तस्याऽपि सापराध-निरपराधभेदद्वयेन द्विप्रकारत्वादत्र निरपराधसङ्कल्पजत्रसजीवविनाशनिवृत्तिरूपो **देशैकदेश**स्तेन स्वयं हननघातनाद् **विरतो** निवृत्तो देशैकदेशविरतः । तथा सम्यगविपरीता तत्त्वश्रद्धानरूपा दृष्टिर्दर्शनं यस्याऽसौ **सम्यग्दृष्टिः**, एवंविधो **यो जीवः** श्रावकसम्बन्धी **म्रियते तदिह** मरणं **जिनशासने बालपण्डितमरण**मिति **भणितं** दृष्टं, शेषशासनेषु बालमरणादिभाषाया एवाभावात् । तत्र सर्वविरतिपरिणामाभावात् बालं, स्थूलप्राणातिपातादिविरमणाच्च पण्डितं, बालं च तत् पण्डितं च बालपण्डितं, तद्योगान्मरणमपि बालपण्डितमित्यर्थः । श्रीजिनशासने च मरणमनेकधा कथित-मावीचिमरणादिभेदात्, तच्चानेकविधमपीह पञ्चधा परिकल्पितं, तद्यथा १-मिथ्यादृशां

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बालबालमरणं, २-अविरतसम्यग्दृष्टेर्बालमरणं, ३-देशविरतस्य बालपण्डितमरणं, ४-छद्मस्थयतीनां पण्डितमरणं, ५-केवलिनां पण्डितपण्डितमरणं चेति ।।१।।

गुण० देशस्य त्रसकायस्यैकदेशः । सङ्कल्पजनिवृत्तिरूपस्तस्यापि सापराधनिरपराधत्वेन द्विप्रकारत्वात् । तस्य देशैकदेशमात्रस्य स्वयं हननघातनतया **विरतो** निवृत्तो **सम्यग्दृष्टिः म्रियते** पञ्चत्वमुपयाति । **यः** श्राद्धजीवः । **तज्जिनशासने बालपण्डितमरणमिति** दृष्टं, शेषशासनेषु बालादिभाषाया एवाभावात् । तत्र सर्वविरतिपरिणामाभावाद् बालं स्थूलप्राणातिपाता-दिविरमणाच्च पण्डितं, बालं च तत् पण्डितं च बाल०।।१।।

पंच य अणुव्वयाइं सत्त उ सिक्खा उ देस-जइधम्मो ।
सव्वेण व देसेण व तेण जुओ होइ देसजई ।।२।।

पञ्च चाणुव्रतानि सप्तैव शिक्षा तु देशयतिधर्मः ।
सर्वेण वा देशेन वा तेन युतो भवति देशयतिः ।।२।।

भुव० अथ यद्व्रतयोगाद्देशयतिर्भवति तानि व्रतानि दर्शयन्नाह - पञ्चेति **संख्या अणूनि लघूनि महाव्रतापेक्षया स्थूलप्राणातिपातादिविरमणरूपाणि व्रतान्यणुव्रतानि। तथा** सप्त **वा** शिक्षाव्रतानि, **[तत्कथमत्र सप्त शिक्षाव्रतानि ?] उच्यते-गुणव्रतानामपि निरन्तरमभ्यसनतया शिक्षाव्रतत्वेन विवक्षणात् सप्त शिक्षाव्रतान्युक्तानीत्यदोषः । एष द्वादशव्रतात्मकः श्रावकधर्मो** देशयतिधर्मः । तेन सर्वेण **द्वादशव्रतात्मकेन** देशेन वाऽन्यतरव्रतप्रतिपत्तिलक्षणेन युक्तो देशयतिर्भवतीति **गाथार्थः** ।।२।।

सोम० अथ यद्व्रतयोगाद्देशविरतो भवति तानि व्रतान्याह - अणूनि लघूनि महाव्रतापेक्षया स्थूलप्राणातिपातादिविरमणरूपाणि व्रता**न्यणुव्रतानि पञ्च** । तथा **सप्त च** शिक्षाप्रधानानि व्रतानि **शिक्षा**व्रतानि । गुणव्रतानामपि नित्यमभ्यसनीयतया शिक्षाव्रतत्वेन विवक्षणात् सप्त शिक्षा-व्रतान्युक्तानि, एवं द्वादशव्रतरूपो देशयतिधर्मः श्रावकधर्म उच्यते । **तेन सर्वेण** द्वादशव्रतात्मकेन **देशेन वाऽन्यतरव्रतप्रतिपत्तिलक्षणेन युतो** युक्तो **देशयतिः** श्रावको **भवती**ति ।।२।।

गुण० अथ यद्योगाद्देशयतिर्भवति तानि व्रतानि दर्शयन्नाह - पञ्च० **अणूनि** लघूनि महाव्रतापेक्षया तथा **सप्त** च शिक्षाप्रधानानि व्रतानि **शिक्षा**व्रतानि । तत्कथमत्र सप्त शिक्षाव्रतानि ? उच्यते-गुणव्रतानामपि निरन्तरमभ्यसनतया शिक्षाव्रतत्वेन विवक्षणात् सप्त शिक्षाव्रतान्युक्तानीत्यदोषः । **तेन सर्वेण वा** द्वादशव्रतात्मकेन **देशेन वा** अन्यतर व्रतप्रतिपत्तिलक्षणेन **युक्तो देशयति-र्भवती**ति ।।२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पाणवह-मुसावाए-अदत्त-परदारनियमणेहिं च ।
अपरिमिइच्छाओ वि य अणुव्वयाइं विरमणाइं ।।३।।

प्राणवध-मृषावादा-दत्त-परदारनियमनैश्च ।
अपरिमितेच्छातोऽपि च विरमणान्यणुव्रतानि ।।३।।

भुव० तत्र तावत्प्रथममणुव्रतानि नामत आह - प्राणा इन्द्रियबलश्वासायुर्लक्षणास्तेषां **वधो विनाशः** प्राणवधः । न तु प्राणिवधो जीववधः **तस्य** हन्तुमशक्यत्वात् । यत आह-

दवट्ठयाइ निच्चो उप्पायविणासवज्जिओ जेण ।
पुव्वकयाणुसरणउ पज्जाया तस्स ओ अणिच्चा ।।१।। [सम्य. सप्त. ६१]

तर्हि वधः कथम् उच्यते -

तप्पज्जायविणासो दुखुप्पाओअ संकिलेसो य ।
एस वहो जिणभणिओ वज्जेयव्वो य पयत्तेणं ।।२।। [श्राव. प्रज्ञ. १९१]

मुसावाए त्ति **एकारः** प्राकृतप्रभवः । **मृषा** मिथ्या वदनं मृषावादः, स च द्रव्यभावभेदाद् द्विधा । **क्रोधादिभेदादभूतोद्भावनादिभेदाच्च चतुर्धा** । तत्र क्रोधादिभेदाः प्रसिद्धाः । तत्र १- **अभूतोद्भावनं यथा सर्वगत आत्मा, २- भूतनिह्नवो यथा नास्ति आत्मा, ३- वस्त्वन्तरन्यासो यथा गौरपि सन्नश्वोऽयमिति वदतः, ४- परनिन्दावचनो यथा कुष्टी त्वमिति** । दानं दत्तं, **न दत्तमदत्तम्** । तच्च **स्वामिजीवतीर्थंकरगुरुभेदतश्चतुर्द्धा, सचित्ताचित्तमिश्रभेदतस्त्रिधा भीमो भीमसेन इति न्यायाददत्तमदत्तादानम्** । परदारनियमणेहिं च त्ति **दारयन्ति, विदारयन्ति, नाशयन्ति पुरुषस्याऽन्तरङ्गबहिरङ्गगुणानिति दाराः, परेषां दाराः [परदाराः] परकलत्राणि** । **ततः प्राणवधश्च मृषावादश्चादत्तादानं च परदाराश्च प्राणवधमृषावादादत्तादानपरदारास्तेषां** नियमनैरुपरमैः । चः **पूरणे** । **अणुव्रतप्रस्तावात् स्थूलपदोपपदानि सर्वाणि वाच्यानि** । अपरिमिय इच्छाओ वि य त्ति **परिमिता न परिमिता अपरिमिता** । **एषणमिच्छा अपरिमिता चेच्छा च तस्या अपरिमितेच्छातश्च** । **यानि** विरमणानि **निवृत्तयस्तैरणुव्रतानि भवेयुस्तानीति गाथार्थः।।३।।**

सोम० प्रथममणुव्रतानि नामत आह - प्राणा इन्द्रियबलोच्छ्वासायुर्लक्षणास्तेषां वधो विनाशः **प्राणवधः**, न तु प्राणिवधो, जीवस्य हन्तुमशक्यत्वात् । **'मुसावाए'** त्ति एकारः प्राकृतत्वात् । मृषा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मिथ्या वचनं मृषावाद: क्रोधादिवशादसद्भूतवचनादिरूप: । स्वाम्यादिभिर्न दत्तम् **अदत्तं** सचित्ता-चित्तमिश्रभेदम् । दारयन्ति विदारयन्ति पुरुषस्याऽन्तरङ्गबहिरङ्गगुणानिति, दारा: परेषां दारा: **परदारा:** । तत: प्राणवधश्च मृषावादश्चादत्तादानं च परदाराश्च तेषां **नियमनैरु**परमैस्तथा न परिमिता **अपरिमिता** या **इच्छा** परिग्रहविषया, ततोऽपि च यानि **विरमणानि** निवृत्तयस्तान्य**णुव्रतानि** भवेयु: । स्थूलशब्दोपपदानि वाच्यानि ।।३।।

गुण० पाण० प्राणवधो न तु प्राणिवधो जीववधस्तस्य हन्तुमशक्यत्वात् । **मुसावा**एत्ति एकार: प्राकृतभव: । मृषा मिथ्यावदनं मृषावाद: । स च द्रव्यभावभेदाद् द्विधा क्रोधादिभेदादभूतोद्-भावनभेदाच्च चतुर्धा । तत्र क्रोधादिभेदा: प्रसिद्धा: । १-तत्राभूतोद्भावनं यथा सर्वगत आत्मा, २-भूतनिह्नवो यथा नास्त्यात्मा, ३-वस्त्वन्तरन्यासो यथा गौरपि सन्नश्वोऽयमिति वदत: ४-परनिन्दावचनो यथा कुष्टी त्वमिति । न **दत्तमदत्तम्** । तच्च स्वामिजीवतीर्थंकर-गुरुभेदतश्चतुर्धा। भीमो भीमसेन इति न्यायाददत्तादानम् । परेषां दारा: **परदारा:** परकलत्राणि तेषां **नियमनैरु**परमै: । अणुव्रता:[तानि] तावत् स्थूलशब्दोपपदानि सर्वाणि वाच्यानि । **अपरिमितेच्छातश्च** यानि **विरमणानि** निवृतयस्तै**रणुव्रतानि** भवेयुरिति गाथार्थ: ।।३।।

जं च दिसावेरमणं अणत्थदंडाउ जं च वेरमणं ।
देसावगासिअं पि य गुणव्वयाइं भवे ताइं ।।४।।

यच्च दिग्विरमणमनर्थदण्डात् यच्च विरमणम् ।
देशावकाशिकमपि च गुणव्रतानि भवेयुस्तानि ।।४।।

भुव० अथ यत्सामान्येन 'सत्त उ सिक्खाओ देसजइधम्मो, इत्युक्तम् । तान्येव विशेषतया गुणव्रतशिक्षाव्रते व्यपदिशन् प्रथमं गुणव्रतान्याह - दिश्यन्ते जीवा गमनागमनत्वेनास्विति दिश: । विरतिर्विरमणं दिशां विरमणं दिक्विरमणं, दिशा वा कृत्वा यद्विरमणं तत्प्रथमं गुणव्रतम् । उक्तञ्च-

दससु दिसासु बहिया लंघिज्जइ जत्थ नेव भूमीसा ।
तं दिसि विरइत्ति वयं पढमं गुणव्वयं तिगस्स ।।१।।

जो धरइ दिसिवयमिमं सो अभयं देइ सयलजीवाणं ।
भुवणंमि पसरमाणं लोभसमुद्दं पडिखलेइ ।।२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथा अर्थ्यते क्रियते प्रयोजनवशतया इत्यर्थः । न अर्थोऽनर्थः, अनर्थं निष्प्रयोजनं दण्ड्यन्ते निपात्यन्ते जीवा एभिरित्यनर्थदण्डास्तेभ्यो यद्विरमणं तद् द्वितीयं गुणव्रतं, मूलक्रमेण तु तृतीयम्। उक्तञ्च -

अवज्झाणपमायायरिय पावोवएसहिंसदाणेहिं ।
चउहा अणत्थदंडो तव्विरई गुणव्वयं तईयं ।।१।।

देसावगासियं पियं ति **दिशामवकाशः प्रतिदिनमानं तत्र भवं देशावकाशिकं तदपि च विरमणरूपं तत्तृतीयं गुणव्रतमिति । मूलक्रमेण द्वितीयं शिक्षाव्रतम् । उक्तञ्च -**

जा (जो) जीवगहिय दिसिंवयपमाणं संखेवणं जमणुदियहं ।
देसावगासियं तं बीयं सिक्खावयं जाण ।।१।।

आह - अस्य शिक्षाव्रतत्वेन प्रसिद्धत्वात्कथं गुणव्रतत्वमुच्यते । अन्ने भणंति - सव्ववएसु जे पमाणा ठविया । ते पुण दिवसओ ओसरेइ । एवं

एगमुहुत्तं दिवसं राइं पंचाहमेव पक्खं वा ।
वयमिह धारेइ दढं जावइयं उव्वहे काले ।।१।। [संबो० १२३६] इत्यावश्यकचूर्णिवचनात्

केषाञ्चिन्मतेन - सव्ववयाणं करेज्ज संखेवमिति । तन्मतमाश्रित्य सर्वव्रतगुणकारकत्वादेशावकाशिकस्यापि गुणव्रतत्वमित्यदोष इति गाथार्थः ।।४।।

सोम० अथ सामान्येन शिक्षाव्रतान्युक्तानि तान्येव गुणभूतशिक्षाव्रतव्यक्त्याऽऽह - १-पूर्वादीनां दिशां गमनविषयतया परिमाणकरणेन तदग्रतो गमनादेर्विरमणं यत् तत् प्रथमं गुणव्रतम् ।

"जो धरइ दिसिवयमिमं सो अभयं देइ सव्वजीवाणं ।
भुवणम्मि पसरमाणं लोभसमुद्दं पडिखलेइ" ।।

२ - तथाऽर्थः प्रयोजनं नार्थोऽनर्थः, अनर्थं निष्प्रयोजनं दण्ड्यन्ते धर्मस्यापहारेण जीवा एभिरिति दण्डा मनोवाक्कायव्यापारास्तेभ्यो यद्विरमणं तत् द्वितीयं गुणव्रतम् । ३ - यावज्जीवं गृहीत-सर्वव्रतनियमानां दिग्गमननियमस्यैव वा प्रतिदिनं संक्षेपकरणं देशावकाशस्तत्र भवं **देशावकाशिकं** एतच्च तृतीयं गुणव्रतम् । अस्य शिक्षाव्रतत्वेन प्रसिद्धस्याप्यत्र सर्वव्रतगुणकारकत्वाद् गुणव्रतत्वं विवक्षितमिति न दोषः ।।४।।

गुण० दिशां विरमणं **दिक्विरमणं** दिशा वा कृत्वा **यद्विरमणं** तत् प्रथमं गुणव्रतम् ।

जो धरइ दिसिवयमिमं सो अभयं देइ सव्वजीवाणं ।
भुवणम्मि पसरमाणं लोभसमुद्दं पडिखलेइ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अनर्थं निष्प्रयोजनं दण्ड्यन्ते निपात्यन्ते जीवा एभिरित्यनर्थदण्डास्तेभ्यो **यद्विरमणं** द्वितीयं गुणव्रतं मूलक्रमेण तृतीयम् । दिशामवकाशः प्रतिदिनमानं तत्र भवं **देशावकाशिकं तदपि** च विरमणरूपं तत्तृतीयं गुणव्रतं, मूलक्रमेण द्वितीयं शिक्षाव्रतम् । आह - अस्य शिक्षाव्रतत्वेन प्रसिद्धत्वात् कथं गुणव्रत[त्व]मुच्यते - अत्रे भणंति - "सव्ववएसु जे पमाणा ठविआ ते पुण दिवसओ ओसरेइ" - आवश्यकचूर्णौ । "सव्ववयाणं करिज्ज संखेवं" तन्मतमाश्रित्य सर्वव्रतगुणकारकत्वाद्देशावकाशिकस्यापि गुणव्रतत्वमित्यदोषः ।।४।।

भोगाणं परिसंखा सामाइय अतिहिसंविभागो य ।
पोसहविही य सव्वो चउरो सिक्खाओ वुत्ताओ ।।५।।

भोगानां परिसङ्ख्या सामायिकमतिथिसंविभागश्च ।
पौषधविधिस्तु सर्वः चतस्रः शिक्षा उक्ताः ।।५।।

भुव० अथ शिक्षाव्रतानि विशेषयन्नाह - सकृदेकवारं भुज्यन्त इति भोगा आहारपुष्पादयः । तथा उपलक्षणत्वात्परिभुज्यन्त इति परिभोगाः गृहाङ्गनादिकाः । उक्तञ्च -

जो भुज्जइ इगवारं सो भोगो असणकुंकुमाईओ ।
परिभुंजइ जो पुण पुण परिभोगो गिहंगणाईओ ।।१।।

परीत्युपसर्गः परिसंख्यानं परिसंख्याप्रमाणकरणमित्यर्थः । तत्प्रथमं शिक्षाव्रतं मूलक्रमेण द्वितीयं गुणव्रतमिति । उक्तञ्च -

जह सत्तीए पमाणं भोगुवभोगाण किज्जई जत्थ ।
भोगोवभोग नामं तं मुणसु गुणव्वयं बीयं ।।१।।

तथा सामाइयत्ति समस्य आयो लाभः समायः, समाय एव सामायिकं प्राकृतत्वाद्विभक्तिलोपः । तद् द्वितीयं शिक्षाव्रतं मूलक्रमेण तु प्रथमम् । उक्तञ्च -

निरवज्जं समुहुत्तं सुहझाणगयस्स जो समो भावो ।
गिहिणो तं सामाइय नामं सिक्खावयं पढमं ।।१।।

अतिहिसंविभागोयत्ति - न सन्ति तिथयः पर्वाण्युत्सवाश्च यस्यासावतिथिः । उक्तञ्च -

तिहिपव्वूसवनियसयणमाइसंबंधवज्जणुजुत्तो ।
अतिही सो विन्नेओ पवित्तपत्तं नियधणस्स ।।१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संविभजनं संविभागः । अतिथेः संविभागोऽतिथिसंविभागः । चः समुच्चये । तत्तृतीयं शिक्षाव्रतमिह ग्रन्थक्रमेण, मूलक्रमेण तु चतुर्थम् । उक्तञ्च -

अतिहीणं जं दाणं च वसहीआहारवत्थपत्ताणं ।
तं अतिहिसंविभागं चउत्थं सिक्खावयं जाण ।।१।।

पोसहविही य सव्वोत्ति - **पोषं पुष्टिं धर्मस्य दधातीति पौषधम् । उक्तञ्च -**

जो पोसइ सुहधम्मं धरेइ जीवं च कुगइनिवडंतं ।
तं पोसहं ति भन्नइ एयं दुक्खखयं गिहिणो ।।१।।

तस्य विधिः पौषधविधिः । चः समुच्चये । पौषधविधिश्चतुर्थः सर्वः चतुर्विधाहार-शरीरसत्कारब्रह्मचर्यव्यापारलक्षणः । इह तु क्रमेण चतुर्थं शिक्षाव्रतं मूलक्रमेण तु तृतीयम् । एतानि चत्वारि शिक्षाव्रतान्युक्तानि ।

न तु यावज्जीवमङ्गीकरणाद्भोगोपभोगव्रतस्य गुणव्रतत्वेन प्रसिद्धत्वात्कथं शिक्षा-व्रतत्वमुच्यते ? प्रतिदिनं प्रतिरात्रं प्रतिप्रहरं प्रतिमुहूर्त्तं पुनः पुनः संक्षेपकरणात् शिक्षिकेणेव पुनः पुनरभ्यसनाच्च शिक्षाव्रतत्वमपि ।।५।।

सोम० अथ शिक्षाव्रतान्याह - १ - एकवारं भुज्यन्ते इति **भोगा** आहार-पुष्पादयः, उपलक्षणत्वात् परिभुज्यन्ते इति **परिभोगाः** पुनर्पुनर्भोग्या गृहाङ्गनादिकास्तेषां **परिसङ्ख्यानं** प्रमाणकरणं यत् तत्प्रथमं शिक्षाव्रतम् । अस्यापि यावज्जीवाङ्गीकाराद् गुणव्रतत्वेन प्रसिद्धस्यापि प्रतिदिनं प्रतिरात्रं प्रतिप्रहरादि च पुनः पुनः संक्षेपकरणत्वात् शिक्षिकेणेव पुनः पुनरभ्यसनाच्च शिक्षाव्रतत्वमप्यत्र विवक्षितमित्यदोषः । २-तथा समस्य रागद्वेषरहितस्य आयो लाभः समायः, समाय एव **सामायिकम्,** विभक्तिलोपः प्राकृतत्वात् तद् द्वितीयं शिक्षाव्रतम् । ३-तथा न सन्ति तिथयः पर्वाणि सदा धर्मपरत्वाद् यस्यासावतिथिस्तस्य संविभागो**ऽतिथिसंविभागः** स तृतीयं शिक्षाव्रतम् । ४-तथा पोषं पुष्टिं धर्मस्य दधातीति **पौषधस्तस्य विधिः** । **चः** समुच्चये । सर्वआहार-शरीरसत्कार-ब्रह्मचर्यव्यापारलक्षणः स चतुर्थं शिक्षाव्रतम् । एतानि **चत्वारि शिक्षाव्रतानि** ।।५।।

गुण० सकृदेकवारं भुज्यन्त इति **भोगा** आहारपुष्पादयः । तथा उपलक्षणत्वात् यत् परिभुज्यन्त इति परिभोगाः गृहाङ्गनादिकाः । **परिसंख्यानं** प्रमाणकरणमित्यर्थः । तत्प्रथमं शिक्षाव्रतं मूलक्रमेण

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

द्वितीयं गुणव्रतमिति । समाय एव **सामायिकं** द्वितीयं शिक्षाव्रतं मूलक्रमेण तु प्रथमम् । अतिथेः संविभागोऽ**तिथिसंविभागः** । **चः** समुच्चये । पोषं पुष्टिं धर्मस्य दधातीति पौषधम् । उक्तं च -

जं पोसइ सुहधम्मं धरेइ जीवं च कुगइ निवडंतं ।
तं पोसहं ति भन्नइ एयं दुक्खखयं गिहिणो ।।१।।

तस्य विधिः **पौषधविधिः** । इह तु क्रमेण चतुर्थं शिक्षाव्रतं मूलक्रमेण तु तृतीयम् । एतानि **चत्वारि शिक्षाव्रतान्युक्तानि** ।।५।।

आसुक्कारे मरणे अच्छिन्नाए य जीवियासाए ।
नाएहि वा अमुक्को पच्छिमसंलेहणमकिच्चा ।।६।।

आशुकारे मरणे अच्छिन्नायां च जीविताशायाम् ।
ज्ञातिभिर्वाऽमुक्तः पश्चिमसंलेखनामकृत्वा ।।६।।

भुव० अथ कदा पुनरसौ श्रावको बालपण्डितमरणेन म्रियत इत्याह - आशु शीघ्रं करणं कार आशुकारो मरणावसरस्तेन मरणं तस्मिन् मरणेऽचिन्तितोपस्थितोपक्रमणे,

फलपाकरज्जुभसमगउल्लपडपईवमग्गनाएण ।
चिरकालनिबद्धस्स वि आउस्स उवक्कमो खिप्पं ।।१।।

एतैर्दृष्टान्तैर्झटिति प्रत्यासन्नीभूते मरणकाले तत्र बालपण्डितमरणं कुर्यात् । अच्छिन्नाए जीवियासाएत्ति । **अथवा क्रमेणैव मरणकालः समागतः । परं संलेखना नाकारि । कस्मादित्याह -** अच्छिन्नाएत्ति **न छिन्ना त्रुटिता या जीविताशा तया हेतुभूतया संलेखना संस्तारकदीक्षा च न व्यधायि।** नाएहिं वा अमुक्कोत्ति - **ज्ञातैर्वा स्वजनैर्न मुक्तो न मुत्कलितः ।** पच्छिमसंलेहणमकिच्चत्ति - **अतः पश्चिमकालकर्त्तव्यां संलेखनां तपसा शरीरशोषणरूपा-मकृत्वैवाविधाय यन्मरणं करोति तद्बालपण्डितमरणमुक्तमित्यग्रेतनगाथायां सम्बन्ध इति गाथार्थः ।।६।।**

सोम० अथ कदा पुनरसौ श्रावको बालपण्डितमरणेन म्रियत इत्याह- आशु शीघ्रं करणं कार **आशुकार** औत्सुक्यमरणावसरस्तेन मरणं तस्मिन् **मरणेऽ**चिन्तितोपस्थित इत्यर्थः । एवं झटिति प्रत्यासन्नीभूते मरणे बालपण्डितमरणं कुर्यादथवा **अच्छिन्नाए** इति न छिन्ना त्रुटिता अच्छिन्ना, का ? **या जीविताशा** तस्यां तया वा क्रमेणैव मरणकाले समागतेऽपि संलेखनाद्यकृत्वैव यन्म्रियते तद्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बालपण्डितमरणम् । **ज्ञातैः** स्वजनैर्वा न मुक्तो नानुमतः **पश्चिमकालकर्त्तव्यां संलेखनां** तपः-प्रभृतिका**मकृत्वैव** यन्मरणं करोति तद् बालपण्डितमरणमुक्तमित्यग्रेतनगाथायां सम्बन्धः ।।६।।

गुण० आशु शीघ्रं करणं **कारः** । अचिन्तितोपस्थितोपक्रमणे अथवा क्रमेणैव मरणकालः समागतः परं संलेखना नाकारि । कस्मादिति ? न छिन्ना न त्रुटिता **या जीविताशा** तया । **ज्ञातैः** स्वजनैर्वा न मुक्तो न मुत्कलित अतः **पश्चिम**कालकर्तव्यां संलेखनां तपसा शरीरशोषणरूपाम-कृत्वाऽविधाय यन्मरणं करोति तद् बालपण्डितमरणमुक्तमित्यग्रेतनगाथायां सम्बन्ध इति गाथार्थः ।।६।।

आलोइय निस्सल्लो स घरे चेवाऽऽरुहित्तु संथारं ।
जइ मरइ देसविरओ तं वुत्तं बालपंडिययं ।।७।।

आलोच्य निःशल्यः स्वगृह एवारुह्य संस्तारकम् ।
यदि म्रियते देशविरतस्तदुक्तं बालपण्डितम् ।।७।।

भुव० स च गृहे कथं म्रियत इत्याह - आलोच्य गीतार्थगुरुसमीपे आलोचनां दत्त्वा तदत्तं प्रायश्चित्तमङ्गीकृत्य निस्सल्लोत्ति - शल्यं द्रव्यभावेभेदाद् द्विधा - द्रव्यशल्यं कण्टकतोमरादि, भावशल्यं मूलोत्तरगुणविराधनादि । तदालोचनादानेन निष्काश्य निर्गतं शल्यमस्मादिति निःशल्यः । उक्तञ्च -

न हु सुज्झइ ससल्लो जह भणियं सासणे धुयरयाणं ।
उद्धरिय सव्वसल्लो गच्छइ सिद्धिं धुयकिलेसो ।।१।।

स चैवं कृत्वा सघरे चेवारुहेत्तुत्ति - **निजसदने एवारुह्याङ्गीकृत्य** संथारं ति - **संस्तारकमनशनप्रतिपत्तिकाले दर्भप्रस्तरणरूपम् । कृतसंस्तारकविधिना हि यत्क्रियते तदनशनमपि संस्तारकमुच्यते । तस्मिन् संस्तारके कृतानशनः समाधिमान् ।** जइ मरइ देसविरओ त्ति **यदि म्रियते देशविरतस्तदुक्तं** बालपण्डितमरणमित्यक्षरार्थः ।।७।।

सोम० स च गृहे कथं म्रियते इत्याह - **आलोच्य** गीतार्थसुगुरुसमीपे आलोचनां दत्त्वा तदत्तप्रायश्चित्तमङ्गीकृत्य [निर्गतं शल्यं यस्मात् स, शल्यं द्रव्यभावभेदाद् द्विधा द्रव्यशल्यं कण्टकादि, मूलगुणोत्तरगुणविराधनारूपं भावशल्यं तेन रहित इत्यर्थः ।] एवंविधः सन्निज**गृहे एवारुह्याङ्गीकृत्य संस्तारकम**नशनप्रतिपत्तिकालार्हं दर्भप्रस्तरणरूपं संस्तारकविधिसाध्यमनशन-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मप्युपचारात् संस्तारकमुच्यते । कृतानशनः सन् **यदि म्रियते देशविरतः** समाधिमान् **तदुक्तं बालपण्डितमरणम्** ।।७।।

गुण० स च गृहे कथं म्रियत इत्याह-**आलोच्य** गुरुसमीपे तद्दतं प्रायश्चितमङ्गीकृत्य, शल्यं द्रव्यभावभेदाद्द्विधा - द्रव्यशल्यं कण्टकादि, भावशल्यं मूलोत्तरगुणविराधनादि । तदालोचनादानेन **निःशल्यः** । **स** चैवं कृत्वा निजसदने **एवारुह्याङ्गीकृत्य संस्तारक**मनशनप्रतिपत्तिकाले दर्भसंस्तरणरूपम् । कृतसंस्तारकविधिना हि यत् क्रियते तदनशनमपि संस्तारकमुच्यते । **यदि म्रियते देशविरतस्तदुक्तं बालपण्डितमित्यर्थः** ।।७।।

जो "भत्तपरिन्नाए" उवक्कमो वित्थरेण निद्दिट्ठो ।
सो चेव बालपंडियमरणे नेओ जहाजोग्गं ।।८।।

यो भक्तपरिज्ञायामुपक्रमो विस्तरेण निर्दिष्टः ।
स एव बालपण्डितमरणे ज्ञेयो यथायोग्यम् ।।८।।

भुव० तर्हि तत्केन विधिना विधेयमित्याह - यो भक्तपरिज्ञाध्ययने **श्रावकस्याऽनशन-प्रतिपत्तिं कुर्वत** उपक्रमः **पीठबन्धो** विस्तरेण **"अह हुज्ज देसविरओ" इत्यादि । अनियाणो इत्यादि । नियदव्वमित्यादि गाथात्रयोक्तविधिः । गुरुपूजा - सङ्घपूजा-साधर्मिकवात्सल्य-दीनादिदाननिजद्रव्यतोऽपूर्वजिनचैत्यकारापणबिम्बनिर्मापणा-तत्प्रतिष्ठापना-सिद्धान्त-पुस्तकलेखना - यथौचित्येन [त्य] चतुर्विधसङ्घसन्माननप्रवाजनकारापणतीर्थयात्रा-विधापनजिनशासनप्रभावनाहेतुप्रभूतद्रव्यस्तवकरणस्वजनमुक्तलापनचैत्यवन्दनगुरू-पज्ञापनाद्वादशावर्त्तवन्दनदानालोचनाग्रहणसम्यक्त्वाणुव्रतोच्चाणपुरस्सरो यस्तत्र निरवशेषो विधिर्निर्दिष्टो भणितः ।** स एवात्राप्यध्ययने बालपण्डितमरणे **वर्णयितव्ये** यथायोग्यं **यथोचितं ज्ञेय इत्यक्षरार्थः। स चात्र कोऽपि दर्श्यते तथाहि -**

अनियाणो दाणमणो हरिसवसट्टकंटयकरालो ।
पूएय गुरुसंघसाहम्मियमाइ भत्तीए ।।१।।

नियदव्वमउव्वजिणंदभवणजिणबिंबवरपइट्ठासु ।
वियरय पसत्थपुत्थयसु तित्थतित्थयरजत्तासु ।।२।।

अट्ठाहियमहिमाओ कारिय जिणचेइएसु सव्वेसु ।
निवइमहब्बलनाया चारगसुद्धिं च कारेइ ।।३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एयं कयदव्वत्थयकिच्चो परिचत्तसयणधणभिच्चो ।
वंदणगुरुवंदणपुव्वं आलोइयं सव्वं ।।४।।

आणा इमा जिणाणं दायव्वाऽऽलोयणा चरिमसमए ।
संविग्गगीयमाईण नियमओ जं सुए भणियं ।।५।।

संविग्गे गीयत्थे तदसय पासत्थमाइसारूवी ।
तदसइ पवयणदेवी सिद्धसमक्खं तु आलोए ।।६।।

आलोयणं अदाउं सइ अन्नमवि तहप्पणो दाउं ।
जे चिय करंति कालं ते उ ससल्ला मुणेयव्वा ।।७।।

न हु सुज्झइ ससल्लो जह भणियं सासणे धुयरयाणं ।
उद्धरियसव्वसल्लो गच्छइ सिद्धिं धुयकिलेसो ।।८।।

मरिउं ससल्लमरणं संसाराडविमहाकडिल्लंमि [?] ।
सुइरं भमंति जीवा अणोरपारे समाइन्ना ।।९।।

उद्धरियसव्वसल्लो भत्तपरिन्नाए धणियमाउत्तो ।
सत्ताराहणजुत्तो चंदगविज्झं समाणेइ ।।१०।।

इय पवडेमि गुरूणं जहट्ठियं नियदुक्कडं सयलं ।
सम्मत्त-नाण-संजम-तव-वीरियायारविसयंमि ।।११।।

उद्धरियसव्वसल्लो वयपव्वयसिहरमारुहिय सम्मं ।
कम्मारिभयविमुक्को जाण सुही सव्वहा होइ ।।१२।।

अह जिण-सिद्ध-सुसाहु-धम्मं सरणंमि काउमिच्छंतो ।
जिणमाइ नमियतो मंगलं च सरणं च तप करेइ ।।१३।।

रागाइरिउजिआणं अरिहंताणं नमो अरहयाणं ।
कम्मकलंकविमुक्काण पणमिमो सव्वसिद्धाणं ।।१४।।

पंचविहायारधरे पयओ पणमामि सव्वआयरिए ।
सिद्धंतवायए तहा उवज्झाए वंदिमो सिरसा ।।१५।।

खंताइगुणजुआणं असेसगुणरयणरोहणगिरीणं ।
गयगारवाण नमिमो धम्मसहायाण साहूणं ।।१६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जयजंतुवच्छला मे अरिहंता मंगलं हवओ पढमं ।
भववारया विमुक्का सिद्धा मम मंगलं बीयं ।।१७।।

गुणगणनिहिणो साहू तईयं ते हुंतु मंगलं मज्झ ।
धम्मो जिणपन्नत्तो चउत्थयं मंगलं होउ ।।१८।।

सरणं मम अरिहंता तियसिंद-नरिंदपूयमरिहंता ।
सरणं तह मे सिद्धा तित्थातित्थाइ जे सिद्धा ।।१९।।

पावमलपडलरहिया साहू सरणं करेमिजगमहिया ।
सरणं मह जिणधम्मे..... ।।२०।।

अह दुक्कडायं गरिहे मिच्छत्तउ नाणमोहियमणेण ।
जाइं मए कयाइं [?] पाणिवहाईणि सव्वाणि ।।२१।।

जिणभवणबिंबठावण रहजत्ता तित्थजत्ता वच्छलो ।
दाणतवसीलमाई अणुमोए सुकयपुन्नाई ।।२२।।

अह तिविहा उच्चरियं सम्मं उच्चरइ अट्ठवि वयाइं ।
पाणाइवायमाई अणत्थदंडावसाणाइं ।।२३।।

साहू पुण पंचमहव्वयाइ उच्चरइ तिन्नि वाराउ ।
पाणाइवायविरमणमाई निसिभोयणंताइं ।।२४।।

आसेवियवयभारो रागद्दोसेहि वज्जउ [ज्जिओ] तत्तो ।
खामेमि रंगजुत्ता सव्वे संसारिणो सत्ता ।।२५।।

जे नारय-तिरिय-नरा-ऽमरेसु भमरेण कम्मवसगेण ।
दुक्खे ठविया जीवा संपइ खामेमि ते सव्वे ।।२६।।

नेरइयेण पउसा परमाहम्मिभवंमि पत्तेण ।
जे मे कयत्थिया नारयाओ ते हं खमावेमि ।।२७।।

तिरियत्तं पत्तेणवि एगिंदियविगलजीवजोणीसु ।
भुत्ता पीया दड्ढा वूढा तह चुन्निया जे उ ।।२८।।

पंचिदिएण बहुसो रोसेण भीएण छुहतन्हपीडिएणवि ।
.....विराहिया जेवि ते खामे।।२९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जलयरथलयरखयरा निहया मणुयावि मूढहिययेण ।
वग्घोरगाइं भावंगएण खामेमि ते इहिं ।।३०।।

जलचारिणो जलंमि गिलियामच्छाइणो भडफडंता [?] ।
थलचारिणो थलंमि चउपय-उर-भूयसप्पाइं ।।३१।।

मंसत्थिणाओ गसिया छाग-मिग-सस-महिस-संघराइया ।
खहचारिणोवि खइया मुगला-बग-तित्तिराइया ।।३२।।

गमणागमण-निसीयण-तुयट्टणाईहिं पीडिया जे उ ।
ते मे खमंतु सव्वं अवराहं संपयं गरुयं ।।३३।।

पत्तेण मणुयभावं आरंभपरिग्गहेहिं विविहेहिं ।
विणिवाइया जिया जे खमंतु ते संपइं सव्वो ।।३४।।

छुहिया तिसिया संता कसकुसाईहिं निहयं जणिउ ।
जे वाहिया हयाइं करेमि खलु खामणं तेसिं ।।३५।।

लुद्धय-धीवरभावे निग्घिणहियएण जे मया वहिया ।
खरकम्मियरुवेणं जे वहिया ते हु खमंतु ।।३६।।

नरवइपयपत्तेणं अणेगसंगामकारणाईहिं ।
संहारो जाणकवसं पइमारिसामि[?]ते सव्वे ।।३७।।

अवराहिणो वि पहया पहया पावेण निरवराहा वि ।
रायसहावे जीवा खमंतु ते सज्झइ त्ताहे [?] ।।३८।।

परधणलुद्धेण हया केवि हया परकलत्तरत्तेण ।
अट्ठाए अणट्ठाए जे निहया ते वि खामेमि ।।३९।।

जस्स कयं पेसुन्नं अब्भखाणं पि जस्स मेदिन्नं ।
धणमाणुसं व हरिउं सोवि खमे सव्वहा खमउ ।।४०।।

जो मंतमूलघ्वाचुन्नं [?] जण दुट्ठा जागमाईहिं [?]।
दुखंमि मए ठविउ तं अवराहं खमउ सो मो ।।४१।।

कीलाकज्जे बालेण जोव्वणे केलिदप्पकंदप्पा ।
जेसिं कउ विणासो खमापरा मज्झ ते हुंतु ।।४२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भोगुवभोगनिमित्तं केइ अन्नेवि जीविया हेउं ।
तसथावरा य जीवा जे निहया ते वि खामेमि ।।४३।।

देवेण महे देवा अभिउगं कारिया हया पइया ।
पत्तपवसाईहिं नरतिरिया पीडिया जे उ ।।४४।।

खामेमि ते व सम्मं भवभीयमहोपसन्नचित्तेण ।
खमियं व मए तेसिं सव्वेसिं दुक्कडं सव्वं ।।४५।।

एवं चउगइरूवे भीमे भवसायरे भमंतेण ।
थेवं पि मए दुखं जस्स कयं तं पि खामेमि ।।४६।।

अहमवि खामेमि सव्वं अवराहं सयलपाणिवग्गस्स ।
नाहं कस्सय सत्तू न य सत्तू कोइ मेयाणिं ।।४७।।

खामेमि सत्तुमित्ते खामेमि य सयणपरियणे सव्वे ।
परिचत्तरागदोसो सव्वेसु य मे समो भावो ।।४८।।

खामेमि सव्व संगं उसभायजिणे वि तह खमावेमि ।
सिद्धे तह आयरिए उवज्झाए सव्वसाहू य ।।४९।।

आसायणा जिणाण मोहतमंधेण जा कया कहवि ।
तह सिद्धमाईयाणं तिविहं तिविहेण निंदामी ।।५०।।

आयरियउवज्झाए साहुजणे तह य समणसंघंमि ।
आसायणा कया जं निंदामि तयं महापावं ।।५१।।

नाणस्स दंसणस्स य चरणस्सासायणा कया जाउ ।
गरिहामि पुणो वि पुणो भयंकरं पावमेयंतु ।।५२।।

जं मे कयं कुतित्थं उम्मग्गो वा पवत्तिउ मोहा ।
जाणंतेण वि मग्गो अवलविउ तं पि गरिहामि ।।५३।।

अह संघो उस्सग्गं खवगस्स य निरुवसग्गहे हुंति ।
कुणइ खवगो वि तेसिं रइयंजलि भणइ सक्कथयं ।।५४।।

जा संपइ ताण पज्जं तयं तु भणिऊण पुलइयसरीरो ।
वंदित्तु सुगुरुपाए खवगो विन्नत्तियं कुणइ ।।५५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भयवं कयसामईओ सव्वं चिय वोसरामि तिविहेणं ।
सव्वेसिं पाणीणं अइवायं तह मुसावायं ।।५६।।

सव्वमदत्तादाणं मेहूण-परिग्गहं निरवसेसं ।
कोहं माणं मायं लोभं पि जं च दोसं च ।।५७।।

कलहं अभक्खाणं परपरिवायं तहा रइअरई ।
मिच्छादंसणसल्लं मायामोसं च पेसुन्नं ।।५८।।

इय पावठाणविरओ दुवालसावत्तवंदणं दाऊं ।
विन्नवइ देहि भयवं विहिपुव्वं अणसणं मज्झ ।।५९।।

भवचरिमं पच्चक्खामि जावज्जीवाए तिविहमाहारं ।
अह चउविहं पि गुरुसक्खियं तु अह सिद्धसक्खिं तु ।।६०।।

जं पिय इमं कुडंबं धणधन्नं दुपयचउपयं अपयं ।
देसपुरखित्तमाई तंपि णिंह वोसिरे सव्वं ।।६१।।

इट्ठं वत्थाभरणं रहपहरणवाहणाइ उवगरणं ।
इहभवपरभवियं वा वोसिरियं अज्ज मे सव्वं ।।६२।।

जं च कयं अहिगरणं अरहट्टघट्टजंतबज्झाई ।
सगडुक्खलसत्थाई तं पि य तिविहेण वोसिरियं ।।६३।।

पावपसत्ता सयणा अणेगजम्मेसु देहगेहाय ।
जे आसि अज्ज ते मे वोसरिया तिविह तिविहेण ।।६४।।

जं पि य इमं सरीरं पोसियमच्चंतजत्तसारेण ।
चरमुस्सासेऽवस्सं वोसरियं सव्वहा तं पि ।।६५।।

दुद्दमइंदियगामे जाइकुलाई ब अट्ठमयठाणे ।
परिहरसु सहसु दुस्सहबावीसपरीसहे वच्छ ।।६६।।

सुरनरतिरिया य समुब्भवे य चउहा चउव्विहे चेव ।
उग्गुवसग्गे सहसु य निसग्गवेरग्गरंगिल्लो ।।६७।।

जम्हा दुग्गइमूलं संसारपवट्टणारिउपमाओ ।
तम्हा अन्नाणाई अट्ठविहो सो न कायव्वो ।।६८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

राउगाय[?]नियाणे नव मा काहिसि कहिंपि धीर तुमं ।
तह कंदप्पाए कुभावणाउ भावेसु मा कइया ।।६९।।

इहपरलोगासंसाविवज्जिउ जियमरणनिरवेखो ।
लोगसुहनिप्पिवासो छिन्नममत्तो य विहराहि ।।७०।।

बारसअणिच्चमाई भावसु तं भावणाउ पवराउ ।
पणवीसभावणाउ महव्वयाणं च भावेसु ।।७१।।

खणसुहदुःखंमि सयोगविउगमरणधम्मंमि ।
मा इंदजालसुविणे य समे भवे धीर कुणसु रई ।।७२।।

जह सामिवयणचोइयजोहा भज्जंति परबलाणीयं ।
तह जिणियमोहमल्लं पावसु आराहणपडागं ।।७३।।

मा अप्पकालभावियछुहाइवियणापराइउ संतो ।
हारेसु निरुवमसुहं तिदिव-सिवसंभवमणंतं ।।७४।।

ता नियमणंमि काउं सिवसुहमसरीरयं अणाबाहं ।
अरुयमणंतमपज्जवसाणं ज्झाणंज्झायसु नमोक्कारं ।।७५।।

मोत्तूण बारसंगं संपत्ते मरणदेशकालम्मि ।
पंचपरमेट्ठिमंतं जं पुव्वधरोज्झायं ति ।।७६।।

एसो परमो मंतो सुरतरुचिंतामणीण अब्भहिउ ।
आगमणं तं ज्झउदुःखखयकारणं परमं ।।७७।।

एयं परियट्टंतो मणवयसा पंचनमोक्कारं ।
उल्लसियसुद्धभावो मुंचइ तणुपंजरं धन्नो ।।७८।।

सोम० तत्केन विधिना विधेयमित्याह - **यो भक्तपरिज्ञाप्रकीर्णके** श्रावकस्यानशनप्रतिपत्तिं कुर्वत **उपक्रमः** प्रथमतः सर्वकृत्यविधिरूपो **विस्तरेण** "अह १ - हुज्जदेसविरओ २-अनिआणो ३-निअदव्वं" इत्यादिगाथात्रयेणोक्तो गुरुसङ्घपूजा-साधर्मिकस्वजनवात्सल्य- दीनादिदान-जिनचैत्य-कारापणबिम्बनिर्मापण-तत्प्रतिष्ठापन-सिद्धान्तलेखन-तीर्थयात्राविधानजिनशासनप्रभावनादिपुण्यानि कृतपूर्वी श्राद्धोऽन्त्यसमये स्वजनमुक्तलापन-चैत्यवन्दन-गुरुद्वादशावर्त्तवन्दनदानाऽऽलोचना-ग्रहणपुनःसम्यक्त्वव्रतोच्चार-सर्वजीवक्षामण-चतुःशरणप्रतिपत्त्यादिपुरस्सरमनशनमङ्गीकरोती-त्यादिरूपः **स एवात्राप्यध्ययने बालपण्डितमरणे** वर्णयितव्ये **यथायोग्यं ज्ञेयः** ।।८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गुण० तत्केन विधिना क्रियत इत्याह - **यो भक्तपरिज्ञाध्ययने** श्रावकस्यानशनप्रतिपत्तिं कुर्वत **उपक्रमः** पीठबन्धो **विस्तरेण निर्दिष्टो** भणितः **स एवात्रापध्ययने बालपण्डितमरणे यथायोग्यं** यथोचितं **ज्ञेय** इत्यर्थः ।।८।।

वेमाणिएसु कप्पोवगेसु नियमेण तस्स उववाओ ।
नियमा सिज्झइ उक्कोसएण सो सत्तमंमि भवे ।।९।।

वैमानिकेषु कल्पोपगेषु नियमेन तस्योपपातः ।
नियमात् सिद्धयत्युत्कृष्टतः स सप्तमे भवे ।।९।।

भुव० अथ **तस्यैवंविधाराधनायुक्तस्य क्वोपपात इति दर्शयन्नाह** - विमाने **भवा वैमानिकास्ते च ज्योतिष्का अपि भवन्तीति तद्व्यवच्छेदार्थं विशिनष्टि** - कप्पोवगेसु त्ति **कल्पान् सौधर्म्मादीनुपगच्छन्तीति कल्पोपगास्तेषु न तु कल्पातीतेषु** । नियमेण तस्स उववाओत्ति - **तस्य श्रावकस्य** नियमेन **निश्चयेन सौधर्मादिषूपपातः** । **यतस्तस्याबद्धायुषो वैमानिकवर्जदेवायुषो बन्धाभावात् । तथा चार्षमुपपातमङ्गीकृत्य "सावगस्स जहन्नेणं सोहम्मे उववाओ, उक्कोसेणं अच्चुए" । अथ कियत्सु भवेषु स सेत्स्यतीत्याह** - नियमा सिज्झइ उक्कोसएणं **ति निश्चयेनोत्कृष्टतो भवानङ्गीकृत्य** सप्तमे भवे **सेत्स्यतीत्यर्थः** ।।९।।

सोम० अथ तस्यैवंविधाराधनायुक्तस्य क्वोपपात इति दर्शयति - विमाने भवा **वैमानिकाः**, ते च ज्योतिष्कां अपि भवन्तीति तद्व्यवच्छेदाय विशेषणमाह-**कप्पो०** कल्पान् सौधर्मादीनुपगच्छन्तीति कल्पोपगास्तेषु न तु कल्पातीतेषु, श्रावकस्य पूर्वमबद्धायुषो जघन्यतः सौधर्मादारभ्योत्कृष्टतोऽच्युतं यावदेव गमनसम्भवात् **नियमेन** तस्योपपातः । अथ स श्राद्धधर्माराधकोऽप्रतिपतितधर्मा कतिपयैर्भवैः सिध्यतीत्याह- **नियo**नियमान्निश्चयेन**ोत्कृष्टतो** भवानङ्गीकृत्य **सप्तमे भवे सिध्यति** जघन्यतश्चत्वारतोऽपि ।।९।।

गुण० वैमानिका ज्योतिष्का अपि भवन्तीति तद्व्यवच्छेदार्थं **कल्पोपगतेषु** न तु कल्पातीतेषु श्रावकस्य **नियमेन** सौधर्म्मादि**षूपपातः** । **निश्चयेनोत्कृष्टतो** भवानङ्गीकृत्य **सप्तमे भवे सेत्स्यती**त्यर्थः ।।९।।

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

[पण्डितमरणम् गा. १० तः गा. ४४ यावत्]

इय बालपंडियं होइ मरणमरिहंतसासणे दिट्ठं (भणियं) ।
इत्तो पंडियपंडियमरणं वुच्छं समासेणं ।।१०।।

इति बालपण्डितं भवति मरणमर्हच्छासने दृष्टम् (भणितम्) ।
इतः पण्डितपण्डितमरणं वक्ष्ये समासेन ।।१०।।

भुव० अथवा बालपण्डितमरणं । पर्यन्तसमयेऽपि सर्वविरतेरनङ्गीकरणाद्बालम् अनशनप्रतिपत्तेश्च पण्डितं भवति । [बालं च तत्] पण्डितं च बालपण्डितं भवति **मरणम्** । अर्हत्शासने **जिनप्रवचने** दृष्टं **भणितम्** । इतोऽनन्तरं पण्डितपण्डितमरणं **सुसाधुमरणं** वक्ष्येऽभिधास्ये समासेन **संक्षेपेणेत्यर्थ एतद्ग्रन्थकारवचनम्** ।।१०।।

सोम० इत्यमुना पूर्वोक्तप्रकारेण पर्यन्तसमयेऽपि सर्वविरतेरनङ्गीकरणाद्बालम्, अनशन-प्रतिपत्तेश्च पण्डितम्, बालं च तत् पण्डितं च **बालपण्डितं भवति मरणम्** । **अर्हच्छासने** जिनप्रवचने **दृष्टं** भणितम् । **इतो**ऽनन्तरं **पण्डितपण्डितमरणं** सुसाधुमरणं **वक्ष्येऽ**भिधास्ये **समासेन** संक्षेपेण एतद् ग्रन्थकारवचनम् ।।१०।।

गुण० इतोऽनन्तरं **पण्डितपण्डितमरणं** सुसाधुमरणं **वक्ष्येऽ**भिधास्ये । **समासेन** संक्षेपेणेत्यर्थ एतद् ग्रन्थकारवचनम् ।।१०।।

[कालत्रिक-करणत्रिक-योगचतुष्कत्रिषष्ठिध्यानादिकम्
प्रतिक्रमण-निन्दा-गर्हा गा. ११]

इच्छामि भंते ! उत्तमट्ठं पडिक्कमामि अईयं पडिक्कमामि अणागयं पडिक्कमामि, पच्चुप्पन्नं पडिक्कमामि, कयं पडिक्कमामि, कारियं पडिक्कमामि, अणुमोइयं पडिक्कमामि, मिच्छत्तं पडिक्कमामि, असंजमं पडिक्कमामि, कसायं पडिक्कमामि, पावप्पओगं पडिक्कमामि, मिच्छादंसणपरिणामेसु वा, इहलोगेसु वा, परलोगेसु वा, सचित्तेसु वा, अचित्तेसु वा, पंचसु इंदियत्थेसु वा;

इच्छामि भदन्त ! उत्तमार्थं प्रतिक्रमामि, अतीतं प्रतिक्रमामि, अनागतं प्रतिक्रमामि, प्रत्युत्पन्नं प्रतिक्रमामि, कृतं प्रतिक्रमामि, कारितं प्रतिक्रमामि, अनुमोदितं प्रतिक्रमामि, मिथ्यात्वं प्रतिक्रमामि, असंयमं प्रतिक्रमामि, कषायं प्रतिक्रमामि, पापप्रयोगं प्रतिक्रमामि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मिथ्यादर्शनपरिणामेषु वा, इहलोकेषु वा, परलोकेषु वा, सचित्तेषु वा, अचित्तेषु वा, पञ्चस्विन्द्रियार्थेषु वा [तस्य मिथ्यादुष्कृतम्]

भुव० यदेव चानेन भणितुमिष्टं तदेव गुरुविज्ञप्तिद्वारेणाह - इच्छामि भंते उत्तमट्ठं पडिक्कमामि । इच्छाम्यभिलषामि प्रतिपद्ये भदन्त [इति] गुरुं प्रति विज्ञपयति । किं किं विज्ञपयति ? उत्तमार्थमनशनप्रतिपत्तिं कर्त्तुमभिलषामि । तमिच्छन्नहं किं करोमि [इत्याह]- सामान्येन पापेभ्यो निवृत्तिः सर्वस्मादसन्मार्गात् । "पुव्विं अन्नाणयाए, असवणयाए, अबोहीयाए, अणभिगमेणं अभिगमेण वा पमाएणं रागदोषपडिबद्धयाए, बालयाए, मोहयाए, मंदयाए, किड्डुयाए, तिगारवगरुआए, चउक्कसाउवगएणं, पंचिदियवसट्टेणं, पडिपुन्नभारियाए सायासुक्खमणुपालयंतेणं" इत्येतैः पञ्चदशभिर्हेतुभिः प्रतिपन्नाद् । [सामान्यतः] प्रतिक्रमणे भणितेऽपि विशेषतस्त्रिकालविषयमप्याह - अईयं पडिक्कमामि अतीतं पापव्यापारं "निन्दा-गरिहा-सोही" इत्यादि प्रकारेण प्रतिक्रमामि । अणागयं पडिक्कमामि - अनागतं सावद्यारम्भं "परिहरणा-वारणा-नियत्ती" इत्यादि भेदेन प्रतिक्रमामि । पच्चुप्पन्नं पडिक्कमामि प्रत्युत्पन्नं वर्तमानकालभाविकर्मबन्धं प्रतिचरणाविधानेन प्रतिक्रमामि । तत्र -

मणसा मिच्छादुक्कडकरणं भावेण इह पडिक्कमणं ।
स चरित्तपच्छयावो निंदागरिहा गुरुसमक्खं ।।१।।

तत्रापि किंस्वरूपं प्रतिक्रमामि-कयं पडिक्कमामि कृतं निष्पादितं पापमात्मना प्रतिक्रमामि, कारियं पडिक्कमामि कारितमन्येषां हस्तेन तदेव प्रतिक्रमामि, अणुमोइयं पडिक्कमामि - अनुमोदितं यत्त्वया शत्रुहननादि भव्यं कृतमिति वदनं तत्प्रतिक्रमामि । तदेनमतीतादिभेदं कृतादिभेदं वाऽशुभमनोवाक्कायव्यापारं हेतुचतुष्टयादेव बध्नाति जीवः । अतस्तदेव प्रतिक्रमणद्वारेण व्यनक्ति । मिच्छत्तं पडिक्कमामि - तत्र मिथ्यात्वमाभिग्रहिकादिपञ्चप्रकारं प्रतिक्रमामि । असंयमं पडिक्कमामि मनोवाक्कायाशुभव्यापारम् असंयममेकविधस्वरूपं, कसायं पडिक्कमामि, कषायं चतुष्प्रकारं प्रतिक्रमामि । पावप्पओगं पडिक्कमामि पापप्रयोगं त्रिविधमनोवाक्काययोगं प्रतिक्रमामि । तदेवं -

मिच्छत्तपडिक्कमणं तहेव असंजमे पडिक्कमणं ।
कसायाण पडिक्कमणं जोगाण अप्पसत्थाणमिति ।। [आव. नि. १२५०]

चतुर्धा प्रतिक्रमणमुक्तम् । अतः परं "मिच्छादंसणपरिणामेसु वा" इत्यादिषु "पडिबुद्धस्स वा" पर्यन्तेषु सर्वपदेषु "जो मे कोई देवसिओ राइओ उत्तमट्ठे अइक्कमो वइक्कमो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अइयारो अणायारो तस्स मिच्छामि दुक्कडं"इति योज्यम् । तत्र मिथ्यादर्शनपरिणामे सति तद्वाञ्छायां यो मम दैवसिको रात्रिको वाऽतिक्रमव्यतिक्रमातिचारानाचारादिजातस्तस्य मिथ्यादुष्कृतं करोमि ।

इहलोगेषु **वा इहलोका मनुष्यलोकास्तेषु मनुष्यलोकेषु यदपराद्धं तस्य मिथ्यादुष्कृतम् । वाशब्दाः सर्वपदेषु समुच्चयार्थाः ।** परलोगेसु **वा परलोकेषु मनुष्यजातिव्यतिरिक्तेषु तिर्यगादिषु यदपराद्धं तस्य मिथ्यादुष्कृतम् ।** सचित्तेसु वा **सचित्तेषु पृथिव्यादिषु यत्सङ्घट्टनादिकृतं तस्य ।** अचित्तेसु वा **अचित्तेषु शुषिरतृणदुष्प्रत्युपेक्षितकम्बलादिषु यच्छयनोपवेशनादिकृतम्। हिरण्यादिषु वा मार्गपतितदृष्टेषु यन्ममत्त्वं वा कृतं तस्य ।** पंचसु इंदियत्थेसु **पञ्चस्विन्द्रियार्थेषु शब्दरूपरसगन्धस्पर्शरूपेषु मनोज्ञामनोज्ञेषु यदनुरागविरागादि कृतं तस्य ।**

तथा अन्नाणंझाणे इत्यादि मिथ्यादर्शनादिषु अज्ञानादिध्यानेषु च सत्सु मम यो ज्ञानादीनामतिक्रमादिः जातस्तस्य प्रतिक्रमामि इति संटंकः ।

सोम० अथ क्षपको गुरुविज्ञप्तिपूर्वकं यथैतत् प्रतिपद्यते तथाऽऽह- **इच्छाम्य**भिलषामि प्रतिपद्ये इत्यर्थः । **भंतेत्ति** भदन्त इति गुरोः सम्बोधनम् । किम् ? **उत्तमार्थ**मनशनं कर्त्तुमिति शेषः । तदिच्छन् पूर्वं किं कुर्वे इत्याह - **प्रतिक्रमामि** सामान्येन पापेभ्यो निवर्त्ते "पुव्विं अन्नाणयाए असवणयाए अबोही०" इत्यादिभिः पञ्चदशहेतुभिः प्रतिपन्नादसन्मार्गान्निवर्त्ते इत्यर्थः । अथ विशेषतस्त्रिकालविषयं प्रतिक्रमणमाह - **अइयं**-अतीतं प्राक्कृतं पापव्यापारं "निन्दा-गरिहा-सोहि" इत्यादिप्रकारेण **प्रतिक्रमामि** । **अनागतं**-भविष्यं सावद्यारम्भं "परिहरणा-वारणा-नियत्ती य" इत्यादिभेदेन **प्रतिक्रमामि** । **प्रत्युत्पन्नं**-वर्तमानकालभाविसावद्यसंवरणविधानेन **प्रतिक्रमामि,** निवर्त्ते पश्चात्तापादिकरणेनेत्यर्थः । तदपि किंस्वरूपं प्रतिक्रमामीत्याह - कृतं निष्पादितं पापं स्वयं तथा **कारितमन्यैस्तथाऽनुमोदितं**-"यत् त्वया शत्रुहननादिकार्यं भव्यं कृतम्" इत्यादिवचनं तत् **प्रतिक्रमामि** । एतच्च पापं मिथ्यात्वा-ऽविरति-कषाय-योगरूपहेतुचतुष्टयादेव बध्नाति जीवोऽतस्तदेव प्रतिक्रमति। **मिच्छत्तं**-मिथ्यात्वमाभिग्रहिकादिपञ्चप्रकारं तथा**ऽसंयम**मेकविधं तथा **कषायं** क्रोधादिभेदाच्चतुष्प्रकारं तथा **पापप्रयोगं** त्रिविधं मनो-वाक्-कायव्यापारजं तदेव **प्रतिक्रमामी**ति पूर्ववत् । अतः परं **"मिच्छादंसणपरिणामेसु वा"** इत्यादिषु "पडिबुद्धस्स वा" इति पर्यन्तेषु 'जो मे कोई देवसिओ राइओ उत्तमट्ठे अइक्कमो वइक्कमो अइआरो अणायारो तस्स मिच्छामि दुक्कडं' इति योज्यम् । ततोऽयमर्थो मिथ्यादर्शनपरिणामे मिथ्यात्वाध्यवसाये तद्वाञ्छायां सति यो मम दैवसिको रात्रिको वाऽतिक्रमो व्यतिक्रमोऽतिचारोऽनाचारो वा जातस्तस्य मिथ्या दुष्कृतं करोमि ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अतिक्रमादिस्वरूपं चाह-"कम्मामंतण" इत्यादिगाथोक्ताऽऽधाकर्मविषयाऽतिक्रमादिस्वरूपवत् सर्वपापेषु ज्ञेयम् । **इहलोगेसु वा**-इह लोका मनुष्यलोकास्तेषु मनुष्येषु विषयभूतेषु यद् हिंसाद्यभिप्रायेणाऽतिक्रमादिरूपोऽपराधः कृतस्तस्य मिथ्या दुष्कृतम् । वाशब्दाः सर्वत्र समुच्चयार्थाः । **परलोकेषु** मनुष्यव्यतिरिक्तेषु तिर्यगादिषु यदपराद्धं तस्य मिथ्या दुष्कृतमिति सर्वत्र योज्यम् । तथा **सचित्तेषु** पृथिव्यादिषु यत्सङ्घट्टनादि कृतं, तस्य मिथ्या दुष्कृतम् । तथा **अचित्तेषु** शुषिरतृणदुष्प्रत्युपेक्षितकम्बलादिषु शयनोपवेशनादि कृतं तस्य । हिरण्यादिषु वा मार्गपतितदृष्टेषु ग्रहणाऽभिप्रायेणातिक्रमादि कृतं तस्य । तथा **पञ्चस्विन्द्रियार्थेषु** शब्द-रूप-गन्ध-रस-स्पर्शरूपेषु मनोज्ञाऽमनोज्ञेषु यदनुराग-विरागादि कृतं तथा अन्नाणं० तथा पूर्वोक्तेषु मिथ्यादर्शनादिषु वक्ष्यमाणेषु अज्ञानादिषु ध्यानेषु च सत्सु मम यो ज्ञानादीनामतिक्रमादिदोषो जातस्तं प्रतिक्रमामीति सम्बन्धः।

गुण० यदेव चानेन भणितुमिष्टं तदेव क्षपक एव गुरुविज्ञप्तिद्वारेणाह - **इच्छामि** अभिलषामि । **भदन्त** इति गुरुं प्रति विज्ञपयति । **उत्तमार्थ**मनशनप्रतिपत्तिं कर्तुमभिलषामि । **प्रतिक्रमामि** सामान्यपापेभ्यो निवर्त्ते सर्वस्मादसन्मार्गात् सन्मार्गं प्रपद्ये । सामान्यतः प्रतिक्रमणे भणितेऽपि विशेषतस्त्रिकालविषयमप्याह - **'अईयं'** अतीतपापव्यापारम्, **अनागतं** सावद्यारम्भं, **प्रत्युत्पन्नं** वर्तमानकालभाविकर्मबन्धं, **कृतं** निष्पादितं पापमात्मना, **कारित**मन्येषां हस्तेन, **अनुमोदितं** यन्मया शत्रुहननादि भव्यं कृतम् । **मिथ्यात्वम**ाभिग्रहिकादि पञ्चप्रकारम् । **असंयम**मेकविधस्वरूपं, **कषायं** चतुष्प्रकारं, **पापप्रयोगं** त्रिविधं मनोवाक्काययोगम् अप्रशस्तयोगं, **मिच्छादंसणपरिणामेसु** वा इत्याद्येषु पडिबुद्धस्स वा इत्यन्तेषु सर्वपदेषु इति योज्यम् । तत्र मिथ्यादर्शनपरिणामे सति तद्वांछायां यो मम दैवसिको रात्रिको वाऽतिक्रमादिर्जातस्तस्य मिथ्या दुष्कृतं करोमि । **इह०** मनुष्यलोकास्तेषु यदपराद्धं, तस्य मिथ्यादुष्कृतम् । **परलोकेषु** मनुष्यजातिव्यतिरिक्तेषु तिर्यगादिषु यदपराद्धं, **सचित्तेषु** पृथिव्यादिषु यत्सङ्घट्टनादि कृतम्, **अचित्तेषु** शुषिरतृणादिषु, **पञ्चस्विन्द्रियार्थेषु** मनोज्ञामनोज्ञेष्वनुरागविरागादि कृतं तस्य मिथ्यादुष्कृतम् ।

तेवट्ठिझाणं [त्रिषष्टिध्यानम्]

१-अन्नाणंझाणे [अज्ञानध्याने]

भुव० न ज्ञानमज्ञानं तस्य यद् ध्यानं तदज्ञानध्यानम् । अनुस्वारः सर्वत्र प्राकृतप्रभवः । तत्राज्ञानमेव श्रेयो व्याख्यानकरणाद्यायासाभावात् । यदेवं स्वचेतसि चिन्तनम् । यथाऽशकटापितुः पूर्वभव आचार्यस्य वाचनाखित्रस्य । तस्मिन्नज्ञानध्याने योऽतिक्रमादिर्जातस्तस्य ।।१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० अन्नाणं झाणे - न ज्ञानमज्ञानं तस्य यद् ध्यानम्, अज्ञानमेव श्रेयो व्याख्यान-करणाद्यायासाभावात् । यदेवं स्वमनसि चिन्तनमशकटापितुः पूर्वभवे आचार्यस्य वाचना-दिखिन्नस्येव । तस्मिन्नज्ञानध्याने योऽतिक्रमादिर्जातस्तस्य मिथ्या दुष्कृतमिति सम्बन्धः । अनुस्वारः सर्वत्र प्राकृतत्वात् ।।१।।

गुण० अज्ञानादिध्यानेषु सत्सु यो मे ज्ञानादीनामतिक्रमादिर्जातस्तस्य प्रतिक्रमामीति संटङ्कः, सर्वध्यानपदेष्वनुस्वारोऽलाक्षणिकः ।।१।।

२-अणायारंझाणे [अनाचारध्याने]

भुव० न आचारोऽनाचारः, नञ् कुत्सार्थत्वाद्दुष्टाचारस्य ध्यानमनाचारध्यानम् । यथा वल्लरदाघं ध्यायतः कौङ्कणीयस्य, देवानामनागमनादुत्प्रव्रजितुकामस्याऽऽषाढसूरेरिव वा । तस्मिन् योऽतिचारस्तस्य ।।२।।

सोम० अणायारं झाणे - न आचारोऽनाचारः, नञः कुत्सार्थत्वाद् दुष्टाचारस्य ध्यानमनाचार-ध्यानम् । वल्लरदाघं ध्यायतः कोङ्कणसाधोरिव, देवानामनागमनादुत्प्रव्रजितुकामस्याऽऽषाढसूरेरिव वा । तस्मिन् योऽतिचारस्तस्य ।।२।।

गुण० अनाचारस्य दुष्टाचारस्य ध्यानमनाचारध्यानम् ।।२।।

३-कुदंसणंझाणे [कुदर्शनध्याने]

भुव० कुत्सितं दर्शनं कुदर्शनं तस्य ध्यानम् । देवत्वं प्राप्तस्य मिथ्याभावपरिणतस्य सम्यग्दृष्टेरपि सुराष्ट्रश्रावकस्येव । तस्मिन् कुदर्शनध्याने ।।३।।

सोम० कुदंसणंझाणे - कुत्सितं दर्शनं कुदर्शनं बौद्धादिरूपं तस्य ध्यानम्, देवत्वं प्राप्तस्य मिथ्याभावं परिगतस्य प्राक् सम्यग्दृष्टेरपि सुराष्ट्रश्रावकस्येव । तस्मिन् योऽतिंचारस्तस्य ।।३।।

गुण० कुत्सितं दर्शनं तत् कुदर्शनं तस्य ध्यानम् ।।३।।

४-कोहंझाणे [क्रोधध्याने]

भुव० क्रोधनं क्रोधस्तस्य ध्यानं तस्मिन् । कूलवालक-गोशालक-पालक-नमुचि-शिवभूतिप्रभृतीनामिव ।।४।।

सोम० कोहंझाणे - क्रोधध्यानं कूलवालक-गोशालक-पालक-नमुचि-शिवभूतिप्रभृतीनामिव तस्मिन् योऽतिचारस्तस्य ।।४।।

गुण० क्रोधनं क्रोधस्तस्य ध्यानम् ।।४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

५-माणंझाणे [मानध्याने]

भुव० माननं मानः स्वोत्कर्षस्तस्य ध्यानं तस्मिन् । यथा बाहुबलि-विश्वभूति-सुभूम-परशुरामाभिनिवेशागतसङ्गमदेवानामिव ।।५।।

सोम० माणंझाणे - मानध्यानं बाहुबलि-विश्वभूति-सुभूम-परशुरामाऽभिनिवेशागतसङ्गमकादीनामिव तस्मिन् ।।५।।

गुण० माननं मानः स्वोत्कर्षस्तस्य ध्यानम् ।।५।।

६-मायंझाणे [मायाध्याने]

भुव० परविप्रतारणस्वरूपा माया । तथाहि -

सूरा मो मन्नता कइयवियाहिउवहिउवहिप्पहाणाहिं ।
गहिया उभयपज्जोय कूलवालाइणो बहुवे ।।१।। [सूय० नि० ५०]

मायाया ध्यानं तस्मिन् । स्वभ्रातृचित्तपरीक्षां कुर्वन्त्या धनश्रिया इव शुक्रस्येव वा ।।६।।

सोम० मायंझाणे - माया परविप्रतारणरूपा, तस्या ध्यानं मायाध्यानम्, भ्रातृद्वयचित्तपरीक्षां कुर्वन्त्या धनश्रिया इव तस्मिन् ।।६।।

गुण० परविप्रतारणस्वरूपा माया, तस्या ध्यानम् ।।६।।

७-लोभंझाणे [लोभध्याने]

भुव० लोभनं लोभस्तस्य ध्यानं तस्मिन् । "चेडगनिहाण" इत्याख्यानके वणिग्मित्रस्येव सिंहकेसरसाधोरिव वा ।।७।।

सोम० लोभं झाणे - लोभध्यानम्, "चेडगनिहाण" इत्याख्यानकोक्तवणिग्मित्रस्येव सिंहकेसरिसाधोरिव वा तस्मिन् ।।७।।

गुण० लोभनं लोभस्तस्य ध्यानं तस्मिन् ।।७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

८-रागंझाणे [रागध्याने]

भुव० रञ्जनं रागः । अनभिव्यक्तमायालोभस्वभावोऽभिष्वङ्गमात्रं रागस्तस्य ध्यानं तस्मिन् । स च त्रिधा - कामरागो स्नेहरागो दृष्टिरागश्च । तत्र कामरागो विष्णुश्रियां विक्रमयशोराजस्येव । स्नेहरागो दामन्नगस्वसुरश्रेष्ठिन इव स्वपुत्रमरणश्रवणतो हृदय-स्फोटनम् । दृष्टिरागो ब्रह्मलोकादागत्य स्वदर्शनानुरागत 'आसुरे रमसे' इत्येवं भणतः कपिलस्येव ।।८।।

सोम० रागं झाणे - रागोऽभिष्वङ्गमात्रम्, स च कामराग-स्नेहराग-दृष्टिरागभेदात् त्रिधा । तत्र कामरागो विष्णुश्रियां विक्रमयशोराजस्येव, स्नेहरागो दामन्नकश्वसुरश्रेष्ठिन इव स्वपुत्रमरणश्रवणतो हृदयस्फोटात्, दृष्टिरागो ब्रह्मलोकादागत्य स्वदर्शनानुरागतः स्वशिष्यं प्रति "आसुरे रमसे" इत्यादि भणतः कपिलस्येव तस्य ध्यानं तस्मिन् ।।८।।

गुण० रञ्जनं रागः, अनभिव्यक्तमायालोभस्वभावस्तस्य ध्यानं तस्मिन् ।

९-दोसंझाणे [द्वेषध्याने]

भुव० दोसं ति प्राकृतत्वाद्दूषणं दोषः । स चानभिव्यक्तदोष[क्रोध]मानलक्षणभेदस्व-भावोऽप्रीतिमात्रं द्वेषः दोषो वा तस्य ध्यानं तस्मिन् । अथवा द्वेषः परद्रोहाध्यवसायः। मधुदेवपिप्पलादयोरिव। धर्मरुचिनाविकनन्दयोरिव वा । हरिवंशोत्पत्तौ वीरकदेवस्येव वा ।।९।।

सोम० दोसं झाणे - अप्रीतिमात्रं परद्रोहाध्यवसायो वा द्वेषस्तस्य ध्यानम्, मधुदेवपिप्प-लादयोरिव, धर्मरुचि-नाविकनन्दयोरिव, हरिवंशोत्पत्तौ वीरकदेवस्येव वा तस्मिन् ।।९।।

गुण० द्वेषणं द्वेषः, स चानभिव्यक्तक्रोधमानलक्षणस्तस्य ध्यानं तस्मिन् । अथवा द्वेषः परद्रोहाध्यवसायः ।

१०-मोहंझाणे [मोहध्याने]

भुव० मोहनं मोह आत्मनो वैचित्त्यताकरणमज्ञानत्वमित्यर्थः । तस्य ध्यानं तस्मिन् । मोहाद्विष्णुतनुं वहतो बलभद्रस्येव ।।१०।।

सोम० मोहं झाणे - मोहनं मोह आत्मनो वैचित्त्यताकरणमज्ञानत्वमित्यर्थस्तस्य ध्यानम्, मोहाद् विष्णुतनुं वहतो बलभद्रस्येव तस्मिन् ।।१०।।

गुण० मोहनं मोहस्तस्य ध्यानं तस्मिन् ।।१०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

११-इच्छंझाणे [इच्छाध्याने]

भुव० इच्छनमिच्छा संभाव्यमानस्याभिलाषाऽतिरेकः । इच्छाया ध्यानमिच्छाध्यानं तस्मिन् । द्विमाषार्थिनः कोटिस्वर्णलाभेऽपि प्रवर्धमानलोभस्य कपिलस्येव। तथाहि -

कोसंबी कासवजसा कविलो सावत्थि इंददत्तो य ।
इब्भे य सालिभद्दे धणसेट्ठि पसेणई राया ।।१।।११।। [उत्तरा० निर्यु० २५३]

सोम० इच्छं झाणे - इच्छा संभाव्यमानलाभस्याऽर्थस्याभिलाषातिरेकस्तस्या ध्यानमिच्छाध्यानम् । द्विमाषार्थिनः कोटिसुवर्णलाभेऽपि प्रवर्धमानलोभस्य कपिलस्येव तस्मिन् ।।११।।

गुण० अर्थस्याभिलाषातिरेकः, इच्छाया ध्यानमिच्छाध्यानं तस्मिन् ।।११।।

१२-मिच्छंझाणे [मिथ्याध्याने]

भुव० मिथ्या विपर्यस्तदृष्टित्वम् । मिथ्याया ध्यानं मिथ्याध्यानं तस्मिन् । जमालि-गोविन्दवाचकप्रभृतीनामिव ।।१२।।

सोम० मिच्छं झाणे - मिथ्या विपर्यस्तदृष्टित्वं तद्ध्यानं मिथ्याध्यानम् । जमालिगोविन्द-प्रभृतीनामिव तस्मिन् ।।१२।।

गुण० मिथ्या विपर्यस्तदृष्टित्वं, मिथ्याया ध्यानं तस्मिन् ।।१२।।

१३-मुच्छंझाणे [मूर्च्छाध्याने]

भुव० मूर्च्छनं मूर्च्छा अत्यर्थं राज्याद्यभिष्वङ्गः । स्वपुत्रान् व्यङ्गयतः कनकध्वजस्येव ।।१३।।

सोम० मुच्छं झाणे - मूर्छाऽत्यर्थं पूर्वप्राप्तस्य राज्यादेरभिष्वङ्गः स्वपुत्रान् व्यङ्गयतः कनक-ध्वजस्येव ।।१३।।

गुण० मूर्छनं मूर्छाऽत्यर्थं राज्याद्यभिष्वङ्गः ।।१३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

१४-संकंझाणे [शङ्काध्याने]

भुव० शङ्कनं शङ्का संशयकरणं शङ्का इति वचनात् शङ्काया ध्यानं शङ्काध्यानं तस्मिन् । अव्यक्तवादिनामाषाढाचार्यशिष्याणामिव ।।१४।।

सोम० संकं झाणे - शङ्कनं शङ्का संशयकरणमित्यर्थः, तस्या ध्यानं शङ्काध्यानम् । अव्यक्तवादिनामाषाढाचार्यशिष्याणामिव तस्मिन् ।।१४।।

गुण० संशयकरणं शङ्का ।।१४।।

१५-कंखंझाणे [काङ्क्षाध्याने]

भुव० काङ्क्षणं [काङ्क्षा] "कांखा अनन्नदंसणग्गाहो" इति भणनात् । काङ्क्षाया ध्यानं काङ्क्षाध्यानं तस्मिन् । कविला इत्थंपि इहयंपीति वदतो मरिचेरिव ।।१५।।

सोम० कंखं झाणे - अन्यान्यदर्शनाग्रहः काङ्क्षा तद् ध्यानम्, "कविला इत्थं पि इहयं पि" इति वदतो मरिचेरिव तस्मिन् ।।१५।।

गुण० काङ्क्षणं काङ्क्षा अन्यान्यदर्शनाग्रहः ।।१५।।

१६-गेहिंझाणे [गृद्धिध्याने]

भुव० गर्द्धनं गृद्धिः, आहारादिष्वत्यन्तमाकाङ्क्षा । गृद्धेर्ध्यानं गृद्धिध्यानं तस्मिन् । मथुरामङ्गोरिव, कण्डरीकराजस्येव वा ।।१६।।

सोम० गेहिं झाणे - गृद्धिराहारादिष्वत्यन्तमाकाङ्क्षा तस्या ध्यानं मथुरामङ्गोरिव कण्डरीकराजस्य मुक्तव्रतस्येव वा तस्मिन् ।।१६।।

गुण० गृद्धिराहारादिष्वत्यन्तमाकाङ्क्षा ।।१६।।

१७-आसंझाणे [आशाध्याने]

भुव० निष्पाथेयस्य परशम्बललाभप्रार्थनमाशा । आशाया ध्यानमाशाध्यानं तस्मिन् । अलब्धव्येऽपि तस्मिन्नाहाराभिलाषः निर्घृणशर्मब्राह्मणपाथेयं प्रति मूलदेवस्येव ।।१७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० आसं झाणे - आशा परसत्कवस्तुप्राप्त्यभिलाषरूपा तस्या ध्यानं आशाध्यानम् । निर्घृण-शर्मब्राह्मणपाथेयं प्रति निष्पाथेयस्य मूलदेवस्येव तस्मिन् ।।१७।।

गुण० आशाया ध्यानम् ।।१७।।

१८-तण्हंझाणे [तृष्णाध्याने]

भुव० तीव्रकामाभिलाषस्तृष्णा । तृट्परीषहोदयजन्यः पीडाविशेषो वा तृष्णा । तस्या ध्यानं तृषार्त्तस्य क्षान्तिसहितस्य क्षुल्लकस्येव मार्गगच्छतः, अङ्गारदाहकस्येव वा ।।१८।।

सोम० तण्हं झाणे - तृष्णा तृषापरीषहोदयस्तस्या ध्यानम्, तृषार्त्तस्य मार्गे गच्छतो जनक-साधुसहितस्य क्षुल्लकस्येव तस्मिन् ।।१८।।

गुण० तृट्परीषहोदयजन्यः पीडाविशेषः ।।१८।।

१९-छुहंझाणे [क्षुद्ध्याने]

भुव० क्षुधा क्षुत्परिषहोदयजन्यः कष्टविशेषः । क्षुधाया ध्यानं तस्मिन् । राजगृहे यात्रागतद्रमकस्येव ।।१९।।

सोम० छुहं झाणे - क्षुधा क्षुत्परीषहोदयजन्यः पीडाविशेषः, तया यद् ध्यानं क्षुधाध्यानम्, राजगृहयात्रागतलोकसहगतद्रमकस्येव तस्मिन् ।।१९।।

गुण० क्षुत्परीषहोदयजन्यः कष्टविशेषः ।।१९।।

२०-पंथंझाणे [पथिध्याने]

भुव० अल्पकालगम्योऽध्वा पन्थाः । पथोध्यानं पथि वा ध्यानं तस्मिन् पोतनपुरमार्गं गवेषयतो वल्कलचीरिण इव ।।२०।।

सोम० पंथं झाणे - अल्पकालगम्योऽध्वा पन्था तस्य तस्मिन् वा ध्यानं पथिध्यानम्, पोतनपुरमार्गं गवेषयतो वल्कलचीरिण इव तस्मिन् ।।२०।।

गुण० अल्पकालगम्योऽध्वा पन्था तस्य पथि वा ध्यानं तस्मिन् ।।२०।।

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

२१-पंथाणंझाणे [प्रस्थानध्याने]

भुव० अनुस्वारौ द्वावप्यलाक्षणिकौ । ततः प्रस्थानमशुभमनसा गमनम् । अथवा महान् विषमश्च पन्थानः । सनत्कुमारं गवेषयतो महेन्द्रसिंहस्येव ब्रह्मदत्तं वा वरधनस्येव ।।२१।।

सोम० पंथाणं झाणे - महान् विषमश्चाध्वा पन्थानः, तस्य ध्यानम्, सनत्कुमारं गवेषयतो महेन्द्रसिंहस्येव, ब्रह्मदत्तं वा वरधनस्येव तस्मिन् । अथवा प्रस्थानं मनसा गमनं तस्मिन् वा । अनुस्वारौ द्वावप्यलाक्षणिकौ ।।२१।।

गुण० अनुस्वारौ द्वावप्यलाक्षणिकौ । ततः प्रस्थानमशुभमनसा गमनम् अथवा महान् पन्था तस्य ध्यानम् ।।२१।।

२२-निद्दंझाणे [निद्राध्याने]

भुव० नितरां द्राणं कुत्सितत्वगमनं निद्रा । तत्परतन्त्रस्य ध्यानं तस्मिन् । यथा-

पुग्गल-मोयग-वंते-फसग-वडसालभंजणे चेव ।
निद्दा पमाए एए उयाहरणा हुंति नायव्वा ।।१।।२२।।

सोम० निद्दं झाणे - निद्रापरतन्त्रस्य ध्यानं निद्राध्यानम्, स्त्यानर्धिनिद्रया १-महिषमांसभक्षि, २-मोदकाभिलाषि, ३-हस्तिदन्तोत्पाटकारि, ४-प्राक् कुम्भकारत्वाभ्यस्तमृत्पिण्डत्रोटनवत् साधु-मस्तकत्रोटि, ५-वटशाखाभङ्गिसाधूनामिव तस्मिन् ।।२२।।

गुण० नितरां द्राणं कुत्सितत्वगमनं निद्रा ।।२२।।

२३-नियाणंझाणे [निदानध्याने]

भुव० - स्वर्गादिऋद्धिप्रार्थनं निदानं तस्य ध्यानं तस्मिन् ।

राउग्गीथीपुरिसो बहुरयसरयारयासुरातिन्नि ।
सङ्घादरिद्दगेहे वज्जेज्जा नवनियाणाइं ।।

भवान्तरे ऋद्ध्यादिप्रार्थनम् । नन्दिषेणगङ्गदत्तसम्भूतद्रौपद्यादीनामिव ।।२३।।

सोम० निआणं झाणे - निदानं स्वर्ग-मर्त्यादिऋद्धिप्रार्थनं, भवान्तरे नवनिदानरूपम् । नन्दिषेण-गङ्गदत्त-सम्भूत-द्रौपद्यादीनामिव तस्मिन् ।।२३।।

गुण० स्वर्गादिऋद्धिप्रार्थनं निदानम् ।।२३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

२४-नेहंझाणे [स्नेहध्याने]

भुव० स्नेहो मोहोदयजन्यः प्रीतिविशेषः । पुत्रादिष्वत्यन्तानुरागस्तस्य ध्यानं तस्मिन् । मरुदेवीसुनन्दाअरहन्नकमातॄणामिव ।।२४।।

सोम० नेहं झाणे - स्नेहो मोहोदयजः प्रीतिविशेषः पुत्रादिष्वत्यन्तानुरागः, मरुदेवी-सुनन्दाऽर्हन्नकमात्रादीनामिव तस्य ध्यानं तस्मिन् ।।२४।।

गुण० स्नेहो मोहोदयजन्यः प्रीतिविशेषः ।।२४।।

२५-कामंझाणे [कामध्याने]

भुव० कामश्चतुर्विंशतिधा चतुःशरणव्याख्यातो [विज्ञेयः] । विषयाभिलाषस्तस्य ध्यानं तस्मिन् हासप्रहासप्रलोभितस्य कुमारनन्दिन इव, सीतां गृह्णतो रावणस्येव वा ।।२५।।

सोम० कामं झाणे - कामो विषयाभिलाषस्तस्य ध्यानं कामध्यानम्, हासा-प्रहासाप्रलोभितस्य कुमारनन्दिसुवर्णकारस्येव, सीतामपहरतो रावणस्येव वा तस्मिन् ।।२५।।

गुण० कामो विषयाभिलाषः ।।२५।।

२६-कलुसंझाणे [कलुषध्याने]

भुव० अपमानतः परगुणोत्कर्षे प्रशंसाभिसूयातश्च मायावलेपाद्वा यश्चित्तस्य कलुषभावः । कालुष्यं गडुलता तद्धेतुर्भावोऽपि कलुषस्तस्य ध्यानं तस्मिन् । केशिराज्यदाने उदायनं प्रति अभीचिकुमारस्येव बाहुसुबाहुप्रशंसामसहमानयोः पीठमहापीठयोरिव वा, स्थूलभद्राभिसूयातश्च सिंहगुफाक्षपकस्येव वा ।।२६।।

सोम० कलुसं झाणे - कालुष्यध्यानम्, अपमानतो परगुणप्रशंसायामीर्ष्यातो वा चित्तस्य कलुषभावः कालुष्यं मलिनता तस्य ध्यानम्, बाहु-सुबाहुप्रशंसामसहमानयोः पीठ-महापीठयोरिव, स्थूलभद्रेर्ष्यातः सिंहगुहास्थितक्षपकस्येव वा तस्मिन् ।।२६।।

गुण० अपमानतः परगुणोत्कर्षप्रशंसाभिसूयातश्च चित्तस्य कलुषभावः ।।२६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

२७-कलहंझाणे [कलहध्याने]

सोम० कलहं झाणे - कलहो वाचिकाराटि:, तस्य ध्यानं कलहध्यानं रुक्मिणीसत्यभामयोर्व्यतिकरे कलहप्रियदुर्योधननृपस्येव कमलामेलादिव्यतिकरे नारदस्येव वा तस्मिन् ।।२७।।

गुण० कलहो वाचिकाराटी तस्य ध्यानम् ।।२७।।

२८-जुज्झंझाणे [युद्धध्याने]

भुव० युद्धं परस्परप्राणव्यपरोपणाध्यवसायो वैरिणां भातृणां विनाशे चेटकेन सह कूणिकनृपस्येव । अङ्गारवत्यादिग्रहणे चण्डप्रद्योतस्येव वा ।२८।।

सोम० जुज्झं झाणे - युद्धं वैरिणां परस्परं प्राणव्यपरोपणाध्यवसायस्तस्य ध्यानं युद्धध्यानम्, भातृणां विनाशे चेटकेन सह कोणिकनृपस्येव, अङ्गारवत्यादिग्रहणे चण्डप्रद्योतस्येव वा तस्मिन् ।।२८।।

गुण० युद्धं परस्परं प्राणव्यपरोपणाध्यवसायो वैरिणं प्रति ।।२८।।

२९-निजुज्झंझाणे [नियुद्धध्याने]

भुव० निर्गतमधमयुद्धं प्राणप्रहाणरूपं यत्र तन्नियुद्धम् । दृष्टिमुष्ट्यादिभिरेव जयहारिकारकं बाहुबलिभरतयोरिव नियुद्धस्य ध्यानं तस्मिन् । मात्स्यिकमल्लजितस्याट्टनकस्येव वा ।।२९।।

सोम० निजुज्झं झाणे - निर्गतं युद्धं नियुद्धं प्राणव्यपरोपणरूपं यस्मिन् तन्नियुद्धम्, यष्टिमुष्ट्यादिभिरेव जयाऽजयकारकं तस्य ध्यानं नियुद्धध्यानम्, बाहुबलिभरतयोरिव मात्स्यिकमल्लयुतस्याट्टनस्येव वा तस्मिन् ।।२९।।

गुण० निर्गतमधमयुद्धं नियुद्धं दृष्टिमुष्टयादिभिरेव जयहारकारकं बाहुबलिभरतयोरिव ।।२९।।

३०-संगंझाणे [सङ्गध्याने]

भुव० सङ्ग: परित्यक्तेष्वपि पुनः संयोगाऽभिष्वङ्ग: । राजीमत्यां रथनेमेरिव, नागिलां प्रति भवदेवस्येव वा ।।३०।।

भुव० संगं झाणे - सङ्ग: परित्यक्तेष्वपि पुनःसंयोगाभिलाषस्तस्य ध्यानम्, राजीमत्यां रथनेमेरिव, नागिलां प्रति भवदेवस्येव वा तस्मिन् ।।३०।।

गुण० परित्यक्तेष्वपि पुनः संयोगाऽभिष्वङ्ग: ।।३०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

३१-संगहंझाणे [संग्रहध्याने]

भुव० संग्रहोऽत्यर्थमतृप्त्या धनमीलनम्। मम्मणकस्येव संग्रहस्य ध्यानं तस्मिन् ।।३१।।

सोम० संग्रहं झाणे - संग्रहोऽत्यर्थमतृप्त्या धनमीलनं तस्य ध्यानम्, मम्मणस्येव तस्मिन् ।।३१।।

गुण० संग्रहोऽत्यर्थमतृप्त्या धनमीलनम् ।।३१।।

३२-ववहारंझाणे [व्यवहारध्याने]

भुव० व्यवहरणं व्यवहारः कार्यपरिच्छेदार्थं राजकुलादौ पुत्रधनार्थं, देशान्तरायातसार्थवाहपत्न्योरिव ।।३२।।

सोम० ववहारं झाणे - व्यवहारः स्वकार्यनिर्णयार्थं राजकुलादौ न्यायकरणं तस्य ध्यानम्, पुत्रधनार्थं देशान्तरायातसार्थवाहसपत्न्योरिव तस्मिन् ।।३२।।

गुण० व्यवहरणं व्यवहारः कार्यपरिच्छेदार्थं राजकुलादौ तस्य, पुत्रधनार्थं देशान्तरायातसार्थवाहपत्न्योरिव ।।३२।।

३३-कयविक्कयंझाणे [क्रयविक्रयध्याने]

भुव० क्रयणं क्रयः, विक्रयणं विक्रयः। लाभार्थमल्पमूल्येन बहुमूल्यवस्तुग्रहणं क्रयश्च विक्रयश्च क्रयविक्रयौ तयोर्ध्यानं तस्मिन् । लुब्धकनन्दस्येव ।।३३।।

सोम० कयं झाणे - क्रयणं क्रयो लाभार्थमल्पमूल्येन बहुमूल्यवस्तुग्रहणम्, विक्रयणं विक्रयो बहुना मूल्येनाल्पमूल्यवस्तुदानम्, क्रयश्च विक्रयश्च क्रयविक्रयौ तयोर्ध्यानम्, लोहमूल्येन सुवर्णकुशग्राहिलोभनन्दस्येव तस्मिन् ।।३३।।

गुण० क्रयविक्रयो लाभार्थमल्पमूल्येन बहुमूल्यवस्तुग्रहणम् ।।३३।।

३४-अणत्थदंडंझाणे [अनर्थदण्डध्याने]

भुव० आत्मनः परेषां वाऽर्थाय दण्डः अर्थदण्डः नार्थदण्डोऽनर्थदण्डः । निष्प्रयोजनं प्राणिघातनं तस्य ध्यानं तस्मिन् । दुर्दान्तमत्ततया द्वैपायनं खलीकुर्वतां शाम्बादीनामिव, चक्रमण्डलीघ्नतो गङ्गदत्तस्येव वा विष्णुश्रीदेवीस्वर्गसन्देशकथननिपुणस्य वाचालस्येव वा ।।३४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० अणट्ठदंडं झाणे - अनर्थदण्डो निष्प्रयोजणं हिंसादिकरणम्, तस्य ध्यानम्, दुर्दान्तमत्ततया द्वैपायनं खलीकुर्वतां शाम्बादीनामिव, चक्रमण्डलीसर्पविशेषरूपां घ्नतो गङ्गदत्तस्येव, विष्णु-श्रीदेवीस्वर्गसन्देशकथननिपुणस्य वाचालस्येव वा तस्मिन् ।।३४।।

चुण० अनर्थदण्डो निष्प्रयोजनप्राणिघातनम् ।।३४।।

३५-आभोगंझाणे [आभोगध्याने]

भुव० आभोगो ज्ञानपूर्वको व्यापारस्तस्य ध्यानं तस्मिन् । ब्राह्मणनयनाभोगे फलान्यपि मृद्नतो ब्रह्मदत्तस्येव ।।३५।।

सोम० आभोगं झाणे - आभोगो ज्ञानपूर्वको व्यापारस्तस्य ध्यानम्, ब्राह्मणनयनाभिप्रायेण फलान्यपि मृद्नतो ब्रह्मदत्तस्येव तस्मिन् ।।३५।।

चुण० आभोगो ज्ञानपूर्वको व्यापारः ।।३५।।

३६-अणाभोगंझाणे [अनाभोगध्याने]

भुव० - अनाभोगोऽत्यन्तविस्मृतिस्तस्य ध्यानं तस्मिन् । विस्मृतव्रतस्य प्रसन्नचन्द्रस्येव ।

आह च -

स्पृष्टः सुतममत्वेन प्रसन्नो व्रतविस्मृतः ।
मनसा योद्धुमारेभे, तैः समं क्रूरमन्त्रिभिः ।। इति ।।३६।।

सोम० अणाभोगं झाणे - अनाभोगोऽत्यन्तविस्मृतिस्तस्य ध्यानम्, विस्मृतव्रतस्य प्रसन्नचन्द्रस्येव तस्मिन् ।।३६।।

चुण० अनाभोगोऽत्यन्तविस्मृतिः ।।३६।।

३७-अणाविलंझाणे [ऋणाविलध्याने]

भुव० अणम् ऋणं तेन आविलः कलुषस्तस्य ध्यानं तस्मिन् ऋणाविलस्य ऋणार्त्तस्य तैलकर्षनिमित्तं दासत्वं प्राप्तायाः श्रमणभगिन्या इव । अथवा परं प्रतार्य गृह्णात्यर्थं पश्चादृणं भङ्क्त्वापलायिष्य इति चिन्तयतः ऋणाविलध्यानं तस्मिन् ।।३७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० अणाविलं झाणे - अणम् ऋणं तेनाविलः कलुष ऋणाविलस्तस्य ध्यानम्, तैलकर्षलस्त्र्या यतिभगिन्या इव तस्मिन् ।।३७।।

गुण० अणम् ऋणं तेन आविलः कलुष ऋणार्त्तस्तस्य यद् ध्यानम् ।।३७।।

३८-वेरंझाणे [वैरध्याने]

भुव० वैरं पितृमातृवधादिसमुत्थं, राज्यापहारादिसमुद्भवं वा वंशानुयायि भवान्तरानुयायि वा परशुरामसुभूमादीनामिव, सुदाढदेवस्य वा भगवन्तं प्रति, त्रिपृष्ठनिहतसिंहजीवस्य कपिलबटोर्वीरं प्रति। त्रिपृष्ठभवे याऽन्तपुरिकाऽपमानिता सैव शालिशीर्षग्रामोद्यानव्यन्तरी सती तापसीरूपेण माघमासे भगवति स्मृतवैरा जटाभिरार्द्राभिर्जलोपसर्गं कुर्वती तस्या इव । सुदर्शनं प्रति वा अभयादेव्या व्यन्तरीभूतायाः ।।३८।।

सोम० वेरं झाणे - वैरं मातृपित्रादिवधोत्थं राज्यापहारदिभवं वा तस्य ध्यानम्, परशुरामसुभूमादीनामिव, भवान्तरानुयायि वा वैरं त्रिपृष्टनिहतसिंहजीवस्य कपिलबटोर्वीरं प्रतीव, सुदर्शनं प्रति वाऽभयादेव्या व्यन्तरीभूतायास्तस्मिन् ।।३८।।

गुण० वैरं पितृमातृवधादिसमुत्थं राज्यापहारदिसमुद्भवं वा ।।३८।।

३९-वियक्कंझाणे [वितर्कध्याने]

भुव० वितर्कणं वितर्कः ऊहः । कथं राज्यादि ग्रहीष्य इति चिन्ता । वितर्कस्य ध्यानं तस्मिन्। नन्दराज्यं जिघृक्षोश्चाणक्यस्येव । उदयनमपजिहीर्षोस्तदमात्यस्य यौगन्धरायणस्येव वा ।।३९।।

सोम० वियक्कं झाणे - वितर्क ऊहः, कथं राज्यादि ग्रहीष्ये ? इति चिन्ता तस्य ध्यानम्, नन्दराज्यं जिघृक्षोश्चाणक्यस्येव तस्मिन् ।।३९।।

गुण० वितर्कः ऊहः, कथं राज्यादि ग्रहीष्य इति चिन्ता ।।३९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

४०-हिंसंझाणे [हिंसाध्याने]

भुव० हिंसनं हिंसा महिषादिजीवमारणं तस्य ध्यानं हिंसाध्यानं तस्मिन् । कूपक्षिप्तस्य कालशौकरिकस्येव । दु:खविपाकोक्ताण्डकवणिक्निर्धनकमहेश्वरदत्तापुरोहितानामिव वा ।।४०।।

सोम० हिंसं झाणे - हिंसा महिषादिजीवमारणं तस्या ध्यानम्, कूपक्षिप्तकालशौकरिकस्येव तस्मिन् ।।४०।।

गुण० हिंसा महिषादिजीवमारणम् ।।४०।।

४१-हासंझाणे [हासध्याने]

भुव० हसनं हास: परविप्रतारणं तस्य ध्यानं तस्मिन् । चण्डरुद्राचार्यशिष्यस्य मित्र-सहितस्येव, वज्रबाहुकुमारं प्रति वा सुन्दरनृपस्येव वा ।।४१।।

सोम० हासं झाणे - हसनं हासो हास्यं तस्य ध्यानम्, चण्डरुद्राचार्यशिष्यस्येव मित्रसहितस्य, वज्रबाहुकुमारं प्रति सुन्दरनृपस्येव वा तस्मिन् ।।४१।।

गुण० हसनं हास: परविप्रतारणम् ।।४१।।

४२-पहासंझाणे [प्रहासध्याने]

भुव० प्रहसनं प्रहास: उपहास: निन्दास्तुति: तस्य ध्यानं - "वंदामि ते नैमित्तिय खवगा" इति वार्त्तकमुनिं प्रति वदतश्चण्डप्रद्योतस्येव ।।४२।।

सोम० पहासं झाणे - प्रहास उपहास: परविप्रतारणनिन्दास्तुतिरूप:, तस्य ध्यानम्, "वन्दामि ते नेमित्तिय, खवगा..." इति वार्तकमुनिं प्रति वदतश्चण्डप्रद्योतस्येव तस्मिन् ।।४२।।

गुण० प्रहसनं प्रहास उपहास: निन्दास्तुति: ।।४२।।

४३-पओसंझाणे [प्रद्वेषध्याने]

भुव० प्रकृष्टो द्वेष: प्रद्वेषस्तस्य ध्यानं तस्मिन् । मरुभूतिं प्रति कमठस्येव, त्रिपृष्ठस्येव वा ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कन्नेसु तऊय तत्तं गोवस्स कयं तिविणिट्ठारन्ना ।
कन्नेसु वद्धमाणस्स तेण वूढा कडसलागा ।। इति ।।४३।।

सोम० पओसं झाणे - प्रद्वेषः प्रकृष्टो द्वेषस्तस्य ध्यानम्, मरुभूतिं प्रति कमठस्येव, श्रीवीरं प्रति कर्णयोः कटशलाकां क्षिपतो गोपस्येव वा तस्मिन् ।।४३।।

गुण० प्रकृष्टो द्वेषः प्रद्वेषस्तस्य ध्यानं तस्मिन् ।।४३।।

४४-फरुसंझाणे [परुषध्याने]

भुव० परुषमतिनिष्ठुरं कर्म तस्य ध्यानं तस्मिन् । ब्रह्मदत्तं प्रति चुलण्या इव, युगबाहुं प्रति मणिरथस्येव वा पुष्पानयनव्याजेन सर्पघटं प्रति श्राविकां प्रेषयतस्तत्पतेरिव वा ।।४४।।

सोम० फरुसं झाणे - परुषमतिनिष्ठुरं कर्म तस्य ध्यानम्, ब्रह्मदत्तं प्रति चुलन्या इव, युगबाहुं प्रति मणिरथस्येव, पुष्पानयनव्याजेन सर्पघटं प्रति श्राविकां प्रेषयतस्यत्पतेरिव वा तस्मिन् ।।४४।।

गुण० फरुसमिति निष्ठुरं कर्म तस्य ध्यानं तस्मिन् ।।४४।।

४५-भयंझाणे [भयध्याने]

भुव० भयं मोहान्तर्गता नोकषायरूपा प्रकृतिस्तस्य ध्यानं तस्मिन् । विहितगजसुकुमालोपसर्गस्य सोमिलस्येव वा ।।४५।।

सोम० भयं झाणे - भयं मोहान्तर्गता नोकषायरूपा प्रकृतिस्तस्य ध्यानम्, कृतगजसुकुमालोपसर्गस्य सोमिलस्येव तस्मिन् ।।४५।।

गुण० भयं मोहान्तर्गता नोकषायरूपा प्रकृतिस्तस्य ध्यानं तस्मिन् ।।४५।।

४६-रूवंझाणे [रूपध्याने]

सोम० रुवं झाणे - रूपम्, क्वचित् पाठेऽन्नरूवं झाणे इत्यधिकं पदमपि दृश्यते । तत्र रूप्यते निरीक्ष्यते आदर्शादाविति रूपं तस्य ध्यानम्, तच्च द्विधा स्वरूपध्यानं पररूपध्यानं च, मदीयं रूपं शोभनमिति स्वरूपध्यानम्, देवाभ्यां प्रशंसितस्य सनत्कुमारस्येव, पररूपध्यानं तु अङ्गारवत्यादिरूपाणि चित्रफलकलिखितानि वीक्षमाणस्य चण्डप्रद्योतस्येव तस्मिन् ।।४६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

४७-अप्पसंसंझाणे [आत्मप्रशंसाध्याने]

भुव० आत्मनः प्रशंसा गुणोत्कर्ष आत्मप्रशंसनं तस्य ध्यानं तस्मिन् । शकडालेनाकृतप्रशंसामभिलषतो वररुचेरिव, स्वविज्ञानं वा कोशाया दर्शयतो रथिकस्येव।।४७।।

सोम० अप्पसंसं झाणे - आत्मप्रशंसा ध्यानम्, शकटालमन्त्रितो निजकृतकाव्यप्रशंसामभिलषतो वररुचेरिव, स्वविज्ञानं कोशाया दर्शयतो रथिकस्येव वा तस्मिन् ।।४७।।

गुण० आत्मप्रशंसा ।।४७।।

४८-परनिंदंझाणे [परनिन्दाध्याने]

भुव० निन्दनं निन्दा परस्य निन्दा परनिन्दा तस्या ध्यानं तस्मिन् । कूरगडुकं प्रति चतुर्णां क्षपकाणामिव ।।४८।।

सोम० परनिंदं झाणे - परस्य निन्दा परनिन्दा तस्या ध्यानम्, कूरगडुकं प्रति चतुर्णां क्षपकानामिव तस्मिन् ।।४८।।

गुण० परस्य निन्दा परनिन्दा तस्या ध्यानम् ।।४८।।

४९-परगरिहंझाणे [परगर्हाध्याने]

भुव० गर्हणं गर्हा परस्य गर्हा परदोषोद्घाटनं तस्य ध्यानं तस्मिन् । सङ्घसमक्षं दुर्बलिकापुष्यमित्रं गर्हमाणस्य गोष्टामाहिलस्येव ।।४९।।

सोम० परगरिहं झाणे - परगर्हा परस्य गर्हा परसमक्षं दोषोद्घट्टनं तस्या ध्यानम्, श्रीसङ्घसमक्षं दुर्बलिकापुष्यमित्रं गर्हमाणस्य गोष्ठामाहिलस्येव तस्मिन् ।।४९।।

गुण० परस्य गर्हा परदोषोद्घट्टनम् ।।४९।।

५०-परिग्गहंझाणे [परिग्रहध्याने]

भुव० परिगृह्यते स्वीक्रियते इति परिग्रहः । सबाह्याभ्यन्तरक्षेत्रादिः । क्रोधादिः चतुर्विंशतिधा। तस्य ध्यानं तस्मिन् । गतविभवस्य विभवार्थे चारुदत्तस्येव, मुनिपतिमुनिं रुन्धन्तः कुञ्जिकस्येव।।५०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० परिग्गहं झाणे - परिग्रहो धन-धान्यादिरूपस्तस्य ध्यानम्, गतविभवस्य विभवार्थे चारुदत्तस्येव, मुनिपतिमुनिं रुन्धतः कुञ्जिकस्येव वा तस्मिन् ।।५०।।

गुण० परिगृह्यते स्वीक्रियत इति परिग्रहः । स बाह्याभ्यन्तरः क्षेत्रादिः क्रोधादिश्च ।।५०।।

५१-परपरिवायंझाणे [परपरिवादध्याने]

भुव० परेषां परिवादः परपरिवादः परविकत्थनम् । परं प्रत्यसद्भूतदोषस्याविष्करणं तस्य ध्यानं परपरिवादध्यानं तस्मिन् । सुभद्रां प्रति तत्स्वश्रूननान्दृणामिव ।।५१।।

सोम० परपरिवायं झाणे - परं प्रत्यसद्भूतदोषाविष्करणं परपरिवादस्तस्य ध्यानम्, सुभद्रां प्रति तत् श्वश्रू-ननान्दृणामिव तस्मिन् ।।५१।।

गुण० परेषां परिवादः परपरिवादः परविकत्थनम् ।।५१।।

५२-परदूसणंझाणे [परदूषणध्याने]

भुव० परेषां दूषणं परदूषणं परेणाकृतमपि तं प्रत्यात्मदोषचटापनम् ।।५२।।

सोम० परदूसणं झाणे - परस्याऽनपराधिनोऽप्यात्मकृतदोषचटापनं परदूषणम्, अङ्गऋषिं प्रति "ज्योतिर्यशाऽनेन हता" इति स्वदोषं चटापयतो रुद्रकस्येव तस्मिन् ।।५२।।

गुण० परेषां दूषणं परेणाकृतमपि तं प्रत्यात्मदोषचटापनम् ।।५२।।

५३-आरंभंझाणे [आरम्भध्याने]

सोम० आरंभं झाणे - आरम्भः परोपद्रवस्तस्य ध्यानम्, कुरुडोत्कुरुडयोरिव, द्वीपायनस्येव वा तस्मिन् ।।५३।।

गुण० आरम्भः परोपद्रवस्तस्य ध्यानम् ।।५३।।

५४-संरंभंझाणे [संरम्भध्याने]

सोम० संरंभ झाणे - संरम्भो विषयादिषु तीव्राभिलाषस्तस्य ध्यानम्, जनन्युपरोधतो व्रतं पालयतोऽपि विषयाभिलाषतः क्षुल्लककुमारस्येव तस्मिन् ।।५४।।

गुण० संरम्भः संकल्पः, विषयादिषु तीव्राभिलाषः ।।५४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

५५-पावाणुमोयणंझाणे [पापानुमोदनध्याने]

भुव० एतेषां चतुर्णाम् उदाहरणानि उपरितनपुस्तके न सन्ति ।।५५।।

सोम० पावाणुमोयणं झाणे - पापं परस्त्रीसेवादि तस्यानुमोदनं पापानुमोदनम्, भव्यमनेनकृतमिति वदनं तस्य ध्यानम्, राजाऽन्तःपुराऽपराधिनः सनेपथ्यहतस्य "धन्य एष" इत्यनुमोदकजनानामिव तस्मिन् ।।५५।।

गुण० पापानुमोदनं भव्यमनेनकृतमिति वदनम् ।।५५।।

५६-अहिगरणंझाणे [अधिकरणध्याने]

भुव० अधिक्रियते दुर्गतौ क्षिप्यते आत्मानेनेत्यधिकरणम् । कर्मोपादानहेतुः कूपारामारहट्टघरट्टयन्त्रादिः तस्य ध्यानम् । वापीध्यानरतस्य नन्दमणिकारस्येव ।।५६।।

सोम० अहिगरणं झाणे - अधिक्रियते दुर्गतौ क्षिप्यते आत्माऽनेनेति अधिकरणं पापोत्पत्तिहेतुः स्थानं तस्य ध्यानमधिकरणध्यानम्, वापीध्यानतत्परस्य नन्दमणिकारस्येव तस्मिन् ।।५६।।

गुण० अधिक्रियते दुर्गतौ क्षिप्यते आत्मानेनेत्यधिकरणं कर्मोपादानहेतुः ।।५६।।

५७-असमाहिमरणंझाणे [असमाधिमरणध्याने]

भुव० समाधानं समाधिर्न समाधिरसमाधिना एव म्रियतामिति चिन्तनमसमाधिध्यानं तस्मिन् । स्कन्दकाचार्यं प्रति क्षुल्लकं प्रथमं यन्त्रपीलयतः पालकस्येव ।।५७।।

सोम० असमाहिमरणं झाणे - असमाधिना एष म्रियतामिति चिन्तनमसमाधिमरणध्यानम्, स्कन्दकाचार्यं प्रति क्षुल्लं प्रथमं यन्त्रे पीलयतोऽभव्यपालकस्येव तस्मिन् ।।५७।।

५८-कम्मोदयपच्चयंझाणे [कर्मोदयप्रत्ययध्याने]

भुव० कर्म्मणां उदयः प्रत्ययो हेतुर्यस्य ध्यानस्य तत् कर्मोदयप्रत्ययेन ध्यानं कर्मोदयप्रत्ययं ध्यानं तस्मिन् । प्रथमं शुभपरिणामवतोऽपि कुतश्चित् कारणात् कर्मोदयतोऽशुभपरिणामत्वं पर्यन्तकाले विष्णोरिव ।।५८।।

सोम० कम्मोदयपच्चयं झाणे - कर्मणामुदयः प्रत्ययो हेतुर्यस्य ध्यानस्य तत्, कर्मोदयप्रत्ययं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कर्मोदयप्रत्ययेन वा ध्यानं कर्मोदयप्रत्ययध्यानम्, प्रथमं शुभपरिणामवतोऽपि पश्चात् कुतश्चित् कर्मोदयतोऽशुभपरिणामत्वं पर्यन्तकाले विष्णोरिव तस्मिन् ।।५८।।

चूर्ण० कर्मोदयप्रत्ययं कर्मोदयप्रत्ययेन ध्यानम् । प्रथमं शुभपरिणामवतोऽपि पश्चात् कुतश्चित् कारणात् कर्मोदयतोऽशुभपरिणामत्वं पर्यन्तकाले विष्णोरिव ।।५८।।

५९-इड्ढिगारवंझाणे [ऋद्धिगौरवध्याने]

भुव० ऋद्धौ च वृद्धौ अर्धनम् ऋद्धिः । राज्यैश्वर्यादिप्राप्तिः । गुरोर्भावः कर्म वा गौरवं तच्च द्विधा द्रव्यतो भावतश्च द्रव्यतो वज्रादेर्भावतोऽभिमानलोभलक्षणाशुभभाववत आत्मनः । तत्राऽपि भावगौरवम् ऋद्ध्या आचार्यत्वादिप्राप्तिलक्षणया वा गौरवम् ऋद्धिगौरवम् । आचार्यत्वादिप्राप्तलक्षणया [ऋद्ध्या] अभिमानद्वारेण गौरवम् । तदप्राप्तौ वा तत्प्रार्थनाद्वारेण आत्मनोऽशुभभावगौरवम् ऋद्धिगौरवं तस्य ध्यानं तस्मिन् दशार्णभद्रस्येव ।

एगत्तो हिमवंतो अन्नत्तो साइवाहणो राया ।
समभारभरुक्कंता तेण न पल्लट्टए पुहवी ।।१।। इत्येवं वदतो वा ।।

प्रतिष्ठानपुराधिपतेरिव ।।५९।।

सोम० इड्ढिगारवं झाणे - राज्यैश्वर्यादिरूपा ऋद्धिस्तया गौरवम् आत्मोत्कर्षरूपं तस्य ध्यानम्, दशार्णभद्रस्येव तस्मिन् ।।५९।।

चूर्ण० ऋद्धिः राज्यैश्वर्यादिप्राप्तिः । गुरोर्भावो गौरवं तच्च द्विधा द्रव्यभावतो द्रव्यतो वज्रादेर्भावतोऽभिमानतः।।५९।।

६०-रसगारवंझाणे [रसगौरवध्याने]

भुव० रस्यते आस्वाद्यते पुष्ट्यर्थमिति रसः । रसनेन्द्रियाप्यायिकस्तिक्तादिः । स च पञ्चधा - तत्र श्लेष्मनाशकृत्तिक्तः । विषाद्युच्छेदनकृत्कटुकः । अन्नरुचिस्तम्भन-कृत्कषायः । आश्रवणक्लेदनकृदाम्लः । आह्लादनतृंहणकृन्मधुरः । तथा वर्णपञ्चको-त्कर्षकारिलाक्षासारणमिव सर्वरसोत्कर्षकृत्संसर्गजः षष्ठो लवणरसः । रसस्य गौरवं तस्य ध्यानं तस्मिन् । रसगर्वो यथा मम रसवतीरसास्तथा किमन्यस्याऽपि सन्तीत्यभिमानः, उदकज्ञातोक्तजितशत्रुराजस्येव सुबुद्धिं प्रति रसान् प्रशंसतः ।।६०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० रसगारवं झाणे - रस्यते आस्वाद्यते पुष्ट्यर्थमिति रसः रसनेन्द्रियाप्यायक रसस्तेन गौरवम्, "यथा मम रसवतीरसास्तथा किमन्यस्यापि सन्तीत्यभिमानरूपं" तस्य ध्यानम्, उदक-ज्ञातोक्तजितशत्रुराजस्येव सुबुद्धिमन्त्रिणोऽग्रे रसवतीरसान् प्रशंसतः, तस्मिन् ।।६०।।

चुण० रस्यते आस्वाद्यते पुष्ट्यर्थमिति रसः रसनेन्द्रियाऽऽप्यायिकस्तिक्तादिः ।।६०।।

६१-सायागारवंझाणे [सातागौरवध्याने]

भुव० सातं सुखं तेन गौरवं तस्य ध्यानं तस्मिन् । सातगर्वो यथा अहमेव सुखीत्यभिमानः, शशिराजस्येव 'नरयत्थो ससिराया' इत्यस्मिन् प्रबन्धे ।।६१।।

सोम० सातागौरवं झाणे - सातं सुखं तेन गौरवं गर्वो यथाऽहमेव सुखीत्यभिमानस्तस्य ध्यानम्, "नरयत्थो ससिराय" इति गाथोक्तशशिराजस्येव तस्मिन् ।।६१।।

चुण० सातं सुखं तेन गौरवं तस्य ध्यानं तस्मिन् सातगर्वो यथा-अहमेव सुखीत्यभिमानः ।।६१।।

६२-अवेरमणंझाणे [अविरमणध्याने]

भुव० विरतिर्विरमणं न विरमणमविरमणम् । तस्य ध्यानं तस्मिन् । यथा - मा भूत् पुत्रयोर्विरतिबुद्धिरित्यङ्गीकृतामपि देशविरतिं परित्यज्य प्रान्तग्रामसमाश्रितयोः ।

एए पव्वइयागादिक्करुवाणि घेत्तुं मारंति ।
पच्छा तेसिं मंसं खाइंति तं मा तुब्भे एएसिं अल्लियह ।।

इत्येवं पुनः पुनस्तनयविहितविप्रतारणयोर्भृगुयशयोरिव । मूकजीवदेवेन प्रतिबोध्य-मानस्याऽपि मुहुर्मुहुर्विरतिं परित्यजतस्तद्भ्रातुरिव वा, मेतार्यस्येव वा ।।६२।।

सोम० अवेरमणं झाणे - न विरमणमविरमणं तस्य ध्यानम्, मा भूत् पुत्रयोर्विरतिबुद्धिरित्य-ङ्गीकृतामपि देशविरतिं परित्यज्य प्रान्तग्राममाश्रितयोः, "एते साधवो मांसाशिनो ! राक्षसा! इत्येतत्पार्श्वे न गन्तव्यम्", इति तनयविहितविप्रतारणयोर्भृगुयशयोरिव, मूकजीवस्यापि देवेन प्रतिबोध्यमानस्यापि मुहुर्मुहुर्विरतिं परित्यजतस्तद्भ्रातुरिव मेतार्यस्येव वा तस्मिन् ।।६२।।

चुण० विरतिर्विरमणं न विरमणम् [अविरमणं] तस्य ध्यानं तस्मिन् ।।६२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

६३-अमुत्तिमरणंझाणे [अमुक्तिमरणध्याने]

भुव० मोचनं मुक्तिः संसाराच्छिवगतिरूपा न मुक्तिरमुक्तिस्तस्य मरणममुक्तिमरणं तस्य ध्यानं तस्मिन्। यथा मुक्तिविघ्नकरमेतन्निदानं मा कुरु । पुनः पुनश्चित्रेण निवार्यमाणस्यापि एतां विभूतिमननुभूय मुक्तिमपि न स्पृहयेयमित्याद्यशुभभावेन निदानं कुर्वतः संभूतस्येव यथा वा लोके वंशार्जुनस्योक्तिः ।

वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम् ।
निर्वाणमपि मन्येहमन्तरायं जयश्रियः ।। इति [किरात-११-६९] ।।६३।।

क्वचित्पाठे रूवंझाणे इत्यधिकमपि पदं दृश्यते । तत्र रुप्यते निरीक्ष्यते आदर्शादिष्विति रूपं तस्य ध्यानं तस्मिन् तच्च द्विधा स्वरूपध्यानं पररूपध्यानं वा । तत्र मदीयरूपं शोभनमिति देवाभ्यां प्रशंसितस्य सनत्कुमारस्येव । पररूपध्यानं तु गोपदारकाणामिवाभीरकन्यारूपातिशयात्क्षिप्तचेतसां तच्छकटनिकटउत्पथेन शकटखेटनेन भग्ननिजशकटानाम् । चण्डप्रद्योतस्य वा अङ्गारवत्यादिरूपाणि चित्रफलकलिखितानि वीक्षमाणस्य पररूपध्यानं भवति । तदेतानि त्रिषष्ठान्यपि ध्यानान्यार्त्तरौद्रस्वभावानीति मिथ्यादुष्कृतविषयाणि ।

सोम० अमुत्तिमरणं झाणे - मुक्तिर्मोक्षगतिर्न मुक्तिरमुक्तिः संसारसुखाभिलाष इत्यर्थः, तेन मरणं तस्य ध्यानम्, "मुक्तिविघ्नकरम् एतन्निदानं मा कुरु" इति पुनः पुनश्चित्रेण भ्रातृसाधुना निवार्यमाणस्यापि "एतां चक्रिविभूतिमननुभूय मुक्तिमपि न स्पृहयेयम्," इत्याद्यशुभभावेन निदानं कुर्वतः संभूतस्येव तस्मिन् ।।६३।।

एतानि त्रिषष्टिरपि ध्यानानि आर्त्तरौद्रस्वभावानि मिथ्यादुष्कृतविषयाणि । अनुस्वाराश्च सर्वध्यानपदेषु अलाक्षणिका ज्ञेयास्तल्लोपश्च कार्यः ।

द्युण० मुक्तिः संसाराच्छिवगतिरूपा । न मुक्तिरमुक्तिस्तस्या मरणममुक्तिमरणं तस्य ध्यानं यथा मुक्तिविघ्नकरमेतन्निदानं मा कुरु [इति] पुनः पुनर्निवार्यमाणस्यापि एतां विभूतिम्[न]नुभूय मुक्तिमपि न स्पृहयेयमित्याद्यशुभभावेन निदानं कुर्वतः सम्भूतस्येव ।।६३।।

पसुत्तस्स वा पडिबुद्धस्स वा जो मे कोई देवसिओ राइओ उत्तमट्ठे अइक्कमो वइक्कमो अइयारो अणायारो तस्स मिच्छा मि दुक्कडं ।।११।।

प्रसुप्तस्य वा प्रतिबुद्धस्य वा यो मया कश्चिद्दैवसिको रात्रिक उत्तमार्थेऽतिक्रमो व्यतिक्रमोऽतिचारोऽनाचारस्तस्य मिथ्या मे दुष्कृतम् ।।११।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भुव० अथ **कस्यामवस्थायां** जातानीत्याह - पसुत्तस्स **वा** त्ति **प्रसुप्तस्य** निद्रां **गतस्य** पडिबुद्धस्स **वा प्रतिबुद्धस्य जाग्रत:** । जो मे कओ देवसिओ राइओ **यो मे मया कोऽपि बहुर्वाल्पो वा दिवसे जातो दैवसिको रात्रौ भवो रात्रिक:** । उत्तमट्ठे त्ति **उत्तमार्थे ज्ञानादौ** अइक्कमो त्ति **अतिक्रमणमतिक्रम आधाकर्माद्यामन्त्रणादौ प्रतिश्रवणरूप:** । वइक्कमो त्ति **विशेषेणातिक्रमणं व्यतिक्रम: तस्यैव ग्रहणाय पदभेदरूप:** । अइयारो त्ति **अतीचरणमतीचार आधाकर्मादिग्रहणरूप:** । अणायारो त्ति **आचरणमाचारस्तत्परिहरणपरिष्ठापनरूपो न आचारोऽनाचारस्तद्भक्षणमित्यर्थ:** । **जात इति पदाध्याहार:** । तस्स मिच्छामि दुक्कडं ति **तस्य सर्वस्याऽनाचारस्य मिथ्या दुष्कृतं भवतु यन्मया दुष्कृतं तन्मिथ्या भवतु । अयं च मिथ्यादुष्कृतविधिर्बालपण्डितमरणे, पण्डितमरणे, पण्डितपण्डितमरणे च साधारण एव।**

सोम० अथ कस्यामवस्थायामेतानि ध्यानानि जातानीत्याह- **प्रसुप्तस्य** निद्रां गतस्य, **'पडिबुद्धस्स वा'** प्रतिबुद्धस्य जाग्रतो वा **यो मे** मम **कोऽपि** 'बहुर्वाऽल्पो वा' दिवसे जातो **दैवसिको,** रात्रौ भवो **रात्रिक: 'उत्तमट्ठे'त्ति** उत्तमार्थे ज्ञानादौ । **'अइक्कमो'** अतिक्रमणमतिक्रम आधाकर्माद्यामन्त्रणादौ प्रतिश्रवणरूप:, **'वइक्कमो'** विशेषेणातिक्रमणं व्यतिक्रम आधाकर्मादेर्ग्रहणाय पदभेदरूप:, **'अइयारो'** अतिचार आधाकर्माद्याहारग्रहणरूप:, आचारस्तत्परिहरण-परिष्ठापनरूप:, **'अणायारो'** अनाचारस्तद्भक्षणमित्यर्थ:, जात इति पदाध्याहार**स्तस्य** सर्वस्य प्रागुक्तस्यातिक्रमादे**र्मिथ्या दुष्कृतं** भवतु । यन्मया दुष्कृतं कृतं तन्मिथ्या भवत्वित्यर्थ: । अयं च मिथ्यादुष्कृतविधिर्बालपण्डितमरणे, पण्डितमरणे, पण्डितपण्डितमरणे च साधारण एव ।।११।।

शुभ० कस्यामवस्थायां जातानीत्याह - **प्रसुप्तस्य** निद्रां गतस्य, **प्रतिबुद्धस्य** जाग्रतो **यो मे** मया **कोऽपि** बहुर्वाल्पो **वा दैवसिको रात्रिक:** । **उत्तमार्थे** ज्ञानादौ **अतिक्रम** आधाकर्माद्यामन्त्रणादौ प्रतिश्रवणरूप:, **व्यतिक्रम**स्तस्यैव ग्रहणाय पदभेदरूप:, **अतिचार** आधाकर्मादिग्रहणरूप:, **अनाचार**स्तद्भक्षणमित्यर्थ: । जात इति पदाध्याहार: **तस्य** सर्वस्यानाचारस्य **मिथ्यादुष्कृतं** भवतु ।।११।।

एस करेमि पणामं जिणवरवसहस्स वद्धमाणस्स ।
सेसाणं च जिणाणं सगणहराणं च सव्वेसिं ।।१२।।

एष करोमि प्रणामं जिनवरवृषभस्य वर्द्धमानस्य ।
शेषेभ्यश्च जिनेभ्य: सगणधरेभ्यश्च सर्वेभ्य: ।।१२।।

भुव० अथ साधोरुद्यतविहारेण विहरत: कदाचिद्देवादिकृताऽऽपत्स्यात् । नद्यादौ रोगादौ **वा**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तस्यां जीवितसापेक्षस्य साकारप्रत्याख्यानमाह - एषोऽहं **सर्वसङ्घप्रत्यक्षं** करोमि **विदधामि** प्रणामं **नमस्कारम्** । **कस्य ? वर्त्तमानतीर्थाधिपतेरासन्नोपकारिणः** जिनवरवृषभस्य **सामान्यकेवलिश्रेष्ठस्य** वर्धमानाभिधस्य **देवस्य** । **न केवलमस्य,** शेषाणामपि **वृषभादि**जिनानां **चशब्दादतीतानागतादिजिनानां** च । **कथम्भूतानां जिनानां सह गणधरैर्वर्त्तन्त इति** सगणधरास्तेषां सगणधराणां सर्वेषाम् । **अत्राऽपि चशब्दान्निज[निज]सङ्घसमेतानाम् ।।१२।।**

सोम० अथ साधोरुद्यतविहारिणः कदाचित् देवादिकृतापत् स्यात्, नद्यादौ रोगादौ वाऽऽपद् भवेत्, तस्यां जीवितसापेक्षः सन् यथा साकारप्रत्याख्यानं कुरुते तथा विधिमाह- **'एस करेमि'** एषोऽहं सर्वसङ्घप्रत्यक्षं करोमि । कम् ? **प्रणामं** नमस्कारम्, कस्य ? वर्तमानतीर्थाधिपते-**र्जिनवरवृषभस्य** सामान्यकेवलिश्रेष्ठस्य **श्रीवर्धमानस्य,** तथा **शेषाणामपि** ऋषभादि**जिनानां** चशब्दादतीतानागतजिनानां च कथम्भूतानाम् ? सह गणधरैर्वर्त्तन्त इति **सगणधरास्तेषां सर्वेषां** पुनश्चशब्दान्निजनिजसङ्घयुतानाम् ।।१२।।

गुण० एषोऽहं सर्वसङ्घप्रत्यक्षं **करोमि** नमस्कारं **जिनवरवृषभस्य** सामान्यकेवलिश्रेष्ठस्य **वर्धमानाभिधस्य शेषाणामपि** वृषभादि**जिनानां** चशब्दादतीतानागतादिजिनानां, **सह गणधरै**र्वर्त्तन्त इति **सर्वेषाम**त्रापि चशब्दान्निजनिजसङ्घसमेतानाम् ।।१२।।

सव्वं पाणारंभं पच्चक्खामि त्ति अलियवयणं च ।
सव्वमदिन्नादाणं मेहुन्न परिग्गहं चेव ।।१३।।

सर्वं प्राणारम्भं प्रत्याख्याम्यलीकवचनं च ।
सर्वमदत्तादानं मैथुनं परिग्रहं चैव ।।१३।।

भुव० अथ **तीर्थकृत्गणधरकृतनमस्कारो व्रतोच्चारं कुर्वन्निदमाह- प्राणानामारम्भं** सर्वं निरवशेषं पच्चक्खामित्ति प्रत्याचक्षे **"पढमे भंते महव्वए पाणाइवायाओ वेरमणं, सव्वं भंते पाणाइवायं पच्चक्खामीत्यादि" व्रतदण्डकमुच्चरतीत्यर्थः** । अलीकवचनं **प्रत्याख्यामि मृषावादमित्यर्थः** । सर्वमदत्तादानं **स्वामि-जीव-तीर्थंकर-गुरुभिरवितीर्णं तृतीयव्रत-मित्यर्थः । सर्वं मिथुनस्य स्त्रीपुंसलक्षणस्य भावं कर्म वा** मैथुनम**ब्रह्म तन्मनोवाक्कायकृत-कारितानुमतिभिरौदारिकवैक्रियशरीरविषयैरष्टादशधा । सर्वं** परिग्रहं **चतुर्विंशतिधा** । चैव **शब्दात् शेषाणि स्थानान्यपि प्रत्याख्यामीत्यर्थः ।।१३।।**

सोम० अथ कृतनमस्कारो व्रतोच्चारं करोति । प्राणानाम् आरम्भं विनाशादिरूपं **प्राणारम्भं सर्वं** निरवशेषं **प्रत्याचक्षे** "पढमे भंते महव्वए..." इत्यादिव्रतदण्डकमुच्चरतीत्यर्थः । एव-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मलीकवचनं च सर्वं मृषावादं प्रत्याख्यामि **सर्वं** स्वाम्यदत्तजीवादत्तादिभेदभिन्न**मदत्तादानं,** सर्वशब्दोऽग्रेऽपि योज्यते, मिथुनस्य स्त्री-पुंसलक्षणस्य कर्म **मैथुन**मब्रह्म तत् सर्वमौदारिक-वैक्रियविषयं, मनोवाक्कायकृतकारितानुमतिभेदभिन्नं, सर्वं **परिग्रहं, चैव**शब्दाच्छेषपापस्थानान्यपि प्रत्याख्यामीति सम्बन्धः ।।१३।।

सम्मं मे सव्वभूएसु, वेरं मज्झ न केणई ।
आसाओ वोसिरित्ताणं समाहिमणुपालए ।।१४।।

साम्यं मे सर्वभूतेषु वैरं मम न केनचित् ।
आशा व्युत्सृज्य समाधिमनुपालये ।।१४।।

भुव० पुनः किं भणति ? **समस्य भावः** साम्यं **समता** मे **मम** सर्वभूतेषु **सर्वजीवेषु** । वैरं **विरोधो** मम न केनापि **साकम्** । आशाः **सर्वाभिलाषरूपा आहारोपकरणगणस्वजन-शरीरादिकाः** व्युत्सृज्य **त्यक्त्वा** समाधिं **मनःस्वास्थ्यं चतुर्विधां वा विनय-श्रुत-तप-आचाररूपं वा**ऽनुपालयेऽ**हमित्यर्थः** ।।१४।।

सोम० पुनः किं भणति ? समस्य भावः **साम्यं** समता **मे** मम **सर्वभूतेषु** सकलजीवेषु अस्तीति शेषः, **वैरं** विरोधो **मम न केनापि** साकम् । **आशा** इच्छा आहारोपकरण-गण-स्वजन-शरीराद्यभिष्वङ्गरूपाः सर्वा **व्युत्सृज्य** त्यक्त्वा **समाधिं** मनःस्वास्थ्यं विनय-श्रुत-तप-आचारसमाधिरूपं वा समाधि**मनुपालयेऽ**हमिति सम्बन्धः।।१४।।

गुण० समस्य भावः **साम्यं** समता **मे** मम **सर्वजीवेषु वैरं** विरोधो **मम** न केनापि साकम्। **आशाः** सर्वाभिलाषरूपा **व्युत्सृज्य** त्यक्त्वा **समाधिं** मनःस्वास्थ्य**मनुपालयेऽ**हं मनोवाक्कायैः ।।१४।।

सव्वं चाऽऽहारविहिं सन्नाओ गारवे कसाए य ।
सव्वं चेव ममत्तं चएमि सव्वं खमावेमि ।।१५।।

सर्वमाहारविधिं च संज्ञा गौरवाणि कषायाश्च ।
सर्वमपि ममत्वं त्यजामि सर्वं क्षमयामि ।।१५।।

भुव० यच्च व्युत्सृजति तदेवाह - सर्वं **चतुर्विधमाहारविधिं त्यजामि** । संज्ञाश्चतस्र **आहार-भय-मैथुन-परिग्रहरूपाः, दश वाहार-भय-मैथुन-परिग्रह-क्रोध-मान-माया-लोभ-लोक-ओघरूपाः । षोडश वा -**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आहारभयपरिग्गहमेहूणसुहदुक्खमोहवितिगिच्छा ।
कोहमणमायलोभे सोगे लोगे य धम्मोधे ।।१।। [प्रवचनसारो०९२५]

तास्सर्वास्त्यजामि । गौरवं **त्रिप्रकारमपि पूर्वं वर्णितम्** । कषायाश्च **षोडशाऽपि** । **सव्वं चेवत्ति । चैवशब्दोऽपिशब्दार्थे** । सर्वमपि **च** ममत्वं **प्रतिबन्धं मूर्च्छां** त्यजामि । सर्वम**पि च दृष्टाभाषितसाधुश्रावकजनं च** क्षमयामी**त्यर्थः** ।।१५।।

सोम० यत् त्यजति तदाह - **सर्वं** चतुर्विध**माहारविधिं** त्यजामि, **संज्ञा**श्चतस्र आहार-भय-मैथुन-परिग्रहरूपाः क्रोधमानादिभेदेन बहुविधा वा त्यजामीति सर्वत्र सम्बन्धः, **गौरवं** त्रिप्रकारं ऋद्ध्यादिरूपं च **कषायाश्च** षोडशाऽपि, चेवशब्दोऽपिशब्दार्थः **सर्वम**पि **च ममत्वं** प्रतिबन्धं मूर्छामित्यर्थः, **त्यजामि** । तथा **सर्व**मपि दृष्टमाभाषितं साधुश्रावकजनं **क्षमयामि** ।।१५।।

गुण० **सर्वं** चतुर्विध**माहारविधिं** त्यजामि । **संज्ञा**श्चतस्र आहारभयमैथुनपरिग्रहरूपाः, दश वाऽऽहारभयमैथुनपरिग्रहक्रोधमानमायालोभलोकओघरूपास्तास्सर्वास्त्यजामि । **गौरवं** त्रिपक्रारम् । **कषायाश्च** षोडशापि । चैवशब्दोऽपिशब्दार्थे **सर्वमपि च ममत्वं** मूर्च्छां **त्यजामि** । **सर्वं** जीवजातं **क्षमयामि** ।।१५।।

हुज्जा इमंमि समए उवक्कमो जीवियस्स जइ मज्झ ।
एयं पच्चक्खाणं विउला आराहणा हेउ (होउ) ।।१६।।

भूयादस्मिन् समये उपक्रमो जीवितस्य यदि मम ।
एतत्प्रत्याख्यानं विपुलाऽऽराधनाहेतुः (भवतु) ।।१६।।

भुव० क्षामणानन्तरं च **किं भणतीत्याह** - भूयाद**स्मिन्नवसरे** । **उपक्रमणं** उपक्रमो जीवितस्य **प्राणधारणस्य** यदि मम **तदेतदेव** प्रत्याख्यानं विपुलाराधनाहेतुर्**भवत्वित्यर्थः** ।।**१६**।।

सोम० क्षामणानन्तरं किं भणतीत्याह - **भूयादस्मिन्नवसरेऽ**स्यामापदीत्यर्थ **उपक्रमो** व्ययो **जीवितस्य** प्राणधारणस्य **यदि मम** तदेतदेव पूर्वकृतं प्रत्याख्यानं विपुलाराधनाहेतुर्भवतीति शेषः । सन्ध्यभावः प्राकृतत्वादथवा **'विउला आराहणा होउ' इति पाठेतदेव प्रत्याख्यानं** विपुलाराधना-हेतुत्वाद् विपुलाराधना भवत्वित्यर्थः ।।१६।।

गुण० भूयादस्मिन्नवसरे **उपक्रमो** व्ययो **जीवितस्य यदि ममैतदेव प्रत्याख्यानं विपुला-राधनाहेतु**र्भवत्वित्यर्थः ।।१६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सव्वदुक्खप्पहीणाणं सिद्धाणं अरहओ नमो ।
सद्दहे जिणपन्नत्तं पच्चक्खामि य पावगं ।।१७।।

प्रक्षीणसर्वदुःखेभ्यः सिद्धेभ्योऽर्हद्भ्यो नमः ।
श्रद्दधे जिनप्रज्ञप्तं प्रत्याख्यामि च पापकम् ।।१७।।

भुव० कृतसाकारप्रत्याख्यानश्च किं भणति ? किञ्च श्रद्धत्त इत्याह ।।१७।।

सोम० कृतसाकारप्रत्याख्यानः किं भणतीत्याह - प्रक्षीणानि सर्वदुःखानि येषां ते तथा तेभ्यः, क्रान्तस्य परनिपातः प्राकृतत्वात् । **सिद्धेभ्यो नमो** नमस्कारोऽस्तु । न केवलं सिद्धेभ्यः **किन्त्वर्हद्भ्यश्च** तीर्थकरेभ्यश्च नमस्कारो भवतु । तथा **श्रद्दधामि जिनप्रज्ञप्तं** सर्वं तत्त्वमिति शेषः, तथा **प्रत्याख्यामि च पापकं** निन्द्यं कर्म सर्वमित्यर्थः ।।१७।।

गुण० प्रक्षीणानि सर्वदुःखानि येषां तेभ्यः **सिद्धेभ्यो** नमोऽस्तु, **अर्हद्भ्यश्च नमोऽस्तु** । **श्रद्दधामि जिनप्रज्ञप्तं** तत्त्वमिति शेषः । **प्रत्याख्यामि च पापकं** निन्द्यं कर्म सर्वमित्यर्थः । उक्तं साकारप्रत्याख्यानम् ।।१७।।

नमुऽत्थु धुयपावाणं सिद्धाणं च महेसिणं ।
संथारं पडिवज्जामि जहा केवलिदेसियं ।।१८।।

नमोऽस्तु धूतपापेभ्यः सिद्धेभ्यश्च महर्षिभ्यः ।
संस्तारं प्रतिपद्ये यथा केवलिदेशितम् ।।१८।।

भुव० नमो **नमस्कारोऽस्तु । धुतं गतं पापमष्टप्रकारं कर्म येषां ते तथा तेभ्यः** सिद्धेभ्यः । **चशब्दात्तीर्थकरेभ्यश्च महर्षीणां गणधरादीनां** महर्षिभ्यः **छट्ठी विभत्तीए भन्नइ चउत्थी इति ज्ञेयम्।** संस्तारकं **रचितदर्भसंस्तारकादिविधिरत्रानशनं [विधिनात्रानशनं] क्रियते तदुपचारात्संस्तारकमनशनं तं** प्रपद्येऽहं यथा केवलिनिदर्शितमिति ।।१८।।

सोम० उक्तं साकारप्रत्याख्यानमथ पण्डितः क्षपको मुक्तजीविताशो भक्तप्रत्याख्यानं कुर्वन् यद् भणति तदाह-**नमो** नमस्कारोऽ**स्तु** । धुतं गतं पापमष्टप्रकारं कर्म येषां ते तथा तेभ्यः **सिद्धेभ्यः** । चशब्दात् तीर्थकरेभ्यश्च तथा महर्षयो गणधरादयस्तेभ्यश्च, चतुर्थीस्थाने षष्ठी प्राकृतवशात् । संस्तारकं दर्भसंस्तारकं दर्भसंस्तारकादिविधिना विधीयमानमुपचारादनशनमुच्यते । तदनशनं **प्रतिपद्ये**ऽहं तथा **केवलिभिर्दर्शितं** प्रकाशितं तं तथेति शेषः ।।१८।।

गुण० अथ पण्डितक्षपको भक्तप्रत्याख्यानं कुर्वन् यद् भणति तदाह-**नमोऽस्तु** धुतं गतं पापमष्टप्रकारं कर्म येषां तेभ्यः **सिद्धेभ्यः** । च शब्दात्तीर्थकरेभ्यश्च, महर्षीणां च गणधरादीनां **महर्षिभ्यः**, छट्ठविभत्तीए भन्नइ चउत्थी इति ज्ञेयम् । **संस्तारकं** रचितदर्भसंस्तारकादिविधिना यदनशनं क्रियते तदप्युपचारतः संस्तारकमनशनं तं **प्रपद्येऽहं यथा केवलिभिर्दर्शितमिति** ।।१८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जं किंचि वि दुच्चरियं तं सव्वं वोसिरामि तिविहेणं ।
सामाइयं च तिविहं करेमि सव्वं निरागारं ।।१९।।

यत् किञ्चिदपि दुश्चरितं तत्सर्वं व्युत्सृजामि त्रिविधेन ।
सामायिकं च त्रिविधं करोमि सर्वं निराकारम् ।।१९।।

भुव० तमङ्गीकुर्वन् किं किमभिधत्ते इत्याह - यत्किमपि दुश्चरितं **विततमतिभिरनासेव्यं** तत्सर्वं व्युत्सृजामि त्रिविधेन **मनसा वाचा कायेन** सामाइयं च तिविहं ति **समानि संयमानि तेषामायो लाभः । समाय एव सामायिकं संयमविशेषं त्रिविधं रूपं सम्यक्त्वश्रुतचारित्र-मित्यर्थः । अथवा त्रिविधं मनोवाक्कायकरणकारापणानुमतिभिः** करोमि सर्वमपि निराकारमा-**काररहितं मरणं चतुर्विंशत्याकारैः[रहितम्]इत्यर्थः** ।।१९।।

सोम० अथ तदनशनमङ्गीकुर्वन् किमभिधत्ते इत्याह - **यत् किमपि दुश्चरितम**कृत्यं साधुनामनासेव्यं **तत् सर्वं व्युत्सृजामि** त्यजामि **त्रिविधेन** मनसा वाचा कायेन च तथा **सामायिकं** चारित्रविशेषं **त्रिविधं** ज्ञानश्रद्धानक्रियारूपं सम्यक्त्वश्रुतसर्वविरतिसामायिकरूपमित्यर्थः । अथवा त्रिविधं मनोवाक्कायकरणकारणाऽनुमतिभिः **करोमि सर्वम**पि **निराकारमा**काररहितं मरणसमयस्य प्रत्यासन्नत्वान्निरपवादमित्यर्थः, पूर्वं तु दर्शनज्ञानादिभिः कल्पिकासेवाविषयैश्चतुर्विंशत्याकारैः सापवादमप्यासीदिति भावः ।।१९।।

गुण० तमङ्गीकुर्वन् किं किमभिधत्त इत्याह - **यत् किमपि दुश्चरितम**कृत्यं साधुभिरनासेव्यं **तत् सर्वं व्युत्सृजामि** । समानि ज्ञानादीनि तेषामायो लाभः **समायः त्रिविधं** ज्ञानश्रद्धानक्रियारूपं **सर्वमपि निराकार**माकाररहितं मरणस्यासन्नत्वान्निरपवादम् ।।१९।।

बज्झं अब्भिंतरं उवहिं सरीराइ सभोयणं ।
मणसा वय-काएहिं सव्वं भावेण वोसिरे ।।२०।।

बाह्यमभ्यन्तरमुपधिं शरीरादि सभोजनम् ।
मनोवाक्कायैः सर्वं भावेन व्युत्सृजामि ।।२०।।

भुव० अन्यच्च यत्करोति तदाह - **बहिर्भवं** बाह्यं **पात्राद्युपकरणम् । अभिरन्तर्भवमभ्यन्तरं कषायादिलक्षणम् ।** उपधिं **परिग्रहं** शरीरादि **च । सह भोजनेन वर्त्तत इति** सभोजनम् । **उपधीयते पोष्यते जीवोऽनेनेत्युपधिः । अथवा उपधीयते जीवो दुर्गतौ स्थाप्यतेऽनेने-त्युपधिविशेषणानि ।** मनोवाक्कायैः सर्वमुपधिं भावतो व्युत्सृजामीत्यर्थः ।।२०।।

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

सोम० पुनर्यत् करोति तदाह - बहिर्भवं **बाह्यं** पात्राद्युपकरणरूपम्, **अभ्यन्तरं** कषायादिलक्षणं तथा शरीरादि च सह भोजनेन वर्त्तत इति **सभोजनम्** । अथवा **उपधिं** किम्भूतम् ? **शरीरादि,** उपधीयते जीवो दुर्गतौ स्थाप्यतेऽनेनाऽयत्नव्यापारितेन इत्युपधिः तं सर्वमुपधिं **मनोवाक्कायैर्भावेन** भावतो **व्युत्सृजामि** त्यजामि । सर्वशब्दाद् विभक्तिलोपः प्राकृतत्वात् ।।२०।।

गुण० **बाह्यं** पात्रादिलक्षणम्, **अभ्यन्तरं** कषायादिलक्षणम् । **उपधिः** परिग्रहं उपधीयते पोष्यते जीवोऽनेनेत्युपधिः **शरीरादि** च **सभोजनं मनोवाक्कायैः सर्वं भावतो व्युत्सृजामि**।।२०।।

सव्वं पाणारंभं पच्चक्खामि त्ति अलियवयणं च ।
सव्वमदिन्नादाणं मेहुण्ण परिग्गहं चेव ।।२१।।

सम्मं मे सव्वभूएसु वेरं मज्झ न केणई ।
आसाओ वोसिरित्ताणं समाहिमणुपालए ।।२२।।

सर्वं प्राणारम्भं प्रत्याख्याम्यलीकवचनं च ।
सर्वमदत्तादानं मैथुनं परिग्रह चैव ।।२१।।

साम्यं मे सर्वभूतेषु वैरं मम न केनचित् ।
आशा व्युत्सृज्य समाधिमनुपालये ।।२२।।

भुव० **इतोऽपि किं करोतीत्याह - नन्विदं गाथाद्वयमग्रेऽप्युक्तं किमिति पुनरुक्तमुक्तम् ? उच्यते - पूर्वं साकारप्रत्याख्यानकर्त्तारमाश्रित्योक्तमिह तु संस्तारकप्रतिपत्तारमाश्रित्योक्तमिति न पौनरुक्त्यम् । तर्हि "एस करेमि" इति गाथा किमिति नोक्ता ? उच्यते- एतस्या अर्थो नमोत्थु धुयपावाणमित्यनयोक्त इति नोक्ता । गाथाद्वयव्याख्यानं तु पूर्ववदेव । समाधिं प्रपद्ये ।।२१-२२।।**

सोम० पुनः किं करोतीत्याह - इदं गाथाद्वयं प्राग् व्याख्यातं तथैव ज्ञेयम् । ननु पुनरेतत् कस्मादुक्तम् ? उच्यते - पूर्वं साकारप्रत्याख्यानकर्त्तारमाश्रित्योक्तम्, इह तु संस्तारकानशनप्रतिपत्तारमाश्रित्योक्तमिति न पौनरूक्त्यम् । तर्हि "एस करेमि पणाम" इति गाथाऽपि किमिति नोक्ता ? उच्यते - एतस्या अर्थो "नमुत्थु धुअपावाणं" इतिगाथया उक्त एवेति नोक्ता ।।२१।।२२।।

गुण० गाथाद्वयव्याख्यानं तु पूर्ववदेव । समाधिं प्रपद्ये ।।२१-२२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

रागं बंधं पओसं च हरिसं दीणभावयं ।
उस्सुगत्तं भयं सोगं रइं अरइं च वोसिरे ।।२३।।

रागं बन्धं प्रद्वेषं च हर्षं दीनभावताम् ।
उत्सुकत्वं भयं शोकं रतिमरतिं च व्युत्सृजामि ।।२३।।

भुव० प्रतिपन्नानशनश्चान्यदपि किमभिधत्त इत्याह - रागमभिष्वङ्गं, बन्धहेतुत्वाद्बन्धं रागलक्षणं बन्धमित्यर्थः । बन्धशब्दः प्रतिपदं योज्यः । प्रद्वेषणं प्रद्वेषस्तं च बन्धं मत्सरमित्यर्थः । हर्षणं हर्षः स्वजनमेलापकादौ सङ्घमेलापकादौ वा मम महती पूजा भविष्यतीति । दीनभावस्य भावो दीनभावता, तां प्रत्यनीकापमानादौ । उत्सुकस्य भावः उत्सुकत्वं पीडोत्पत्तौ झटित्येव यदि म्रियेऽहमित्येवंरूपम् । भयं देवाद्युपसर्गे सति, शोकमिष्टवियोगादौ, रतिं तथाविधानन्दरूपां मनोज्ञशब्दादौ, अरतिं च नोकषाय-मोहनीयोदयजचित्तविकारोद्वेगलक्षणं परीषहोपसर्गादौ व्युत्सृजामीत्यर्थः ।।२३।।

सोम० अथ प्रतिपन्नानशनः किमभिधत्त इत्याह - **रागं** अभिष्वङ्गं किम्भूतम् ? बन्धहेतुत्वाद् **बन्धं** तथा प्रकर्षेण द्वेषः **प्रद्वेषो** मत्सर इत्यर्थः तं च किम्भूतम् ? बन्धं बन्धहेतुं, बन्धशब्दः पदद्वयेऽपि योज्यते राग-द्वेषयोर्द्वयोरपि बन्धनत्वात्, तथा प्रहर्षणं **प्रहर्षः** स्वजनमेलापकादौ सङ्घमेलापकादौ वा मम महती पूजा भविष्यतीति प्रमोदः, दीनो भावो मानसाध्यवसायो यस्यासौ **दीनभावो** दीनभावस्य भावो दीनभावता तां प्रत्यनीकापमानादौ दैन्यमित्यर्थः । उत्सुकस्य भाव **उत्सुकत्वम्,** पीडोत्पत्तौ शीघ्रमेव यदि म्रियेऽहं तदा वरमित्येवंरूपं, **भयं** देवाद्युपसर्गे सति, **शोकमिष्ट**वियोगादौ, **रतिं** मनोऽभिमतक्षेत्रस्थानादिविषयाम्, **अरतिं चा**नभिमतक्षेत्रादिविषयां चित्तोद्वेगलक्षणां **व्युत्सृजामि** त्यजामीत्यर्थः ।।२३।।

गुण० **रागम**भिष्वङ्गं बन्धहेतुत्वाद् **बन्धं,** रागलक्षणं बन्धमित्यर्थः । बन्धशब्दः प्रतिपदं योज्यः । **प्रद्वेषं** मत्सरं, **हर्षः** स्वजनमेलापकादौ मे महती पूजा भाविनी, **दीनभावता** तां प्रत्यनीकापमानादौ । **उत्सुकत्वं** पीडोत्पत्तौ झटित्येव यदि म्रियेऽहमित्येवंरूपं, **भयं** देवाद्युपसर्गे सति, **शोक**मिष्टवियोगादौ, **रतिं** मनोज्ञराज्यादौ, **अरतिं** च चित्तोद्वेगलक्षणां **व्युत्सृजामि** ।।२३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ममत्तं परिवज्जामि निम्ममत्तं उवट्ठिओ ।
आलंबणं च मे आया, अवसेसं च वोसिरे ।।२४।।

ममत्वं परिवर्जयामि निर्ममत्वमुपस्थितः ।
आलम्बनं च मे आत्मा अवशेषं च व्युत्सृजामि ।।२४।।

भुव० तथा - ममैतदित्येवंरूपो भावो ममत्त्वं **प्रतिबन्धं सर्वसारवस्तुष्विति । ज्ञपरिज्ञया** परिजानामि, **प्रत्याख्यानपरिज्ञया** परिहरामि । **किम्भूतः सन्** निर्ममत्वमुपस्थित **आश्रितः** । **तर्हि किमालम्बनतया चिन्तयतीत्याह** - आलम्बनं च **आश्रयो मे मम** आत्मै**वाराधनाहेतुरवशेषं** च **शरीरोपध्यादि** व्युत्सृजामीत्यर्थः ।।२४।।

सोम० तथा ममैतदित्येवंरूपो भावो **ममत्वं** प्रतिबन्धं सर्वमनोऽभिमतवस्तुष्विति शेषः **परिजानामि** ज्ञपरिज्ञया ज्ञात्वा प्रत्याख्यानपरिज्ञया **परिहरामी**त्यर्थः । अहं किम्भूतस्सन् ? **निर्ममत्वं** निस्सङ्गत्व**मुपस्थित** आश्रित इत्यर्थः । तर्हि किमालम्बनतया चिन्तयतीत्याह-**आलम्बनं** चाश्रयोऽवष्टम्भ आधार इत्यर्थः, **मे ममात्मै**वाराधना-हेतुरयमवशेषमपरं शरीरोपध्यादि सर्वं **व्युत्सृजामि** ।।२४।।

गुण० **ममत्वं** प्रतिबन्धं सारवस्तुष्विति ज्ञपरिज्ञया **परिजानामि** प्रत्याख्यानपरिज्ञया परिहरामि । **निर्ममत्वमुपस्थित** आश्रितः । **आलम्बनं च** आश्रयो **मम आत्मै**वाराधनाहेतुर**वशेषं च** शरीरोपध्यादि **व्युत्सृजामि** ।।२४।।

आया हु महं नाणे, आया मे दंसणे चरित्ते य ।
आया पच्चक्खाणे, आया मे संजमे जोगे ।।२५।।

आत्मैव मम ज्ञाने आत्मा मे दर्शने चारित्रे च ।
आत्मा प्रत्याख्याने आत्मा मे संयमे योगे ।।२५।।

भुव० अथ केषु विषयेषु आत्मा **आलम्बनं** विधेय इत्याह - अतति सततं गच्छति तासु तासु योनिष्वात्मा । **स** मम ज्ञानविषये **आलम्बनं** हु **स्फुटं भवतु** । आत्मा मे दर्शने **सम्यक्त्वे आलम्बनं** चारित्रेऽपि **चात्मैव** । **तथा** प्रत्याख्यानेऽपि **भक्तपरिज्ञारूपे** संयमे **च सर्वविरत्यङ्गीकाररूपे** । योगे च **प्रशस्तमनोवाक्कायरूपे ममात्मैवालम्बनम्** । **यत एतत्** - साहाय्यसाध्यानि ज्ञानदर्शनचारित्राणि तानि चात्मनः कदाचिदपि न भिन्नानि । अत आत्मोपादाने तान्युपात्तानि ।।२५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० अथ केषु कार्येष्वयमात्माऽऽलम्बनं विधेय इत्याह - अतति सततं गच्छति तासु तासु योनिषु इति **आत्मा,** स **मम ज्ञाने** ज्ञानविषये आलम्बनं सहाय इत्यर्थः, **'हु'** स्फुटं भवतु इति शेषः, **आत्मा मे दर्शने** सम्यक्त्वे **चारित्रेऽपि** चालम्बनं तथा **प्रत्याख्याने** भक्तपरिज्ञारूपे **संयमे** च सर्वविरत्यङ्गीकाररूपे **योगे च** प्रशस्तमनोवाक्कायव्यापाररूपे मम आत्मैवालम्बनम् । यत एतत् साहाय्यसाध्यानि ज्ञानदर्शनचारित्राणि तानि चात्मनः कदाचिदपि न भिन्नानि । अतः प्राग् गाथायां 'आलंबणं च मे आया' इत्यत्र आत्मोपादानेन तान्यप्युपात्तानि द्रष्टव्यानि ।।२५।।

गुण० आत्मा मम **ज्ञान**विषये आलंबनं 'हु' स्फुटं भवतु । **दर्शने चारित्रेऽपि** चात्मैव तथा **प्रत्याख्यानेऽपि** भक्तपरिज्ञारूपे **संयमे** सर्वविरतिरूपे प्रशस्तयोगत्रयरूपे ममात्मैवालम्बनम् । यत एतत्साध्यानि ज्ञानदर्शनचारित्राणि तानि चात्मनः कदाचिन्न भिन्नानि आत्मोपादाने तान्यप्युपात्तानि ।।२५।।

एगो वच्चइ जीवो, एगो चेवुववज्जए ।
एगस्स चेव मरणं, एगो सिज्झइ नीरओ ।।२६।।

एको व्रजति जीवः एकश्चैवोत्पद्यते ।
एकस्य चैव मरणम् एकः सिध्यति नीरजस्कः ।।२६।।

भुव० एवं च परित्यक्तसमस्तबाह्याभ्यन्तरोपधिक एकत्वभावनां भावयन्निदमाह - एकः **स्वजनधनादिविरहितो** व्रजति जीवो **भवान्तरम्** । एक एव च उत्पद्यते **जन्मतया** । एकस्यैव मरणं **भवति** । एक **एव च** निष्कर्मा **कर्मरजोरहितः** सिद्धयति **जीवः** ।।२६।।

सोम० अथ निर्ममत्वाय एकत्वभावनां भावयति - **एकः** स्वजनधनादिरहितो **व्रजति जीवो** भवान्तरमिति शेषः, **एक एव चोपपद्यते** मनुष्यत्वादिरूपतया; **एकस्यैव मरणं** भवति, **एक** एव च कर्मरजोरहितः सन् **सिध्यति** जीवः । भवान्तरगमनस्य मरणस्य चैकार्थत्वेऽपि पृथगुपादान-मेकत्वभावनोत्कर्षपोषार्थं नानादेशजविनेयानां व्यक्त्यार्थप्रतिपादनार्थं वा ।।२६।।

एगो मे सासओ अप्पा नाणदंसणसंजुओ ।
सेसा मे बाहिरा भावा सव्वे संजोगलक्खणा ।।२७।।

एको मे शाश्वत आत्मा ज्ञानदर्शनसंयुतः ।
शेषा मे बाह्या भावाः सर्वे संयोगलक्षणाः ।।२७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भुव० एक **एवात्मा** मे **मम शश्वद्भवनाद् गमनाच्च** शाश्वत: **सहचारी [आत्मा]** ज्ञानदर्शनयुक्त:। शेषा **ये केचन** मम बाह्या भावा: **पदार्था: पुत्रकलत्रादिकास्ते** सर्वे संयोगलक्षणा **एव कृत्रिममेलापका एव । येषां संयोगस्तेषामवश्यंभावी वियोग इति परमार्थ:** ।।२७।।

सोम० **एक** एव **मे** मम **आत्मा** शश्वद् भवनात् **शाश्वत:** सहचारी **ज्ञानदर्शनसंयुक्त:** स एव मदीय इत्यर्थ:। **शेषा** ये केचन **मे** मम **बाह्यभावा:** पदार्था: पुत्र-कलत्र-मित्र-बान्धवादिकास्ते **सर्वे** संयोजनं संयोग: स एव लक्षणं येषां ते तथा कृत्रिममेलापका इव न तु शाश्वता:, येषां संयोगस्तेषामवश्यंभावी वियोग इतिहेतोर्न मदीयास्ते इति परमार्थ: ।।२७।।

संजोगमूला जीवेणं पत्ता दुक्खपरंपरा ।
तम्हा संजोगसंबंधं सव्वं भावेण [तिविहेण] वोसिरे ।।२८।।

संयोगमूला जीवेन प्राप्ता **दु:खपरम्परा ।**
तस्मात्संयोगसम्बन्धं सर्वं भावेन [त्रिविधेन] व्युत्सृजामि ।।२८।।

भुव० अथ कथं वियोगदु:खानीत्याह - संयोग एव मूलं यासां ता: संयोगमूला जीवेन **सांसारिकप्राणिना** प्राप्ता **अनुभूता** दु:खपरंपरा **अनिष्टकष्टश्रेणय: । यस्मादेवं** तस्मात्**कारणात्**संयोगसम्बन्धं **समवायाभिलाषं** सर्वं भावेन **स्वाभिप्रायेण** व्युत्सृजामि ।।२८।।

सोम० संयोगो नानाभवेषु पुत्रकलत्रमित्रशरीरादिसम्बन्धरूप:, स एव मूलं यासां ता: **संयोगमूला जीवेन** सांसारिकप्राणिना **प्राप्ता** अनुभूता **दु:खपरम्परा** जन्ममरणेष्टवियोगानिष्ट-संयोगादिरूपा असङ्ख्यकष्टश्रेणय:, यस्मादेवं **तस्मात्** कारणात् संयोगस्य सम्बन्धोऽभिलाष: **संयोगसम्बन्धस्तं सर्वं भावेन** मनोवाक्कायेन स्वाभिप्रायेण **व्युत्सृजामि** त्यजामि ।।२८।।

मूलगुण उत्तरगुणे जे मे नाऽऽराहिया पमाएणं ।
तमहं सव्वं निंदे पडिक्कमे आगमिस्साणं ।।२९।।

मूलगुणा उत्तरगुणा ये मया नाऽऽराधिता: प्रमादेन ।
तदहं सर्वं निन्दामि प्रतिक्रमाम्यागमिष्याणाम् ।।२९।।

भुव० एवं व्युत्सृष्टममत्वेऽपि प्रतिक्रान्तमूलोत्तरगुणोऽपि पुन: किमाचष्ट इत्याह - मूलगुणा: **प्राणातिपातविरमणादय** उत्तरगुणा: **पिण्डविशुद्ध्यादयस्ततो द्वन्द्व: । ये मूलोत्तरगुणा** मया नाराधिता न **सम्यक् प्रतिपालिता:** प्रमादेनाज्ञानादिनाऽष्टप्रकारेण

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदहमानाराधनं सर्वं **निरवशेषं** निन्दामि **आत्मसाक्षिकं मिथ्यादुष्कृतं ददामि** । आगमिष्याणां **आगामिनां मूलोत्तरगुणानां विराधनां** प्रत्याख्यामि । **यतोऽतीतस्य निन्दा, वर्त्तमानस्य संवरणमनागतस्य प्रत्याख्यानमभाणीति** ।।२९।।

सोम० अथ प्रमादप्रतिक्रमणमाह - **मूलगुणाः** प्राणातिपातविरमणादय **उत्तरगुणाः** पिण्डविशुद्ध्यादयस्ततो द्वन्द्वः, **ये** मूलोत्तरगुणा **मया नाऽऽराधिता** न सम्यक् पालिताः **प्रमादेनाऽज्ञानाद्यष्टविधेन तदहमनाराधनं सर्वं** निरवशेषं **निन्दाम्याऽऽत्मसाक्षिकं** मिथ्यादुष्कृतं ददामि **आगमिष्याणामुत्तरकालसम्भाविनां** मूलोत्तरगुणानां विराधनां **प्रत्याख्यामि** नियमगोचरीकुर्वे । यतोऽतीतस्य निन्दा, वर्तमानस्य संवरणम्, अनागतस्य प्रत्याख्यानं चागमयुक्तमिति भावार्थः ।।२९।।

गुण० मूलगुणाः प्राणातिपातादयः **उत्तरगुणाः** पिण्डविशुध्यादयः **ये मया नाराधिता** न सम्यक् परिपालिताः **प्रमादेन तदहमनाराधनं सर्वं** निरवशेषं **निन्दाम्यात्मसाक्षिकं आगमिष्याणामा**गामिनां मूलोत्तरगुणानां विराधनां **प्रत्याख्यामि** ।।२९।।

सत्त भए अट्ठ मए सन्ना चत्तारि गारवे तिन्नि ।
आसायण तेत्तीसं रागं दोसं च गरिहामि ।।३०।।

सप्तभयानि अष्ट मदान् संज्ञाः चतस्रः गौरवाणि त्रीणि ।
आशातनात्रयस्त्रिंशतं रागं द्वेषं च गर्हामि ।।३०।।

भुव० अन्यदपि यत्प्रतिक्रामति तदाह - **इहपरलोकादानाकस्मादाजीविकामरणाश्लोकभयानि** सप्त । अष्टौ **जातिकुलबलरूपतपऐश्वर्यलाभश्रुतरूपान्** मदान् । संज्ञा **आहार-भय-परिग्रह-मैथुनरूपाश्चतस्रः** । गर्वान् त्रीन् **ऋद्धि-रस-सातरूपान्** । आशातना **अर्हदाद्या गुरुसत्का वा** त्रयस्त्रिंशत् । रागं द्वेषं च गर्हामि **जुगुप्स इत्यर्थः** ।।३०।।

सोम० अन्यदपि यत् प्रतिक्रामति तदाह - इहपरलोकाऽऽदानाऽकस्मादाजीविकामरणाश्लोका इति **सप्तभयानि** । **अष्टौ मदान्** जातिकुलबलरूपतपःश्रुतलाभैश्वर्यरूपान्, **संज्ञाश्चतस्र** आहारभयमैथुनपरिग्रहरूपाः, **गर्वान् त्रीन्** ऋद्धिरससातरूपान्, **आशातना** अर्हदाद्याः प्रतिक्रमणसूत्रोक्ता गुरुसत्का वा **त्रयस्त्रिंशत्, रागं द्वेषं च गर्हामि** ।।३०।।

गुण० भयानि सप्तानि । अष्टौ जात्यादीन् **मदान् संज्ञा** आहाराद्याः **चतस्रः । गर्वान् त्रीन्** ऋध्यादीन् । **आशातनाः त्रयस्त्रिंशत् रागं द्वेषं च गर्हामि** जुगुप्सें ।।३०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अस्संजममन्नाणं मिच्छत्तं सव्वमेव य ममत्तं ।
जीवेसु अजीवेसु य तं निंदे तं च गरिहामि ।।३१।।

असंयममज्ञानं मिथ्यात्वं सर्वमेव च ममत्वम् ।
जीवेष्वजीवेषु च तन्निन्दामि तच्च गर्हामि ।।३१।।

भुव० असंयमं **विराधनास्वभावमेकविधम्,** अज्ञानं **मूढतारूपमेकभेदमेव,** मिथ्यात्वं **विपर्ययरूपं तदप्येकविधम् । तथा** सर्वामेव च ममतां **केषु विषयेषु ?** जीवेषु **पुत्रकलत्रगोअश्वादिषु,** अजीवेषु **हिरण्यवस्त्रादिषु । तत्सर्वं** निन्दाम्यात्म**साक्षिकं** गर्हामि **गुरुसाक्षिकं यदनाभोगादिना न प्रतिक्रान्तमित्यर्थः ।।३१।।**

सोम० तथा **असंयमं** विराधनास्वभावमेकविधम्, **अज्ञानं** मूढतारूपमेकविधमेव, **मिथ्यात्वं** विपर्ययरूपमेकविधमेव सामान्येन तथा **सर्वामेव ममतां** केषु ? **जीवेषु** पुत्रकलत्रगोअश्वादिषु, **अजीवेषु च** हिरण्यवस्त्रादिषु **तत्** सर्वं **निन्दाम्यात्मसाक्षिकम्, गर्हामि** गुरुसाक्षिकम्, यदनाभोगादिना न प्रतिक्रान्तमित्यर्थः ।।३१।।

गुण० **असंयमं** विराधनास्वभावमेकविधम्, **अज्ञानं** मूढतारूपमेकभेदमेव । **मिथ्यात्वं** विपर्ययरूपं तदप्येकविधम् । **सर्वामेव ममतां** केषु ? **जीवेषु** गोअश्वादिषु **अजीवेषु** हिरण्यादिषु ।।३१।।

निंदामि निंदणिज्जं गरिहामि य जं च मे गरहणिज्जं ।
आलोएमि य सव्वं अब्भिंतर बाहिरं उवहिं ।।३२।।

निन्दामि निन्दनीयं गर्हामि च यच्च मे गर्हणीयम् ।
आलोचयामि च सर्वमभ्यन्तरं बाह्यमुपधिम् ।।३२।।

भुव० न केवलमेतदन्यदप्याह निन्दामि निन्दनीयम**संयमकरणादि,** गर्हामि यच्च मे **मम** गर्हणीयं **जुगुप्सितं पिण्डग्रहणादि । तथा** आलोचयामि **च गुरोर्निवेदयामि ।** सर्वं **निन्दनीयं गर्हणीयं तथा सह अभ्यन्तरेण वर्त्तत इति** साभ्यन्तरा **तां । बहिर्भवा** बाह्या, **ताम्** उपधिं, **मायां मनोदुष्प्रणिधानरूपां बाह्यां प्राणातिपातविषयामित्यर्थः ।।३२।।**

सोम० अथ सामान्यतः सर्वमप्यालोचयतीत्याह - यत् किञ्चि**न्निन्दनीयं** निन्दार्हमसंयमकरणादि तन्निन्दामि, **यच्च मे** मम **गर्हणीयं** गर्हार्हं सदोषपिण्डग्रहणादि तत्सर्वं **गर्हामि** च

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथाऽऽलोचयामि गुरोर्निवेदयामि **सर्वं** पूर्वोक्तं निन्द्यं गर्ह्यं **च** तथा **उपधिं** मायां चालोचयामि **साभ्यन्तरबाह्याम्,** अभ्यन्तरां मनोदुष्प्रणिधानरूपां बाह्यां प्राणातिपातविषयां चेत्यर्थः ।।३२।।

द्रुण० **निन्दामि** निन्दनीयमसंयमकरणादि । **गर्हामि गर्हणीयं** पिण्डग्रहादि । तथा **आलोचयामि च** गुरोर्निवेदयामि **सर्वं** निन्दनीयं गर्हणीयम् । तथा सहाभ्यन्तरेण वर्त्तत इति **साभ्यन्तरा** तां, बहिर्भवा **बाह्या** ताम् । **उपधिं** मायामभ्यन्तरां मनोदुष्प्रणिधानरूपां बाह्यां प्राणातिपात-विषयामित्यर्थः ।।३२।।

[गा. ३३-३६ आलोचनादायक-ग्राहकाः]

जह बालो जंपंतो कज्जमकज्जं च उज्जुयं भणइ ।
तं तह आलोइज्जा मायामोसं पमुत्तूणं ।।३३।।

यथा बालो जल्पन् कार्यमकार्यं च ऋजुकं भणति ।
तथा तदालोचयेत् मायामृषां प्रमुच्य ।।३३।।

भुव० **केन विधिनाऽऽलोचनीयमित्याह** - यथा बालोऽव्यक्तचेतनस्तनंधयो जल्पन् कार्यमकार्यं **च भणितव्यमभणितव्यं च** । ऋजुकं **निर्मायतया प्राञ्जलतया** भणति **स्वमातुः कथयति । न पुनरेवं चिन्तयति लज्जनीयमेतदत्र न वाच्यं, एतच्च वाच्यमिति । प्रच्छन्नं वा एतत्कथ्यं च प्रकटमेतदिति बालभावत्वादेवमनवगच्छन् सर्वमेव वदति** । तत्तथैव **तन्न्या**येनालोचयेत् **गुरोः प्रकटयेत्** मायां **प्रच्छादनरूपां** मृषां **चान्यथाकथनरूपां प्रकर्षेण मुक्त्वा** प्रमुच्य **परित्यज्येत्यर्थः** ।।३३।।

सोम० कथमालोचनीयमित्याह - **यथा बालो जल्पन् कार्यमकार्यं च** भणितव्यमभणितव्यं च वदन् **ऋजुकं** प्राञ्जलतया निर्मायतया **भणति** स्वमातुः कथयति, न पुनरेवं चिन्तयति "लज्जनीयमेतदत्र न वाच्यम्, एतद् वाच्यमिति", किन्तु प्रच्छन्नं प्रकटं वा सर्वमेव भणति, **तत्** पापं **तथैव** तन्न्यायेनैवाऽऽलोचयेत् गुरोः प्रकटयेत् **मायां** पापाच्छादनरूपां **मृषां** चान्यथाकथनरूपां प्रकर्षेण मुक्त्वा प्रमुच्य परित्यज्येत्यर्थः ।।३३।।

द्रुण० केन विधिनालोचनीयमित्याह - **यथा बालः** शावो **जल्पन्** लपन् **कार्यमकार्यं** भणितव्यमभणितव्यं **च** । **ऋजुकं** निर्मायतया **भणति** स्वमातुः कथयति, न पुनरेवं चिन्तयति "लज्जनीयमेतदत्र न वाच्यम्, एतच्च वाच्यमिति" **तत्तथैवालोचयेत्** गुरोः प्रकटयेत् । **मायां** प्रच्छादनरूपां **मृषां** चान्यथाकथनरूपां **परित्यजेत्** [परित्यज्य]।।३३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

नाणम्मि दंसणम्मि य तवे चरित्ते य चउसु वि अकंपो ।
धीरो आगमकुसलो अपरिस्सावी रहस्साणं ।।३४।।

ज्ञाने दर्शने च तपसि चारित्रे च चतुर्ष्वप्यकम्पः ।
धीर आगमकुशलोऽपरिश्रावी रहस्यानाम् ।।३४।।

भुव० अथ यस्य गुरोः सकाश आलोच्यते तस्य गुणान्याह- ज्ञाने **पञ्चप्रकारे**, अक्षोभ्यः सन् सम्यक् तद्वेदित्वात् ।

आगमववहारीछज्जणाओ पच्चक्खनाणिणो एए ।
केवलमणोहिदंसी चउदसदसपुव्विनवपुव्वी।।१।।

बहु आगमविन्नाणा समाहिउप्पायगा य गुणगाही ।
एएण कारणेणं अरहा आलोयणं सोउं ।। इति ।।२।। [उत्तरा० ३६-२६०]

तथा दर्शने **वाक्षोभ्यः** । **क्षायिकौपशमिकक्षायिकौपशमिकरूपे, कारक-रोचक-दीपक-वेदकरुपे वा निसर्गाधिगमरूपे वा इत्यादि तद्भेदप्रभेदवेत्ता** । तपसि **द्वादशप्रकारे स्वयं करणसमर्थोऽन्ये कारापणविधिज्ञश्च** । चारित्रे **च सामायिकछेदोपस्थापनविशुद्धिक-सूक्ष्मसंपराययथाख्यातरूपे** । चतुर्ष्वपि **न पुनरेकैकस्मिन् । अक्षोभ्यो देवैरप्यचाल्यः । धिया राजत इति** धीरो **धैर्यमापादयति**। आगमकुशलः । **आदिपदग्रहणादागम-श्रुत-ज्ञान-धारणा-जीत-व्यवहारनिपुणः । प्रतिश्रवतीत्येवंशीलः प्रतिश्रावी न प्रतिश्रावी** अप्रतिश्रावी **समुद्रवद्गम्भीर इत्यर्थः । केषामप्रतिश्रावी ?** रहस्यानाम**ालोचकेनालोचितानाम् । एवंविधस्य गुरोः पार्श्वे आलोचनीयमित्युक्तम् ।।३४।।**

सोम० अथ यस्य गुरोः सकाश आलोच्यते तस्य गुणानाह - **ज्ञाने** पञ्चप्रकारे तथा **दर्शने** क्षायोपशमिकक्षायिकौपशमिकरूपे कारकरोचकदीपकरूपे वा, **'अकंपो'** अक्षोभ्यो देवैरप्यचाल्य इत्यर्थः ज्ञानानां दर्शनानां च सम्यग् भेदप्रभेदादिस्वरूपवेत्तृत्वात्, तथा **तपसि** द्वादशप्रकारे स्वयं करणसमर्थोऽन्ये कारापणविधिज्ञश्च, **चारित्रे च** सामायिकादिपञ्चभेदे स्वयं पालनपरस्तदाराधन-समर्थः पूर्वोक्तेषु **चतुर्ष्वपि** न पुनरेकैकस्मिन्, अथवा पिण्ड-शय्या-वस्त्र-पात्रेषु चतुर्ष्वकम्पोऽ-चाल्यः । यथा धिया राजते इति **धीरो** विशुद्धबुद्धिमान् सुभटो वा परीषहादिशत्रून् प्रति, तथा**ऽऽगमकुशलो**ऽत्राऽऽदिपदाध्याहाराद् आगम-श्रुता-ऽऽज्ञा-धारणा-जीतव्यवहारनिपुण इत्यर्थः, अथवाऽऽगमे सिद्धान्ते, सम्यग् तदर्थवेत्तृत्वात् निपुणः, तथा न प्रतिश्रवतीत्येवंशीलोऽ**प्रतिश्रावी,**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

केषाम् ? **रहस्यानाम्,** आलोचकेनालोचितानाम्, सागरवद्गम्भीर इत्यर्थः, एवंविधस्य गुरोः पार्श्वे आलोचनीयमित्युक्तम् ।।३४।।

गुण० यस्याग्र आलोच्यते तद्गुणानाह- **ज्ञाने** पञ्चप्रकारेऽकम्पोऽक्षोभ्यः । तथा **दर्शने** क्षायोपशमिकादौ चाक्षोभ्यः, **तपसि** द्वादशप्रकारे, **चारित्रे** च सामायिकादौ **चतुर्ष्वपि** अक्षोभ्यः । **धीरो** धैर्यमापादयति । **आगमकुशलः, अप्रतिश्रावी,** केषाम् ? **रहस्यानाम्,** आलोचकेनालोचितानाम् ।।३४।।

रागेण व दोसेण व जं भे अकयन्नुया पमाएणं ।
जो मे किंचि वि भणिओ तमहं तिविहेण खामेमि ।।३५।।

रागेण वा द्वेषेण वा या भवतामकृतज्ञतया प्रमादेन ।
यन्मया किञ्चिदपि भणितं तदहं त्रिविधेन क्षमयामि ।।३५।।

भुव० **अथ कथमप्यालोचयता पुरा वा गुरोर्विरूपमाचरितं स्यात्तदाह** - रागेण वा **अतिप्रेमवशात्** द्वेषेण वा **प्रमादस्खलितादौ शिक्षितेन** द्विष्टेनाऽकृतज्ञतया **वा गुरुकृतोपकार-गुणानभिज्ञेन वा** प्रमादेन **वाऽनाभोगेन वा** यत्किमपि भे **भवतां विरूपमाचरितं पूज्यानां सतां तत्सर्वं क्षमयामि । तथान्योऽपि मया यः** कश्चित् **विरूपोऽलीकोद्घट्टनादिर्भवतां** भणितस्तमप्यहं त्रिविधेन **मनोवाक्कायेन** क्षमयामि **मर्षयामीत्यर्थः** ।।३५।।

सोम० अथ कथमप्यालोचकेन पूर्वं तदा वा गुरोः किमपि विरूपमाचरितं स्यात् तत् क्षमयति - **रागेण** वाऽतिप्रेमवशात् **द्वेषेण वा** प्रमादस्खलितादिशिक्षायां द्विष्टेनाऽकृतज्ञतया वा गुरुकृतोपकारविस्मरणेन **प्रमादेन** वाऽनाभोगेन वा **यत्** किमपि **'भे'** भवतां पूज्यानां विरूपमाचरितमिति शेषः, तथाऽन्योऽपि **यः कश्चिद्** विरूपोऽलीकोद्घट्टनादिदोष इति शेषः, **भणित** उक्तस्**तत्** सर्वम**हं त्रिविधेन** मनोवाक्कायेन **क्षमयामि** ।।३५।।

गुण० **रागेण** अतिप्रेमवशात् । **द्वेषेण** प्रमादस्खलितादौ शिक्षितेन द्विष्टेन **यत्किमपि भे** भवताम् **अकृतज्ञतया प्रमादेन** वा विरूपमाचरितं तत्सर्वं क्षमयामि **यो मया कश्चिद्विरूपोऽलीकोद्घट्टनादिर्भवतां भणितस्तमहं त्रिविधेन** मर्षयामि ।।३५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तिविहं भणंति मरणं, बालाणं[१] बालपंडियाणं[२] च ।
तइयं पंडियमरणं जं केवलिणो अणुमरंति[३] ।।३६।।

त्रिविधं भणन्ति मरणं बालानां बालपण्डितानां च ।
तृतीयं पण्डितमरणं यत्केवलिनोऽनुम्रियन्ते ।।३६।।

भु० अथालोचितक्षमितगुरुः क्षपकोऽनित्यभावनां भावयन् मरणस्वरूपं चिन्तयंश्चाह- त्रिविधं **त्रिप्रकारं** भणन्ति मरणम् । **बाला इव बाला अज्ञा विरतिसाधकविवेकविकलत्वात् । असंयमा अविरतसम्यग्दृष्टिपर्यन्तास्तेषां** बालानाम् । **तथाऽविरतत्वेन बाला देशविरतत्वेन पण्डितास्तेषां** बालपण्डितानां च । तइयं पि **तृतीयं पिडिधातोर्गत्यर्थत्वेन ज्ञानार्थत्वाद्विरतिफलेन फलवद्विज्ञानमुक्तत्वात् पण्डिता बुद्धतत्त्वाः संयता इत्यर्थः । तेषां मरणं** पण्डितमरणम् । यद्यस्मात्**केवलमनन्तं संपूर्णं वा ज्ञानादि येषां ते** केवलिनः । अनुम्रियन्ते **यतस्तेऽपि पादपोपगमनं कुर्वन्तीति । अणुसरंतीति** पाठे **अनुसरन्त्यनुगच्छन्तीत्यर्थः** ।।३६।।

सोम० अथ क्षपको मरणस्वरूपं चिन्तयन्नाह - **त्रिविधं** त्रिप्रकारं **भणन्ति** जिना इति गम्यते । किम् ? **मरणम्,** बाला इव **बाला** अज्ञाना विरतिरूपविवेकविकला असंयता अविरतसम्यग्दृष्टिपर्यन्तास्तेषामेकं **मरणम्,** तथाऽविरतत्वेन बाला देशविरतत्वेन पण्डितास्तेषां **बालपण्डितानां** मरणं द्वितीयम्, **तृतीयं** सर्वविरतिफलविज्ञानयुक्तत्वात् पण्डिता बुद्धतत्त्वाः संयता इत्यर्थः, तेषां यत् मरणं **पण्डितमरणं** पादपोपगमनादिरूपम्, केवलमनन्तं सम्पूर्णं विज्ञानादि येषां ते **केवलिनस्तेऽप्यनुम्रियन्ते** कुर्वन्तीति, 'अणुसरंति' इति पाठेऽनुसरन्त्यनुगच्छन्तीत्यर्थः ।।३६।।

गुण० **त्रिप्रकारं** बाला इव बाला अज्ञाना विवेकविकलत्वात् असंयता अवरितसम्यग् - दृष्टिपर्यन्तास्तेषां **बालानां** बालमरणम् । तथाऽविरतत्वेन बाला देशविरतत्वेन च पण्डितास्तेषां बालपण्डितमरणम् । **तृतीयं** विज्ञानयुक्तत्वात् पण्डिताः बुद्धतत्त्वास्तेषां मरणं **पण्डितमरणम्** । **यद्यस्मात्केवलिनोऽनुम्रियन्ते** यतस्तेऽपि पादपोपगमनं कुर्वन्तीति।।३६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

[गा. ३७-४५ असमाधिमरणं तत्फलं च]

जे पुण अट्ठमईया पयलियसन्ना य वक्कभावा य ।
असमाहिणा मरंति उ न हु ते आराहगा भणिया ।।३७।।

ये पुनरष्टमदिकाः प्रचलितसंज्ञाश्च वक्रभावाश्च ।
असमाधिना म्रियन्ते नैव ते आराधका भणिताः ।।३७।।

भुव० इति मरणस्वरूपं विज्ञाय समाधिमरणेन मर्त्तव्यम् । असमाधिमरणे दोषान् दर्शयन्नाह - ये पुनर्जीवाः **अष्टौ मदस्थानानि येषां ते** अष्टमदिकाः । **'अट्ठमइया' इति पाठे ऋतं दुःखं तस्य निमित्तमार्त्तं ऋते दुःखे भवे वा आर्त्तम् ऋते पीडिते वा भवमार्त्तम् आर्त्ते मतिर्येषां ते आर्त्तमतिकाः स्वार्थे इकप्रत्ययो भवति** । पयलियसन्नाय इति **प्रचलिता विषयकषायादिभिः सन्मार्गात्परिभ्रष्टा संज्ञा बुद्धिर्येषां ते प्रचलितसंज्ञाः प्रगलितसंज्ञा वा । चः समुच्चये ।** वक्कभावत्ति **वञ्च्यते संचाल्यते आत्मा परो वा ऐहिकपारत्रिकलाभस्य येन स वक्रः । अथवा वक्रः कुटिलः । वक्रो वंको वा भावो येषां ते वक्रभावाः । यत एवंविधा अत एवासमाधिना चित्तास्वास्थ्यरूपया** म्रियन्ते । न हु **नैव** आराधका **उत्तमार्थसाधका** भवन्ति **जायन्त इत्यर्थः ।।३७।।**

सोम० इति मरणस्वरूपं ज्ञात्वा समाधिमरणेन मर्त्तव्यम् । असमाधिमरणे दोषानाह - **ये पुनर्जीवा** अष्टौ मदस्थानानि येषां तेऽ**ष्टमदिकाः**, 'अट्ठमइआ' पाठे आर्त्ते ध्याने मतिर्येषां ते आर्त्तमतिकाः, स्वार्थे इक-कप्रत्ययौ । प्रचलिता विषयकषायादिभिः सन्मार्गात् परिभ्रष्टा संज्ञा बुद्धिर्येषां ते प्रचलितसंज्ञाः **प्रगलितसंज्ञा** वा, **चः** समुच्चये । वञ्च्यते स्खल्यते शल्यते चाल्यते आत्मा परो वा ऐहिकपारत्रिकलाभाद् येन स वक्रः, अथवा वंको वा कुटिलो भावो येषां ते तथा, यत एवंविधा अत **एवासमाधिना** चित्तास्वास्थ्यरूपेण **म्रियन्ते 'न हु'** नैव 'हु'रेवार्थे **ते आराधका** उत्तमार्थसाधका भवन्तीत्यर्थः ।।३७।।

गुण० समाधिमरणेन मर्त्तव्यमसमाधिमरणे दोषा इति दर्शयन्नाह - **ये** जीवा अष्टौ मदस्थानानि येषां तेऽ**ष्टमदिकाः**, प्रचलिता विषयकषायादिभिः सन्मार्गात्परिभ्रष्टा संज्ञा बुद्धिर्येषां ते, अथवा **प्रगलितसंज्ञाः** । **चः** समुच्चये । वञ्च्यते आत्मा परो वा ऐहिकपारत्रिकलाभात् येन स वक्रः अथवा वंकः कुटिलः, **असमाधिना** चित्ताऽस्वास्थ्यरूपया म्रियन्ते ।।३७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मरणे विराहिए देवदुग्गई दुल्लहा य किर बोही ।
संसारो य अणंतो होइ पुणो आगमिस्साणं ।।३८।।

मरणे विराधिते देवदुर्गतिः दुर्लभश्च किल बोधिः ।
संसारश्चानन्तो भवति पुनरागमिष्यताम् ।।३८।।

भुव० यदि नाराधकास्ततः **किमित्याह** - मरणे विराधिते **निदानकरणादिना** देवदुर्गति**र्भवति** । दुर्लभश्च **दुष्प्रापश्च** किले**ति[निश्चये]आप्तोक्तौ** बोधिः **सम्यक्त्वबीजं भवति** । संसारो य अणंतो त्ति **अनन्तोऽनन्तपुद्गलपरावर्त्तपरिभ्रमणरूपः संसारो** भवति । **चशब्दान्मरणमप्यनन्तं भवति । अथानुक्तं मरणं कथं भण्यते ? उच्यते - अनन्तसंसारभ्रमणेन मरणमपि भणितं दृष्टव्यम्, अनन्तसंसारपरिभ्रमणस्य मरणपूर्वकत्वात् । संसारो य अणंतो भमइ इति पाठे प्राकृतत्वाल्लिङ्गव्यत्ययः । अनन्तसंसारं भ्रमति** । आगमिस्साणं ति **अत्र प्राकृतत्वादागमिष्यत्काले** ।।३८।।

सोम० यदि च नाराधकास्ततः किमित्याह - **मरणे** निदानकरणादिना **विराधिते देवदुर्गति**र्भवति, **दुर्लभश्च** दुष्प्रापश्च **किलेति** निश्चये **बोधिः** सम्यक्त्वप्राप्तिर्भवति । प्राकृतत्वात् स्त्रीत्वम्, **संसारश्चानन्तो**ऽनन्तपुद्गलपरावर्त्तभ्रमणरूपो चशब्दान्मरणमप्यनन्तं **भवति,** अनन्तसंसारभ्रमणस्य मरणपूर्वकत्वात् । 'भमइ' इति पाठे प्राकृतत्वाद् विभक्तिव्यत्ययोऽनन्तं संसारं भ्रमति । क्व ? **'आगमिस्साणं'** ति एष्यत्काले इत्यर्थः, प्राकृतत्वादत्रापि विभक्तिव्यत्ययः ।।३८।।

गुण० **मरणे विराधिते** निदानादिना **देवदुर्गति**र्भवति, **दुर्लभो** दुष्प्रापश्च **किल** आप्तोक्तौ **बोधिः** । अनन्तपुद्गलपरावर्तपरिभ्रमणरूपः **संसारो भवति** । प्राकृतत्वात् वचनव्यत्ययः । अनन्तसंसारपरिभ्रमणमिति प्राकृतत्वा**दागमिष्यत्काले** ।।३८।।

का देवदुग्गई ? का अबोहि ? केणेव वुज्झई मरणं ? ।
केण अणंतमपारं संसारे हिंडई जीवो ? ।।३९।।

का देवदुर्गतिः ? काऽबोधिः ? केनैवोह्यते मरणम् ?
केनानन्तमपारं संसारं हिण्डति जीवः ? ।।३९।।

भुव० किञ्च - एतद् गाथार्थमनवबुध्यन् शिष्यश्चत्वारि पदानि प्रश्नयिष्यति,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ग्रन्थकारोऽपि सप्तभिर्गाथाभिश्चतुर्णां पदानामुत्तराणि दास्यतीत्यर्थः । अथ शिष्यस्तानि प्रश्नयन्नाह - का देवेषु दुर्गतिर्देवदुर्गतिः ? को वाऽबोधिर्बोधिदुर्लभता ? केणेव वुज्झई मरणं ति केन च प्रकारेण हेतुना विशेषेणोह्यते पुनः पुनर्भावेन मध्यसमागतभारवदकामेनाऽपि स्वीक्रियते मरणमिति, केण अणंतंपारं ति अनन्तपारः पर्यन्तो यस्य कालस्य तमनन्तपारं कालम् । अनुस्वारलोपात् । अथवा अणंतंपारंति अकारलोपादपारंकालम्, केन हेतुना संसारे हिण्डते जीव इत्यर्थः ।।३९।।

सोम० अथ शिष्यश्चत्वारि प्रश्नान्याह - १ - **का देवेषु दुर्गति** ? २ - का चाबोधिः ? बोधिदुर्लभता ३-**केन** च प्रकारेणेति गम्यते, **व्यूह्यते** विशेषेणोह्यते पुनः पुनर्भावेन मध्यसमागतभारवदकामेनापि स्वीक्रियते, किम् ? **मरणम्**, ४-**केन** हेतुनेत्यत्रापि गम्यते, अनन्तः पारः पर्यन्तो यस्य कालस्य केन हेतुना **संसारे हिण्डते जीव** इत्यर्थः ।।३९।।

गुण० अथ शिष्यस्तानि प्रश्नयन्नाह - '**कादेव०**' ।।३९।।

कंदप्पदेव-किब्बिस-अभिओगा आसुरी य सम्मोहा ।
ता देवदुग्गईओ मरणम्मि विराहिए हुंति ।।४०।।

कन्दर्पदेवकिल्बिषाभियोगा आसुरिश्च संमोहाः ।
ता देवदुर्गतयो मरणे विराधिते भवन्ति ।।४०।।

भुव० अथ प्रथमप्रश्नस्य निर्वचनमाह - कन्दर्प्पोऽट्टहासहसनं कन्दर्पकरणशीलाः कन्दर्पाः कन्दर्प्पाश्चदेवाश्च कन्दर्पदेवाः । ये पुरा यद्विधा भवन्ति ते तद्विधेषु गच्छन्ति 'जल्लेसे मरइ तल्लेसे उववज्जइ' इति वचनात् । तत्स्वरूपं चेदम् -

कहकहकहस्स हसणं कंदप्पो अणिहूआ य संलावा ।
कंदप्पकहाकहणं कंदप्पुवएस संसा या ।।१।। [पंच.व. १६३१]

कंदप्पकुक्कुयाइं तह सील-सहाव-हसणविगहाहिं ।
विम्हावंतो य परं कंदप्पं भावणं कुणइ ।।२।। [उत्तरा० ३६-२६१]

भूनयणवयणदसणत्थएहिं करचरणकन्नमाई हिं ।
तं तं करेइ जह जह हसइ परा अत्तणो अहसमिति ।।३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इति **कन्दर्परूपा दुर्गतिः** । किब्बिसत्ति **किल्बिषं ज्ञानाद्याशातनादिकम्** । **तद्योगाद्देवा अपि किल्बिषिकाः** । तथाहि -

नाणस्स केवलीणं धम्मायरियस्स संघसाहूणं ।
माईअवन्नवाई किव्विसियं भावणं कुणह ।।१।।

तद्रूपा **देवदुर्गतिः** । अभिओगित्ति **अभियोजनमभियोगः शत्रूच्चाटनादिमन्त्रप्रयोजनम्** । **तद्योगाद्देवा अपि अभियोगाः** । **उक्तञ्च** -

मंताजोगं काऊं भूइकम्मं च जे पउंजंति ।
सायरसइड्ढिहेउं अभिओगं भावणं कुणइ ।।१।। [उत्तरा० ३६-२६२]

इत्यभियोगदेवरूपा दुर्गतिरित्यर्थः ।। आसुरियत्ति **असुराणां भावः कर्म वा आसुरं, असुरेण चण्डकोपेन चरन्त्यासुरिकादेवा अपि** । **उक्तञ्च** -

अणुबद्धरोसपसरो तहानिमित्तंमि होइ पडिसेवी ।
एएहिं कारणेहिं आसुरियं भावणं कुणइ ।।१।। [उत्तरा० ३६-२६४]

इत्यासुरिकदेवरूपा दुर्गतिः । संमोहत्ति **संमोहयत्युन्मार्गदर्शनादिना मार्गान्मोक्षमार्गाद् भ्रंसयन्ति ये ते संमोहाः** । **उक्तञ्च** -

उमग्गदेसओ तु मग्गनासउ मग्गविपडिवत्तीय ।
मोहेण मोहयंतो संमोहं भावणं कुणइ ।।१।।

इति **संमोहरूपा देवदुर्गतिः** । तादेवत्ति **ता एता देवदुर्गतयो** मरणे विराधितेऽपध्यानादिना भवन्ति । **उक्तञ्च** -

एयाओ भावणाओ[भावित्ता]देवदुग्गइं जंति ।
तत्तो चुआओ संता पडंति भवसागरमणंतं ।। [आरा० पडा० ७२१] इति गाथार्थः ।।४०।।

सोम० प्रथमप्रश्नस्य उत्तरमाह - १ - कन्दर्पोऽट्टट्टहासहसनं, कन्दर्पकरणशीलाः कन्दर्पाश्च ते देवाश्च **कन्दर्पदेवाः**, ये प्राग्भवे साधवो यद्विधा भवन्ति ते तद्विधेषु गच्छन्ति, "जं लेसे मरइ तं लेसे उववज्जइ" इति वचनात् । तत् स्वरूपं तु "कहकहकहस्स हसणं" इत्यादिगाथाभ्यो ज्ञेयमिति कन्दर्परूपा देवदुर्गतिः २-**किब्बिस त्ति** किल्बिषं पापं ज्ञान-केवल्याद्याशातनादिकम्, तद्योगाद् देवा अपि किल्बिषिकाः, प्राक् संयतभवकृतज्ञानाद्याशातनादेव मातङ्गत्वेनोत्पन्ना इत्यर्थ एवंरूपा देवदुर्गतिः । ३-**अभिओग त्ति** अभियोजनम् अभियोगः शत्रूच्चाटनादिमन्त्रप्रयुञ्जनम्, प्राक्

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संयतभवे तद् योगाद्-देवा अप्यभियोगा महर्धिकसुराणां प्रेष्यकर्मकारिण एवंविधा देवदुर्गतिः । ४-**आसुरियत्ति** असुराणां कर्मणा चण्डकोपेन चरन्तीति आसुरिकाः संयतभवे कृतचण्डकोपा असुरत्वेनोत्पन्नास्तथाविधा देवा अपि आसुरिका एवंरूपा देवदुर्गतिः । ५-**संमोह त्ति** सम्मोहयन्त्युन्मार्गदर्शनादिना मोक्षमार्गाद् भ्रंशयन्ति जीवान् ये ते सम्मोहाः संयता अप्येवंविधा देवत्वेनोत्पन्नाः सम्मोहा एवंरूपा देवदुर्गतिः । **ता** एता **देवदुर्गतयो मरणे**ऽपध्यानादिना विराधिते सति **भवन्ति,** ततश्च्युताश्चानन्तं संसारं परिभ्रमन्ति ।।४०।।

गुण० अथ प्रश्नस्य निर्वचनमाह - कन्दर्पोऽट्टट्टहासहसनं कन्दर्प्पकरणशीलाः कन्दर्पाश्च ते देवाश्च **कन्दर्प्पदेवाः** । किल्बिषं पापं ज्ञानाद्याऽऽशातनादिकं, तद्योगाद्देवा अपि **किल्बिषिकाः** । अभियोजनमभियोगः, तद्योगाद्देवा अपि **अभियोगाः** । अभियोगरूपा दुर्गतिरित्यर्थः । असुराणां भावः कर्म वाऽसुरेण चण्डकोपेन चरन्त्यासुरिका देवा अपि । सम्मोहयन्त्युन्मार्गदर्शनादिना मार्गान्मोक्षमार्गाद् विध्वंसयन्ति ये ते **सम्मोहाः ता** एता **देवदुर्गतयो मरणे विराधिते**ऽपध्यानादिना **भवन्ति** ।।४०।।

मिच्छादंसणरत्ता सनियाणा किण्हलेसमोगाढा ।
इह जे मरंति जीवा तेसिं दुलहा भवे बोही ।।४१।।

मिथ्यादर्शनरक्ताः सनिदानाः कृष्णलेश्यावगाढाः ।
इह ये म्रियन्ते जीवास्तेषां दुर्लभो भवेद्बोधिः ।।४१।।

भुव० का देवदुग्गइ इत्यस्य प्रश्नस्य निर्वचनमुक्तमथ का अबोहीत्यस्य सविपक्षस्य निर्वचनमाह-मिथ्यादर्शनं **विपर्यस्तदर्शनं मिथ्यात्वं तत्र** रताः । **यत आर्षम् -**

"कहन्नं भंते समणा निग्गंथा मोहणिज्जा कम्मं वेयंति ?
गोयमा ! तेहिं तेहिं नाणंतरेहिं दंसणंतरेहिं चरित्तंतरेहिं
कप्पंतरेहिं मग्गंतरेहिं नयंतरेहिं भंगंतरेहिं पावयणंतरेहिं
समणा निग्गंथा कंषा मोहणिज्जं कम्मं वेयंति ।"

तथा सह निदानेन देवत्वादिप्रार्थनारूपेण वर्त्तन्त इति सनिदानाः । **तथा कृष्णां सर्वनिकृष्टां लेश्यां जीवपरिणामरूपामवगाढाः प्राप्ताः** इहास्मिन् **[जगति]** ये म्रियन्ते जीवास्तेषां दुर्लभा बोधिरित्यर्थः ।। **किञ्च -**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जिणसासणं पि पाविय संपाविय साधुसावगत्तेवि ।
कुगुरुकुवएसेण हओ अणंतखुत्तो दुहं पत्तो ।।१।।४१।।

सोम० अथ का अबोधिरिति द्वितीयप्रश्नस्योत्तरमाह - मिथ्यादर्शनं विपर्यस्तदर्शनं मिथ्यात्वं मिथ्याक्रियाद्यभिलाषरूपं, तत्र रताः, तथा सह निदानेन देवत्वादिप्रार्थनारूपेण वर्त्तन्त इति **सनिदानाः** तथा कृष्णां सर्वाधमां लेश्यां जीवपरिणामरूपामवगाढाः प्राप्ताः । **इहास्मिन्** जगति एवंविधा **ये जीवा म्रियन्ते, तेषां दुर्लभा बोधिर्भवेत्** ।।४१।।

गुण० [का] देवदुर्गतिः इति अस्य प्रश्नस्य निर्वचनमुक्तमथ का अबोही ? तस्य निर्वचनमाह- विपर्यस्तदर्शनं मिथ्यात्वं तत्र रताः । तथा सह निदानेन देवत्वादिप्रार्थनारूपेण वर्त्तन्त इति **सनिदानाः** । तथा कृष्णां सर्वनिकृष्टां लेश्यां जीवपरिणामरूपा**मवगाढाः** प्राप्ताः ।।४१।

सम्मद्दंसणरत्ता अनियाणा सुक्कलेसमोगाढा ।
इह जे मरंति जीवा तेसिं सुलहा भवे बोही ।।४२।।

सम्यग्दर्शनरक्ता अनिदानाः शुक्कलेश्यामवगाढाः ।
इह ये म्रियन्ते जीवास्तेषां सुलभो भवेद्बोधिः ।।४२।

भुव० का **अबोहीत्यस्योत्तरमुक्तमथ तद्विपक्षभूतं प्रस्तावाद्बोधिसुलभत्वमाह - सम्यग्दर्शने रक्ता भावितान्तःकरणास्तद्वासनया सप्तानामपि धातूनां रञ्जनात्** । अनिदाना **निदानवर्जिताः** । **तथा शोधयत्यष्टप्रकारं कर्ममलमिति शुक्ला । शुचं वा क्लमयतीति शुक्ला । सा चासौ लेश्या च शुक्ललेश्या, तामवगाढाः प्राप्ताः** । इह **प्रवचने** ये म्रियन्ते जीवास्तेषां सुलभबोधि**रित्यर्थः** ।।४२।।

सोम० अथ प्रस्तावाद् बोधिदुर्लभत्वविपक्षभूतं बोधिसुलभत्वमप्याह - **सम्यग्दर्शनेन रक्ता** भावितान्तःकरणाः सम्यक्त्ववासितसप्तधातव इत्यर्थः । **अनिदाना** निदानवर्जिताः, तथा शोधयत्यष्टप्रकारं कर्ममलमिति शुक्ला शुचं क्लमयतीति वा, शुक्ला चासौ लेश्या च शुक्ललेश्या तामवगाढाः प्राप्ताः, एवंविधा **इह** प्रवचने **ये जीवा म्रियन्ते तेषां सुलभो भवेद् बोधिः** ।।४२।।

गुण० का अबोहीत्यस्योत्तरमुक्तमथ तद्विपक्षभूतं बोधिसुलभत्वमाह - **सम्म**मित्यादि ।।४२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जे पुण गुरुपडिणीया बहुमोहा ससबला कुसीला य ।
असमाहिणा मरंति उ ते हुंति अणंतसंसारी ।।४३।।

ये पुनर्गुरुप्रत्यनीका बहुमोहाः सशबलाः कुशीलाश्च ।
असमाधिना म्रियन्ते ते भवन्त्यनन्तसंसारिणः ।।४३।।

भुव० अथ केण अणंतं पारमिति प्रश्नस्य निर्वचनमाह - गृणात्यभिधत्ते तत्त्वमिति गुरुस्तं प्रतीत्याश्रित्य प्रत्यनीका गुरुप्रत्यनीका गुर्वाशातका गोशालकवत्। तथाहि -

जच्चाईहिं अवन्नं भासइ वट्टइ नया वि उववाए ।
अहिओ छिद्दप्पेही पगासवाई अणणुकूला खिंसका ।। [पंच व० १६३९] इत्यर्थः।।

तथा बहुमोहा त्ति **त्रिंशन्मोहनीयस्थानवर्त्तिनः बहुमोहाः, तथा सह सबलैरेकविंशत्या शबलस्थानैर्वर्तन्त इति** सशबलाः **कुत्सितं शीलं समाचारं येषां ते** कुशीलाः । चः **समुच्चये** । असमाधिना **आर्त्तरौद्रतया** ये म्रियन्ते तेऽनन्तसंसारिणो भवन्तीति । **केण अणंतंपारमित्यस्य निर्वचनमुक्तम्** । ननु किमिति तृतीयप्रश्नं विमुच्य चतुर्थस्य प्रथमं निर्णय उक्तः ? उच्यते- **'मरणविराहिए' इति गाथायामयमेव क्रमस्तस्यैव निर्वचनमभाणि । तर्हि प्रश्नसंग्रह-गाथायां किमिति व्यतिक्रमग्रहणम् ? उच्यते-शिक्षाभ्यूह्य शक्तिवर्द्धनार्थं विचित्रा सूत्ररचनेति न्यायप्रदर्शनार्थं वा इति परमार्थः** ।।४३।।

सोम० अथ केनानन्तं पारमिति चतुर्थस्य प्रश्नस्य निर्वचनमाह - **ये पुन**र्जीवा गृणाति अभिधत्ते तत्त्वमिति गुरुस्तं प्रति जात्याद्यवर्णवादभाषणादिना प्रत्यनीकाः प्रतिकूलाः तथा **बहुमोहास्त्रिंशन्मोहनीयस्थानवर्त्तिनः**, सह शबलैरेकविंशत्या शबलस्थानैर्वर्तन्ते ये ते **सशबलाः**, कुत्सितं शीलमाचारो येषां ते कुशीलाः, **चः** समुच्चये । एवंविधा ये**ऽसमाधिना**ऽऽर्त्तरौद्रभावे वर्त्तमाना **म्रियन्ते तेऽनन्तसंसारिणो भवन्ती**ति । ननु 'केणेव वुज्झई मरणं' ? इति तृतीयं प्रश्नं विमुच्य चतुर्थप्रश्नस्य प्रथमं निर्णयः कस्मादुक्तः ? उच्यते-विचित्रा सिद्धान्तसूत्ररचना भवतीति न्यायदर्शनार्थं शिष्याणाम् ।।४३।।

गुण० अथ केण अणंतं पारमिति प्रश्नस्य निर्वचनमाह - गृणाति तत्त्वमिति गुरुस्तं प्रतीत्याश्रित्य प्रत्यनीका गुर्वाशातनाः तथा **बहु०** त्रिंशन्मोहनीयस्थानवर्तिनः बहुमोहाः, सह शबलैरेकविंशत्या शबलस्थानैर्वर्तन्त इति **सशबलाः** । **कुशीलाः** । **चः** समुच्चये ।।४३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जिणवयणे अणुरत्ता गुरुवयणं जे करंति भावेणं ।
असबल असंकिलट्ठा ते हुंति परित्तसंसारी ।।४४।।

जिनवचनेऽनुरक्ता गुरुवचनं ये कुर्वन्ति भावेन ।
अशबला असंक्लिष्टास्ते भवन्ति परीत्तसंसारिणः ।।४४।।

भुव० अथानन्तसंसारिविपक्षभूताः **परीत्तसंसारिणः** तत्स्वरूपमित्याह - जिनवचनस्यानुरक्तास्तद्वासितमनसः गुरुवचनं **धर्माचार्योपदेशं** भावतो **हितमिति कृत्वा** ये कुर्वन्ति । अशबलाः **शबलस्थानदूरवर्त्तिनः** । असंक्लिष्टा **विशुद्धाध्यवसायास्ते** परीत्तसंसारिणः **स्तोकसंसारिणो भवन्तीत्यर्थः** ।।४४।।

सोम० अथ अनन्तसंसारिविपक्षभूतत्वात् परीत्तसंसारिस्वरूपमाह - **जिनवचने** श्रीजिनेन्द्रवचने श्रीजिनप्रवचनेऽ**नुरक्ता**स्तद्वासितमनसो **गुरुवचनं** धर्माचार्योपदेशं **भावतो** हितमिति कृत्वा **ये कुर्वन्ति, अशबलाः** शबलस्थानदूरवर्तिनः, **असंक्लिष्टा** विशुद्धाध्यवसाया एवंविधा ये म्रियन्त इति गम्यं **ते परीत्तसंसारिणः** स्तोकसंसारिणो भवन्तीत्यर्थः ।।४४।।

गुण० जिनवचने अनुरक्तास्तद्वासितमनसो **गुरुवचनं** धर्माचार्योपदेशम् । **अशबलाः** शबलस्थानदूरवर्तिनः, **असंक्लिष्टास्ते परीत्तसंसारिणः** स्तोकसंसारिणो **भवन्ती**त्यर्थः ।।४४।।

बालमरणाणि बहुसो बहुयाणि अकामगाणि मरणाणि ।
मरिहंति ते वराया जे जिणवयणं न याणंति ।।४५।।

बालमरणानि बहुशो बहुकानि च अकामानि मरणानि ।
म्रियन्ते ते वराका ये जिनवचनं न जानन्ति ।।४५।।

भुव० अथ केणेव वुज्झई मरणमित्यस्य निर्वचनं सार्द्धगाथाद्वयेनाह - ये वराका जिनवचनं न जानन्ति ते बालमरणानि **शस्त्रग्रहणादीनि** बहुशोऽ**नेकशो** मरिहंति **मरिष्यन्ति । तथा बहूनि** बहुकानि च अकामुकानि **निरभिलाषाणि** मरणानि **केचिद्वराका महारोगादिदुःखपीडिता अनिच्छन्तोऽपि** मरिष्यन्ति । **जिनवचनबाह्याः सन्तः** ।।४५।।

सोम० अथ केणेव वुज्झइ मरणं ? इति तृतीयप्रश्नस्य पूर्वमुक्तस्य निर्वचनं सार्धगाथाद्वयेनाह -

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ये वराका जिनवचनं न जानन्ति ते बालमरणानि शस्त्रग्रहण-विषभक्षणादीनि **बहुशो**ऽनेकशो **'मरिहंति'** मरिष्यन्तीति सम्बन्धस्तथा **बहुकानि** बहून्येवाकामुकानि निरभिलाषाणि **मरणानि** दर्शयति केचिद् वराका महारोगादिग्रस्ता मोहान्मर्तुमनिच्छन्तो मरिष्यन्ति जिनवचनबाह्याः सन्त इत्यर्थः ।।४५।।

गुण० ये वराका जिनवचनं न जानन्ति ते बालमरणानि शस्त्रग्रहणादीनि **बहुशो** मरिष्यन्ति तथा बहूनि **बहुकानि च अकामुकानि** निरभिलाषानि **मरणानि** केचित् **वराका** महारोगादिदुःखपीडिता अनिच्छन्तोऽपि **मरिष्यन्ति** जिनवचनबाह्याः सन्तः ।।४५।।

[गा. ४६-४७ बालमरणम्]

सत्थग्गहणं विसभक्खणं च जलणं च जलपवेसो य ।
अणयारभंडसेवी जंमण-मरणाणुबंधीणि ।।४६।।

शस्त्रग्रहणं विषभक्षणं च ज्वलनं च जलप्रवेशश्च ।
अनाचारभाण्डसेवी जन्ममरणानुबन्धीनि ।।४६।।

भुव० अथ **बालमरणान्येव व्यक्तीक्रियन्ते-** तत्र शस्त्रग्रहणं **तीर्थादौ मस्तके क्रकचदापनं शिरःशारणादि** विसभक्खणंचेति **विषभक्षणं तालुपुटादि वैराग्यात्,** ज्वलनप्रवेशः **काष्ठभक्षणं पञ्चाग्नितपश्च** जलप्रवेशश्च **तीर्थे पयसि निमज्जनं कण्ठस्नानं वा माघमासे । चशब्दादन्यदप्येवंविधमुद्बन्धनादि बालमरणं ज्ञातव्यम् । एतानि बालमरणानि के मरिष्यन्तीत्याह -** अणयारभंडसेवित्ति **- आचारः शास्त्रविहितो व्यवहारस्तेन भाण्डमुपकरणमाचारभाण्डोपकरणं, न आचारभाण्डोपकरणमनाचारभाण्डोपकरणम् । तत्सेवितुं शीलं येषां ते अनाचारभाण्डसेविनस्ते च परिव्राजकादयो मिथ्यादृष्टयः स्वयूथ्या वा ये हासमोहादिभिस्तत्सेवन्ति । तानि च परिव्राजाम् ।**

पाउय १ तिदंड २ कुंडिय ३ कंचणि ४ केसरिय ५ छत्त ६ छन्नाल ७ मिसिय ८ करोडि ९ पवित्ती १० वत्थं ११ कुस १२ पाणह १३ गणित्ती १४ ।।१।।

कुण्डिका - कमण्डलु, कंचणी - रुद्राक्षमाला, केसरी - प्रमार्जनी, छन्नालं - त्रिकाष्टिका, पुस्तकोपकरणम्, व्रतिनामासनं, मृसी करोटिका नैवेद्यादौ कनक-भाजनविशेषः, वस्त्राणि-धातुरक्तसाटिका, अंकुशो - दण्डाग्रतो लोहमयो, गणत्रिका -

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कलाचिकाभरणविशेषः । पवित्री - अङ्गुल्याभरणविशेषः । तापसानां कत्थोटक-पुटिकाताम्रभाजनादि, ब्राह्मणानां यज्ञोपवीतादि । एवमन्येषामपि । ते चैवमनाचार-भाण्डसेविनः सन्तो बालमरणानि मरिष्यन्ति । कथं जन्मानि च मरणानि तान्यनुबध्न-न्तीत्येवंशीलानि जन्ममरणानुबन्धीनि **बहूनि मरिष्यन्तीत्यर्थः ।।४६।।**

सोम० बालमरणानि दर्शयति - **शस्त्रग्रहणं** तीर्थादौ मस्तके क्रकचदापनं - शिरःशारणादि, **विषभक्षणं** तालुपुटादि, दुःखगर्भवैराग्यत्वात् **ज्वलन**मग्नौ काष्ठभक्षणपञ्चाग्नितपःकरणादिरूपम्, **जलप्रवेशश्च** तीर्थजले निमज्जनं स्नानं वा माघमासादौ चशब्दादन्यदप्येवंविधमुद्बन्धनादि बालमरणं ज्ञातव्यम् । एतानि बालमरणानि के कुर्वन्तीत्याह - **अणायार०** आचारः शास्त्रविहितो व्यापारस्तेन भाण्डमुपकरणम् आचारभाण्डम्, न आचारभाण्डम् अनाचारभाण्डम्, स्वबुद्धिकल्पितनाना-विधवेषादि-रूपम्, तत् सेवितुं शीलं येषां तेऽनाचारभाण्डसेविनस्ते च त्रिदण्डकुण्डकादिधराश्चक्र-परिव्राजकादयो मिथ्यादृष्टयो हास-मोहादिना संयतवेशधारिणोऽप्यनाचारभाण्डसेविनः, ते चैवंविधास्सन्तो बालमरणानि मरिष्यन्ति बहूनि । कथम्भूतानि ? जन्मानि च मरणानि च परम्पराभावीन्यनेकानि तान्यनुबध्नन्ति इत्येवंशीलानि **जन्ममरणानुबन्धीनि** इत्यर्थः ।।४६।।

गुण० तीर्थादौ मस्तके कक्रचदापनं, **विस०** तालुपुटादि[भक्षणं], वैराग्यात् **ज्वलन**प्रवेशः, पञ्चाग्नितपश्च **जलप्रवेशः** पयसि निमज्जनं माघमासे । चशब्दादन्यदपि उद्बन्धनादि बालमरणं ज्ञातव्यम् । आचारः शास्त्रविहितो व्यवहारस्तेन भाण्डमुपकरणमित्याचारभाण्डं, न आचार-भाण्डमित्यनाचारभाण्डं तत्सेवितुं शीलं येषां **तेऽनाचारभाण्डसेविनः,** ते च परिव्राजकादयो मिथ्यादृष्टयः **जन्ममरणानि तान्यनुबन्धीनि** बहूनि मरिष्यन्तीत्यर्थः ।।४६।।

उड्ढमहे तिरियम्मि वि मयाणि जीवेण बालमरणाणि ।
दंसण-नाणसहगओ पंडियमरणं अणुमरिस्सं ।।४७।।

ऊर्ध्वमधस्तिरश्चयपि मृतानि जीवेन बालमरणानि ।
दर्शनज्ञानसहगतः पण्डितमरणमनुमरिष्ये ।।४७।।

भुव० ऊर्ध्वं **भूतलान्नवयोजनशतादुपरिसमग्रोर्ध्वलोके ।** अधः **अधोग्रामादौ सर्वपृथिवीषु** तिर्यग्लोकेऽपि **चाष्टादशयोजनशतमाने** मृतान्यनुभूतानि जीवेन बालमरणानि **पूर्वोक्तानि यदिवानुभूतानि तत् किंविधेयमित्याह - स चैवं क्षपको विज्ञातबालमरणविपाक-श्चिन्तयामास ।** दर्शनज्ञानसमन्वितः **सन्नहं** पण्डितमरणं **विवेकिमरण**मनुमरिष्ये ।।४७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० तानि क्व मरिष्यन्तीत्याह - ऊर्ध्वं भूतलान्नवयोजनशतोपरिसम**ग्रोर्ध्वलोके** तथाऽधो-लौकिकग्रामादौ भवनपतिषु सप्तपृथ्वीषु च **तिर्यग्लोके** चाष्टादशयोजनशतमाने **मृतान्य**नुभूतानि **जीवेन बालमरणान्य**निच्छामरणानि शस्त्रादिमरणानि वा पूर्वोक्तानि यदिवाऽनुभूतानि ततः किं विधेयमित्याह - **दंसणगाथार्धं०** स क्षपक एवं विज्ञातबालमरणविपाकश्चिन्तयति - दर्शनज्ञानाभ्यां सहगतः समन्वितः सन्नहं **पण्डितमरणं** विवेकिमरण**मनुमरिष्ये**ऽनुरथशब्दार्थे ।।४७।।

चुण० ऊर्द्धं **ऊर्ध्वलोकः, अधोलोकः** अधोग्रामादौ, **तिर्यग्लोकेऽपि** चाष्टादशयोजनशतमाने **मृतान्य**नुभूतानि । **दर्शनज्ञानसमन्वितः सननुमरिष्ये [पण्डितमरणम्]** ।।४७।।

[गा. ४८ तः ७१ पण्डितमरणे भावनाः तदाराधनविधिश्च]

उव्वेयणयं जाई मरणं नरएसु वेयणाओ य ।
एयाणि संभरंतो पंडियमरणं मरसु इण्हिं ।।४८।।

उद्वेगजनकं जातिर्मरणं नरकेषु वेदनाश्च ।
एतानि स्मरन् पण्डितमरणं म्रियस्वेदानीम् ।।४८।।

भुव० हे **वत्स ! विराधितव्रतस्य** उद्वेगजनकं **भयानकमुद्वेगकारि । किं ? जननं** जातिः, **म्रियते** मरणं, **तत्संसारे परिभ्रमतस्ते भविष्यतीत्यध्याहारः । तथा पापकारिनरान् कायन्त्याह्वायन्तीति** नरकास्तेषु। वेदनाश्च **छेदन-भेदन-क्रकच-करपत्रविदारण-शाल्मलीवृक्ष-शिखरारोपण-तप्तायःपुत्तलिकासमालिङ्गन-वैतरणीनदीप्लावन-वज्रवालुका-पुलिनभार-वहन-तप्तायस्त्रपुपानादिका दशप्रकारा वा दुरधिसह्या भविष्यन्तीत्यत** एतानि संस्मरन् चिन्तयन् पण्डितमरण**मभ्युद्यतमरणं** मर इदानीमि**त्यर्थः** ।।४८।।

सोम० अथ गुरुः क्षपकस्य दुर्गतिभयं दर्शयन्नुपदेशमाह - हे वत्स ! विराधितव्रतस्योद्वेगजनकं भयानकं **उद्वेगकारि,** किम् ? **जातिर्जन्म,** म्रियते इति **मरणम्,** जातिश्च मरणं च जातिमरणम्, तत् संसारे परिभ्रमतस्ते भविष्यतीत्यध्याहारः, क्वचिं'दुव्वेयणाइ' इति पाठस्तत्रापि प्राकृतत्वाद् वचनव्यत्ययं कृत्वा जन्म-मरणविशेषणं कार्यम् । तथा पापकारिनरान् कायन्ति आह्वायन्तीति **नरकास्तेषु वेदनाश्च** छेदन-भेदन-करपत्रविदारण-शाल्मलीवृक्षशिखरारोपणतप्तायःपुत्रिकासमालि-ङ्गनादिरूपाः क्षेत्रजादिभेदा वा दुरधिसह्या विराद्धव्रतस्यैव ते भविष्यन्तीत्यत **एतानि संस्मरन्** चिन्तयन् **पण्डितमरणम**भ्युद्यतमरणं **म्रियस्वेदानीमि**त्यर्थः ।।४८।।

चुण० **उद्वेगजनकं** भयानकमुद्वेगकारि किं **जातिर्म**रणं तत्संसारे भ्रमतस्ते भविष्यती-त्यध्याहारः । **नरकेषु वेदनाः** छेदनाद्याः । **एतानि संस्मरन्** चिन्तयन् ।।४८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जइ उप्पज्जइ दुक्खं तो दट्ठव्वो सहावओ नवरं ।
किं किं मे [मए] न पत्तं संसारं संसरंतेणं ? ।।४९।।

यदि उत्पद्यते दु:खं तर्हि दृष्टव्य: स्वभाव: नवरम् ।
किं किं मया [मदे] न प्राप्तं संसारं संसरता ।।४९।।

भुव० इति गुरुणा श्रावितव्रतविराधनाविपाक: क्षपकश्चिन्तयन्नाह - यदि उत्पद्यते **जायते** दु:खं **कष्टम्** । तो **ततो** द्रष्टव्यो **ज्ञेय:** स्वभावत**स्तत्प्रादुर्भाव:** । **न कोऽप्यात्मव्यतिरिक्तोऽन्यो हेतुस्तदुत्पत्तौ समस्तीत्यात्मैव तद्धेतुरिति चिन्तयति । अथवा** नवरं **पुन: कियद् दु:खमेत-त्पुरापि** का: का **दु:खपरम्परा** मे **मया मएत्ति - मदे जाति-कुल-बल-रूप-तप-ऐश्वर्यश्रुत-लाभरूपे । आसक्तचेतसा संसारे संसरता** न प्राप्ता **नानुभूता:** । **परं ता अकामनिर्जरया सोढा अल्पस्तत्सहने फलविशेष:** । **इदानीं त्वनन्तगुणनिर्जरालाभहेतुत्वात्सम्यक् सोढव्या इत्यर्थ:** । **अथवा यदि उत्पद्यते दु:खं तत्किं कर्त्तव्यमित्याह - तो तदासौ दृष्टव्य: सखा मित्रं, रोगादि: पुरुषादिर्वा। कथंभूत: सखा ? आपदं ददातीति आपद: ससखा दृष्टव्य: । नवरमयं विशेष:** । **तथा का आपत्कर्त्री मे इति मां कर्मतापन्नं न प्राप्ता इति का मे पदस्यार्थ:** । **तथा का आपत्कर्मतापन्ना मया कर्त्रा न प्राप्ता न लब्धा** । **किं विशिष्टेन ?** संसारं संसरता **परिभ्रमता । संसारे संसारं वा चातुर्गतिकमिति मयेति पदस्यार्थ: ।।४९।।**

सोम० अथ क्षपक: श्रुतगुरुपदेश: कदाचिदुत्पन्नवेदनादु:खोऽप्येवं चिन्तयतीत्याह - **यदि उत्पद्यते दु:खं** जायते कष्टं **ततो द्रष्टव्यो** ज्ञेय: **स्वभावत**स्तत्प्रादुर्भावो न कोऽप्यात्म-व्यतिरिक्तोऽन्यो हेतुस्तदुत्पतौ समस्तीत्यात्मैव तद् हेतुरिति चिन्तयति अथवा **नवरं** पुनरर्थे कियद् दु:खमेतत्, पुरा **किं किं** दु:खं दु:खपरम्परा **मया न प्राप्ता संसारे संसरता** परिभ्रमता सता, का: का दु:खपरम्परा मया नानुभूता:, परं ता अकामनिर्जरया सोढा अतोऽल्पस्तत्सहने फलविशेष:, इदानीं त्वनन्तगुणनिर्जरालाभहेतुत्वात् सम्यक्सोढव्या इति भाव: । का मे मए न पत्तेति पाठान्तरम्-तत्रापि का दु:खपरम्परा मदे जात्यादौ आसक्तचेतसा मया न प्राप्ता: । किंविशिष्टेन ? मदे जाति-कुल-बल-रूप-श्रुत-तपो-लाभैश्वर्यरूपे आसक्तचेतसेति गम्यम्, अथवा यदि उत्पद्यते दु:खं तत: किं कर्तव्यमित्याह-तो तदा आपदं ददातीति आपद्दो रोगादि: पुरुषादिर्वा, असौ सखा मित्रमिति द्रष्टव्य: । नवरं केवलं का इति आपत्कर्त्री मे इति मां कर्मतापन्नं न प्राप्तेति सम्बन्ध:, एवं का मे पदस्यार्थो गत: । तथा का आपत्कर्मतापन्ना मयेति मया कर्त्रा न प्राप्ता लब्धा संसारे संसारं परिभ्रमता इति मयेति पदस्यार्थ: । का: का आपदो मम स्वयं नागता: । मया वा प्रसह्य का नाऽऽनीता इत्यर्थ: ।।४९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्रव्य० अथ गुरुणा श्रावितव्रतविराधने क्षपकचिन्ता - **यदि उत्पद्यते** जायते **दुःखं** कष्टं **ततो द्रष्टव्यो** ज्ञेयः **स्वभावत**स्तत् प्रादुर्भावः न कोऽप्यात्मव्यतिरिक्तोऽन्यो हेतुः, आत्मैव हेतुरिति विचिन्तयति । अथवा **नवरं** पुनः कियद्दुःखमेतत् । पुरापि **का** दुःखपरंपरा **मे** मया । **मए त्ति** मदे जात्यादौ आसक्तचेतसा संसारे संसरता भ्रमता सता **न प्राप्ता** नानुभूताः ? परं ता अकामनिर्जरया सोढा अल्पस्तत्सहने फलविशेषः । इदानीं त्वनन्तगुणनिर्जरालाभहेतुत्वात् सम्यक् सोढव्या इत्यर्थः। अथवा यदि उत्पद्यते दुःखं ततः किं कर्तव्यमित्याह- तो तदा द्रष्टव्योऽसौ सखा मित्रं रोगादिः पुरुषादिर्वा । कथंभूतः सखा ? आपदं ददातीति आपद्दः । स सखा द्रष्टव्यः नवरमयं विशेषः । का च आपत्कर्त्री मे इति मां कर्मतापन्नं न प्राप्ता । अथ का आपत् कर्मतापन्ना मया कर्त्रा न प्राप्ताऽनुपलब्धा, किं विशिष्टेन ? **संसरता** परिभ्रमता **संसारे** ।।४९।।

संसारचक्कवालम्मि सव्वे वि य पुग्गला मए बहुसो ।
आहारिया य परिणामिया य नाहं गओ तत्तिं ।।५०।।

संसारचक्रवाले सर्वेऽपि च पुद्गला मया बहुशः ।
आहारिताश्च परिणामिताश्च न चाहं गतस्तृप्तिम् ।।५०।।

भुव० न केवलं **मया संसरता वेदना एव सोढाः । अपि त्वाहारा अपि सुखहेतुकाः सर्वेप्याहारिताः। परं तथाऽप्यतृप्त एवायं ममात्मेति भावयन्नाह -** संसारचक्रवाले **भवचक्रे भ्रमता** मया सर्वेऽपि पुद्गलाः **समग्रोऽपि पुद्गलास्तिकायः** । बहुशोऽ**नेकशः** । आहारिता **आहारे गृहिताः,** परिणामिताश्च **तद्रसवेदनेन। अथवा परिणामिताश्च तनुमनोवाक्प्राणत्वेन । अनन्तान् पुद्गलपरावर्त्तान् परिभ्रमता मया । तथापि तैः सर्वैराहारैरपि** नाऽहं तृप्तिं गतो **न संतोषमापन्न इत्यर्थः ।।५०।।**

सोम० अथ न केवलं मया वेदना एव सोढाः, किन्त्वाहारा अपि सुखहेतुकाः सर्वेप्याहारिताः, तथापि अतृप्त एवायं ममात्मेति भावयति - चक्रवालशब्दः समूहार्थे **संसारचक्रवाले** भवसमूहे भ्रमता **मया सर्वेऽपि पुद्गलाः** सर्वोऽपि पुद्गलास्तिकायो **बहुशो**ऽनेकश **आहारिता** आहारत्वेन गृहीताः **परिणामिताश्च** तद्रसवेदनेन तनुमनोवाक्प्राणत्वेन वाऽनन्तपुद्गलपरावर्तान् भ्रमता मयेति योगस्तथापि **तैर्नाहं तृप्तिं गतो** न सन्तोषमापन्नः ।।५०।।

द्रव्य० भवचक्रे भ्रमता **मया सर्वेऽपि** पुद्गलाः **समग्रोऽपि पुद्गलास्तिकायो बहुशो** अनेकश आहारत्वेन गृहीताः **परिणामिताश्च** तद् रसवेदनेन **नाहं तृप्तिं गतो** न सन्तोषमापन्न इत्यर्थः ।।५०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तण-कट्ठेहि व अग्गी लवणजलो वा नईसहस्सेहिं ।
न इमो जीवो सक्को तिप्पेउं काम-भोगेहिं ।।५१।।

तृणकाष्ठैरिवाग्नि लवणजल इव नदीसहस्रैः ।
नायं जीवः शक्यस्तर्पयितुं काम-भोगैः ।।५१।।

भुव० केन दृष्टान्तेन न तृप्त इत्याह - तृणकाष्ठैरिवाग्निः, **लवणं क्षारं जलं यत्र स** लवणजलो **लवणसमुद्रः** । वा **इवार्थे** । नदीसहस्रैः **सहस्रशब्दो बहुत्वसंख्यावचनः** । **यथा समुद्रश्चतुर्दशभिर्नदीनां लक्षैः षट्पञ्चाशत्सहस्रैर्नवत्यधिकैर्न तृप्तो न पूर्णः । एवममुना दृष्टान्तेन** । न इमोत्ति **नायं** जीवः शक्यस्तर्पयितुं **तृप्तीकर्तुं** कामभोगैः । **कामाः शब्दरूपगन्धाः । भोगा रसस्पर्शास्तैरित्यर्थः ।।५१।।**

सोम० केन दृष्टान्तेन न तृप्त इत्याह - **तृणकाष्ठैरिवाग्निः** लवणं क्षारं जलं यस्य स **लवणजलो** लवणसमुद्र इत्यर्थः । **वा** इवार्थे । **नदीसहस्रैः** सहस्रशब्दो बहुत्वसूचकः, यथा नदीनां चतुर्दशलक्षैः षट्पञ्चाशत्सहस्रैर्नवत्यधिकैः समुद्रो **न** तृप्तो न पूर्णस्तथा **नायं जीवस्तर्पयितुं शक्यः** तृप्तीकर्तुं **कामभोगैः** कामाः शब्दरूपगन्धाः, भोगा रसस्पर्शास्तैरित्यर्थः ।।५१।।

द्रगुण० केन दृष्टान्तेन - स्पष्टाः । नवरं **न 'इमो'** न चायं **जीवः शक्यस्तर्पयितुं** तृप्तीकर्तुं **कामाः** शब्दरूपगन्धाः । **भोगा** रसस्पर्शास्तैरित्यर्थः ।।५१।।

आहारनिमित्तेणं मच्छा गच्छंति सत्तमिं पुढविं ।
सच्चित्तो आहारो न खमो [खमइ] मणसा वि पत्थेउं ।।५२।।

आहारनिमित्तेन मत्स्या गच्छन्ति सप्तमीं पृथिवीम् ।
सचित्त आहारो न क्षमो [क्षमते] मनसाऽपि प्रार्थयितुम् ।।५२।।

भुव० अथ तेषु गृद्धस्य दोषान् दर्शयन्नाह - आहारनिमित्तेनाहारेण हेतुना मत्स्यास्तन्दुलमत्स्या गच्छन्ति **यान्ति** सप्तमीं पृथिवीं **तमस्तमाभिधाम् । रसस्य दोषं भणता शेषाणामपि शब्द-रूप-गन्ध-स्पर्शानां दोषो दर्शित एव । तद्धेतुत्वाच्छेषविषयाणाम् । तेषामपि दोष उक्तैर्दर्श्यते । तथाहि -**

सो इंदिय दुद्दंतणस्स अहइत्तिउ इमो दोसो ।
दीवियखमसहंतो वहबंधतित्तिरो पत्तो ।।१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चक्खिंदियदुद्दंतणस्स अहइत्तिउ इमो दोसो ।
जं जलणंमि जलं ते पडइ पयंगो अबुद्धीउ ।।२।।

घाणिंदियदुद्दंतणस्स अहइत्तिउ इमो दोसो ।
जं उसहिगंधेण बिलाओ निद्धायईओ एगो ।।३।।

जिब्भिंदियदुद्दंतणस्स अहइत्तिउ इमो दोसो ।
जं गललग्गुखित्तो फुरइ थलथिरल्लिओ मच्छो ।।४।।

फासिंदियदुद्दंतणस्स अहइत्तिउ इमो दोसो ।
जं खणइ मत्थयं कुंजरस्स लोहं कुसोतिखो ।।५।।

यत एवैतावान् दोषः अत एव तीर्थकरसाधूनां सर्वदोषमूलं प्राकृतत्वात् लिङ्गव्यत्ययः सचित्तमाहारं मनसापि प्रार्थयितुं न क्षमते ।।५२।।

सोम० अथ क्षपक आहारे गृद्धस्य दोषान् चिन्तयति - आहार एव निमित्तम् **आहारनिमित्तम्,** तेन **मत्स्या**स्तन्दुलमत्स्या महामत्स्यमुखमध्ये प्रविशतो निसरतश्चानेकान् मत्स्यान् दृष्ट्वाऽहमेवंविधवपुश्चेद् भवामि तदैतान् सर्वान् भक्षयामीति रौद्रध्यानपरा **गच्छन्ति** यान्ति **सप्तमीं पृथिवीं** तमस्तमाऽभिधाम्, एवं रसस्य दोषं भणता शेषाणामपि शब्द-रूप-गन्ध-स्पर्शाणां दोषो मृग-पतङ्ग-भृङ्ग-मातङ्गदृष्टान्तैर्भणित एव द्रष्टव्यो रसमूलत्वाच्छेषविषयेच्छानाम्, यत एवैतावान् दोष अत एव साधूनां सर्वदोषमूलत्वात् **सचित्ताहारो मनसाऽपि प्रार्थयितुं न क्षमो** न साधुर्न यौक्तिक इत्यर्थः । 'न खमइ' इति पाठे तु प्राकृतत्वाल्लिङ्गव्यत्ययं कृत्वा सचित्तमाहारं जिनसाधूनां मनसा प्रार्थयितुं न क्षमते न सहते इत्यर्थः ।।५२।।

गुण० अथ तेषु गृद्धस्य दोषानाह-आहारेण हेतुना **मत्स्या** यान्ति **सप्तमीं पृथ्वीं, सचित्तमाहारं मनसापि प्रार्थयितुं न क्षमते** न सहते ।।५२।।

पुव्विं कयपरिकम्मो अनियाणो ईहिऊण [ऊहिऊण]मइ-बुद्धी ।
पच्छा मलियकसाओ सज्जो मरणं पडिच्छामि ।।५३।।

पूर्वं कृतपरिकर्मा अनिदान ऊहित्वा मतिबुद्धी ।
पश्चात् मलितकषायः सद्यो मरणं प्रतीच्छामि ।।५३।।

भुव० इति विज्ञातविषयविपाको भावितगुरूपदेशश्च क्षपको यद्भणति तदाह - पूर्वं **प्रथमं "चत्तारि विचित्ताइं" इत्यादिक्रमेण** कृतपरिकर्मा **कृतोत्कृष्टमध्यमजघन्यद्वादशवर्ष-**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्वादशमासद्वादशपक्षसंलेखनः । अनिदानो **निदानरहितः** । ईहिऊण **वितर्क्य विचार्य** मतिं **तत्कालोत्पन्नां,** बुद्धिमुत्तरकालभाविनीं **सूक्ष्मार्थपर्यालोचिकां** पश्चाद्विचारणानन्तरम् । मलितकषायो **मर्दितसम्परायः सन्** सद्यो **झटिति** मरणं **पण्डितमरणं** प्रतीच्छाम्यङ्गीकरोमीत्यर्थः ।।५३।।

सोम० अथ भावितगुरूपदेशो विज्ञातविषयविपाकश्च क्षपकश्चिन्तयति **पूर्वं** प्रथमं "चत्तारि विचित्ताइं" इत्यादिक्रमेण **कृतपरिकर्मा** कृतद्वादशवर्ष-द्वादशमास-द्वादशपक्षरूपोत्कृष्ट-मध्यम-जघन्यसंलेखनोऽ**निदानो** निदानरहित **'ऊहिऊण'** विचार्य स्वयोग्यताविषयां **मतिं** तत्कालोत्पन्नां **बुद्धिं** च तद्विषयामेवोत्तरकालभाविनीं सूक्ष्मार्थपलोचननिपुणाम्, **पश्चात्** तद्विचारणानन्तरं **मलित-कषायो** मर्दितसंपरायः सन् **सद्यः** शीघ्रं **मरणं** तद्हेतुत्वेनोपचारादनशनं **प्रतीच्छाम्यङ्गी**करोमीत्यर्थः ।।५३।।

गुण० इति विज्ञातविषयविपाको भावितगुरूपदेशश्च क्षपको यद्भणति तदाह - **पूर्वं** प्रथमं "चत्तारि विचित्ता" इत्यादिक्रमेण **कृतपरिकर्मा** त्ति कृतोकृष्टमध्यमजघन्यद्वादशवर्षद्वादशमास-द्वादशपक्षसंलेखनः । **अनिदानो** निदानरहितः । **ईहिऊण** वितर्क्य विचार्य **मतिं** तत्कालोत्पन्नां **बुद्धि**मुत्तरकालभाविनीं **पश्चाद्वि**चारणानन्तरं **मलितकषायो** मर्दितसम्परायः सन् **सद्यो** झटिति **प्रतीच्छाम्य**ङ्गीकंरोमि ।।५३।।

अक्कंडेऽचिरभाविय ते पुरिसा मरणदेसकालम्मि ।
पुव्वकयकम्मपरिभावणाए पच्छा परिवडंति ।।५४।।

अकाण्डेऽचिरभावितास्ते पुरुषाः मरणदेशकाले ।
पूर्वकृतकर्मपरिभावनातः पश्चात् प्रतिपतन्ति ।।५४।।

भुव० अथ येऽप्रस्तावेऽपरिकर्मिता वाऽनशनं प्रतिपद्यन्ते तेषामपायमाह - अकाण्डे-ऽप्रस्तावेऽनवसरे ये आराधनां कुर्वन्ति । तथा न चिरं प्रभूतं कालं परिभावितः परिकर्मित आत्मा यैस्ते अचिरभाविताः । विभक्तिलोपः प्राकृतत्वात् । तेऽकृताऽनवसरा राधनाः अकृताराधनाः पुरुषा मरणदेशकाले **मरणसमये** पूर्वकृतकर्मपरिभावनातश्च **प्राक्तनकर्म-विपाकोदयतः प्रतिपतन्ति [पश्चात्]** निदानादि कुर्वन्तीति । नन्दिषेणवत् मिथ्यात्वमपि दुर्गतिं च यान्ति । कुरुडोत्कुरुडवदित्यर्थः ।।५४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० अथ येऽप्रस्तावेऽपरिकर्मिता वा संलेखनयाऽनशनं प्रतिपद्यन्ते तेषामपायमाह - **अकाण्डेऽप्रस्तावेऽनवसरे** ये आराधनामनशग्रहणरूपां **कुर्वन्ति**, तथा चिरं प्रभूतं कालं भावितः संलेखनया परिकर्मित आत्मा यैस्ते चिरभाविताः, तथा ये न एवंविधा**स्ते [अचिरभाविताः] पुरुषा मरणदेशकाले** मरणसमये इत्यर्थः, देशकालशब्देन प्रस्ताव उच्यते । पूर्वं कृतमर्जितं यत् कर्म तस्य परिसमन्ताद् भावना ततः, **स्वप्राक्कृतकर्मविपाकोदयत** इत्यर्थः । **पश्चात् प्रतिपतन्ति** निदानादिकरणेन नन्दिषेणवत् मिथ्यात्वं दुर्गतिं च यान्ति कुरुडोत्कुरुडवत् ।।५४।।

गुण० अथ येऽप्रस्तावेऽपरिकर्मिता वाऽनशनं प्रतिपद्यन्ते तेषामपायमाह-**अप्रस्तावेऽनवसरे** आराधनां कुर्वन्ति. । चिरं प्रभूतं कालं भावितः परिकर्मित आत्मा यैस्ते [चिरभाविताः, तथा ये न एवंविधास्ते **अचिरभाविताः** ।] अचिरभाविया इति अत्र विभक्तिलोपः प्राकृतत्वात् **ते** कृतानवसराराधनाः **पुरुषा मरणदेशकाले** मरणसमये **पूर्वकृतकर्मपरिभावनातश्च** प्राक्तनकर्मविपाकोदयतः । प्रतिपतन्ति निदानानि कुर्वन्ति नन्दिषेणवत् । दुर्गतिं च यान्ति कुरुडोत्कुरुडवत् ।।५४।।

तम्हा चंदगविज्झं सकारणं उज्जुएण पुरिसेणं ।
जीवो अविरहियगुणो कायव्वो मुक्खमग्गम्मि ।।५५।।

तस्माच्चन्द्रकवेध्यं सकारणम् उद्युक्तेन पुरुषेण ।
जीवोऽविरहितगुणः कर्त्तव्यो मोक्षमार्गे ।।५५।।

भुव० यदि वाऽप्रस्तावकारिणामकृताभ्यासानां दोषस्तस्मात्किं कर्त्तव्यमिति **गुरुरुपदेशमाह** - तस्माच्चंद्रकवेध्यं **वामदक्षिणावर्त्तभ्रमदष्टचक्रारकमध्यनिर्गच्छदर्द्धमुखशरप्रयोगतो भूस्थतैलकुण्डिकातैलान्तःप्रतिबिम्बितगगनस्थाधोमुखपुत्तलिकावामलोचनचन्द्रकवेध्यं राधावेधमित्यर्थः** । सकारणं **सहेतुकमुद्युक्तेन** पुरुषेण **साध्यमित्यध्याहारः । यथा चन्द्रकवेध्यं राधावेधं सकारणं राज्यादिलाभकृते केनाऽपि सुरेन्द्रदत्तकल्पेन राजपुत्रेण साध्यते एवं त्वयाऽपि चन्द्रकवेध्यमिव चन्द्रकवेध्यमनशनं सकारणं स्वर्गापवर्गकमलालाभकृते उद्युक्तेन सावधानेन साध्यमित्यर्थः । तर्हि कथं साध्यत इत्याह - "बाहिर जोगविरहिओ अब्भिंतर"** जीवो **जीव आत्मा** अविरहितगुणोऽमुक्तज्ञानदर्शनचारित्रगुणः कर्त्तव्यः । **क्व ?** मोक्षमार्गे **ज्ञानदर्शनचारित्रतपोरुपे तद्व्यवस्थितो हि चन्द्रकवेध्यमाराधनां साधयतीत्यर्थः** ।।५५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० यत एवं ततः किं कर्त्तव्यमिति गुरुरुपदेशमाह - **तस्मात्** कारणाच्चन्द्रकवेध्यं वामदक्षिणावर्तभ्रमदष्टचक्रारकमध्यनिर्गच्छदूर्ध्वमुखशरप्रयोगतो भूस्थकुण्डकागततैलान्तः - प्रतिबिम्बितगगनस्थाधोमुखपुत्तलिकावामलोचनरूपश्चन्द्रकस्तद्रूपं ऊर्ध्वमुखशरप्रयोगतो वेध्यं राधावेधमित्यर्थः साध्यमित्यध्याहारः, केन ? **पुरुषेण,** किम्भूतेन ? **उद्युक्तेन** उद्यमवता सावधानेनेत्यर्थः । कथम् ? **सकारणं** स्वर्गापवर्गादिश्रीलाभहेतोरित्यर्थः यथा राधावेधः सकारणं राज्यादिलाभकृते केनापि साध्यते एवं चन्द्रकवेध्यमिवानशनं सकारणं मोक्षादिलाभकृते सावधानेन साधयितव्यमिति भावः, तत्साधनोपायश्चायमित्याह- **जीवो०** जीवात्माऽ**विरहितगुणो**ऽमुक्तज्ञान-दर्शन-चारित्रगुणः **कर्त्तव्यः** । क्व ? **मोक्षमार्गे** ज्ञानदर्शनचारित्रतपोरूपे तद्व्यवस्थितो हि चन्द्रवेध्यसमां प्रान्ताराधनां साधयतीत्यर्थः ।।५५।।

गुण० यदि अप्रस्तावकारिणामकृताभ्यासानां च दोषस्तस्मात् किं कर्तव्यमिति गुरुरुपदेशमाह - **चन्द्रकवेध्यं** वामदक्षिणावर्तभ्रमदष्टचक्रारकमध्यनिर्गच्छदूर्ध्वमुखशरप्रयोगतो भूस्थतैलकुण्डि-कातैलान्तःप्रतिबिम्बितगगनस्थाधोमुखपुत्तलिकावामलोचनचन्द्रकवेध्यं राधावेधमित्यर्थः । **सकारणं सहेतुकमुद्युक्तेन पुरुषेण** साध्यमित्यध्याहारः । यथा चन्द्रकवेध्यं राधावेध्यं सकारणं राज्यादिलाभकृते केनापि सुरेन्द्रदत्तकल्पेन राजपुत्रेण साध्यते एवं त्वयाऽपि चन्द्रकवेध्यमिव चन्द्रकवेध्यमनशनं सकारणं स्वर्गापवर्गकमलालाभकृते उद्युक्तेन सावधानेन साध्यमित्यर्थः । तर्हि कथं साध्यत इत्याह-**जीवो०** आत्मारूपोऽ**विरहित**गुणोऽमुक्तज्ञानदर्शनचारित्रगुणः **कर्तव्यः** । क्व ? **मोक्ष०** मोक्षमार्गे ज्ञानदर्शनचारित्रतपोरूपे तद्व्यवस्थितो हि चन्द्रकवेध्यमाराधनां साधयतीत्यर्थः ।।५५।।

बाहिरजोगविरहिओ अब्भिंतरझाणजोगमल्लीणो ।
जह तम्मि देसकाले अमूढसन्नो चयइ देहं ।।५६।।

बाह्ययोगविरहितोऽभ्यन्तरध्यानयोगमाश्रितः ।
यथा तस्मिन् देशकालेऽमूढसंज्ञस्त्यजति देहम् ।।५६।।

भुव० कथं मोक्षमार्गे जीवो गामयितव्य इत्याह - बाह्ययोगै**र्बाह्यसम्बन्धैर्गच्छोप-करणादिभि**र्विरहितो **वियुक्तः** । अभ्यन्तरध्यानयोगं **'जिणसाहुगुणकित्तण' इत्यादिरूपं** अल्लीणोत्ति **आश्रितस्तथा कर्त्तव्य इत्यध्याहारः** । यथा तस्मिन् देशकालेऽमूढसंज्ञः **सन्** ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अविगतचेतनस्त्यजति देहं **शरीरमित्यर्थः** । **यदा** न हु तंमीति **पाठस्तदायमर्थः, यदि पूर्वं बाह्ययोगविरतो न स्यादभ्यन्तरध्यानयोगयुक्तश्च न स्यात्तदा न हु नैव तस्मिन् देशकाले मरणावसरेऽमूढसंज्ञः सन् देहं शरीरं त्यजेदित्यर्थः ।।५६।।**

सोम० कथं मोक्षमार्गे एवंविधो जीवः कर्त्तव्य इत्याह - बाह्ययोगैर्बाह्यसम्बन्धैर्गच्छोपकरणादिप्रतिबन्धरूपैर्विरहितो वियुक्तोऽभ्यन्तरध्यानयोगं "जिणसाहुगुणकित्तण" इत्यादिरूपम्, **अल्लीणोत्ति** आश्रितः स्वात्मा तथा कर्त्तव्य इत्यध्याहारः । **यथा तस्मिन् देशकाले** तस्मिन्नवसरेऽ**मूढसंज्ञो**ऽविगतचेतनः सावधानमना इत्यर्थः, **त्यजति देहं** शरीरमित्यर्थः । 'न हु तंमि देशकाले' इति क्वचित्पाठस्तत्रायमर्थः यदि पूर्वमेव बाह्ययोगविरतोऽभ्यन्तरध्यानयोगयुक्तश्च स्यात्, तदा 'न हु' नैव तस्मिन् देशकालेऽमूढसंज्ञस्सन् देहं त्यजेदित्यर्थः ।।५६।।

गुण० कथं मोक्षमार्गे जीवः कर्तव्य इत्याह - बाह्ययोगैर्बाह्यसम्बन्धैर्गच्छोपकरणादिभिर्विरहितो वियुक्तोऽ**भ्यन्तरध्यानयोगं** 'जिणसाधुगुणकित्तण' इत्यादिरूपम्, **अल्लीणो** आश्रितस्तथा कर्तव्य इत्यध्याहारः । **यथा तस्मिन् देशकाले** तस्मिन्नवसरेऽ**मूढसंज्ञ** अविगतचेतन**स्त्यजति देहम्**।।५६।।

हंतूण राग-दोसं भित्तूण य अट्ठकम्मसंघायं [संकलिअं]।
जम्मण-मरणऽरहट्टं छेत्तूण भवा विमुच्चिहिसि ।।५७।।

हत्वा रागद्वेषौ भित्त्वा चाष्टकर्मसङ्घातम् [संकलिकाम्]।
जन्ममरणारहट्टं छित्त्वा भवाद् विमोक्ष्यसे ।।५७।।

भुव० एवं च **वत्स ! तव देहत्यागिनः किं न भविष्यतीत्याह** - हत्वा रागद्वेषौ **एकवचनं प्राकृतत्वात्** भित्त्वाऽष्टकर्मसंकलिकां **शृङ्खलां** जम्मणमरणरहट्टंति **जन्ममरणान्येवारघट्टो जन्मजरामरणारघट्टस्तत्र जन्ममरणारघट्टे संसारिणो जीवाः कर्मराशिप्रतिबद्धा बलीवर्दवत्सततं परिभ्रमन्ति । तत्रापि ये केचनापि प्रमत्ताः सन्तः पर्यटन्ति ते गुणमालां भङ्क्त्वा नरककूपे निपतन्ति इति तीव्रदुःखानि च सहन्ते ये पुनरप्रमत्ता भ्रमन्ति ते गुरुदेशनावृष्टिमोचिताः सन्तो बन्धरहिताः सर्वाङ्गमोक्षकरां सुगतिं प्राप्नुवन्ति । तमेवंभूतं जन्ममरणारघट्टं** छित्त्वा भवात्**संसाराद्वत्स !** मोक्ष्यसे **त्वमित्यर्थः ।।५७।।**

सोम० एवं वत्स ! तव देहत्यागिनः किं भविष्यतीत्याह - **हत्वा रागद्वेषौ** एकवचनं प्राकृतत्वात् समाहारद्वन्द्ववशाद् वा **भित्त्वा चाष्टकर्मसङ्घातम्,** 'संकलिअं' इति पाठेऽष्टकर्मरूपा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

या सङ्कलिका शृङ्खला तां भित्त्वेत्यर्थः' जन्ममरणान्येवारघट्टो **जन्ममरणारघट्टस्तं छित्त्वा भवात्** संसाराद् वत्स ! **मोक्ष्यसे त्वम्** । अयं भावः- जन्ममरणारघट्टे संसारिणो जीवाः कर्मराशिबद्धा बलीवर्दवत् सततं भ्रमन्ति, तत्रापि ये प्रमत्तास्सन्तः पर्यटन्ति गुणरूपां मालां भङ्क्त्वा नरकरूपे कूपे निपतन्ति तीव्रदुःखानि च सहन्ते । ये पुनरप्रमत्ता भ्रमन्ति ते गुरुदेशनावृष्टिशोधिताः सन्तो बन्धरहिताः सर्वाङ्गमोक्षकरां सुगतिं प्राप्नुवन्ति एवं त्वमपि मोक्ष्यसे इत्यर्थः ।।५७।।

द्युण० एवं च वत्स ! तव देहत्यागिनः किं भावीत्याह - **भित्त्वाऽष्टकर्मसंकलिकाशृखलाम्** । जन्ममरणारघट्टे भविनो जीवाः कर्मराशिप्रतिबद्धा बलीवर्दवत् सततं परिभ्रमन्ति । तत्रापि ये केचनापि प्रमत्ताः सन्तः पर्यटन्ति ते गुणमालां भङ्क्त्वा नरककूपे पतन्ति, तीव्रदुःखानि सहन्ति । ये पुनरप्रमता भ्रमन्ति ते गुरुदेशनामोचिता सन्तो बन्धरहिता सर्वांगमोक्षकरां सुगतिं प्राप्नुवन्ति । तमेवंभूतं **जन्ममरणारहट्टं छित्त्वा संसारात् वत्स ! मोक्ष्यसे** त्वम् ।।५७।।

एयं (एवं) सव्वुवएसं जिणदिट्ठं सद्दहामि तिविहेणं ।
तस-थावरखेमकरं पारं निव्वाणमग्गस्स ।।५८।।

एतं (एवं) सर्वोपदेशं जिनदृष्टं श्रद्दधे त्रिविधेन ।
त्रसस्थावरक्षेमकरं पारं निर्वाणमार्गस्य ।।५८।।

भुव० **इत्येवं गुरुभिरुपदिष्टे स क्षपकः किं ब्रूते इत्याह** - एवं एतं वा सर्वमुपदेशं जिनदृष्टं श्रद्दधे । त्रिविधेन **मनोवाक्कायेन** । **कथंभूतमुपदेशम् ?** त्रसस्थावरक्षेमकरं **सर्वजीवकल्याण-कारि** । **पुनः कथंभूतम् ?** पारं **परतीरम्, कस्य ?** निर्वाणमार्गस्य **मोक्षपथस्येत्यर्थः** ।।५८।।

सोम० एवं गुरुभिरूपदिष्टे क्षपकः प्राह - **एवं एतं** वा युष्मदुपदिष्टं **सर्वमुपदेशं जिनदृष्टं श्रद्दधे त्रिविधेन** मनोवाक्कायेन । कथम्भूतमुपदेशम् ? **त्रसस्थावरक्षेमङ्करं** सर्वजीवकल्याणकारि, पुनः कथम्भूतम् ? **पारं** परतीरम् । कस्य ? **निर्वाणमार्गस्य** मोक्षपथस्य मोक्षमार्गपारप्रापकं मोक्षदायकमित्यर्थः ।।५८।।

द्युण० एवं गुरूपकृते क्षपको वदति - **एवं एतं** वा **सर्वमुपदेशं जिनदृष्टं श्रद्दधे त्रिविधेन** मनोवाक्कायेन । कथंभूतमुपदेशम् ? **त्रसस्थावरक्षेमकरं** सर्वजीवकल्याणकारि, पुनः कथंभूतम् ? **पारं** परतीरम् कस्य ? **निर्वाणमार्गस्य** मोक्षपथस्येत्यर्थः ।।५८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

न हु तम्मि देसकाले सक्को बारसविहो सुयक्खंधो ।
सव्वो अणुचिंतेउं धणियं पि समत्थचित्तेणं ।।५९।।

नैव तस्मिन् देशकाले शक्यो द्वादशविधः श्रुतस्कन्धः ।
सर्वोऽनुचिन्तयितुं बाढमपि समर्थचित्तेन ।।५९।।

भुव० अथ **गुरुभिर्जीवोऽविरहितगुणः कर्त्तव्य इत्युक्तम् । स च श्रुतचिन्तनाद्भवतीति । तच्च कियच्चिन्तनीयमित्याह - न हु** नैव तस्मिन् देशकाले **पर्यन्तसमये शिथिलीभवत्सु बन्धनेषु स्खलति जिह्वाबले अपयान्त्यां श्रुतिशक्तौ** । शक्यः **शकनीयो** द्वादशविधो **द्वादशप्रकारः** श्रुतस्कन्धः **श्रुतपिण्डो द्वादशाङ्गरूपः** सर्वो **निरवशेषः** । अनुचिन्तयितुं **स्मर्तुं** धणियमत्यर्थमपि समर्थचित्तेन **दृढश्रुतिशक्तिनापि** ।।५९।।

सोम० अथ जीवो गुरुभिरविरहितगुणः कर्त्तव्य इत्युक्तम्, स च श्रुतचिन्तनादेव भवति, तच्च श्रुतं कियच्चिन्तनीयमित्याह - **'न हु'** नैव **तस्मिन् देशकाले** पर्यन्तसमये शिथिलीभवत्सु बन्धनेषु स्खलति जिह्वाबलेऽपयान्त्यां श्रुतशक्तौ **शक्यः** शकनीयो **द्वादशविधो** द्वादशाङ्गरूपः **श्रुतस्कन्धः** श्रुतपिण्डः **सर्वो** निरवशेषोऽ**नुचिन्तयितुं** स्मर्तुं **'धणियं'** अत्यर्थं **समर्थचित्तेन** दृढमनः-शक्तिवताऽपि ।।५९।।

गुण० अविरहितगुणः श्रुतचिन्तनात् भवति तदाह - **नैव तस्मिन् देशकाले** पर्यन्तसमये शिथिलीभवत्सु बन्धनेषु स्खलति जिह्वाबलेऽपयान्त्यां श्रुतशक्तौ* **शक्यः** शकनीयो **द्वादशविधो** द्वादशप्रकारः **श्रुतस्कन्धः सर्वो** निरवशेषोऽ**नुचिन्तयितुं 'धणियम'**त्यर्थमपि **समर्थचित्तेन** दृढश्रुतशक्तिनापि ।।५९।।❖

एगम्मि वि जम्मि पए संवेगं वीयरागमग्गम्मि ।
गच्छइ नरो अभिक्खं तं मरणं तेण मरियव्वं ।।६०।।

एकस्मिन्नपि यस्मिन् पदे संवेगं वीतरागमार्गे ।
गच्छति नरोऽभीक्ष्णं तन्मरणं तेन मर्त्तव्यम् ।।६०।।

भुव० अत एकस्मिन्नपि यस्मिन्पदे **यदेवस्थाने एकाङ्गैकाध्ययनैकोद्देशकैकाधिकारैक-**

* श्रवणशक्तौ इत्यर्थः । ❖ स्वाध्यायदृढमूलश्रुतज्ञानबलवताऽपि ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गाथैकपदरूपे अधीते सति वीतरागमार्गे संवेगं **मोक्षाभिलाषरूपं** गच्छति **प्राप्नोति** नरो **मनुष्योऽभीक्ष्णं निरन्तरं** तन्मरणं **संवेगप्राप्तिरूपं** तेन **पदेन हेतुना** मर्त्तव्यमित्यर्थः ।।६०।।

सोम० अत **एकस्मिन्नपि यस्मिन् पदेऽङ्गाध्ययनोद्देशगाथापदादिरूपेऽधीते** सति **वीतरागमार्गे संवेगं** मोक्षाभिलाषरूपं **गच्छति नरोऽभीक्ष्णं** निरन्तरं **तन्मरणं** संवेगप्राप्तिसुभगम्, **तेनैव** पदेनाविस्मृतेन सता **मर्त्तव्यमित्यर्थः** ।।६०।।

गुण० अत **एकस्मिन्नपि यस्मिन्पदे** स्थाने एकगाथा-एकपदरूपेऽधीते सति **वीतरागमार्गे संवेगं** मोक्षाभिलाषरूपं **गच्छति** प्राप्नोति नरो मनुष्योऽ**भीक्ष्णं** तन्मरणं ते संवेगप्राप्तिरूपं **तेन** पदेन हेतुना **मर्त्तव्यमित्यर्थः** ।।६०।।

ता एगं पि सिलोगं जो पुरिसो मरणदेसकालम्मि ।
आराहणोवउत्तो चिंतंतोऽऽराहगो होइ ।।६१।।

तदेकमपि श्लोकं यः पुरुषो मरणदेशकाले ।
आराधनोपयुक्तश्चिन्तयन्नाराधको भवति ।।६१।।

भुव० ततः किमित्याह - तस्मात्ततो **तावत्** । एकमपि श्लोकं **पञ्चपरमेष्ठिनमस्कारस्मरणरूपं** यः पुमान् मरणकाले आराधनोपयुक्तः **सन् चिन्तयति** । **स तं** चिन्तयन् **स्मरन्**नाराधको भवति।।६१।।

सोम० ततः किमित्याह - **ता** तस्मा**देकमपि श्लोकं** पञ्चपरमेष्ठिनमस्कारादिरूपं **यः पुमान् मरणदेशकाले आराधनोपयुक्तः** सन् **चिन्तयति** स तं चिन्तयन् स्मर**न्नाराधको भवति** ।।६१।।

गुण० ततः किमित्याह - **तस्मात्** तत **एकमपि श्लोकं** पञ्चपरमेष्ठिनमस्कारस्मरणरूपं **यः पुमान् मरणकाले आराधनोपयुक्तः** सन् **चिन्तयति** स तं चिन्तयन् स्मर**न्नाराधको भवति** ।।६१।।

आराहणोवउत्तो कालं काऊण सुविहिओ सम्मं ।
उक्कोसं तिन्नि भवे गंतूणं लहइ निव्वाणं ।।६२।।

आराधनोपयुक्तः कालं कृत्वा सुविहितः सम्यक् ।
उत्कृष्टतस्त्रीन् भवान् गत्वा लभते निर्वाणम् ।।६२।।

भुव० अथाराधकस्य किं फलमित्याह - आराधनया **उत्तमार्थप्रतिपत्त्या** उपयुक्त **उद्यतः**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कालं कृत्वा सुविहितः **सुसाधुः** सम्यक् उत्कृष्टतोऽतिशयेन **सम्यगाराधनां कृत्वा** त्रीन् भवान् गत्वा लभते निर्वाणं **मोक्षमित्यर्थः । एतदुक्तं भवति - यदि परमसमाधानेन कालं करोति सम्यक् ततस्तृतीये भवेऽवश्यं सिद्ध्यति । अत्राह परः उत्कृष्टतोऽष्टभवाभ्यन्तरे सामायिकं प्राप्य सिद्ध्यति इत्येतन्नाप्युत्कृष्टं नाऽपि जघन्यं ततश्च कथं न विरोधः ? इति उच्यते - अनवगाहितसिद्धान्तसद्भावस्यैतद्वचः । यत्पुनरेकैनैव भवेन जघन्यतः सिद्ध्यतीत्युक्तं तद्वज्रऋषभनाराचसंहननमाश्रित्य एतच्चच्छेदपृष्टसंहननमङ्गीकृत्योच्यते । छेदपृष्टसंहननो हि यद्युत्कृष्टाराधनां करोति ततस्तृतीये भवे मोक्षं प्राप्नोति । उत्कृष्टशब्दश्चात्रातिशयार्थे दृष्टः। न तु भवानङ्गीकृत्य, भवाङ्गीकरणे पुनरष्टभिरेवोत्कृष्टतो भवैश्छेदपृष्टसंहननः सिद्ध्यतीति न विरोध इति ।।६२।।**

सोम० अथाराधकस्य किं फलमित्याह - **आराहणा०** उत्तमार्थप्रतिपत्त्याऽऽराधनायां वोपयुक्त उद्यतः सावधान इत्यर्थः **कालं** मरणं **कृत्वा सुविहितः** सुसाधुः **सम्यक्** शुद्धभावेनोत्कृष्टत उत्कृष्टाराधनाबलात् **त्रीन् भवान् गत्वा लभते निर्वाणं** मोक्षमित्यर्थः, यदि परमसमाधिना कालं मरणं निरन्तरमष्टभवाराधनया जघन्यतस्त्वेकभवाराधनयाऽपि सिध्यतीत्युक्तम् । अत्र तु तृतीयभवे सिध्यतीति तदेतन्नाप्युत्कृष्टं नापि जघन्यं ततश्च कथं न विरोधः ? उच्यते - यावदेकैनैव भवेन सिध्यतीत्युक्तं तद् वज्रऋषभनाराचसंहननमाश्रित्य एतच्च सेवार्त्तसंहननमङ्गीकृत्योच्यते सेवार्त्त-संहननो हि यद्युत्कृष्टाराधनां करोति ततस्तृतीये भवे सिध्यतीति उत्कृष्टशब्दश्चातिशयार्थः, आराधनाविशेषणं च दृष्टव्यः न तु भवानङ्गीकृत्य, भवाङ्गीकारे पुनरुकृष्टतोऽष्टभिरेव भवैः सेवार्त्तसंहननः सिध्यतीति न विरोधः ।।६२।।

वृ० आराधकस्य किं फलं - **आराधनया** उत्तमार्थप्रतिपत्त्या **उपयुक्त** उद्यतः **कालं कृत्वा सुविहितः** सुसाधुः **सम्यक् उत्कृष्टतो**ऽतिशयेन सम्यगाराधनां कृत्वा **त्रीन् भवान् गत्वा लभते निर्वाणं** मोक्षमित्यर्थः । एतदुक्तं भवति - यदि परमसमाधानेन कालं करोति सम्यक् ततस्तृतीये भवेऽवश्यं सिध्यति ।।६२।।

समणो त्ति अहं पढमं, बीयं सव्वत्थ संजओ मि त्ति ।
सव्वं च वोसिरामि, एयं भणियं समासेणं ।।६३।।

श्रमण इति अहं प्रथमं द्वितीयं सर्वत्र संयतोऽस्मीति ।
सर्वं च व्युत्सृजामि एतद्भणितं समासेन ।।६३।।

भुव० एवं विज्ञाताराधनाफलः **कया वासनया सर्वं व्युत्सृजतीत्याह -** प्रथमं तावदहं श्रमणो

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

महाव्रताङ्गीकारात् कृततप:खेद: । द्वितीयं सर्वत्र **समितगुप्तत्वात्संयतोऽस्मि प्रतिनिगृहीतेन्द्रिय:, अत: ममैवंविधस्य सत: किं प्रतिबन्धेनाहाराभिलाषेण वा किं** तत्सर्वमपि व्युत्सृजामि । एतत्समासेन **संक्षेपेण** भणित**मित्यर्थ:** ।।६३।।

सोम० अथ स क्षपको विज्ञाताराधनाफल: किं चिन्तयन् सर्वं व्युत्सृजतीत्याह - **प्रथमं** तावद**हं श्रमण:** कृतमहाव्रताङ्गीकारो तप:-संसारखेदरूपेण श्रमू च खेदतपसोरिति धात्वन्वर्थेन युक्त:, **द्वितीयं सर्वत्र** समितगुप्तत्वात् **संयतोऽस्मि** निगृहीतेन्द्रिय इत्यर्थ:, अतो ममैवंविधस्य सत: किं प्रतिबन्धेनाहाराभिलाषेण वा किं तत: **सर्वमप्येतद् व्युत्सृजामि** त्यजामि । **संक्षेपेणैतत्** क्षपकभावनास्वरूपं **भणितं** प्रोक्तमित्यर्थ: ।।६३।।

गुण० एवं विज्ञाताराधनाफल: कया वासनया सर्वं व्युत्सृजतीत्याह - **प्रथमं तावदहं श्रमणो** महाव्रताङ्गीकारात् कृततप:खेद: । **द्वितीयं सर्वत्र** समितगुप्तत्वात् **संयतोऽस्मि** निगृहीतेन्द्रिय: । तत: ममैवंविधस्य सत: किं प्रतिबन्धेनाहाराभिलाषेण वा किं तत्**सर्वमपि व्युत्सृजामि, एतत्समासेन भणितमित्यर्थ:** ।।६३।।

लद्धं अलद्धपुव्वं जिणवयणं सुभासियं अमयभूयं ।
गहिओ सुग्गइमग्गो नाहं मरणस्स बीहेमि ।।६४।।

लब्धमलब्धपूर्वं जिनवचनं सुभाषितममृतभूतम् ।
गृहीत: सुगतिमार्गो नाहं मरणाद्बिभेमि ।।६४।।

भुव० अथ क्षपको भावनां भावयन्निदमाह - लब्धं **प्राप्त**मलब्धपूर्वम**प्राप्तपूर्वं** पुराऽस्मिन् **भवे परिभ्रमता मया न कदाचिदाराधनावस्तु अनुभूतमित्यर्थ: । किं विशिष्टमित्याह - जिनवचने सिद्धान्ते सुष्ठु अतिशयेन भाषितं प्रतिपादितं** जिनवचनसुभाषितम् । **पुन: कथंभूतम् ? अमृततुल्यम् देवभोज्यतुल्यम् । अथवा जिनवचनसुभाषितमेव विशेष्यपदं तदपि अलब्धपूर्वम् । उक्तञ्च -**

सुलहा सुरालयसिरी रयणायरमेहलामही सुलहा ।
निव्वुइसुहजणियरुई जिणवयणसुई जए दुलहा ।।१।।

तथा **अमृतभूतम्** अमृततुल्यं परमसुखहेतुत्वाद्वलिपलितजराविघातकत्वाच्च । अत एव च **गृहीतो** लब्ध: **सुगतिमार्गो** मोक्षमार्गो **नाहमिदानीं मरणाद्बिभेमी**त्यर्थ: ।।६४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० पुनः क्षपको यथा भावनां भावयति तथाऽऽह - **लब्धं** प्राप्त**मलब्धपूर्वं** मयाऽप्राप्तपूर्वं पुराऽस्मिन् भवे परिभ्रमता मया न कदाचिदेवेतदाराधनावस्त्वनुभूतमित्यर्थः । किंविशिष्टम् ? **जिनवचने** सिद्धान्ते सुष्ठु अतिशयेन **भाषितं** प्रतिपादितम् । पुनः कथंभूतम् ? **अमृतभूतं** भूतशब्द उपमार्थे अमृततुल्यं परमपदहेतुत्वाज्जरामरणादिविघातकत्वेन । अथवा **जिनवचनसुभाषितं** विशेषपदम् । तदपि अलब्धपूर्वं लब्धं अमृतभूतं चेति यत एतल्लब्धं अत एव **गृहीतो** लब्धः **सुगति-मार्गो** मोक्षमार्गो मया अतो **नाऽहमिदानीं मरणाद्बिभेमि** । प्राकृतत्वात् पञ्चम्यऽर्थे षष्ठी ।।६४।।

गुण० अथ क्षपको भावनां भावयन्निदमाह - **लब्धं** प्राप्त**मलब्धपूर्वं** परस्मिन् भवे परिभ्रमता मया न कदाचिदाराधनावस्तु अनुभूतमित्यर्थः । जिनवचनं सुभाषितम् । **अमृतभूतं** देवभोज्यतुल्यं **गृहीतो** लब्धः **सुगतिमार्गो** मोक्षमार्गः । नाहमिदानीं मरणस्य बिभेमीत्यर्थः ।।६४।।

धीरेण वि मरियव्वं, काउरिसेण वि अवस्स मरियव्वं ।
दुण्हं पि हु मरियव्वं वरं खु धीरत्तणे मरिउं ।।६५।।

धीरेणापि मर्त्तव्यं कापुरुषेणाप्यवश्यं मर्त्तव्यम् ।
द्वयोरपि मर्त्तव्यं वरमेव धीरत्वेन मर्त्तुम् ।।६५।।

भुव० तथा धीरेणाऽपि **सुभटेन सता** मर्त्तव्यम् । **निर्धीरेणाऽपि विगतधैर्येण** कातरेणाऽपि **सता** मर्त्तव्यम्। द्वाभ्यामपि **प्रकाराभ्यां** हु **स्फुटं** मर्त्तव्यमे**व** । **तस्माद्वरं** खु **निश्चये** धीरत्वेन मर्त्तुं **युक्तमित्यर्थः** ।।६५।।

सोम० तथा **धीरेणाऽपि** सुभटेनाऽपि सता **मर्त्तव्यं, कापुरूषेणाऽपि** विगतधैर्येण कातरेणाऽपि **अवश्यं** निश्चितं **मर्त्तव्यम्** । एवं **द्वाभ्यामपि** प्रकाराभ्यां हु स्फुटं **मर्त्तव्यमेव** तस्माद्वरं **खु** निश्चये **धीरत्वेन मर्त्तुं** युक्तमित्यर्थः । मरियव्वे इति पाठे मर्त्तव्ये सतीति गम्यम् ।।६५।।

गुण० तथा **धीरेणापि** सुभटेनापि **मर्त्तव्यं, कातरेणापि मर्त्तव्यम्** । **द्वाभ्यामपि** प्रकाराभ्यां हु स्फुटं **मर्त्तव्यमेव** तस्माद्वरं खु निश्चये **धीरत्वेन मर्त्तुं** युक्तमित्यर्थः ।।६५।।

सीलेण वि मरियव्वं, निस्सीलेण वि अवस्स मरियव्वं ।
दोण्हं पि हु मरियव्वं वरं खु सीलत्तणे मरिउं ।।६६।।

शीलवताऽपि मर्त्तव्यं निःशीलेनाप्यवश्यं मर्त्तव्यम् ।
द्वयोरपि मर्त्तव्यं वरमेव शीलवता मर्त्तुम् ।।६६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भुव० तथा **शीलयोगात्पुरुषोऽपि शीलः** । शीलेनाऽप्यलुप्तसमाचारेण **पालितनिज-प्रतिज्ञेनाऽपि** मर्त्तव्यम् । निःशीलेनाऽपि **भ्रष्टप्रतिज्ञेनाऽपि** मर्त्तव्यम् । द्वाभ्यामपि **भेदाभ्यां मर्त्तव्यम्** । खु **तस्मादर्थे** वरं शीलत्वेन मर्त्तुमित्**यर्थः** ।।६६।।

सोम० तथा शीलं सदाचारस्तद्योगात् पुरुषोऽपि शीलः, ततः **शीलेनाप्यलुप्तसदाचारेण** पालितनिजप्रतिज्ञेनापि **मर्त्तव्यम्, निःशीलेनापि** भ्रष्टप्रतिज्ञेनाप्यवश्यं **मर्त्तव्यम्** । **द्वाभ्यामपि** भेदाभ्यां **मर्त्तव्यं 'खु'** तस्मादर्थे **वरं शीलत्वेन** पालितसदाचारत्वेन **मर्त्तुमित्यर्थः** ।।६६।।

गुण० **शीलेनापि** अलुप्तसदाचारेण पालितनिजप्रतिज्ञेनापि **मर्त्तव्यम्** । **निःशीलेनापि** भ्रष्टप्रतिज्ञेनापि **मर्त्तव्यम्** । **द्वाभ्यामपि** भेदाभ्यां **मर्त्तव्यम् 'खु'** तस्मादर्थे **वरं शीलत्वेन मर्त्तुमित्यर्थः** ।।६६।।

नाणस्स दंसणस्स य सम्मत्तस्स य चरित्तजुत्तस्स ।
जो काही उवओगं संसारा सो विमुच्चिहिसि ।।६७।।

ज्ञानस्य दर्शनस्य च सम्यक्त्वस्य च चारित्रयुक्तस्य ।
यः करिष्यत्युपयोगं संसारात्स विमोक्ष्यते ।।६७।।

भुव० **इति स्थिरीभूते क्षपके गुरुः सामान्योपदेशं फलद्वारेण गाथापञ्चकेनाह** - ज्ञानस्य **विशेषोपयोगरूपस्य,** दर्शनस्य **सामान्योपयोगस्य,** सम्यक्त्वस्य **निःशङ्किताद्यष्टप्रकारस्य, चारित्रस्य समितिगुप्तिभेदतोऽष्टभेदस्य** यः **साधुः** काही **करिष्यति** । उपयोगं **सावधानत्वं** स **मुनिः** संसाराद्भवाद्विमोक्ष्यते **छुटिष्यतीत्यर्थः** ।।६७।।

सोम० इत्थं स्थिरीभूते क्षपके गुरुः सामान्यत उपदेशं फलकथनद्वारेण गाथाचतुष्केणाह - **ज्ञानस्य** विशेषोपयोगरूपस्य, **दर्शनस्य** सामान्योपयोगरूपस्य, **सम्यक्त्वस्य** निःशङ्किताद्यष्ट-प्रकारस्य, **चारित्रस्य** समितिगुप्तिभेदतोऽष्टविधस्य च, **यः** साधुः **'काही'** करिष्यति **उपयोगं** तद्विषय-सावधानत्वमित्यर्थः **स** मुनिः **संसाराद्** भवात् **विमोक्ष्यते** छुटिष्यतीत्यर्थः ।।६७।।

गुण० इति स्थिरीभूते क्षपके गुरुः सामान्योपदेशं फलद्वारेण गाथापञ्चकेनाह - **ज्ञानस्य** विशेषोपयोगस्य **दर्शनस्य** सामान्योपयोगस्य **सम्यक्त्वस्य** निशङ्किताद्यष्टप्रकारस्य **चारित्रस्य** समितिगुप्तिभेदतोऽष्टभेदस्य **यः** साधुः **करिष्यति उपयोगं** सावधानत्वं **स** मुनिः **संसाराद्** भवाद् **विमोक्ष्यते** छुटिष्यतीत्यर्थः ।।६७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चिरउसियबंभयारी पप्फोडेऊण सेसयं कम्मं ।
अणुपुव्वीइ विसुद्धो गच्छइ सिद्धिं धुयकिलेसो ।।६८।।

चिरोषितब्रह्मचारी प्रस्फोट्य शेषकं कर्म ।
आनुपूर्व्या विशुद्धो गच्छति सिद्धिं धूतक्लेशः ।।६८।।

भुव० चिरउसियत्ति प्राकृतत्वाद्विसंधिः । **चिरमुषितो ब्रह्मणः चरणं ब्रह्मचारः । चिरोषितो ब्रह्मचारो येन स** चिरोषितब्रह्मचारः । **चिरोषितः ब्रह्मचारो विद्यते यस्याऽसौ चिरोषितब्रह्मचारी त्वम् ।** प्रस्फोट्य **विधूय** शेषकं कर्म **क्षिप्तोद्धारितं कर्म ज्ञानावरणादि । अथवा चिरओ सि बंभयारी इति वा पाठः। तदायमर्थः - यत एव विरतोऽसि ब्रह्मचार्यसि अत एव प्रस्फोट्य शेषकं कर्मेति सम्बन्धः ।** आनुपूर्व्या **क्रमेणोत्तरोत्तरगुणस्थानाधिरोहणतः** विशुद्धः **कर्ममलमुक्तः सन् ।।६८।।**

सोम० तथा चिरम् उषितः सेवितः प्राकृतत्वाद्विसन्धिरस्वारलोपश्च चिरोषितो यो ब्रह्मणश्चरणं ब्रह्मचारः स विद्यते यस्याऽसौ **चिरोषितब्रह्मचारी** । 'चिर उसिबंभयारी' इतिपाठे त्वयमर्थो यत एव विरतोऽसि ब्रह्मचार्यसि त्वम्, अत एव **प्रस्फोट्य** विधूय **शेषकं** पूर्वक्षिप्तकर्मभ्य उद्धरितं **कर्म** ज्ञानावरणादि **आनुपूर्व्या** क्रमेणोत्तरोत्तरगुणस्थानाधिरोहलक्षणेन **विशुद्धः** सन् कर्ममलक्षालनतः प्रथमपाठे सामान्यतो जीवः कर्त्ता **गच्छति** याति **सिद्धिं** शिवं **धूतक्लेशः** क्षिप्तसप्तभयक्लेशः सन्नित्यर्थः । द्वितीयपाठे प्राकृतत्वाद् विभक्तिव्यत्ययं कृत्वा गच्छसि यास्यसि सिद्धिं शिवमिति व्याख्येयम् ।।६८।।

गुण० चिरमुषितो ब्रह्मचारो येन स **चिरोषितब्रह्मचारी प्रस्फोट्य** विधूय **शेषकं** पूर्वक्षिप्तोद्धरितं **कर्म** ज्ञानावरणादि **आनुपूर्व्या** क्रमेण **विशुद्धो** कर्ममलक्षालनात् क्षिप्तभयक्लेशः ।।६८।।

निक्कसायस्स दंतस्स सूरस्स ववसाइणो ।
संसारपरिभीयस्स पच्चक्खाणं सुहं भवे ।।६९।।

निष्कषायस्य दान्तस्य शूरस्य व्यवसायिनः ।
संसारपरिभीतस्य प्रत्याख्यानं शुभं भवेत् ।।६९।।

भुव० कषायरहितस्य दान्तस्य **इन्द्रियनोइन्द्रियदमेन** शूरस्य व्यवसायिन **आराधनापताकालाभाय,** संसारपरिभीतस्य, **भवभीरोः प्रत्याख्यानभङ्गदोषदर्शिनः ।** प्रत्याख्यानमनशनप्रतिपत्तिरूपं शुभं भवेत् **।।६९।।**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सोम० तथा **निष्कषायस्य** कषायरहितस्य तथा, **दान्तस्येन्द्रिय**-नोइन्द्रियदमेन, तथा **शूरस्य** मोहमल्लजये, **व्यवसायिन** उद्यमवत आराधनापताकालाभाय, तथा **संसारात् परिभीतस्य** भवभीरो: प्रत्याख्यानभङ्गदोषदर्शिन इति हृदयम्, एवंविधस्य साधो: **प्रत्याख्यानमनशन**प्रतिपतिरूपं **शुभं** शुभायतिफलं **भवेत्** स्यादित्यर्थ: ।।६९।।

ग्रुण० **निष्कषायस्य** कषायरहितस्य **दान्तस्य** इन्द्रियनोइन्द्रियदमेन **शूरस्य** मोहमल्लजये, **व्यवसायिन** आराधनापताकालाभाय **संसारपरिभीतस्य** भवभीरो:, **प्रत्याख्यान**मनशन-प्रतिपत्तिरूपं **शुभं भवतु** ।।६९।।

एयं पच्चक्खाणं जो काही मरणदेसकालम्मि ।
धीरो अमूढसन्नो सो गच्छइ उत्तमं ठाणं ।।७०।।

एतत्प्रत्याख्यानं य: करिष्यति मरणदेशकाले ।
धीरोऽमूढसंज्ञ: स गच्छत्युत्तमं स्थानम् ।।७०।।

भुव० एयं पच्चक्खाणं ति **एतदनशनप्रतिपत्तिरूपं प्रत्याख्यानं** य: **कोऽप्यन्योऽपि** करिष्यति । मरणदेशकाले धीरो **विद्वान् न मूढा मूर्च्छिता संज्ञा ज्ञानं यस्य सो**ऽमूढसंज्ञ: **संपूर्णज्ञान इत्यर्थ:** । स गच्छति **यात्युत्तमं** स्थानं **मोक्षस्थानमित्यर्थ: ।।७०।।**

सोम० तथा एतदनशनप्रतिपत्तिरूपं **प्रत्याख्यानं य:** कोऽप्यन्योऽत्रापि **करिष्यति मरणदेशकाले** प्रान्तसमये, **धीरो** विद्वान् न मूढा मूर्छिता संज्ञा ज्ञानं यस्य सोऽमूढसंज्ञ: स्पष्टज्ञान: सम्पूर्णज्ञान इत्यर्थ: **स** एवंविधो **गच्छति यात्युत्तमं स्थानं** मोक्षस्थानमित्यर्थ: ।।७०।।

ग्रुण० **एतत् प्रत्याख्यान**मनशनप्रतिपत्तिरूपं **य:** कोऽप्यन्योऽपि **करिष्यति मरणदेशकाले धीरो** विद्वान् न मूढा संज्ञा ज्ञानं यस्य स **अमूढसंज्ञ:** संपूर्णज्ञान इत्यर्थ: । **स गच्छति** यात्युत्तमं **स्थानं** मोक्षस्थानमित्यर्थ: ।।७०।।

धीरो जरमरणविऊ धीरो [वीरो] विन्नाण-नाणसंपन्नो ।
लोगस्सुज्जोयगरो दिसउ खयं सव्वदुक्खाणं ।।७१।।

धीरो जरामरणवित् धीरो [वीरो] विज्ञानज्ञानसंपन्न: ।
लोकस्योद्द्योतकरो दिशतु क्षयं सर्वदु:खानाम् ।।७१।।

भुव० अथ शास्त्रकार आशिषं बिभणिषुराह - धिया राजत इति धीरस्तीर्थकृत् जरामरणे

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वृद्धत्वनिधने वेत्तीति जरामरणवित् । **तथा धियं बुद्धिं सर्वेषां भव्यानामासामस्त्येन राति ददातीति धीरः । विशिष्टं ज्ञानं केवलज्ञानं विशेषावबोधरूपं ज्ञायत इति ज्ञानम् । तदेव सामान्यायबोधरूपम् [केवलदर्शनम्]। ताभ्यां** सम्पन्नः **संयुक्तः** । लोकस्य **चतुर्दशरज्ज्वात्मकस्योद्योतकरः** । दिशतु **करोतु** क्षयं **विनाशं सर्वपापानां सर्वकर्मणामित्यर्थः । यदा तु पाठान्तरेण वीरो इति पठ्यते - तदा विशेषेण ईरयति प्रेरयत्यष्टप्रकारकं कर्मेति वीरश्चरमतीर्थकृत् । शेषं तथैव । अस्मिन्पाठे शास्त्रकाराभिधानमपि गुप्तमुक्तं भवति । यतोऽस्याऽपि प्रकीर्णकस्य वीरभद्रः कर्त्ता श्रूयते । भक्तपरिज्ञायामतिदेशकरणात् सा तु तेन कृतेति व्यक्तमेवास्तीत्यतो ज्ञायतेऽस्याऽपि स एव कर्त्तेति ।।७१।। समाप्तमातुरप्रत्याख्यानविवरणम् ।।छ।।**

विवरणमेतद्ब्रुवता यदि विपरीतं मया किमप्युक्तम् ।
तन्मयि कृतानुकम्पैर्विचिन्त्य शोध्यं सदा विबुधैः ।।१।।

सार्वज्ञशासनलवस्य श्रीधर्मघोषसुगुरोर्जयति प्रसादः ।।छ।।

प्रथितमतिरार्यरक्षितसूरिर्विधिपक्षदेशकः पूर्वम् ।
शमनिधिरभूदमुष्माद् श्रीजयसिंहसूरिगुरुः ।।१।।

तत्पट्टोदयगिरिवरभानुः श्रीधर्मघोषसूरीशः ।
तस्मान्महेन्द्रसूरिर्दूरीकृतकुमतमतिवादः ।।२।।

श्रीभुवनतुङ्गसूरिस्तस्मात्स्वस्योपकृति कृते चक्रे ।
विवरणमात्रमिहातुरप्रत्याख्यानप्रकीर्णकस्य ।।३।।

मिथ्या यदत्र भणितं मयका मतिमान्द्यतो महार्थेषु ।
तन्मयि कृतानुकम्पैः शोध्यं विबुधैर्विशेषेण ।।४।।

।। समाप्तातुरप्रत्याख्यानविवरणप्रशस्तिः ।। ग्रन्थमानं ८५० ।।श्रीः।।

।। वैक्रमीये २०६६ तमे वर्षे विजयकीर्तियशसूरिणा संशोधितं सम्पादितञ्चेदं आञ्चलिकगच्छीयश्रीभुवनतुङ्गसूरिकृतवृत्तिसहितं श्रीवीरभद्रगणिप्रणीतं श्रीआतुरप्रत्याख्यानप्रकीर्णकं समाप्तम् ।।

सोम० अथाध्ययनप्रान्ते शास्त्रकारः श्रीजिनाशिषं भणति - धिया राजते इति **धीरस्तीर्थकृत्**, जरा वृद्धत्वं मरणं च निधनं जरा च मरणं च जरामरणे ते वेत्तीति **जरामरणवित्** जरामरण-

Jain Education International 2010_02　For Private & Personal Use Only　www.jainelibrary.org

स्वरूपतदुच्छेदादिप्रकारवेत्ता इत्यर्थः । तथा धियं बुद्धिं सर्वेषां भव्यानां राति ददातीति **धीर** इति विशेषणपदम्, तथा विशिष्टं ज्ञानं विज्ञानं विशेषावबोधरूपं केवलज्ञानमित्यर्थः, ज्ञायते इति ज्ञानं सामान्यावबोधरूपं केवलदर्शनमित्यर्थस्ताभ्यां **सम्पन्नः** संयुक्तः । तथा लोकस्य चतुर्दशरज्ज्वात्मकस्य जन्मादिकल्याणकेषु द्रव्योद्योतेन केवललोकभावोद्योतेन तु सर्वदाप्युद्योतकरः **लोकोद्योकरः। दिशतु** करोतु **क्षयं** विनाशं **सर्वदुरितानां** सर्वपापानां कर्मणामित्यर्थः । यदा तु पाठान्तरेण 'वीरो' इति पठ्यते तदा विशेषेण ईरयति प्रेरयति अष्टप्रकारं कर्मेति वीरश्चरमतीर्थकृत् । इदं विशेष्यपदं शेषाणि विशेषणाणि तथैव । अस्मिन् पाठे शास्त्रकाराभिधानमपि गुप्तमुक्तं ज्ञातव्यम् । यतोऽस्यापि प्रकीर्णकस्य वीरभद्र एव साधुः कर्त्ता श्रूयते भक्तपरिज्ञायां तत्कृतायामत्राध्ययनेऽतिदेशकरणादपि ज्ञायतेऽस्यापि स एव कर्त्तेति भावः ।।७१।। इति श्रीधर्मघोषसूरिशिष्यश्रीमहेन्द्रसूरिविरचितवृत्त्यनुसारेणश्रीगच्छेशभट्टारकप्रभुपरमगुरुश्रीसोमसुन्दरसूरिपादैः कृताऽवचूर्णिः समाप्ता । भद्रं भवतु श्रीसङ्घस्य ।।छ।।

।। वैक्रमीये २०६६ तमे वर्षे विजयकीर्तियशसूरिणा संशोधितं सम्पादितञ्छेदं
तपागच्छेशश्रीसोमसुन्दरसूरिकृतावचूरियुतं श्रीवीरभद्रगणिप्रणीतं
श्रीआतुरप्रत्याख्यानप्रकीर्णकं समाप्तम् ।।

गुण० धिया राजत इति **धीर**स्तीर्थकृत् जरामरणे वृद्धत्वनिधने वेत्तीति **जरामरणवित्** तथा धियं बुद्धिं सर्वेषां भव्यानां राति ददातीति **धीरः** । विशिष्टं ज्ञानं [विज्ञानं] केवलज्ञानम्, ज्ञायत इति ज्ञानं तदेव सामान्यावबोधरूपं ताभ्यां संपन्नः संयुक्तः । लोकस्य चतुर्दशरज्ज्वात्मकस्योद्योतकरो **दिशतु** करोतु **क्षयं** विनाशं **सर्वदुरितानां** सर्वपापानां सर्वकर्मणामित्यर्थः ।।७१।। इति प्रकीर्णावचूरिः श्रीगुणरत्नसूरिकृता ।।

।। वैक्रमीये २०६६ तमे वर्षे विजयकीर्तियशसूरिणा संशोधितं सम्पादितञ्छेदं
श्रीगुणरत्नसूरिकृतावचूरिसहितं श्रीवीरभद्रगणिप्रणीतं
श्रीआतुरप्रत्याख्यानप्रकीर्णकं समाप्तम् ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

।। मध्यमङ्गलम् ।।

एगम्मि वि जम्मि पए संवेगं वीयरायमग्गम्मि ।
गच्छइ नरो अभिक्खं तं मरणं तेण मरियव्वं ।।६०।।

અર્થ : શાસ્ત્રના એક માત્ર જે પદના અભ્યાસ-ચિંતન-પરાવર્તનથી આત્મા વીતરાગ માર્ગમાં આગળ વધીને સંવેગને પ્રાપ્ત કરે તે પદ - તે ગાથાના ચિંતન-પરાવર્તન કરતા કરતા મૃત્યુને સ્વીકારવું જોઈએ. (૬૦)

ता एगं पि सिलोगं जो पुरिसो मरणदेसकालम्मि ।
आराहणोवउत्तो चिंतंतोऽऽराहगो होइ ।।६१।।

અર્થ : તેથી પંચપરમેષ્ઠીને નમસ્કારરૂપ એક શ્લોકના સ્મરણમાં લીન બનીને જે આરાધક મૃત્યુને પ્રાપ્ત કરે છે તે આરાધક બને છે. (૬૧)

आगम-

श्रीआतुरप्रत्याख्यानप्रकीर्णकम्

खण्डः-२

❖ प्रकीर्णकोक्तदुर्ध्यानाऽन्तर्गतदृष्टान्तसमुच्चयः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

પ.પૂ. પંડિત શ્રીરૂપવિજયજી કૃત પીસ્તાલીસ આગમની

મોટી પૂજા

શ્રીઆતુરપ્રત્યાખ્યાન પ્રકીર્ણક સૂત્ર પૂજા

॥ દુહો ॥

રાગ દ્વેષને છેદજે, ભેદજે આઠે કર્મ ।
સ્નાતક પદને અનુસરી, ભજજે શાશ્વત શર્મ ॥૧॥

રાગ : ઈડર આંબા આંબલી રે... દેશી

દેશવિરતિ ગુણઠાણમેં રે, વરતે શ્રાવક જેહ ।
આણંદાદિકની પરે રે, તજે મિથ્યાત્વને તેહ ॥૧॥
સુગુણનર, પૂજો શ્રી જિનદેવ... એ આંકણી

બારે વ્રતના પરિહરે રે, પ્રત્યેકે અતિચાર ।
કરમાદાન પન્નર તજી રે, સમકિતના પંચ છાર ॥૨॥ સુ. ॥

જ્ઞાન દર્શન ચારિત્રના રે, તપ વીરજના જેહ ।
અતિચાર અલગા કરી રે, ભજ જિનવર ગુણગેહ ॥૩॥ સુ. ॥

પારંગત પદ પૂજીયે રે, તજી ત્રેસઠ દુર્ધ્યાન ।
ઈન્દ્રિય કષાયને ઝીપીને રે, પામે સમકિત જ્ઞાન ॥૪॥ સુ. ॥

આઉર પચ્ચક્ખાણ સૂત્રની રે, કરે આરાધના જેહ ।
ત્રીજે ભવે શિવ સંપદા રે, નિશ્ચય પામે તેહ ॥૫॥ સુ. ॥

તેણે એ સૂત્રની પૂજના રે, કરજો ધરી સુહ ઝાણ ।
રૂપવિજય કહે પામજો રે, શાશ્વત સુખ નિર્વાણ ॥૬॥ સુ. ॥

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

खण्डः-२

प्रकीर्णकोक्तदुर्ध्यानाऽन्तर्गतदृष्टान्तसमुच्चयाऽनुक्रमः

१ अज्ञानध्यानम् : अशकटापिता ९७
२ अनाचारध्यानम् : कोङ्कणसाधुः ९८
२ अनाचारध्यानम् : आषाढाचार्यः ९८
३ कुदर्शनध्यानम् : सुराष्ट्रश्रावकः १०५
४ क्रोधध्यानम् : कूलवालकमुनिः १०७
४ क्रोधध्यानम् : गोशालकः ११२
४ क्रोधध्यानम् : पालकः ११७
४ क्रोधध्यानम् : नमुचिमंत्री ११७
४ क्रोधध्यानम् : शिवभूतिः १२१
५ मानध्यानम् : बाहुबली १२४
५ मानध्यानम् : विश्वभूतिः १२५
५ मानध्यानम् : सुभूमचक्री १२६
५ मानध्यानम् : परशुरामः १२६
५ मानध्यानम् : सङ्गमः १३०
६ माया ध्यानम् : धनश्री १३६
७ लोभध्यानम् : वणिक्मित्र १३८
७ लोभध्यानम् : सिंहकेसरिसाधुः १३८
८ रागध्यानम् : विक्रमयशोराजः १४१
८ रागध्यानम् : दामन्नकश्वसुरः १४२
८ रागध्यानम् : कपिलः १४३
९ द्वेषध्यानम् : मधुदेव-पिप्पलादौ १४५
९ द्वेषध्यानम् : धर्मरुचि-नाविकौ १४५
९ द्वेषध्यानम् : वीरकदेवः १४७
१० मोहध्यानम् : बलभद्रः १४७
११ इच्छाध्यानम् : कपिलः १५०
१२ मिथ्याध्यानम् : जमालिः १५१
१२ मिथ्याध्यानम् : गोविन्दः १५३
१३ मूर्छाध्यानम् : कनकध्वजः १५४
१४ शंकाध्यानम् : आषाढाचार्यशिष्याः ९८
१५ काङ्क्षाध्यानम् : मरिचिः १६३
१६ गृद्धिध्यानम् : मङ्गुसूरिः १६४
१६ गृद्धिध्यानम् : कण्डरीकः १६५
१७ आशाध्यानम् : मूलदेवः १६६
१८ तृष्णाध्यानम् : क्षुल्लकमुनिः १७४
१९ क्षुद्रध्यानम् : राजगृहद्रमकः १७६
२० पथिध्यानम् : वल्कलचीरी १७६
२१ प्रस्थानध्यानम् : सनत्कुमारः १८०
२१ प्रस्थानध्यानम् : ब्रह्मदत्तः
२२ निद्राध्यानम् : महिषमांसभक्षिः १८४
२२ निद्राध्यानम् : मोदकाभिलाषी १८४
२२ निद्राध्यानम् : हस्तिदन्तोत्पाटकारी १८५
२२ निद्राध्यानम् : साधुमस्तकत्रोटी १८५
२२ निद्राध्यानम् : वटशाखाभङ्गी १८५
२३ निदानध्यानम् : नन्दिषेणः १८५
२३ निदानध्यानम् : गङ्गदत्तः १८७
२३ निदानध्यानम् : सम्भूतिमुनिः १९१
२३ निदानध्यानम् : द्रौपदी १९४
२४ स्नेहध्यानम् : मरुदेवीमाता १९७
२४ स्नेहध्यानम् : सुनन्दा १९९
२४ स्नेहध्यानम् : अर्हन्नकमाता २००
२५ कामध्यानम् : कुमारनन्दिसुवर्णकारः २०१
२५ कामध्यानम् : रावणः २०२

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

२६ कलुषध्यानम् : बाहु-सुबाहु-पीठ-महापीठाः २०३
२६ कलुषध्यानम् : सिंहगुहास्थितक्षपकः २०३
२७ कलहध्यानम् : दुर्योधनः २०४
२७ कलहध्यानम् : नारदः २०५
२८ युद्धध्यानम् : कोणिकनृपः २०५
२८ युद्धध्यानम् : चण्डप्रद्योतः २४६
२९ नियुद्धध्यानम् : बाहुबली-भरतौ २१०
२९ नियुद्धध्यानम् : अट्टनमल्लः २१३
३० सङ्गध्यानम् : राजीमती २१४
३० सङ्गध्यानम् : भवदेवमुनिः २१६
३१ सङ्ग्रहध्यानम् : मम्मणः २२०
३२ व्यवहारध्यानम् : सार्थवाहपत्नी
३३ क्रयविक्रयध्यानम् : नन्दः २२१
३४ अनर्थदण्डध्यानम् : शाम्बः २६६
३४ अनर्थदण्डध्यानम् : गङ्गदत्तः २२२
३४ अनर्थदण्डध्यानम् : वाचालः २६६
३५ आभोगध्यानम् : ब्रह्मदत्तः २२३
३६ अनाभोगध्यानम् : प्रसन्नचन्द्रः २२४
३७ ऋणाविलध्यानम् : यतिभगिनी २२६
३८ वैरध्यानम् : परशुरामः २२७
३८ वैरध्यानम् : कपिलः (कृषिवलः?) २२८
३८ वैरध्यानम् : सुदर्शनः २२९
३९ वितर्कध्यानम् : चाणक्यः २३०
४० हिंसाध्यानम् : कालसौकरिकः २३३
४१ हासध्यानम् : चण्डरुद्राचार्यः २३५
४१ हासध्यानम् : वज्रबाहुः २३७
४२ प्रहासध्यानम् : चण्डप्रद्योतः २४६
४३ प्रद्वेषध्यानम् : मरुभूति-कमठौ २३८
४३ प्रद्वेषध्यानम् : वीरविभुः गोपश्च २३८
४४ परुषध्यानम् : ब्रह्मदत्तः २४२
४४ परुषध्यानम् : युगबाहुः २४२
४४ परुषध्यानम् : एकाश्राविका २४५
४५ भयध्यानम् : गजसुकुमालमुनिः २४६
४६ रूपध्यानम् : सनत्कुमारः
४६ रूपध्यानम् : चण्डप्रद्योतः २४६
४७ आत्मप्रशंसाध्यानम् : वररुचिः २४७
४७ आत्मप्रशंसाध्यानम् : रथिकः कोशा च २५१
४८ परनिन्दाध्यानम् : कूरगडुकमुनिः २५२
४९ परगर्हाध्यानम् : गोष्ठामाहिलः २५५
५० परिग्रहध्यानम् : चारुदत्तः २६०
५० परिग्रहध्यानम् : मुनिपतिमुनिः
५१ परपरिवादध्यानम् : सुभद्रासती २६१
५२ परदूषणध्यानम् : अङ्गऋषिः २६६
५३ आरम्भध्यानम् : कुरुडोत्कुरुडौ २६६
५३ आरम्भध्यानम् : द्वीपायनः २६६
५४ संरम्भध्यानम् : क्षुल्लकमुनिः २७०
५५ पापानुमोदनध्यानम् : -राजा
५६ अधिकरणध्यानम् : नन्दमणिकारः २७१
५७ असमाधिमरणध्यानम् : स्कन्दकाचार्यः २७३
५८ कर्मोदयप्रत्ययध्यानम् : विष्णुः(कृष्णः)२७६
५९ ऋद्धिगौरवध्यानम् दशार्णभद्रः २७८
६० रसगौरवध्यानम् : जितशत्रुराजा २८१
६१ सातागौरवध्यानम् : शशिराज
६२ अविरमणध्यानम् : भृगुयशसौ २८२
६२ अविरमणध्यानम् : मूकजीवः
६२ अविरमणध्यानम् : मेतार्यमुनिः २८३
६३ अमुक्तिमरणध्यानम् : सम्भूतिमुनिः १९१

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

खण्डः-२

प्रकीर्णकोक्तदुर्ध्यानाऽन्तर्गतदृष्टान्तसमुच्चयः

१. अज्ञानध्यानेऽशकटापितुः सम्प्रदायः सङ्गाचारविधिग्रन्थात् ।

प्रमाद्यन् सूरिरेकोऽत्र, प्रेत्याभूद् विगतश्रुतः । तत्रोद्यच्छन् स एवाभूत्, पारदृश्वा श्रुताम्बुधेः ।।१।।
तथाहि-एकस्मिन् भ्रातरौ गच्छे, गङ्गाकूलनिवासिनौ । व्रतं जगृहतुः शान्तौ तत्रैकोऽभूद् बहुश्रुतः ।।२।।
सूरिर्जज्ञे क्रमेणासौ, शिष्यैः सूत्रार्थमिच्छुभिः । सेव्यमानो दिनं सर्वं, विश्रामं नाश्नुते क्वचित् ।।३।।
निशायामपि सूत्रार्थचिन्तनपृच्छनादिभिः । नाससाद सुखान्निद्रामन्वहं व्यग्रमानसः ।।४।।
भ्राता तस्य द्वितीयस्तु, नित्यमास्ते यथासुखम् । तं च पश्यन्नसौ सूरिर्दध्यौ दुर्बुद्धिबाधितः ।।५।।
अहो मे बान्धवो धन्यो, योऽयमास्ते सदा सुखी । ज्ञानविज्ञानहीनत्वात्, केनाप्यायास्यते नहि ।।६।।
अजाकृपाणकल्पेन, ज्ञानेनाहं त्ववाप्नुयाम् । दुःखं ततोऽत्र केनापि, विदुषा सूदितं ह्यदः ।।७।।
मूर्खत्वं हि सखे ! ममापि रुचितं तस्यापि चाष्टौ गुणा,

१-निश्चिन्तो २-बहुभोजनो ३-ऽत्रपमना ४-नक्तंदिवाशायकः ।
५-कार्याकार्यविचारणान्धबधिरो ६-मानापमाने समः;
७-प्रायेणाभयवर्जितो ८-दृढवपुर्मूर्खः सुखं जीवति ।।८।।

न पुनर्भावयति यथा-

नानाशास्त्रसुभाषितामृतरसैः श्रोतोत्सवं कुर्वतां, येषां यान्ति दिनानि पण्डितजनव्यायामखिन्नात्मनाम् ।
तेषां जन्म च जीवितं च सफलं तैरेव भूर्भूषिता, शेषैः किं पशुवद् विवेकरहितैर्भूभारभूतैर्नरैः ?।।९।।
ज्ञानप्रद्वेषतश्चैवं, ज्ञानमाशातयन्नसौ । दुष्टबुद्धिः प्रमादेन, ज्ञानघ्नं कर्म्म बद्धवान् ।।१०।।
ज्ञानाचारातिचारं तमनालोच्य विपद्य च । देवोऽभूद् देवलोकेऽसौ, सच्चारित्रप्रभावतः ।।११।।
च्युत्वाऽऽभीरकुले कस्मिन्, भरतेऽत्र सुतोऽजनि । पितृभ्यामात्मरूपां स, कन्यामुद्वाहितो युवा ।।१२।।
तस्यैकदा सुता जज्ञे, सुरूपा भद्रकन्यका । यौवनं प्राप सा यूनां, मनोनयनहारकम् ।।१३।।
अनोधुरि निधायैनां, तत्पिता नगरं प्रति । प्रतस्थे सममाभीरैर्घृतं विक्रेतुमन्यदा ।।१४।।
तामेव पश्यतां तेषामनांसि च मनांसि च । उत्पथस्थान्यभज्यन्त, सद्यः प्रस्खल्य कुत्रचित् ।।१५।।
विलक्षीभूय संभूय, तैरित्यौच्यत तावता । नाम्नाऽशकटाऽशकटापितेति च मुहुर्मुहः ।।१६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

शृण्वतस्तस्य वैराग्यं, बभूव लघुकर्म्मणः । सुतामुद्वाह्य केनापि, दत्त्वा तस्मै धनादिकम् ।।१७।।
गच्छे कस्मिन् स निष्क्रम्य, योगोद्वहनमाहृतः । कुर्वन्नध्यैष्ट सुस्पष्टमुत्तराध्ययनत्रयम् ।।१८।।
पठतोऽसंस्कृताख्यं च, तुर्याध्ययनमञ्जसा । तद् ज्ञानावरणीयाख्यमागात्कर्मोदयं ततः ।।१९।।
अधीयानस्य तत्तस्याचामाम्लाभ्यां दिनद्वयम् । नैकोऽप्यालापकोऽस्यागात्कृच्छ्रेणाण्यभियोगतः ।।२०।।
ततोऽसौ गुरुभिः प्रोचे, किं तेऽनुज्ञाप्यतामिदम् ? । स प्राह भगवन्नस्य, योगः कीदृग् ? ततो गुरुः ।।२१।।
ऊचे यावदिदं नैति, तावदाचाम्लमस्य तु । स स्माह कृतमन्येन, श्रुतेन तपसा च मे ।।२२।।
आचाम्लान्यथ सोऽकार्षीद्, द्वादशाब्दीं समाहितः । क्षयमापैतकत् कर्म, सुखेनाध्यैष्ठ तच्छ्रुतम् ।।२३।।
शेषं चापि श्रुतं क्षिप्रमधीते स्म महामतिः । श्रुतभक्तेरिहामुत्र, सर्वत्र सुखभागभूत् ।।२४।।

२. अनाचारध्याने कोङ्कणसाधोः दृष्टान्तः श्रीकल्पसूत्रसुबोधिकाटीकाऽन्तर्गतः ।

यथा कोऽपि कुङ्कणदेशीयो वणिग् वृद्धत्वे प्रव्रजितः, स चैकदा ऐर्यापथिकीकायोत्सर्गे चिरं स्थितो गुरुभिः पृष्टः- 'एतावद्दीर्घे कायोत्सर्गे किं चिन्तितम् ?' स प्रत्युवाच-'स्वामिन् ! जीवदया चिन्तिता', कथमिति पुनर्गुरुभिः पृष्ट आह- 'पूर्वं गृहस्थावस्थायां क्षेत्रेषु वृक्षनिषूदनपूर्वकमुप्तानि धान्यानि बहून्यभूवन्, इदानीं मम पुत्रास्तु निश्चिन्ता यदि वृक्षनिषूदनं न करिष्यन्ति तदा धान्याऽभावेन वराकाः कथं भविष्यन्ति ?' इति ऋजुत्वात् स्वाभिप्राये यथास्थिते निवेदिते गुरुभिः कथितं- 'महाभाग ! दुर्ध्यातं भवता, अहो ! अयुक्तमेतद्यतीनाम्,' इत्युक्ते च मिथ्यादुष्कृतं ददौ ।।

२-१४. अनाचारध्याने शङ्काध्याने च देवानामनागमनादुत्प्रव्रजितुकामस्याऽऽषाढसूरेः श्रीमद्भावविजयकृतश्रीउत्तराध्ययन-सूत्रवृत्युक्तकथा ।

वत्साभूमौ भूरिशिष्यपरिवारा बहुश्रुताः । आर्याषाढाभिधाचार्या, बभूवुर्विश्ववत्सलाः ।।१।।
यो यस्तेषां गणे भक्तं, प्रत्याख्याय व्यपद्यत । तं तं निर्याम्य निर्ग्रन्थ-मित्थं ते सूरयोऽवदन् ।।२।।
देवभावंगतेनाऽऽशु, देयं मे दर्शनं त्वया । इत्युक्तेऽपि बहूनां तैर्नागात्कोऽपि दिवं गतः ।।३।।
अथाऽन्यदा स्वशिष्यं ते, निर्याम्यातीव वल्लभम् । एवमुचुः सनिर्बन्धं, गुरवो गद्गदाक्षरम् ।।४।।
स्वर्गंगतेन भवता, वत्स ! वत्सलचेतसा । अवश्यं दर्शनं देयं त्वामिति प्रार्थये भृशम् ।।५।।
मया हि बहुसाधुनामेवमुक्तमभूत्परम् । नाऽऽगात्कोऽपि त्वं तु वत्साऽऽगच्छेः स्नेहममुं स्मरन् ।।६।।
तत्प्रपद्य विपद्याशु, देवीभूतोऽपि स द्रुतम् । नाययौ प्रथमोत्पन्न-सुरकार्यैर्विलम्बितः ।।७।।
तस्मिन्नागते सद्यो, विपर्यस्तमना गुरुः । एवं व्यचिन्तयन्नूनं, परलोको न विद्यते ! ।।८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ज्ञानदर्शनचारित्राराधकाः शान्तचेतसः । विहितानशनाः सम्यग्मया निर्यामिताः स्वयम् ।।९।।
मद्वाचं प्रतिपन्नाश्च, विनेयो मम ये मृताः । स्नेहलेऽप्यपि तेष्वेको-ऽप्याऽऽगान्नो कथमन्यथा ? [युग्मम्] ।।१०।।
तदद्य यावच्चक्रेऽसौ, क्रिया कष्टप्रदा मुधा । भोगान् हित्वा मनोज्ञांश्च, मयात्मा वञ्चितो वृथा ! ।।११।।
भुक्त्वा भोगांस्तदद्यापि, करिष्ये सफलं जनुः । परलोके ह्यसति कः, क्लिश्यते कुशलो मुधा ! ।।१२।।
विमृश्येति स्वलिङ्गस्थ, एव मिथ्यात्वमाश्रितः । उत्प्रव्रजितुकामोऽसौ, मुक्त्वा गच्छं विनिर्ययौ ।।१३।।
अत्रान्तरेऽवधिज्ञानात्स्वरूपं स्वगुरोरिदम् । ज्ञात्वा दिवं गतः शिष्यो, विषण्णो ध्यातवानिति ! ।।१४।।
अहो ! मद्गुरवो जैनागमनेत्रान्विता अपि । विमुक्तिमार्गं मुञ्चन्ति, मोहान्धतमसाकुलाः ! ।।१५।।
अहो ! मोहस्य महिमा, जगज्जैत्रो विजृम्भते । जात्यन्धा इव चेष्टन्ते, पश्यन्तोऽप्यखिला जनाः ! ।।१६।।
कुलवानपि धीरोऽपि, गभीरोऽपि सुधीरपि । मोहाज्जहाति मर्यादां, कल्पान्तादिव वारिधिः ।।१७।।
तन्मोहप्रेरिता यावन्नामी दुष्कर्म कुर्वते । तावदेतान्विबोध्याहं, कुर्वे सन्मार्गमाश्रितान् ! ।।१८।।
ध्यात्वेत्यागत्य स सुरः, स्वगुरोर्गमनाध्वनि । ग्राममेकं विचक्रे तत्-पार्श्वे दिव्यं च नाटकम् ।।१९।।
ततः स सूरिस्तन्नाट्यं, प्रेक्ष्यमाणो मनोहरम् । ऊर्ध्वं एव हि षण्मासीमासीत्प्राज्यप्रमोदभाक् ।।२०।।
शीतातपक्षुधातृष्णाषण्मासतिक्रमश्रमान् । दिव्यानुभावान्नाजासीत्तन्नाट्यं स विलोकयन् ।। २१।।
तस्मिन्नृत्येऽथ देवेन, संहृते सोऽचलत्पुरः । क्षणमेकं शुभं नाट्यं, दृष्टं दिष्ट्येति भावयन् ।।२२।।
स देवोऽथ तदाकूतं, परीक्षितुमलड्कृतान् । षट् जीवकायसंज्ञान् षट्, विदधे बालकान् वने ।।२३।।
दृष्ट्वाथ सूरिस्तेष्वाद्यं, भूरिभूषणभूषितम् । इति दध्यौ शिशोरस्याऽलङ्काराना च्छिनद्म्यहम् ।।२४।।
एषां द्रव्येण भोगेच्छा, चिरं मे पूरयिष्यते । मृगतृष्णाम्बुपानेच्छादेश्या द्रव्यं विना हि सा ।।२५।।
विमृश्येति स तं क्षीरकण्ठं सोत्कण्ठमब्रवीत् । रे ! मुञ्च मुञ्चालङ्कारान्, बालकः स तु नाऽमुचत् ।।२६।।
ततो रुष्टः स तं शावं, जग्राह गलकन्दले । सोऽभ्रकोऽपि भयोद्भ्रान्तस्तमित्यूचे सगद्गदम् ।।२७।।
अस्यामटव्यां भीमायां, बिभ्यच्चौराद्युपद्रवात् । पृथ्वीकायिकसंज्ञोऽहमस्मि त्वां शरणं श्रितः ।।२८।।
अशाश्वता ह्यमी प्राणा, विश्वकीर्तिश्च शाश्वती । यशोर्थी प्राणनाशेऽपि, तद्रक्षेच्छरणागतम् ! ।।२९।।
बालं मां दीनतां प्राप्तं, पाहि पाहि प्रभो ! ततः । तैरेव भूषिता भूर्ये, रक्षेयुः शरणागतम् ।।३०।।

यतः-"विहलं जो अवलंबइ, आवइपडिअं च जो समुद्धरइ ।
सरणागयं च रक्खइ, तिसु तेसु अलंकिआ पुहवी ।।३१।।"

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्याद्युक्तोऽपि लुब्धात्मा, स सूरिस्तस्य कन्धराम् । यावन्मोटयितुं लग्नस्तावच्छावः पुनर्जगौ ।।३२।।
भगवन्नेकमाख्यानं, श्रुत्वा कुर्या यथोचितम् । सूरिर्जगाद तद्ब्रूहि, सोप्याख्यत् श्रूयतामिति ।।३३।।
ग्रामे क्वापि कुलालोऽभूत्स चान्येद्युर्मृदं खनन् । आक्रान्तः पतता खानितटेनेति वचोऽवदत् ।।३४।।
यत्प्रसादाद्बलिं भिक्षां, ददे ज्ञातींश्च पोषये । साऽप्याऽऽक्रामति भूमिर्मां, तज्जातं शरणाद्वयम् ! ।।३५।।
यथा ह्याजीविकामुख्यसौख्यार्थी पृथिवीं श्रितः । वराकः कुम्भकारोऽयं, तयैवोपहतो द्रुतम् ! ।।३६।।
भगवन्नहमप्येवं, भीतस्त्वां शरणं श्रितः । त्वं च मुष्णासि मां तद्भीर्ममापि शरणादभूत् ! ।।३७।।
तदाकर्ण्यातिदक्षोऽसि, रे ! बालेति वदन् गुरुः । तद्भूषणानि जग्राह, निजग्राह च तां शिशुम् ! ।।३८।
तानशेषानलङ्कारानक्षिपत्स्वप्रतिग्रहे । व्रताद्भ्रष्टो हि दक्षोऽपि, निश्शूको जायते भृशम् ! ।।३९।।
ततः पुरो व्रजन् काञ्चिदतिक्रान्तो वनीं गुरुः । बालकं प्राग्वदद्राक्षीदपूकायाख्यं द्वितीयकम् ।।४०।।
तस्मिंस्तस्याऽप्यऽलङ्कारांस्तथैवाऽऽदातुमुद्यते । सोऽप्याऽऽख्याय निजामाख्यामाख्यानं ख्यातवानिति ।।४१।।
"एकस्तालाचरश्चारुकथाकथनकोविदः । पाटलाह्वोऽभवद्भूरिसुभाषितरसह्रदः ।।४२।।
सोऽन्यदा प्रोत्तरन् गङ्गां, नीरपूरैः प्रवाहितः । तीरस्थैर्ददृशे लोकैरित्यूचे च सविस्मयैः ।।४३।।
बहुश्रुतं चित्रकथं, गंगा वहति पाटलम् । वाह्यमानाऽस्तु भद्रं ते, ब्रूहि किञ्चित्सुभाषितम् ।।४४।।
समाकर्ण्योभयाकर्णिसकर्णस्तज्जनोदितम् । श्लोकमेकमनश्लीलं, पाटलोऽप्येवमब्रवीत् ।।४५।।
येन रोहन्ति बीजानि, येन जीवन्ति कर्षकाः । तस्य मध्ये विपद्येत, जातं मे शरणाद्वयम् ! ।।४६।।"
कथां प्रोच्येति तद्भावं, चाविष्कृत्य स्थिते शिशौ । कृपां हित्वाऽऽददे सूरिस्तस्याप्याभरणव्रजम् ।।४७।।
ततोऽप्यग्रे व्रजंस्तेजस्कायिकाख्यं तृतीयकम् । वीक्ष्यार्भकमभूत्सूरिस्तद्भूषाग्रहणोद्यतः ।।४८।।
ततः सोऽपि शिशुः प्राग्वत्प्रादुष्कृत्य निजाभिधाम् । इत्थं कथां कथयितुं, पटुवाक्यैः प्रचक्रमे ।।४९।।
"क्वाप्याश्रमे तापसोऽभूत्सर्वदा वह्निपूजकः । तस्योटजेऽनले नैवाऽन्यदा दग्धे स इत्यवक् ।।५०।।
यमहं मधुसर्पिर्भ्यां, तर्पयामि दिवानिशम् । दग्धस्तेनैवोटजो मे, जातं तच्छरणाद्वयम् ! ।।५१।।
यद्वारण्यं गतः कश्चिद्वह्निं व्याघ्रभिया निशि । अज्वालयत् प्रमत्तश्च, दग्धस्तेनाऽब्रवीदिति ।।५२।।
मया हि व्याघ्रभीतेन, पावकः शरणीकृतः ।। दग्धं तेन च गात्रं मे, जातं शरणतो भयम् ।।५३।।"
इत्युक्त्वाख्यानकं तस्योपनयं च प्रकाश्य सः । तस्थौ शिशुस्ततस्तस्य, भूषणान्याददे गुरुः ।।५४।।
ततोऽप्यऽग्रेऽर्भकं वायुकायाख्यं वीक्ष्य पूर्ववत् । लातुं तस्याप्यलङ्कारान्, सूरिरुद्यमवानऽभूत् ।।५५।।
सोऽपि शावो निजं नाम, प्राग्वत्तस्मै प्रकाशयन् । आख्यानं वक्तुमारेभे, वाग्मित्वं नाटयन्निजम् ।।५६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

"एकः कोऽपि युवा भूरिबलोऽभूत्पीनभूधनः। वातरोगगृहीतं तं, प्रेक्ष्य कोऽपीति पृष्टवान् ।।५७।।
लङ्घनप्लवनोद्योगी, प्राग्भूत्वाप्यधुना भवान् । याति यष्टिमवष्टभ्य, कस्य व्याधेरुपद्रवात् ? ।।५८।।
सोऽवादीद्यो मरुज्ज्येष्ठाऽऽषाढयोः सौख्यदो भवेत् । स एव बाधतेऽङ्गं मे, जातं हि शरणाद्भयम् ! ।।५९।।
आख्यानमित्युदित्वा तद्भावयित्वा च पूर्ववत् । शिशोः स्थितस्य तस्यापि, भूषणान्यग्रहीद्गुरुः ।।६०।।
भूयोपि पुरतो बालं, प्राग्वदाभरणैर्भृतम् । स वनस्पतिकायाख्यं, पञ्चमं सूरिरैक्षत ।।६१।।
तस्यापि भूषणगणं, ग्रहीतुं सोद्यमे गुरौ । सोऽपीत्याख्यानमाचख्यौ, स्वाभिख्याख्यानपूर्वकम् ।।६२।।
"द्रुमे पुष्पफलाकीर्णे, क्वापि केऽप्यऽवसन् खगाः । वृक्षो ह्ययं नः शरणमिति विश्रब्धचेतसः ।।६३।।
तेषां च वसतां तत्र, निराबाधमथान्यदा । अपत्यानि बहून्यन्तर्नीडं क्रीडन्ति जज्ञिरे ।।६४।।
इतश्च तस्य वृक्षस्य, पार्श्वात्काऽप्युद्गता लता। तं तरुं परिवेष्ट्योच्चैरारुरोह द्रुमोपरि ।।६५।।
तया च लतयाऽन्येद्युर्विलग्य भुजगो महान् । आरुह्य तं द्रुमं तानि, खगापत्यान्यभक्षयत् ।।६६।।
ततस्ते विहगाः स्वीयापत्यविध्वंसदुःखिताः । कुर्वन्तस्तुमुलं प्रोच्चैरित्थमाहुर्मुहुर्मिथः ।।६७।।
अद्य यावत्सुखं वृक्षे, स्थितमत्रानुपद्रवे । अस्मादेव लतायुक्तादद्याभूच्छरणाद्भयम् ।।६८।।"
इत्युदीर्य कथां तस्या, भावं प्राग्वत् प्रकाश्य च । तस्थुषस्तस्य शावस्याऽप्याददे भूषणानि सः ।।६९।।
ततोऽग्रे प्रस्थितः षष्ठं, त्रसकायाख्यमर्भकम् । वीक्ष्य तस्याप्यलङ्कारान्, सोऽभूदाच्छेत्तुमुत्सुकः ।।७०।।
निजामाख्यां समाख्याय, सोऽप्याऽऽख्यानचतुष्टयम् । अवादीद्द्वीन्द्रियादीनां, चतुर्णां तत्र सम्भवात् ।।७१।।
"तथा हि नगरे क्वापि, परीते परितोऽरिभिः । भीता बहिस्था मातङ्गा, पुरान्तः प्राविशन् द्रुतम् ।।७२।।
तांश्च मध्यस्थितैर्लोकैरन्नादिक्षयभीरुभिः । निष्काश्यमानान्नगराद्विद्विषोऽपीडयन् भृशम् ।।७३।।
पुरं नः शरणं भावीत्याशया विशतोऽपि तान् । निरीक्ष्य दुर्दशां प्राप्तास्तदा कोऽपीत्यऽभाषत ।।७४।।
भीताः पौराः कर्षयन्ति, युष्मान्निघ्नन्ति च द्विषः । तत्क्वापि यात मातङ्गा !, जातं शरणतो भयम् ।।७५।।"
प्राग्वत् सोपनये तेन, प्रोक्तेऽप्येवं कथानके । अमुञ्चति गुरौ बालौ, द्वितीयामब्रवीत्कथाम् ।।७६।।
"नगरे क्वाप्यभूद्भूपः, स च दुष्टो निजैर्नरैः । स्वीय एव पुरे चौर्यं, सर्वदाऽचीकरद्भृशम् ।।७७।।
राज्ञस्तस्य पुरोधास्तु, सर्वं जनमभण्डयत् । खिन्नास्ततोऽखिला लोकाः, परस्परमदोऽवदन् ।।७८।।
यत्र राजा स्वयं चौरो, भण्डकश्च पुरोहितः । यात पौराः ! पुरात्तस्माज्जातं हि शरणाद्भयम् ।।७९।।"
कथां सोपनयां प्राग्वदिमामूचानमप्यमुम् । नाऽनूचानोऽमुचद्ग्रस्तं, जनं दुष्ट इव ग्रहः !।।८०।।
ततस्तृतीयमाख्यानं, वक्तुं प्राक्रंस्त सोऽर्भकः । "तथा हि क्वाप्यभूद्ग्रामे, द्विजन्मा कोऽपि कामुकः ।।८१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तस्य चासीत्सुता मध्यवयोभूषितभूघना । उदग्ररूपलावण्या, जगन्नेत्रसुधाञ्जनम् ।।८२।।
अन्यदा तां सुतां वीक्ष्य, रिरंसुः स द्विजोऽभवत् । न हि प्रबलभोगेच्छः, स्थानास्थाने विचारयेत् ।।८३।।
तां च कामयमानोऽपि, न सिषेवे स लज्जया। तत्कामस्यानिवृत्तेश्च, जज्ञे क्षीणतनुर्भृशम् ।।८४।।
तं चातिदुर्बलं प्रेक्ष्य, सनिर्बन्धं तदङ्गना । अप्राक्षीत्क्षामताहेतुं, सोऽप्याचख्यौ यथातथम् ।।८५।।
ततः सा व्यमृशद्दक्षा, यद्येनां नाप्नुयादयम् । तदावश्यं विपद्येत, द्राग् दशां दशमीं गतः ।।८६।।
विधायाकार्यमप्येतत्तदेनं जीवयाम्यहम् । निजो भर्त्ता हि पत्नीभिर्जीवनीयो यथातथा ।।८७।।
सा विचिन्त्येति तं प्रोचे, मा कार्षीरधृतिं प्रिय ! । अहं केनाऽप्युपायेन, करिष्यामि तवेहितम् ।।८८।।
तमित्याश्वास्य सा पुत्रीमिति प्रोवाच दम्भिनी । पूर्वं हि नः सुतां यक्षो, भुङ्क्ते पश्चाद्विवाह्यते ।।८९।।
कृष्णभूतेष्टानिशायां, तत्त्वं यक्षालयं व्रजेः । त्वां भोक्तुमुद्यतं तत्राऽऽगतं यक्षं च मानयेः ।।९०।।
हे पुत्रि ! तत्रोद्योतं च, मा कार्षीर्यक्षमीक्षितुम् । उद्योते हि कृते यक्षः, सरोषमुपयास्यति ।।९१।।
तच्छ्रुत्वा मातृविस्रम्भा, स्वीचक्रे साऽपि तद्वचः । विस्रब्धो हि जनोऽकार्यमपि सद्यः प्रपद्यते ! ।।९२।।
रात्रौ च मातृप्रोक्तायां, सा यक्षेक्षणकौतुकात् । शरावस्थगितं दीपं, लात्वा यक्षालयं ययौ ।।९३।।
तन्मात्रा प्रहितो भट्टोऽप्याऽऽगात्तद्यक्षमन्दिरम् । तां चोपभुज्यं निःशंकं, रतश्रान्तोऽस्वपीत्सुखम् ।।९४।।
शरावसम्पुटाद्दीप्रमाविष्कृत्याऽथ कौतुकात् । पश्यन्ती तत्सुता तत्र, तातं दृष्ट्वेत्यचिन्तयत् ।।९५।।
अहो मया समं माया, मात्राऽपि महती कृता । भर्त्ता तदयमेवास्तु, मम किं लज्जयाऽधुना ? ।।९६।।
किञ्च स्वतातमप्येनमपशंकं भजाम्यथ । नर्त्तनोद्युक्तनर्त्तक्या, वदनावरणेन किम् ? ।।९७।।
सा विमृश्येति पित्राऽपि, समं रेमे यथारुचि । रतश्रान्तौ च तौ सुप्तौ, प्राबुध्येतां प्रगेऽपि न ।।९८।।
माता तस्यास्ततः कान्तवियोगोदग्रदुःखतः । अलब्धनिद्रा यामिन्यां, प्रातस्तावित्यभाषत ।।९९।।
उद्गतेऽपि रवौ विश्वं, विश्वं स्पृशति चाऽऽतपे । प्रबुद्धेऽप्यऽखिले लोके, हले ! जागर्त्ति नो सुखी ।।१००।।
तत्सवित्रीवचः पूर्वप्रबुद्धा सा तदङ्गजा । श्रुत्वा तदीयभावं चाऽवगम्येत्युत्तरं ददौ ।।१०१।।
मातस्त्वयैव प्रोक्तं मे, यद्यक्षं बहु मानयेः । यक्षेण चाहृतस्तातस्तदन्यं तातमेषयः ।।१०२।।
इमामाकर्ण्य तद्वाचं, ब्राह्मणीत्यब्रवीत्पुनः । नव मासान् स्वीयकुक्षौ, कष्टेनाऽधारि या मया ।।१०३।।
विण्मूत्रे च चिरं यस्या, मर्दिते साऽपि नन्दना । मत्कान्तमहरत्तन्मे, जातं शरणतो भयम् ।।१०४।।"
पूर्ववद्भावनापूर्वमित्युक्तेपि कथानके । तेनाऽमुक्तः शिशुस्तुर्यमाख्यानमिदमुक्तवान् ।।१०५।।
"तथा हि क्वप्यभूद्ग्रामे, विप्रः कोऽपि महाधनः । स च धर्मधिया मूढः, सरोवरमचीखनत् ।।१०६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तस्य पाल्यां देवकुलमारामं च विधाप्य सः । प्रवर्त्य छागयज्ञं च, मुहुस्तत्र चकार सः ।।१०७।।
अयं हि धर्मस्त्राणं मे, परलोकं भविष्यति । ध्यायन्निति स यज्ञेषु, छगलानवधीद्बहून् ।।१०८।।
भूदेवः सोऽन्यदा मृत्वा, छागेष्वेवोदपद्यत । सोऽपि छागः क्रमाद्वृद्धिं, प्राप्तोऽभूत्पीनभूघनः ।।१०९।।
यज्ञे हन्तुं नीयमानः, स्वपुत्रैरेव सोऽन्यदा । स्वोपज्ञं तत्तटाकादि, दृष्ट्वा स्वां जातिमस्मरत् ।।११०।।
मयैव कारितमिदं, ममैवाभूद्विपत्तये । निन्दन्नेवं स्वकृत्यं स, 'बुबु' शब्दं व्यधान्मुहुः ।।१११।।
तथाभूतं च तं वीक्ष्य, ज्ञानी कोऽपि महामुनिः । तत्पूर्वभववृत्तान्तं, विज्ञायैवमवोचत ।।११२।।
खानितं हि त्वयैवेदं, सरो वृक्षाश्च रोपिताः । प्रवर्तिता मखाश्चाऽथ, किं 'बुबू' कुरुषे पशो ! ।।११३।।
इति साधुवचः श्रुत्वा, स छागो मौनमाश्रयत् । स्वकर्मण्युदिते किं हि, पूत्कारैरिति चिन्तयन् ।।११४।।
तूष्णीकः साधुवाचाऽयमजोऽभूदित्यवेत्य ते । अथाऽपृच्छन् द्विजाः साधुमित्याश्चर्यभराकुलाः ।।११५।।
किमेष मेषो भगवन्नाकर्ण्य भवतां वचः । तूष्णीकत्वं दधौ नाग, इव मन्त्रवशीकृतः ? ।।११६।।
मुनिर्जगौ भवत्तातौ, मृत्वाऽसौ छगलोऽभवत् । दृष्ट्वा चैतत्तटाकादि, जातिस्मरणमासदत् ।।११७।।
ततो दुःखाद्बुबुध्वानमुच्चैः कुर्वन्मयोदितम् । स्वकर्मणां दोषममुं, ज्ञात्वा मौनं दधौ द्रुतम् ।।११८।।
ततस्तदङ्गजाः प्रोचुः, कः प्रत्यय इह प्रभो ! । विना प्रत्ययमुक्तं हि, परोक्षं श्रद्दधीत कः ? ।।११९।।
साधुरूचे समक्षं वः, प्राग्भवे निहितं स्वयम् । निधिं चेद्दर्शयत्येष, तदा ह्येतद्यथातथम् ।।१२०।।
तदाकर्ण्य निधिस्थानं, दर्शयेत्युदितः सुतैः । छागो गत्वा निधिस्थाने, पादाग्रेणाऽखनद्भुवम् ।।१२१।।
ततस्तत्तनयैर्जातप्रत्ययैर्यतिसन्निधौ । स छागो मुमुचे जैनधर्मश्च प्रत्यपद्यत ।।१२२।।
धर्मं श्रुत्वा मुनेस्तस्मान्मेषोऽपि प्रतिपद्य सः । विहितानशनः सद्यो, देवभूयमविन्दत ।।१२३।।
प्रेत्य मे शरणं भावीत्याशया स द्विजो यथा । तटाकादि व्यधात्तच्च, तस्याशरणतामगात् ।।१२४।।
एवं मयाऽपि भीतेन, भवन्तः शरणीकृताः । चेन्मुष्णन्ति तदा मेऽपि, त्राणमत्राणतां गतम् ।।१२५।।"
इत्थं चतुर्भिराख्यानैर्गुरोस्तेनोदितैरपि । न दुर्भावो न्यवर्त्तिष्टाऽसाध्यो रोग इवौषधैः ।।१२६।।
ततस्तस्याऽप्यलङ्कारान्, सूरिर्जग्राह पूर्ववत् । लुब्धो जनो हि नो द्रव्यैस्तृप्यत्यब्धिरिवाम्बुभिः ।।१२७।।
एवं षण्णां कुमाराणामात्तैराभरणव्रजैः । प्रतिग्रहं दुर्विकल्पैरात्मानं च बभार सः ।।१२८।।
ततो द्रुतं द्रुतं सूरिः, पुरो गन्तुं प्रचक्रमे । सम्बन्ध्येषां शिशूनां मां, माद्राक्षीदिति चिन्तयन् ।।१२९।।
देवोऽप्येवं परीक्षाभिस्तं प्रणष्टव्रताशयम् । ज्ञात्वैकां व्यकरोत्साध्वीं, तत्सम्यक्त्वं परीक्षितुम् ।।१३०।।
तां च गुर्वीमलङ्कारनिकरैः परिमण्डिताम् । वीक्ष्य सूरिः ससंरम्भारम्भमेवमुवाच सः ।।१३१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अञ्जिताक्षी भूरिभूषाभूषिता तिलकाङ्किता । शासनोड्डाहकृदुष्टसाध्वि ! त्वं कुत आगता ? ।।१३२।।
सूरेस्तस्येति वचनं, श्रुत्वा रोषभराकुला । सा व्रतिन्यपि निःशङ्कं, प्रत्युवाचेति तं द्रुतम् ।।१३३।।
रे सूरे ! सर्षपाभानि, परिच्छिद्राणि पश्यसि ? । आत्मनो बिल्वमात्राणि, पश्यन्नपि न पश्यसि ? ।।१३४।।
किञ्चैवं शिक्षयन्नन्यं, निर्दोषः खलु शोभते । स्वयं सदोषस्तु परं, न शिक्षयितुमर्हति ! ।।१३५।।
यदि च त्वं मन्यसे स्वं, श्रमणं ब्रह्मचारिणम् । समलेष्टुसुवर्णं सत्क्रियमुग्रविहारिणम् ।।१३६।।
तदभ्येहि ममाभ्यर्णमुत्कर्णः किं प्रणश्यसि ? । विलोकयामि ज्येष्ठार्य !, यथाहं ते प्रतिग्रहम् ।।१३७।।
तयेत्युड्डाहितः साध्व्या, तूष्णीकः स व्रजन् पुरः । ददर्श सैन्यमागच्छत्, कृतं तेनैव नाकिना ।।१३८।।
भयोद्भ्रान्तस्ततः सुरिः, सैन्याध्वानं विहाय सः । नश्यन्नपि नृपस्यैव, पुरोगाद्दैवयोगतः ।।१३९।।
नृपोऽपि प्रेक्ष्य तं हस्तिस्कन्धादुत्तीर्य चाऽनमत् । आह स्म चाऽहो ! भाग्यं मे, यूयं यदिह वीक्षिताः ! ।।१४०।।
तत्कृत्वाऽनुग्रहं स्वामिन्मयीदं मोदकादिकम् । एषणीयं प्रासुकं च, गृह्यतां गृह्यतां द्रुतम् ।।१४१।।
नाऽद्य भोक्ष्येऽहमित्युच्चैर्वदन् सूरिस्तु नाऽऽददे । पात्रस्थो भूषणौघो मा, दृश्यतामिति चिन्तयन् ! ।।१४२।।
तं मुञ्च मुञ्चेत्यूचानं, भिया भूपस्तु नाऽमुचत् । ह्रिया न नेति जल्पन्तीं, नवोढां रमणो यथा ! ।।१४३।।
भूभुजा मुहुराकृष्टमपि सूरिः पतद्ग्रहम् । न मुमोच नवोढा स्त्री, भर्त्राकृष्टमिवांशुकम् ! ।।१४४।।
ततः प्रसह्य तत्पाणेस्तमाच्छिद्य पतद्ग्रहम् । तत्र यावन्नृपः क्षेप्तुमारेभे मोदकादिकम् ।।१४५।।
तावत्स तानलङ्कारान्निरीक्ष्य कुपितो भृशम् ! । तमाचार्यमुवाचैवं, भ्रुकुटीविकटाननः ।।१४६।।
अरे पाप ! त्वया नूनं, पुत्रा व्यापादिता मम । नो चेत्कथममी तेषामलङ्कारास्तवान्तिके ।।१४७।।
रे दुष्ट ! द्विष्ठ ! पापिष्ठ !, साधुवेषविडम्बक ! । यास्यसि त्वं कथं जीवन्, व्यापाद्य मम नन्दनान् ? ।।१४८।।
श्रुत्वेति भूभृतो भाषां, साध्वसाकुलमानसः । अधोमुखः सोऽनूचानोऽनूचानो ध्यातवानिति ।।१४९।।
अहो ! विमूढचित्तेनाऽकार्यमेतत्कृतं मया । यदेतदीयपुत्राणामाददे भूषणव्रजः !।।१५०।।
मत्पातकं च सकलं, ज्ञातं भूस्वामिनाऽमुना । तदसौ मां कुमारेण, मारयिष्यति केनचित् ! ।।१५१।।
पाप्मनो निखिलस्यापि, फलमेतदुपस्थितम् । इदानीमेव तत्कोऽत्र, शरणं मे भविष्यति ? ।।१५२।।
अथवा पूर्वमेवेदमविमृश्य व्यधामहम् । तत्संयमसुखं त्यक्तं, यन्मया भोगकाम्यया ।।१५३।।
तत्रैवं चिन्तयत्येव, मायां संहृत्य तां सुरः । आविर्बभूव स्वतनुद्युतिद्योतितदिङ्मुखः ।।१५४।।
तमित्यूचे च भवगन् !, सोऽहं शिष्योऽस्मि वः प्रियः । स्वयं निर्याम्य यः पूज्यैरागन्तुं प्रार्थितोऽभवत् ।।१५५।।
अहं हि व्रतमाहात्म्यात्सुरोऽभूवं महर्द्धिकः । स्मृत्वा वाक्यं च पूज्यानां, स्ववाग्बद्ध इहाऽऽगमम् ।।१५६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मदनागमने कश्चित्कालक्षेपो बभूव यः । स तु ज्ञेयो नवोत्पन्नदेवकार्याकुलत्वतः ।।१५७।।
संयमभ्रष्टचित्तांश्च, युष्मान् बोधयितुं मया । तन्नाट्यं विदधे पूज्यैर्यदृष्टमधुनाऽध्वनि ! ।।१५८।।
मयैव युष्मदाकूतपरीक्षार्थं परिष्कृताः । षट्कायाह्वा दारकाः षट्, ससाध्वीका विकुर्विताः ।।१५९।।
ततोऽवबुध्य वः प्राज्यं, मोहोन्मादमुदित्वरम् । मयोदपादि सैन्यादिभयं तद्ध्वंसनौषधम् ।।१६०।।
शङ्कातङ्कामिमुं तस्मात्त्यक्त्वा मोहसमन्वितम् । उन्मार्गगं मनोऽवाप्तसन्मार्गं कुरुताऽऽत्मनः ।।१६१।।
किञ्च-"संकंतदिव्वपेमा, विसयपसत्तासमत्तकत्तव्वा । अणहीणमणुअकज्जा, नरभवमसुइं न इंति सुरा ।।१६२।।
चत्तारि पंच जोअणसयाइं गंधो उ मणुअलोगस्स । उड्ढं वच्चइ जेणं, न हु देवा तेण आवंति ।।१६३।।"
इत्याद्यागमवाक्यानि, जानद्भिरपि सूरिभिः । मदनागमनेप्येतत्कर्मारब्धं किमीदृशम् ? ।।१६४।।
अन्यच्च दिव्यनाट्यादिविलोकनकुतूहलात् । कालं यान्तं बहुमपि, नैव जानन्ति निर्जराः ! ।।१६५।।
युष्माभिरपि तद्दिव्यनाटकाक्षिप्तमानसैः । ऊर्द्धस्थैरेव षण्मासी, निन्येऽश्रान्तैर्मुहूर्त्तवत् ! ।।१६६।।
तद्भदन्ताः ! विमोहोऽयं, कर्तुं वो नैव युज्यते । कल्पान्तेऽपि किमु क्षीराम्भोधिरुल्लङ्घतेऽवधिम् ? ।।१६७।।
भवादृशा अपि यदा, कुर्वन्त्येवमनीदृशम् । दृढधर्मा जगति कस्तदाह्यन्यो भविष्यति ? ।।१६८।।
तद्दुराचरितं सर्वमालोच्येदं महाधियः ! । समाचरत चारित्रं, कर्मकक्षहुताशनम् ।।१६९।।
गीर्वाणवाणीं श्रुत्वेति, प्रतिबुद्धो महाशयः । स सूरिः स्वदुराचारं, भूयो भूयो निनिन्द तम् ! ।।१७०।।
वारं वारं च तं देवमार्याषाढोऽब्रवीदिति । साधु साधु त्वया वत्स !, बोधितोऽहं महामते ! ।।१७१।।
अहं हि नरकाध्वानं, प्रपन्नोऽपि स्वकर्मभिः । मोक्षमार्गं त्वयैवाऽथ, प्रापितो भावबन्धुना ।।१७२।।
धर्माद्भ्रष्टस्य मे भूयो, धर्मदानविधायिनः । तवाऽनृणोऽहं नैव स्यां, ब्रवीमि किमतः परम् ? ।।१७३।।
तं देवमभिनन्द्येति, स्वस्थानमगमद्गुरुः । आलोचितप्रतिक्रान्तस्तपोत्युग्रं चकार च ।।१७४।।
सुरोऽपि सूरिं नत्वा तं, प्रमोदभरमेदुरः । क्षमयित्वा स्वापराधं, सुरलोकमगात्पुनः ।।१७५।।
नाषाढसूरिरिति दर्शनगोचरं प्राक्, सेहे परीषहममुं न तथा विधेयम् ।
सूरिः स एव सहते स्म यथा च पश्चात्सर्वैस्तथा व्रतिवरैः सततं स सह्यः ।।१७६।।

३. कुदर्शनध्याने श्रीसम्यक्त्वसप्ततिटीकायाः सुराष्ट्रश्रावकस्य दृष्टान्तः ।

देशे श्रीमत्सुराष्ट्रायां, सर्व्वराष्ट्रविभूषणे । कोऽपि सुश्रावको जज्ञे, सम्यग्ज्ञानादितत्त्ववित् ।।१।।
दुष्प्रापभिक्षे दुर्भिक्षे, प्रवृत्ते तत्र दैवतः । सोऽन्यदा बौद्धसार्थेन, प्रतस्थेऽवन्तिमण्डलम् ।।२।।
स शाक्यैरौच्यतान्येद्युरस्माकमुपधिं यदि । मार्गे वहसि तत् तुभ्यं, दद्महे भोजनादिकम् ।।३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद्वचः क्षुधितः सोऽङ्गीकृत्य तद्भाण्डभृत्पथि । व्रजन्नश्रंश्च तद्भावभावितात्माऽभवद्भूशम् ।।४।।
सौगते शासने प्रीतिमतीव दधतोऽस्य तु । मार्गे यातः समुत्पेदे, रोगोऽसाध्यतमस्तनौ ।।५।।
अक्षमः सह सार्थेन, गन्तुं पथि स तस्थिवान् । गैरिकारक्तवस्त्रेणाच्छाद्य तं सौगता गताः ।।६।।
सोऽपि दूषितसम्यक्त्वो, रोगतः पञ्चतां गतः । यक्षीभूयावधिज्ञानं, प्रायुङ्क्ताव्यक्तचेतनः ।।७।।
मया पूर्वभवे किं किं, कृतं सुकृतमद्भुतम् ? । येन प्राप्तेदृशी यक्षपदवी सम्पदोज्ज्वला ।।८।।
रक्तेन वाससाच्छन्नं, तदा स स्वकलेवरम् । मार्गे दृष्ट्वा बहिर्दृष्टिर्हृद्येवं पर्यभावयत् ।।९।।
अनुभावेन भिक्षूणां, लब्धा देवश्रियो मया । तन्वेऽहमपि माहात्म्यमतोऽमीषां हि शासने ।।१०।।
वटवासी स यत्रामी, भिक्षवो भुञ्जते मठे । तत्र कङ्कणकेयूर-मुद्राभिर्मण्डितं करम् ।।११।।
प्रकटीकृत्य शाक्येभ्यो, ददानो मोदकादिकम् । समस्तं कृतवांल्लोकं, सादरं बौद्धशासने ।।१२।। युग्मम् ।
तत्प्रभावमदोन्मादप्रोल्लण्ठाः शठचेतसः । अपनिन्द्यं तु निन्दन्ति, भिक्षवो जिनशासनम् ।।१३।।
किमन्यैर्दर्शनैर्लोकाः !, सेवध्वं शाक्यशासनम् । यत्र देवा अपि सदा, सेवाहेवाकशालिनः ।।१४।।
एकदा केऽपि सूरीन्द्रा, विद्यासिद्धा वसुन्धराम् । विहरन्तः समाजग्मुरुज्जयिन्यां महौजसः ।।१५।।
श्राद्धैस्ते बौद्धवृत्तान्तं, ज्ञापिता ज्ञानभानवः । प्रैषिषन् शिक्षयित्वेति, गीतार्थौ द्वौ महामुनी ।।१६।।
सौगतानां मठे हस्तो, यदा निर्याति दैवतः । तं विधृत्य स वक्तव्यो, युवाभ्यामुञ्चकैरिदम् ।।१७।।
अहो बुध्यस्व बुध्यस्व, मा मुह्य गुह्यकोत्तम ! । स्मर पञ्चनमस्कारं, पाथेयं शिववर्त्मनः ।।१८।।
मठायातौ यती बौद्धैर्निमन्त्र्येतां मदोद्धुरैः । अन्तःप्रविष्टौ तौ हस्तमदार्ष्टां च विनिर्गतम् ।।१९।।
निरुध्य हस्तं तौ व्यक्तमवक्तां गुरुवाचिकम् । तदाऽऽकर्णनतो यक्षः, प्रत्यबुध्यत तत्क्षणात् ।।२०।।
अचिन्तयच्च हा धिग्मां, यस्य मे जिनशासने । विज्ञस्यापि कथं मोहोऽभून्मिथ्यादृष्टिसङ्गतः ? ।।२१।।
आविर्भूय ततो यक्षः, सौगतांस्तदुपासकान् । अपरानप्युवाचोच्चैः, श्रूयतां भो ! वचो मम ।।२२।।
अन्ये दर्शनिनः सर्वे मिथ्यारूपाः प्रकीर्त्तिताः । तथ्यमेकं तु विज्ञेयं, श्रीजिनेश्वरशासनम् ।।२३।।
तद्भो मिथ्यादृशस्त्यक्त्वा, श्रयध्वं जिनशासनम् । यथा करतलक्रोडीस्यात् श्रीः खर्ग्गापवर्ग्गयोः ।।२४।।
इत्युदीर्य ततो गत्वा, सूरीन्नत्वाऽतिचारजम् । पापमालोच्य जैनं स, मार्ग्गमुद्राव्य जग्मिवान् ।।२५।।
निपीय केऽपि तद्वाक्यमरन्दं मधुपा इव । श्रीमज्जिनमतोद्याने, जगुरर्हद्गुणावलिम् ।।२६।।

श्रुत्वा सुराष्ट्रावणिजश्चरित्रं, कुलिङ्गिसङ्गं त्यजताशु भव्याः ।
येन ध्रुवं दर्शनशुद्धिमाप्य, खर्ग्गादिसौख्यैः सुहिता भवेयुः ।।२७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

४. क्रोधध्याने श्रीमद्भावविजयकृतश्रीउत्तराध्ययनवृत्त्युक्तं कूलवालकमुनिचरित्रम् ।

सूरेरेकस्य शिष्योऽभूदविनीतोऽतिरोषणः । चुकोप कोपसदनं, शिक्ष्यमाणः स सूरिणा ।।१।।
दक्षया शिक्षया सूरिस्तथापि तमशिक्षयत् । स तु तामपि मेनेऽन्तर्विषाक्तविशिखोपमाम् ।।२।।
हितशिक्षा हि दुष्टानां, नोपकाराय जायते । पयःपानमिवाहीनां, किन्तु स्याद्विषवृद्धये ।।३।।
नत्वाऽन्यदा सिद्धशैले, जिनानुत्तरतो गुरून् । पेष्टुं दुष्टः स पृष्ठस्थो, गंडशैलमलोठयत् ।।४।।
शब्दायमानमायान्तं, तं च प्रेक्ष्य गुरुर्द्रुतम् । पादौ प्रासारयत् प्राज्ञस्ततः सोऽगात्तदन्तरे ।।५।।
अक्षतांगस्ततः सूरिः, क्रुद्धस्तेन कुकर्मणा । भावी पातोऽङ्गनायास्ते, रे ! पापेति शशाप तम् ।।६।।
गुरोर्गिरं मृषाकर्त्तुं, क्षुल्लः क्षुद्रमतिः स तु । गत्वा निर्मानुषारण्ये, तस्थौ गिरिनदीतटे ।।७।।
स तत्रातापनासेवी, तपस्तेपे सुदुस्तपम् । पारणां चाध्वगादिभ्यो, मासपक्षादिना व्यधात् ।।८।।
अथायातासु वर्षासु, तरुणांबुदकामुकैः । अपूर्यंतार्णवानीतैर्नदीवेश्याः पयोधनैः ।।९।।
एनं कूलंकषाकूलं, निकषासंस्थितं मुनिम् । मानैषीदंबुपुरोऽब्धिं, दुष्टो वाह इवाटवीम् ।।१०।।
इति ध्यात्वा नदीदेव्या, साऽन्यतोऽवाहि वाहिनी । कूलवालक इत्यूचुस्ततस्तं संयतं जनाः ।।११।। (युग्मम्)
इतश्च श्रेणिको राजा पुरे राजगृहेऽभवत् । नन्दा च चिल्लणा चास्तां, महिष्यौ तस्य मञ्जुले ।।१२।।
तत्राद्यायाः सुतो जज्ञेऽभयोऽन्यस्याः सुनन्दनाः । कूणिकहल्लविहल्लास्त्रयोऽभूवन्मनोहराः ।।१३।।
कालाद्या भ्रातरस्तेषां, दशाऽऽसन् भिन्नमातृकाः । मात्रा सत्राऽभयस्तत्राऽऽददे दीक्षां जिनान्तिके ।।१४।।
प्रव्रजती तदा नन्दा, ददौ हल्लविहल्लयोः । कुंडलद्वितयं देवदत्तं क्षौमयुगं तथा ।।१५।।
राज्यं ज्येष्ठस्य भावीति, ध्यात्वा राजाप्यदात्तयोः । गंधद्वीपं सेचनकं, हारं च त्रिदशार्पितम् ।।१६।।
कूणिकस्ते च कालाद्याः, दुष्टा बद्ध्वाऽन्यदा नृपम् । विभज्यादादिरे राज्यं, राजा त्वजनि कूणिकः ।।१७।।
राज्यादिकं ददौ हारादिकं तातोऽनयोः स्वयम् । इति राज्यविभागं ते, नादुर्हल्लविहल्लयोः ।।१८।।
कारास्थ एव पितरि, विषं भुक्त्वान्यदा मृते । सानुतापो रतिं प्राय, पुरे तत्र न कूणिकः ।।१९।।
वासयित्वा ततोऽन्यत्र, नव्यां चंपाभिधां पुरीम् । उवास वासव इव, महर्द्धिः कूणिको नृपः ।।२०।।
हारकुंडलवासोभिर्दिव्यैर्भूषितभूधनौ । गंधद्वीपं तमारूढौ, सान्तःपुरपरिच्छदौ ।।२१।।
क्रीडायै प्रत्यहं हल्लविहल्लौ जग्मतुर्नदीम् । तदेति क्रीडयामास, तद्वधूर्गन्धसिन्धुरः ।।२२।। (युग्मम्)
स्कन्धेऽध्यारोपयत्काश्चिच्छुण्डयाऽऽदाय सुन्दरीः । काश्चिन्न्यवेशयन्मौलौ, काश्चिद्दन्तान्तरेष्वधात् ।।२३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उद्ध्वीकृत्य करं काश्चिद्बालिकावद्वियत्यधात् । काश्चिदान्दोलयद्दोलामिव शुण्डां विलोलयन् ।।२४।।
"किं बहुना" ? यथा यथा प्रोचिरे तास्तस्मै शस्ताय हस्तिने । विभङ्गज्ञानवान् सोऽपि, प्रावर्त्तत तथा तथा ।।२५।।
तच्च प्रेक्ष्याद्भुतं सर्वोऽप्येवं पौरजनो जगौ । राज्यश्रीफलभोक्तारावि मावेव न कूणिकः ।।२६।।
तच्च पद्मावती राज्ञी, श्रुत्वा कूणिकभूभुजः । जातामर्षप्रकर्षेति, चिंतयामास चेतसि ।।२७।।
दिव्यहारादिना गंधहस्तिना चामुना विना । राज्यं न राजते प्राज्यमप्यनाज्यमिवाशनम् ।।२८।।
तत् पत्या सर्वमप्येतद्ग्राहयिष्ये बलादपि । ध्यात्वेति सा स्वमाकूतं, रहो राज्ञे न्यवेदयत् ।।२९।।
भूपोऽवादीददानो, भ्रात्रोरपि रमामहम् । काकादपि निकृष्टः स्यां, तदलं वार्त्तयानया ।।३०।।
निषिद्धापि नृपेणैवं, नाग्रहं तं मुमोच सा । बालानामिव बालानामाग्रहो हि भवेद्बली ।।३१।।
प्रपेदे तद्विशामीशस्तत्प्रेमविवशोऽथ सः । अकार्यमपि किं प्रायो, न कुर्वन्ति ? वशावशाः ! ।।३२।।
यदुक्तम् "सुवंशजोऽप्यकृत्यानि, कुरुते प्रेरितः स्त्रिया । स्नेहलं दधि मथ्नाति, पश्य मंथानको न किम् ?" ।।३३।।
हारादिकं नृपोऽन्येद्युर्भ्रातरौ तावयाचत । विहाय दूरतः स्नेहमुन्मत्त इव चीवरम् ।।३४।।
तावूचतुस्तातदत्तं, तद्दातुं नार्हमावयोः । तथापि दद्महे राजन् ! राज्यांशं चेद्ददासि नौ ।।३५।।
इत्युक्तः पार्थिवस्ताभ्यां, कषायकलुषोऽवदत् । वात्सल्यादविमृश्यैव, तातेनादायि किं ततः ? ।।३६।।
किं चार्हति ममैवेदं सारं रत्नचतुष्टयम् । रत्नानि राजगामिनीत्युच्यते हि जडैरपि ।।३७।।
ततस्तद्दीयतां नोचेद्ग्रहीष्यामि बलादपि । ओमित्युक्त्वा ततो हल्लविहल्लौ जग्मतुर्गृहम् ।।३८।।
दध्यतुश्चेति राज्ञोऽस्य, शोभनो नायमाशयः । वासः ससर्पधाम्नीव, नेह श्रेयांस्तदावयोः ।।३९।।
ध्यात्वेत्यादाय हारादि, सर्वं तौ सपरिच्छदौ । चंपायां निशि निर्गत्य, वैशालीं जग्मतुः पूरीम् ।।४०।।
मातामहाय तौ तत्र, चेटकाय महीभुजे । सर्वं स्वोदंतमावेद्यास्थातां तत्कृतगौरवौ ।।४१।।
कूणिकस्तूभयभ्रष्टतया चिन्ताञ्चितस्ततः । वैशाल्यां तौ गतौ ज्ञात्वा, प्रैषीद्दूतं वचस्विनम् ।।४२।।
गत्वा दूतोऽपि वैशालीं, नत्वा चेटकमित्यवक् । राजन् ! कूणिकराजस्त्वां, मया विज्ञपयत्यदः ।।४३।।
गजादिरत्नान्यादायागताविह कुमारकौ । प्रेषणीयौ द्रुतं पूज्यैस्तुल्यैर्मयि तयोस्तथा ।।४४।।
तौ चेन्नागच्छतस्तर्हि, प्रेष्यं सद्यो द्विपादिकम् । नो चेद्वो भविता भूयानायासोऽनुशयावहः ।।४५।।
अथेति चेटकोऽवोचद्दूत ! त्वं ब्रूहि कूणिकम् । तातदत्ता भ्रातृलक्ष्मीर्ग्रहीतुं युज्यते न ते ।।४६।।
रक्ष्यन्ते शरणायाताः, किं चान्येऽपि मनस्विभिः । तद्दौहित्रौ कथंकारं, प्रेषणीयाविमौ मया ? ।।४७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

दौहित्रत्वात्समाना मे, भवन्तो यद्यपि त्रयः । न्यायित्वादाश्रितत्वाच्च, विशिष्येते तथाऽप्यमू ।।४८।।
सत्यप्येवं दापयामि, द्विपादि तव तुष्टये । ददासि यदि राज्यांशं, न्यायोपेतं त्वमेतयोः ।।४९।।
तच्चेटकवचो गत्वा, दूतः स्वस्वामिनेऽवदत् । क्रोधाध्मातस्ततः सोऽपि, यात्राभंभामवीवदत् ।।५०।।
कालाद्यैर्दशभिर्युक्तो, भ्रातृभिर्निजसन्निभैः । त्रयस्त्रिंशत्सहस्राश्वरथसिन्धुरसंयुतः ।।५१।।
त्रयस्त्रिंशत्कोटिपत्तिकलितश्चलितस्ततः । कूणिकोऽच्छादयत्सैन्यैर्भुवं द्यां च रजोभरैः ।।५२।। (युग्मम्)
ततो युतोऽष्टादशभिर्भूपैर्मुकुटधारिभिः । सप्तपञ्चाशत्सहस्र-रथहस्तिहयान्वितः ।।५३।।
चेटकोऽप्यभ्यगात्सप्तपञ्चाशत्कोटिपत्तियुक् । स्वदेशसीम्नि सैन्ये च, वार्द्धिव्यूहमचीकरत् ।।५४।। (युग्मम्)
कूणिकोऽप्यागतस्तत्र, तार्क्ष्यव्यूहं व्यधाद्बले । न्यधाच्चमूपतित्वे च, कालं कालमिवोत्कटम् ।।५५।।
व्यक्तवीरगणोन्मुक्तपृषक्ताच्छादिताम्बरे । आरेभाते रणं भीममुभे अपि ततो बले ।।५६।।
निषादिना व्यधाद्युद्धं, निषादी रथिना रथी । सादिना च समं सादी, पदातिस्तु पदातिना ।।५७।।
काली जयार्थमुत्तालः, समं चेटकसेनया । युध्यमानस्तदा राज्ञश्चेटकस्यान्तिके ययौ ।।५८।।
दिनं प्रत्येकविशिखमुक्तिसन्धाधरस्ततः । चेटको दिव्यबाणेन तं कृतान्तातिथिं व्यधात् ।।५९।।
चंपापतेर्बलं शोकाकुलं द्रष्टुमिवाक्षमः । तदा भानुर्जगामास्तं, विशश्राम ततो रणः ।।६०।।
द्वितीयेऽप्यह्नि सैन्याभ्यामारब्धे संगरे पुनः । महाकालं कूणिकस्य, सेनान्यं चेटकोऽवधीत् ।।६१।।
अन्येष्वपि हतेष्वेवं, तेनाष्टस्वष्टभिर्दिनैः । शोकाक्रान्तोऽशोकचन्द्रः, इति चेतस्यचिन्तयत् ।।६२।।
राज्ञोऽस्याऽजानता दिव्यां, शक्तिमेतां हहा मया । मुधैव प्रापिताः कालं, कालाद्या भ्रातरो दश ।।६३।।
तदद्यापि सुरं कञ्चिदाराध्यामुं जयाम्यरिम् । नो चेद्भविष्याम्यनुगस्तेषामहमपि द्रुतम् ।।६४।।
ध्यात्वेति देवताध्याने, स्थितं तं विहिताष्टमम् । प्राग्जन्मसंगतौ शक्रचमरेन्द्रावुपेयतुः ।।६५।।
किमिच्छसीति जल्पन्तौ, तावित्यूचेऽथ कूणिकः। यदि तुष्टौ युवां सद्यश्चेटको मार्यतां तदा ।।६६।।
ऊचे शक्रः सधर्माणं, चेटकं न हि हन्म्यहम् । करिष्याम्यङ्गरक्षां तु, तव भक्तिवशंवदः ।।६७।।
महाशिलाकंटकाह्वरथादिमुशले रणे । चमरेन्द्रस्त्वदात्तस्मै, वैरिनिर्जयकारणे ।।६८।।
तत्राद्ये वैरिषु क्षिप्तावपि कर्करकण्टकौ । महाशिलामहाशस्त्रे, इव स्यातां मृतिप्रदौ ।।६९।।
युद्धे द्वितीये तु रथमुशले भ्रमकं विना । भ्राम्यतः परितो वैरिपक्षपेषणतत्परे ।।७०।।
ततस्तुष्टो ययौ दुष्टः, कूणिकः समराजिरम् । ममंथ वार्द्धिव्यूहं च, मंथाचल इवोदधिम् ।।७१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तमापतन्तं संहर्त्तुं, सामर्षश्चेटको नृपः । मुमोचाकर्णमाकृष्य, सद्यो दिव्यं शिलीमुखम् ।।७२।।
कूणिकस्य पुरो वज्र-कवच वज्रभृद्वधौ । पृष्ठे तु लौहं सन्नाहं, तदा तस्यासुरेश्वरः ।।७३।।
तस्मिन् दिव्ये शरे वज्रवर्मणा स्खलितेऽन्तरा । भटाश्चेटकराजस्य, मेनिरे सुकृतक्षयम् ।।७४।।
सत्यसन्धो द्वितीयं तु, चेटको नामुचच्छरम् । द्वितीयेऽप्यह्नि तद्बाणं, तथैवाऽजनि निष्फलम् ।।७५।।
आद्ये रणे षण्णवतिर्लक्षा नृणां ययुः क्षयम् । लक्षाश्चतुरशीतिश्च, द्वितीये तु महाहवे ।।७६।।
तेष्वेको वरुणः श्राद्धो, नागनप्ता ययौ दिवम् । तत्सुहृद्भद्रको नृत्वं, तिर्यक्त्वं नरकं परे ।।७७।।
इत्यन्वहं जायमाने, समरे सैन्ययोस्तयोः । यात्सु स्वस्वपुरं नष्ट्वाऽष्टादशस्वपि राजसु ।।७८।।
प्रणश्य चेटकोर्वीशो, वैशालीमविशत्पुरीम् । रुरोध सर्वतस्तां च, कूणिकः प्रबलैर्बलैः ।।७९।। (युग्मम्)
अथ सेचनकारूढौ, कूणिकस्याखिलं बलम् । उपदुद्रुवतुर्हल्लविहल्लौ तौ प्रतिक्षपम् ।।८०।।
अवस्कन्दप्रदानायाऽऽगतं तं गन्धहस्तिनम् । न हंतुमनुगन्तुं वा, तत्सैन्ये कोऽप्यभूत् प्रभुः ।।८१।।
तन्मार्गे मन्त्रिणां बुद्ध्या, कूणिकोऽचीकरत्ततः । खातिकां ज्वलदंगार-पूर्णां पर्णाद्यवस्तृताम् ।।८२।।
रात्रौ तत्रागतः सोऽथ, गजो ज्ञात्वा विभंगतः । ज्वलदंगारगर्त्तां तां, नुन्नोऽपि न पुरोऽचलत् ।।८३।।
तावूचतुस्ततः खिन्नौ, कुमाराविति तं द्विपम् । परेभ्यः किं बिभेषि ? त्वं, यत्पुरो न चलस्यरे ! ।।८४।।
वरं श्वा पोषितः शश्वत्स्वामिनं योऽनुवर्त्तते । कृतघ्नोऽहिरिव स्वामिकृत्यनाशी भवान्नतु ।।८५।।
इत्युक्तः सिन्धुरस्ताभ्यां, स्वामिभक्तधुरन्धरः । गृहीत्वा शुंडया स्कन्धात्तौ बलेनोदतारयत् ।।८६।।
स्वयं तु तस्यां गर्त्तायां, दत्वा झंपां विपद्य च । आद्येऽगान्नरके धैर्यमहो तस्य पशोरपि ! ।।८७।।
तद्वीक्ष्य सानुतापौ तौ, कुमाराविति दध्यतुः । क्रोधान्धाभ्यां धिगावाभ्यां, किमकार्यमिदं कृतम् ! ।।८८।।
कृते यस्य कृतो देशत्यागो भ्राता रिपूकृतः । अस्मिंश्च व्यसनांभोधौ, क्षिप्तो मातामहोऽप्यहो ! ।।८९।।
निहत्य तं गजं युक्तं, नैव जीवितुमावयोः । जीवावश्चेद्वीरदेवशिष्यीभूयैव नान्यथा ।।९०।। (युग्मम्)
तदा शासनदेव्या तौ, नीतौ वीरजिनान्तिके । प्रव्रज्यैकादशाङ्गानि, सुधियौ पेठतुः क्रमात् ।।९१।।
गुणरत्नं तपस्तप्त्वा, संलिख्य च समाधिना । हल्लः सुरो जयन्तेऽभूद्विहल्लस्त्वपराजिते ।।९२।।
गृहीतेऽपि व्रते ताभ्यां, पुरीमादातुमक्षमः । व्यधात्सन्धामित्यशोकचन्द्रो निस्तन्द्रविक्रमः ।।९३।।
खरयुक्तहलैरेनां, नगरीं न खनामि चेत् । तदा त्यजाम्यहमसून्, भृगुपातादिना ध्रुवम् ।।९४।।
तथापि तां पुरीं भंक्तु-मनीशे श्रेणिकात्मजे । क्रमात् खेदं गते देवी, कापीत्यूचे नभःस्थिता ।।९५।।
"समणे जदि कूल्ववालए, मागधिअं गणिअं गमिस्सए । राया य असोगचन्दए, वेसालिं नगलिं गहिस्सए" ।।९६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तन्निशम्य नृपस्तुष्टस्तां वेश्यामेवमादिशेत् । इहानय पतीकृत्य, भद्रे ! त्वं कूलवालकम् ।।९७।।
तत्प्रपद्याभवन्मायाश्राविका सा पणाङ्गना । मुनेः कुतोऽपि तत्रस्थमज्ञासीत्तं च संयतम् ।।९८।।
तत्रारण्ये ततो गत्वा, तं च नत्वा यथाविधि । इति सा दम्भिनी प्रोचे, वचनैरमृतोपमैः ।।९९।।
नन्तुं तीर्थानि चंपातः, प्रभो ! प्रस्थितया मया । सर्वतीर्थाधिकाः पूज्यपादा दिष्ट्याऽत्र वन्दिताः ।।१००।।
मत्पाथेयात्तदादाय, भिक्षामनुगृहाण माम् । तयेति सादरं प्रोक्तस्तत्सार्थे साधुरप्यगात् ।।१०१।।
तस्यादान्मिश्रितद्रव्यान्, सामोदा सापि मोदकान् । तद्भक्षणादतीसारस्तस्यासीदतिदुस्सहः ।।१०२।।
ततः सा तत्र तद्वैयावृत्यदम्भेन तस्थुषी । मुहुर्मुनिमुपासर्पत्सर्पवत्कुटिलाशया ।।१०३।।
उद्वर्त्तनादिना स्वाङ्गस्पर्शं चाचीकरन्मुहुः । भेषजान्तरदानाच्च, तमुल्लाघं व्यधाच्छनैः ।।१०४।।
तत्कटाक्षसरागोक्तिशरीरस्पर्शविभ्रमैः । मुनेर्मनोऽचलत्तस्य, स्त्रीसङ्गे क्वनु ? तत्स्थिरम् ।।१०५।।
त्यक्तव्रतस्ततस्तस्यामासक्तः सोऽभवत्तथा । यथा तया विना स्थातुं, नाभूत्क्षणमपि प्रभुः ।।१०६।।
तद्वशः कूणिकोपान्तं, ततोऽगात्कूलवालकः । सत्कृत्य कूणिकोऽप्येवमब्रवीत्तं मुनिब्रुवम् ।।१०७।।
महात्मन् ! गृह्यते नेयमुपायैर्बहुभिः पुरी । ततस्तद्ग्रहणोपायं, विधेहि धिषणानिधे ! ।।१०८।।
ततो दैवज्ञवेषेण, वैशालीं प्रविवेश सः । श्रीसुव्रतार्हतः स्तुपं, भ्रमंस्तत्र ददर्श च ।।१०९।।
दध्यौ च नूनमस्यास्ति, प्रतिष्ठालग्नमुत्तमम् । अभंगा तन्महिम्नासौ, नगरी ननु वर्त्तते ।।११०।।
कथं मया पातनीयस्तदसाविति चिन्तयन् । अपृच्छ्यत पुरीरोधाकुलेनेति जनेन सः ।।१११।।
वद दैवज्ञ ! वैशाल्या, रोधो यास्यत्यसौ कदा ? । खिन्नाः स्मो यद्वयं कारावासेनेवामुना भृशम् ।।११२।।
मुदितः स ततोऽवादीत्, पापपङ्केकशूकरः । स्तूपोऽसौ यावदत्र स्यात्तावदुद्वेष्टनं क्व ? वः ।।११३।।
तल्लोकाः ! यद्ययं स्तूपो, युष्माभिः पात्यते द्रुतम् । तदाऽपयाति नियतं पुरीरोधोऽधुनैव हि ।।११४।।
प्रोक्तो धूर्त्तेन तेनेति, बालवद्बालिशो जनः तं स्तूपं भंक्तुमारेभे, धूर्तैः को न हि वञ्च्यते ।।११५।।
स्तूपे च भंक्तुमारब्धे, गत्वा मागधिकाधिपः । सद्योऽपासारयच्चंपाधीशं क्रोशद्वयं ततः ।।११६।।
ततः स प्रत्ययैर्लोकैः, स्तूपे मूलात्प्रपातिते । व्याद्युट्य कूणिकोऽविक्षत्, पुरीं सबलवाहनः ।।११७।।
तदा चानशनं कृत्वा, स्मृत्वा पञ्चनमस्क्रियाः । चेटको न्यपतत् कूपे, बद्धाऽयःपुत्रिकां गले ।।११८।।
तदा तत्रासनास्थैर्यादागत्य धरणाधिपः । साधर्मिकं तमादाय, निनाय भवने निजे ।।११९।।
विधायाराधनां सम्यक्, प्रपाल्यानशनं च तत् । तत्रस्थः प्राप्य पञ्चत्वं, चेटकस्त्रिदिवं ययौ ।।१२०।।
इतश्च सुज्येष्ठासूनुर्दौहित्रश्चेटकप्रभोः । वैशाल्यामाययौ दैवात्तदा सत्यकिखेचरः ।।१२१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मातामहप्रजां सर्वां, लूंट्यमानां स रक्षितुम् । निनाय नीलवत्यद्रौ, द्रुतमुत्पाट्य विद्यया ।।१२२।।
कोपाविष्टः कूणिकोऽथ, तां पुरीं युक्तरासभैः । खेटयित्वा हलैस्तीर्णप्रतिज्ञः स्वपुरीं ययौ ।।१२३।।
कूलवालकनामा तु, मृत्वागान्नरकं कुधीः । उद्धृतस्तु ततोऽनन्ते, संसारे पर्यटिष्यति ।।१२४।।

कूलवालकमुनेरिव दुःखावाप्तिरेवमविनीतमुनेः स्यात् ।
धृष्टतां तदपहाय सुशिष्यैः, सद्गुरोर्विनय एव विधेयः ।।१२५।।

४. क्रोधध्याने त्रिषष्टिशलाकापुरुषचरिते गोशालकाख्यानकः ।

इत्याख्याय ततो नाथः श्रावस्तीं विहरन् ययौ । तस्यां च समवासार्षीदुद्याने कोष्ठकाभिधे ।।१।।
तस्यां प्रागागतस्तेजोलेश्याहतविरोधकः । अष्टांगनिमित्तज्ञानज्ञातलोकमनोगतः ।।२।।
अजिनोऽपि जिनशब्दमात्मना संप्रकाशयन् । हालाहलाकुंभकार्या गोशालोऽवसदापणे ।।३।। (युग्मम्)
तस्य चार्हन्निति ख्यातिं लोक आकर्ण्य मुग्धधीः । उपेत्योपेत्य विदधे निरन्तरमुपासनम् ।।४।।
इतश्च समये प्राप्ते गौतमः स्वाम्यनुज्ञया । प्राविशत् पुरि भिक्षार्थं चिकीर्षुः षष्ठपारणम् ।।५।।
गोशालोऽत्रास्ति सर्वज्ञोऽर्हन्नित्याकर्ण्य तत्र च । गौतमः सविषादोऽगादात्तभिक्षोऽन्तिके प्रभोः ।।६।।
यथावत् पारणं कृत्वा गौतमः समये प्रभुम् । पश्यतां पौरलोकानामपृच्छत् स्वच्छधीरिति ।।७।।
स्वामिन्नगर्यामेतस्यां व्याहरन्त्यखिला जनाः । सर्वज्ञ इति गोशालं किमेतद् घटते न वा ? ।।८।।
अथाख्यद्भगवानेष सूनुर्मंखस्य मंखलेः । अजिनोऽपि जिनमन्यो गोशालः कपटालयः ।।९।।
मयैव दीक्षितश्चायं शिक्षां च ग्राहितो मया । मिथ्यात्वं प्रतिपन्नो मे सर्वज्ञो नैष गौतम ! ।।१०।।
तत्तु स्वामिवचः श्रुत्वा पौराः पुर्यामितस्ततः । एवं बभाषिरेऽन्योऽन्यं चत्वरेषु त्रिकेषु च ।।११।।
हं हो अर्हन्निहायातो वीरस्वामी वदत्यदः । गोशालो मंखलिसुतो मिथ्या सर्वज्ञमान्यसौ ।।१२।।
जनश्रुत्या ततः श्रुत्वा गोशालः कालसर्पवत् । आपूर्यमाणः कोपेन तस्थावाजीवकावृतः ।।१३।।
इतश्च स्वामिनः शिष्य आनन्दः स्थविराग्रणीः । षष्ठपारणकं कर्तुं भिक्षार्थं प्राविशत् पुरि ।।१४।।
हालाहलागृहासीनो गोशालस्तत्प्रदेशगम् । आनन्दमुनिमाहूय साधिक्षेपमदोऽवदत् ।।१५।।

भो आनन्द ! तवाचार्यो लोकात् सत्कारमात्मनः ।
इच्छन् वीरः सभान्वक्षं मां तिरस्कुरुतेतराम् ।।१६।।

मंखपुत्रमनर्हन्तमसर्वज्ञं च वक्ति माम् । तेजोलेश्यां न मे वेत्ति विपक्षदहनक्षमाम् ।।१७।।
भस्मराशीकरिष्यामि तमहं सपरिच्छदम् । त्वामेवैकं विमोक्ष्यामि दृष्टान्तोऽत्र निशम्यताम् ।।१८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अवसरः प्रसरश्च संवादः कारकस्तथा। भलनो वणिजोऽभूवन् क्षेमिलायां पुरा पुरि ।।१९।।
भाण्डैरापूर्य शकटान्निर्ययुस्ते वणिज्यया । यान्तश्च निर्जलारण्यं विविशुः किञ्चिदध्वनि ।।२०।।
ते पञ्चापि तृषाक्रान्ता मरुमार्गगता इव । जलं गवेषयामासुः पर्यन्टतो महाटवीम् ।।२१।।
भ्राम्यन्नवसरः पञ्चशिखरं वामलूरकम् । ददर्शादर्शयत्तेषां चतुर्णां सुहृदामपि ।।२२।।
ते तस्य पूर्वशिखरं संभूयाऽस्फोटयन् द्रुतम् । तस्माच्च लेभिरे वारि तत्पीत्वा सुस्थतां ययुः ।।२३।।
अथोचे प्रसरोऽपाच्यशृंगमप्यस्य दीर्यताम् । लप्स्यामहे नूनमितो वस्त्वन्यदपि किंचन ।।२४।।
अथाब्रवीदवसरः खननं नास्य युज्यते । उत्थास्यत्यहिरेतस्मान्नाकुरोको हि भोगिनाम् ।।२५।।
अवादीदथ संवादो विसंवादोऽप्यभूदिह । यत्परिस्फोटितात्पूर्वशिखरान्नाहिरुत्थितः ।।२६।।
भूयोऽप्यवसरोऽवोचद्दैवादिह पयोऽभवत् । अथोचे कारको दैवाद् द्रम्मा इह नु भाविनः ।।२७।।
इत्युदित्वा तत् खनितुं समारभत कारकः । मतं ममेदं नेत्युक्त्वा गन्त्रीमवसरो ययौ ।।२८।।
बभाषे भलनो यातोऽवसरो यदि यातु तत् । विनाऽप्यमुं खनिष्याम इति सर्वेऽपि तेऽखनन् ।।२९।।
खातात्तस्मान्नाकुशृंगात् सद्यो द्रम्मा विनिर्ययुः । विभज्यावसरवर्जं चत्वारो जगृहुश्च तान् ।।३०।।
चक्षुश्चतुर्थमपि ते शृंगं स्वर्णं च लेभिरे । ततो रजतमप्यौज्झन् सुवर्णादानलोभतः ।।३१।।
रत्नानि पञ्चमे शृंगे भविष्यन्तीति बुद्धितः । चक्षुस्तदपि लोभान्धा लाभाल्लोभो हि वर्धते ।।३२।।
अत्यन्तमथितादब्धेः कालकूट इवोत्कटः । तस्माच्छृंगात् खन्यमानादुत्तस्थौ दृग्विषोरगः ।।३३।।
वल्मीकाग्रस्थितः सोऽहिः प्राक् सूर्यं प्रेक्ष्य तादृशा । भस्मीचकार चतुरः सगन्त्रीवृषभानपि ।।३४।।
निर्लोभ इत्यवसरं सगन्त्रीवृषमप्यथ । तस्याहेर्देव्यधिष्ठात्री प्रापयत् स्थानमीप्सितम् ।।३५।।
धक्ष्यामि त्वद्गुरुं सर्पोऽधाक्षीत्तांश्चतुरो यथा । मोक्ष्यामि त्वामहं सोऽहिर्मुमोचावसरं यथा ।।३६।।
ततोऽसमाप्तभिक्षार्थ एवाऽऽनन्दो ययौ प्रभुम् । गोशालोक्तं तदाचख्यावपृच्छेच्चेति शंकितः ।।३७।।
भस्मराशीकरिष्यामीत्युक्तं गोशालकेन यत् । उन्मत्तभाषितं तत् किं तत्कर्तुमथवा क्षमः ? ।।३८।।
अथाचचक्षे भगवानर्हद्भ्यः सोऽन्यतः क्षमः । अर्हतामपि सन्तापमात्रं कुर्यादनार्यधीः ।।३९।।
तद्गत्वा गौतमादीनां शंसेदं ते यथा हि तम् । इहागतं नोदनया धर्म्ययापि नुदन्ति न ।।४०।।
तेषां गत्वाऽऽख्यदानन्दस्तदा गोशालकोऽपि हि । तत्राऽऽगात् स्वामिनोऽग्रे चावस्थाय व्यब्रवीदिति।।४१।।
भोः काश्यप ! वदस्येवं गोशालो मंखलेः सुतः । अन्तेवासी ममेत्यादि तन्मृषा भाषितं तव ।।४२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गोशालस्तव यः शिष्यः स हि शुक्लाभिजातिकः । धर्मध्यानस्थितो मृत्वा त्रिदशेषूदपद्यत ।।४३।।
तद्देहेऽस्मिन्नुपसर्गपरीषहसहेऽविशम् । उदायनामाऽहमृषिः परित्यज्य निजं वपुः ।।४४।।
ततो मामपरिज्ञाय गोशालं मंखलेः सुतम् । स्वशिष्यं कथमाख्यासि न खल्वसि गुरुर्मम ।।४५।।
स्वाम्यथोचे यथाऽऽरक्षैः क्रम्यमाणो मलिम्लुचः । गर्तं दुर्गं वनं वाऽपि स्वान्तर्धानमवाप्नुवन् ।।४६।।
ऊर्णालोम्ना शणलोम्ना तूलांशेन तृणेन वा । मन्यतेऽन्तरदत्तेनात्मानमावृतमल्पधीः ।।४७।।
एवं त्वमपि गोशालोऽनन्योऽप्याख्यान् स्वमन्यथा । किमर्थं भाषसेऽलीकं स एवास्यपरो न हि ।।४८।।
एवं स्वामिगिरा क्रुद्धो गोशालोऽप्यब्रवीत् प्रभुम् । अद्य भ्रष्टोऽसि नष्टोऽसि न भवस्येष काश्यप ! ।।४९।।
सर्वज्ञशिष्यः सर्वानुभूतिर्गुर्वनुरागतः । अक्षमस्तद्वचः सोढुं गोशालकमभाषत ।।५०।।
गुरुणा दीक्षितोऽनेन शिक्षितोऽस्यमुनैव हि । निह्नुषे हेतुना केन गोशाल ! त्वं स एव हि ।।५१।।
अथ गोशालकः कोपात्तेजोलेश्यामनाहताम् । सर्वानुभूतयेऽमुञ्चद् दृग्ज्वालामिव दृग्विषः ।।५२।।
निर्दह्यमानः सर्वानुभूतिर्गोशाललेश्यया । शुभध्यानपरो मृत्वा सहस्रारे सुरोऽभवत् ।।५३।।
गोशालोऽपि हि तत्कालं स्वलेश्याशक्तिगर्वितः । निर्भर्त्सयितुमारेभे भगवन्तं पुनः पुनः ।।५४।।
स्वामिशिष्यः सुनक्षत्रस्तमथ स्वामिनिन्दकम् । गुरुभक्त्याऽनुशास्ति स्म भृशं सर्वानुभूतिवत् ।।५५।।
गोशालमुक्तया तेजोलेश्यया प्रज्वलत्तनुः । प्रभुं प्रदक्षिणीकृत्याऽऽदाय भूयो व्रतानि च ।।५६।।
आलोच्याथ प्रतिक्रम्य क्षमयित्वाऽखिलान्मुनीन् । सुनक्षत्रमुनिर्मृत्वाऽच्युतकल्पे सुरोऽभवत् ।।५७।। (युग्मम्)
जितकाशी च गोशालस्ततोऽतिपरुषाक्षरम् । समाक्रोशन्निजगदे स्वामिना करुणाजुषा ।।५८।।
दीक्षितः शिक्षितश्चासि श्रुतभाक् च मया कृतः । ममैवावर्णवादी त्वं कोऽयं ते धीविपर्ययः ? ।।५९।।
स्वामिना स्वयमित्युक्तो गोशालः कुपितो भृशम् । उपेत्य किञ्चिदमुचत्तेजोलेश्यां प्रभुं प्रति ।।६०।।
स्वामिन्यप्रभविष्णुः सा महावात्येव पर्वते । प्रभुं प्रदक्षिणीचक्रे भक्तिभागनुहारिणी ।।६१।।
संतापमात्रं स्वाम्यंगेऽभूत्तेजोलेश्यया तया । तीरकक्षोद्भवेनेव दावेन सरिदम्भसः ।।६२।।
अकार्याय प्रयुक्ता धिगनेनेति क्रुधेव सा । तेजोलेश्या निवृत्यांगे गोशालस्याविशद्बलात् ।।६३।।
तयाऽन्तर्दह्यमानोऽपि गोशालो धार्ष्ट्यमाश्रितः । भगवन्तं महावीरमभ्यधत्तैवमुद्धतः ।।६४।।
मत्तेजोलेश्यया ध्वस्तः षण्मासान्ते हि काश्यप ! । पित्तज्वरपराभूतश्छद्मस्थोऽपि विपत्स्यसे ।।६५।।
स्वाम्यथोवाच गोशाल ! मृषा ते वागहं यतः । अन्यानि षोडशाब्दानि विहरिष्यामि केवली ।।६६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वतेजोलेश्ययैव त्वं पुनः पित्तज्वरार्दितः । विपत्स्यसे सप्तदिनपर्यन्ते नात्र संशयः ।।६७।।
तेजोलेश्याक्लिश्यमानवपुष्को विलपन्नथ । भूमौ पपात गोशालः शालद्रुरिव वायुना ।।६८।।
गुर्ववज्ञाप्रकुपिता मुनयो गौतमादयः । एवं मर्माविधा वाचोच्चकैर्गोशालमूचिरे ।।६९।।
धर्माचार्यप्रातिकूल्यभाजां भो ! भवतीदृशम् । तेजोलेश्या क्व तव सा धर्माचार्ये नियोजिता ? ।।७०।।
सुचिरं विब्रुवाणोऽपि निघ्नन्नपि महामुनी । कृपयोपेक्षितो भर्त्रा स्वयमेव विपत्स्यसे ।।७१।।
व्यपत्स्यथाः पुराऽपि त्वं वैशिकायनलेश्यया । स्वलेश्यया शीतया त्वां नारक्षिष्यद्यदि प्रभुः ।।७२।।
शार्दूल इव गर्ताऽन्तः पतितस्तेषु साधुषु । निःकर्तुं सोऽक्षमस्तस्थावुद्वेल्लनपरः क्रुधा ।।७३।।
निःश्वसन् दीर्घमुष्णं च दंष्ट्रालोमानि चोत्खनन् । पादाभ्यां ताड्यन्नुर्वीं हतोऽस्मीति मुहुर्ब्रुवन् ।।७४।।
निष्क्रम्य स्वामिसदसो दस्युवद्वीक्षितो जनैः । हालाहलाकुम्भकार्या गोशालोऽगमदापणम् ।।७५।। (युग्मम्)
अथ स्वामी मुनीनूचे तेजो गोशालकेन यत् । अस्मद्वधाय प्रक्षिप्तं तस्येयं शक्तिरूर्जिता ।।७६।।
वत्साच्छकुत्समगधवंगमालवकोशलान् । पाटलाटवज्रिमालिमलयावाधकांगकान् ।।७७।।
काशीन् सुह्मोत्तरान् देशान् निर्दग्धुं षोडशेश्वरा । तेजोलेश्या गोशालस्य तपसोग्रेण साधिता ।।७८।।
ते विसिष्मियिरे सर्वे मुनयो गौतमादयः । सन्तः शक्तौ परस्यापि मात्सर्यं न हि बिभ्रति ।।७९।।
गोशालकोऽपि स्वेनैव दह्यमानोऽथ तेजसा । तापशान्त्यै पपौ मद्यं दधानो मद्यभाजनम् ।।८०।।
मदोन्मत्तो गायति स्म गोशालो नृत्यति स्म च । हालाहलायाः प्रणतिं प्राञ्जलिश्चाकरोन्मुहुः ।।८१।।
अंगरागीचकारांगे भाण्डार्थं मृदितां मृदम् । लुलोठ च गृहस्रोतोजले तच्चापिबन्मुहुः ।।८२।।
असंबद्धविरुद्धानि प्रजजल्प वचांसि च । शिष्यैः सशोकैः स उपचर्यमाणोऽत्यगाद्दिनम् ।।८३।।
गोशालोपासकस्तत्रायंपुलो धर्मजागरम् । पूर्वरात्रापररात्रे कुर्वन्नेवं व्यचिन्तयत् ।।८४।।
तृणगोपालिका किंसंस्थानेति न हि वेद्म्यहम् । गत्वा पृच्छामि गोशालं सर्वज्ञं गुरुमात्मनः ।।८५।।
एवं निश्चित्य गोसर्गेऽनर्ध्यभूषणभृद्ययौ । हालाहलागृहेऽपश्यद्गोशालं च तथा स्थितम् ।।८६।।
लज्जयाऽथापचक्राम द्रुतद्रुतमयंपुलः । गोशालशिष्यैः स्थविरैर्दृष्टश्च जगदे च सः ।।८७।।
अयंपुल ! निशायां ते पश्चिमायामजायत । तृणगोपालिकासंस्थाविषयः संशयः खलु ।।८८।।
विस्मितः सोऽप्युवाचैवमेवमेतन्महर्षयः । गोशालचेष्टितं गोप्तुं ते भूयस्तं बभाषिरे ।।८९।।
गायन्नृत्यन् पात्रपाणिरञ्जलिं च करोति यत् । निर्वाणप्राप्तिलिंगानि तदाख्याति गुरुस्तव ।।९०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यदेतत् पश्चिमं गेयं नृत्यमञ्जलिकर्म च । पानं मृदंगरागादि यदन्यदपि किंचन ।।९१।।
गोशालस्य चतुर्विंशस्यार्हतो मोक्षलक्ष्म तत् । गत्वाऽमुं पृच्छा सन्देहं सर्वज्ञो ह्येष ते गुरुः ।।९२।।
इत्युक्तस्तैरभिगन्तुं स प्रावर्तिष्ट तेऽपि हि । तस्याऽऽगमं संशयं च गोशालस्य पुरोऽवदन् ।।९३।।
तेऽन्यतो मद्यपात्रादि गोशालेन व्यमोचयन् । आसने चासयाञ्चक्रुस्तदा चाऽऽगादयंपुलः ।।९४।।
ततो निषण्णमग्रे तमूचे गोशालकोऽपि हि । तृणगोपालिका किंसंस्थानेति तव संशयः ।।९५।।
तृणगोपालिकां विद्धि वंशीमूलसमाकृतिम् । श्रुत्वेति मुदितः सद्योऽयंपुलः स्वाश्रयं ययौ ।।९६।।
अन्येद्युश्चेतनां लब्ध्वा ज्ञात्वाऽन्तसमयं निजम् । शिष्यानाहूय गोशालो व्याजहारेति सादरः ।।९७।।
मृतस्य मे वपुः स्नप्यं गन्धाम्भोभिर्विलेपनैः । सुगन्धिभिर्विलेप्यं चाऽऽमोच्यं चोत्कृष्टवाससा ।।९८।।
भूष्यं च भूषणैर्दिव्यैरारोप्यं तदनन्तरम् । सहस्रवाह्यां शिबिकां ततो निःसार्यमुत्सवात् ।।९९।।
अयमत्रावसर्पिण्यां चतुर्विंशो जिनेश्वरः । गोशालः प्रययौ मोक्षमित्युद्घोष्यं पुरेऽखिले ।।१००।।
ते तथा प्रत्यपद्यन्त गोशालोऽप्यह्नि सप्तमे । जातशुद्धाशयः पश्चात्तापादेवमचिन्तयत् ।।१०१।।
अहो! पापोऽहमर्हन्तं वीरं धर्मगुरुं निजम् । नितान्तमाशातितवांस्त्रिधाऽप्यत्यन्तदुर्मतिः ।।१०२।।
अभाणयं च सर्वज्ञमात्मानं सर्वतोऽपि हि । मृषोपदेशैः सत्याभैः सर्वं लोकं प्रतारयन् ।।१०३।।
धिङ्महर्षी मया दग्धौ गुरुगृह्यावुभौ च तौ । तेजोलेश्या स्वदाहायामुच्यत स्वामिने च धिक् ।।१०४।।
कृते दिनानां स्तोकानां किमकार्यं मया कृतम् । भूयिष्ठनरकावासविनिवासनिबन्धनम् ।।१०५।।
न केवलमयं स्वात्मा नरकायातिथीकृतः । किं त्वयं सकलो लोकोऽप्यसन्मार्गोपदेशतः ।।१०६।।
भवत्वियत्यपि गते लोको यातु पथैव हि । विमृश्यैवं समाहूय शिष्यानेवमथावदत् ।।१०७।।
भो ! भोः ! शृणुत सर्वेऽपि नाहमर्हन्न केवली । किं त्वस्मि मंखलिसुतो गोशालो वीरशिष्यकः ।।१०८।।
आश्रयाशो वह्निरिव प्रत्यनीको गुरोरहम् । मया दंभादियत्कालमात्मा लोकश्च वंचितः ।।१०९।।
छद्मस्थोऽहं मरिष्यामि दह्यमानः स्वतेजसा । वामांघ्रौ रज्जुभिर्बद्ध्वा कर्षणीयः पुरीह भोः ।।११०।।
निष्ठीवद्भिर्मम मुखे मां कर्षद्भिर्मृतश्ववत् । घोषणीयमिदं पुर्यां त्रिकशृंगाटकादिषु ।।१११।।
स एष मंखलिसुतो गोशालो दंभितप्रजः । मुनिघात्यजिनो दोषनिधानं गुरुतल्पगः ।।११२।।
जिनस्तु भगवान् वीरः सर्वज्ञः करुणानिधिः । हितोपदेष्टा न्यहनोष्ट गोशालस्तं मुधैव हि ।।११३।।
इत्यर्थं शपथं दत्त्वा व्यथया स व्यपद्यत । तच्छिष्याश्च कुलालौकोद्वाराणि पिदधुर्ह्रिया ।।११४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

श्रावस्तीमालिखंस्तत्र शिष्याः शपथमुक्तये । तथा गोशालमाकर्षन् कुर्वन्तो घोषणादिकम् ।।११५।।
ततो निष्क्रमयामासुस्तद्गोशालकलेवरम् । ऋद्ध्या महत्या तच्छिष्याश्चक्रुश्च ज्वलनातिथिम् ।।११६।।
[त्रिषष्ठि० पर्व-१० श्लोक-३५४ तः ४६९]

४. क्रोधध्याने श्रीउत्तराध्ययनबृहद्वृत्तिकथितः श्रीस्कन्दकाचार्यहन्तृपालकसम्प्रदायः ।

सावत्थीए नयरीए जियसत्तूराया, धारिणी देवी, तीसे पुत्तो खंदओ णाम कुमारो, तस्स भगिणी पुरंदरजसा, सा कुंभकारकडे नयरे दंडगी नाम राया तस्स दिन्ना, तस्स य दंडकिस्स रण्णो पालगो णाम मरुतो पुरोहितो । अन्नया सावत्थीए मुणिसुव्वयसामी तित्थयरो समोसरिओ, परिसा निग्गया, खंदतोऽवि निग्गतो, धम्मं सोच्चा सावगो जाओ । अन्नयां सो पालकमरुतो दूयत्ताए आगतो सावत्थिं नयरिं, अत्थाणिमज्झे साहूणं अवण्णं वयमाणो खंदएणं निप्पिट्ठपसिणवागरणो कतो, पतोसमावण्णो, तप्पभिइं चेव खंदगस्स छिद्दाणि चारपुरिसेहिं मग्गाविंतो विहरइ, ज्जाव खंदगो पंचजणसएहिं कुमारोलगएहिं सद्धिं मुणिसुव्वय सामिसगासे पव्वतितो, बहुसुतो जातो, ताणि चेव से पंच सयाणि सीसत्ताए अणुण्णायाणि । अन्नया खंदओ सामिमापुच्छइ-वच्चामि भगिणीसगासं, सामिणा भणियं-उवसग्गो मारणंतितो, भणइ-आराहगा विराहगा वा ? सामिणा भणियं-सव्वे आराहगा तुमं मोत्तुं, सो भणइ-लट्ठं, जदि एत्तिया आराहगा, गओ कुंभकारकडं, मरुएण जहिं उज्जाणे ठिओ तहिं आउहाणि णूमियाणि, राया वुग्गाहिओ-जहा एस कुमारो परीसहपराइतो एएण उवाएण तुमं मारित्ता रज्जं गिण्हिहित्ति, जदि ते विपच्चतो उज्जाणं पलोएहि, आउहाणि ओलइयाणि दिट्ठाणि, ते बंधिऊण तस्स चेव पुरोहियस्स समप्पिया, तेण सव्वे पुरिसजंतेण पीलिया, तेहिं सम्मं अहियासियं, तेसिं केवलणाणं उप्पण्णं सिद्धा य । खंदतोऽवि पासे धरिओ, लोहियचिरिक्काहिं भरिज्जंतो सव्वतो पच्छा जंते पीलितो णिदाणं काऊण अग्गिकुमारेसु उववण्णो । तंपि से रयहरणं रुहिरलित्तं पुरिसहत्थोत्ति काउं गिद्धेहिं पुरंदरजसाते पुरतो पाडियं, सावि तद्दिवसं अधितिं करेइ जहा साधू ण दीसंति, तं च णाए दिट्ठं, पञ्चभिन्नाओ य कंबलो, णिसिज्जातो छिण्णातो, ताए चेव दिण्णो, ताए नायं-जहा ते मारिया, ताए खिंसितो राया-पाव ! विणट्ठोऽसि, ताए चिंतियं-पव्वयामि, देवेहिं मुणिसुव्वयसगासं नीया, तेणवि देवेण णगरं दड्ढं सजणव्वयं, अज्जवि दंडगारण्णंति भण्णइ ।

४. क्रोधध्याने पुष्पमालायां नमुचिमन्त्री ।

कुरुजणवयमज्झगयं अत्थि पुरं हत्थिणाउरं नाम । ठाणट्ठाणनिवेसियसुवन्नरासीहिं जत्थ सया ।।१।।

अवगयपरमत्थाणवि बहुकणयगिरीण जायए संका ।
पुणरवि सा विणियत्तइ दाणावसरम्मि तव्विगमे।।२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बहुगयघडच्छलेणं साइसयमहीहरत्तविजयंतं । सेवंति जं अथद्धं कुलगिरिणो विहियबहुरूवा ।।३।।
सो पउमोत्तरराया तं पालइ जस्स सयलगुणकलिया । सावयधम्मम्मि दढा जाला नामेण वरभज्जा ।।४।।
सीहसुमिणपरिकहिओ विण्हुकुमारोत्ति ताण पढमसुओ । चउदससुमिणपिसुणिओ बीओ पुत्तो महापउमो ।।५।।
विण्हू तत्थ निरीहो इयरो उ समीहए तओ रन्ना । जुवरायत्ते ठविओ लहुओऽवि हु सो महापउमो ।।६।।
एत्तो उज्जेणीए सिरिमुणिसुव्वयजिणस्स वरसीसो । सुव्वयनामायरिओ समागओ कहवि विहरंतो ।।७।।
सिरिधम्मो नाम निवो वंदणहेउं समागओ तस्स । नमुई य नाम मंती तेण समं आगओ दुट्ठो ।।८।।
तेण वितंडावाओ आढत्तो उवसमप्पहाणीए । पडिणीओत्ति य कलिउं मोणेण ठिओ खणं सूरि ।।९।।
तेण भणिअं किमेसो आयरिओ जाणए बलीद्दो ? । गुरुपरिभवमसहंतो भणइ तओ खुड्डओ एक्को ।।१०।।
नियऽगुरुययाए सुयणं खलो महंतंपि गणइ असमत्थं । नियसहावसरिच्छं जेण जणो पेच्छइ परंपि ।।११।।
चिट्ठंतु ताव नीसेससत्थपारंगया इमे सूरी । जइ तुच्छ ! काइ सत्ती ता भणसु मएवि सह ताव ।।१२।।
अह आढत्तो भणिउं निरुत्तरो खुड्डएण सो विहिओ । ता साहूसु पउट्ठो विलक्खवयणो गओ सगिहं ।।१३।।
असमंजसाइं सुबहुं चिंतंतो उट्ठिऊण रयणीए । साहूण हणणहेउं सत्थं गहिउं गओ तत्थ ।।१४।।
सम्मदिट्ठीए देवयाए तो थंभिओ तहिं चेव । दिट्ठो पभायसमए सपउरलोएण नरवएणा ।।१५।।
तो आउट्ठो लोओ भत्तिं साहूण कुणइ सविसेसं । मुक्को नमुईवि य देवयाए लज्जाए नीहरिउं ।।१६।।
अवयारत्थं साहूण चिंतयंतो उवायलक्खाइं । गंतूण हत्थिणउरे ओलग्गइ सो महापउमं ।।१७।।
एसो राया जाओ काही मह वंछियंति बुद्धीए । मंतित्तं पडिवन्नो चिट्ठइ तस्सेव पासम्मि ।।१८।।
एत्तो य महापउमस्स संतियं भंजए सयलदेसं । सिंहबलो नाम निवो बलेण दुग्गस्स कोट्टस्स ।।१९।।
सो बंधिऊण गहिओ बुद्धीएँ नमुइणा तओ तुट्ठो । देइ वरं कुमरो से देज्जसु समयम्मि सो भणइ ।।२०।।
अह अन्नया करावइ जालादेवी रहं जिणाययणे । तीए सवक्की लच्छी उ कारए बंभरहमेत्तो ।।२१।।
बंभरहो नीहरिही पढमं लच्छीएँ पभणिओ राया । तं सोउं जालाऽवियं कुणइ पइण्णं इमं तत्तो ।।२२।।
गिण्हामि अणसणमहं जइ पढमं जिणरहो न नीहरइ । पउमुत्तरेण रन्ना तओ निरुद्धा रहा दोऽवि ।।२३।।
माऊणं अवमाणं तं मन्नंतो तओ महापउमो । नीहरिओ रयणीए एगागी अडविमणुपत्तो ।।२४।।
तत्थ य हिंडंतेणं पत्तेणं सिंधुनंदणे नयरे । परिणीयं कण्णायं महसेणनिवस्स सयमेगं ।।२५।।
वेगवईए विज्जाहरीए तत्तो य अवहरेऊणं । वेयड्ढम्मि नगवरे सूरोदयपुरवरे नेउं ।।२६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

खयरिंदइंदधणुणो सिरिकंताए सुया य जयचंदा । परिणाविओ तहिं चिय तीसे माउलयपुत्तेहिं ।।२७।।
विज्जाहरेहिं सद्धिं गंगाहरमहिहरेहिं संगामो । तव्वतियरम्मि जाओ तो जिणइ तहिं महापउमो ।।२८।।
तो चंपाउरिपहुणो जणमेजयराइणो सुया पवरा । मयणावलित्ति नामं परिणीया इत्थिरयणं सा ।।२९।।
इय कमसो संजाओ नवमो चक्की इमो महापउमो । पुव्वुत्तचक्किरिद्धीए परिगओ गयउरं पत्तो ।।३०।।
तो ठाविऊण रज्जे राया पउमुत्तरो महापउमं । पडिवज्जइ पव्वज्जं सिरिसुव्वयसूरिणो पासे ।।३१।।
पिउणा य बंधवेण य ठाविज्जंतोऽवि रायलच्छीए । संसारम्मि विरत्तो विण्हुकुमारोऽवि सह पिउणा ।।३२।।
पडिवज्जइ पव्वज्जं सिरिसुव्वयसूरिणो च्चिय सयासे । अह चक्कवट्टिभोए भुंजए सुइरं महापउमो ।।३३।।
तह जणणिकारिय रहो महाविभूईए भामिउं नयरे । कारावियाओ भरहे जिणभवणाणं च कोडीओ ।।३४।।
सेसावि नरिंदाई जिणिंदधम्मे पयट्टिया बहवे । जिणसासणम्मि विहिया समुण्णई बहुपयारेहिं ।।३५।।
पउमुत्तरोऽवि साहू परमपयं पाविउं विगयकम्मो । भुंजइ अणंतसोक्खं अजरो अमरो निहयदुक्खो ।।३६।।
विण्हुकुमारस्स पुणो नहगमणविउव्वियाइलद्धीओ । उप्पण्णा बहुयाओ तवप्पभावेण तो एसो ।।३७।।
मेरुव्व तुंगदेहो वच्चइ गयणम्मि पक्खिनाहो व्व । होइ सुहुमो गुरू वा पगामरूवी सुरिंदो व्व ।।३८।।
एत्तो वासारत्ते ते सुव्वयसूरिणो ठिया कहवि । हत्थिणउरम्मि नयरे तो कत्थइ नमुइणा दिट्ठा ।।३९।।
सरिऊण तओ वेरं पुव्ववरं पत्थिओ महापउमो । देह नमुईऽवि पभणइ वेयविहीए जइस्सामि ।।४०।।
जण्णमहं ता दिज्जउ कइवय दियहाइं देव ! मह रज्जं । तह चेव देइ चक्की सयमरोहं ठिओ गमइ ।।४१।।
नमुईवि जण्णवाडे बाहिं कवडेण दिक्खिओ जाओ । तस्स य वद्धावणए सह पासंडीहिं पगईओ ।।४२।।
मोत्तूण सेयभिक्खू सेसाओ समागयाओ तो नमुई । हक्कारिऊण सूरिं तं चिय उब्भाविउं दोसं ।।४३।।
पभणइ खुड्डा तुब्भे लोगव्ववहारबाहिरा थद्धा । छड्डेउं मह रज्जं ता सिग्घं वयह अन्नत्थ ।।४४।।
तो भणियं सूरीहिं लोयठिई विज्जए बहुपयारा । सावज्जाए तीसे तो नरवर ! मुणियभावाणं ।।४५।।
वज्जियसावज्जाणं विमुक्कनीसेसलोयतत्तीणं । किं चिंताए कज्जं साहूणं समियपावाणं ? ।।४६।।
तो नागया वयमिहं न उणो अम्हाण कोऽवि हु पओसो । तो कुविओ सो जंपइ किं बहुण भो पलत्तेणं ? ।।४७।।
सत्तदिणाणं उवरिं कंपि हु पव्वइयगं जइ नियेमि । तो मारेमि अवस्सं इय सोऊणं तओ सूरी ।।४८।।
उज्जाणे गंतूणं किं कायव्वंति पुच्छए साहू । तत्थेक्को भणइ मुणी भाया सिरिचक्कवट्टिस्स ।।४९।।
बहुवाससहस्साइं विहियतवो पत्तविविहलद्धीओ । अंगामंदरसेले विण्हुकुमारो मुणी अत्थी ।।५०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तस्स वयणेण नमुई मन्ने उवसमइ तो भणइ सूरी । साहु भणियं परं तं को आणेही मुणी एत्थ ।।५१।।
तो भणइ एगसाहू नहेण गमणंमि अत्थि मह सत्ती । आगमणंमि न विज्जइ तो भणिओ सूरिणा सोऽवि ।।५२।।
आणेस्सइ एत्थ तओ इय भणिए झत्ति सो मुणी गयणे । उप्पइओ दट्ठूण य खणेण तं चिंतए विण्हू ।।५३।।
गरुयं पवयणकज्जं वासारत्तेऽवि तेणिमो साहू । इह आगच्छइ तेणवि तो सव्वं साहियं तस्स ।।५४।।
तत्तो विण्हू तं गिण्हिऊण पत्तो खणेण नमइ गुरुं । सेसेऽवि मुणी सम्माणिऊण पत्तो नमुइपासे ।।५५।।
तं मोत्तूणं सेसेण पणमिओ सयलरायलोएण । उवविट्ठो कहिऊणं धम्मं तो महुरवयणेहिं ।।५६।।
भणिओ नमुई चिट्ठंतु साहुणो जाव वयइ घणसमणो । तेण भणियं किमेवं पुणरत्तं आलभणिएहिं ? ।।५७।।
भणियदिणाणं उवरिं जइ तुब्भं कंपि एत्थ पिच्छामि । ता तह करेमि जह से नामंपि हु निट्ठए लोए ।।५८।।

इय जह जह सो महुरं भणेइ तह तह चडेइ अहिअयरं ।
तत्तो कुविओ विण्हू पभणइ रे दुट्ठ ! सच्चमिणं।।५९।।

कडुएहिं चिय सिंभो व्व दुज्जणो उवसमं पवज्जेइ । पगईए च्चिय कुप्पइ सो दिज्जंतेहिं महुरेहिं ।।६०।।
निम्मलवयणेहिवि सज्जणाण पगइं न दुज्जणो मुयइ । न हि धोइओऽवि दुद्धेण निम्मलो होइ इंगालो ।।६१।।
जं च मुणीणं उवसमधणाण अइकक्कसं समायरसि । तत्थवि तुह पडिकूलो दिव्वो जं खीरजलहिम्मि ।।६२।।
अइमंथणाउ महुरेवि उट्ठियं किं न कालकूडविसं ? । ता किं बहुणा ? साहूण देसु ठाणं कमतिगम्मि ।।६३।।
तो नमुइणाऽवि भणियं होउ इमे किंतु कमतिगस्स बहिं । जइ तुब्भाणं पावेमि कंपि ता नूण मारेमि ।।६४।।
तो विण्हू कोवेणं महुघयसित्तो व्व पावओ जलिओ । कयवेउव्वियरूवो आढत्तो वड्ढिउं गयणे ।।६५।।
जोयणलक्खसरीरो खणेण पलयानलु व्व दुप्पिच्छो । संजाओ कसिणतणू भयंकरो सयलभुवणस्स ।।६६।।
कमदद्दरं कुणंतो गामागरनगरसागराइण्णं । कंपावइ महिवीढं ढालेइ गिरीण सिहराइं ।।६७।।
उच्छालइ जलनिहिणो आयंकं जणइ मणुयतिरियाणं । भवणवणजोइवेमाणियाण संजणइ संखोभं ।।६८।।
नमुईसिरम्मि पायं दाऊण रसायलम्मि पक्खित्तो । तो पुव्वावरजलहीसु चिट्ठए जा कमे ठविउं ।।६९।।
भुवणत्तयखोभाओ नाउं सक्केण तं मुणिं कुवियं । पट्ठवियाओ कलकंठियाओ तो अच्छराउ तहिं ।।७०।।
उवसमहेउं सवणेसु तस्स होऊण महुरकंठेणं । गायंतीओ एवं भणंति जह भो महाभाग ! ।।७१।।
सपरोभयसंतवओ कोवो तह सुचरियस्स निट्ठवओ । दुग्गइगममहपंथो पलिमंथो सयलसोक्खाणं ।।७२।।
तित्थयरा अन्नेवि हु महरिसिणो अतुलविक्कमजुआवि । विसहंति विहीणाणवि सव्वं परलोयभीरुमणा ।।७३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जह नेरइयतेरिच्छाइएसु इयरेसु विप्फुरइ कोवो । तह जह गुणगुरुएसुवि ता किंनु विवेयसामत्थं ? ।।७४।।
ता उवसमसु मुणीसर ! सुमरसु जिणभासियाइं वयणाइं । करुणाए देसु चित्तं कुणसु पसायं तिहुयणस्स ।।७५।।
इय एवमाइभणिएहिं ताण तह सयलसंघवयणेहिं । ससुरासुरलोएण य पारद्धे संतिकम्मंमि ।।७६।।
चक्किमि महापउमे य नायतव्वइयरे सपरिवारे । संभमकंपिरगत्ते नमिउं चलणेसु खामंते ।।७७।।

तो कहवि हु उवसंतो तप्पभिई तिविकमोत्ति स पसिद्धो ।
आलोइयपडिक्कंतो विहरइ सुद्धो जओ भणियं ।।७८।।

आयरिए गच्छम्मि य कुलगणसंघे य चेइयविणासे । आलोइयपडिक्कंतो सुद्धो जं निज्जरा विउला ।।७९।।
पावियकेवलनाणो विण्हुकुमारो कमेण तो सिद्धो । चक्कीवि महापउमो गहिऊण वयं गओ सिद्धिं ।।८०।।

४. क्रोधध्याने श्रीउत्तराध्ययनागमोक्तनिह्नवाधिकारात् शिवभूतिनामनिह्नवकथा ।

रथवीरपुराभिख्ये, पुरेऽभूद्दीपकाभिधम् । वनं तत्रार्यकृष्णाख्याः, सूरयः समवासरन् ।।१।।
इतश्च शिवभूत्याख्यः, क्षत्रियः सात्त्विकाग्रणीः । सहस्रयोधीतत्रत्यं, नृपं सेवितुमाश्रयत् ।।२।।
नृपो दध्यौ परीक्षेऽहमस्य धैर्यादिकान् गुणान् । निर्गुणो ह्यनुजीवी स्यात्स्वामिनो नो सुखाकरः ।।३।।
परीक्षापूर्वमेवास्मै, प्रदास्ये वृत्तिमप्यहम् । निर्गुणे हि जने दत्तं , स्याद्भस्मनि हुतोपमम् ।।४।।
ध्यात्वेति भूपतिः श्यामचतुर्दश्यां निशामुखे । पशुमेकं वारुणीं च, तस्य दत्वैवमब्रवीत् ।।५।।
श्मशानस्थे मातृदेवीगृहे गत्वा त्वमेककः । पशुमद्य बलिं देहि, कृत्यमेतद्विधेहि नः ।।६।।
शिवभूतिस्तदादाय, धीरः प्रेतवने ययौ । निहत्य छगलं मातृदेवीनां च बलिं ददौ ।।७।।
क्षुधितोऽस्मीति तत्रैवाऽऽरेभे तन्मांसभक्षणम् । श्मशानमातृदेवीभ्यो, बिभयामास न त्वसौ ।।८।।
तदा च तद्भापनाय, भूपेन प्रहिता नराः । तत्रागत्य शिवाशब्दान्, भैरवान् परितो व्यधुः ।।९।।
बभाज तैरपि क्षोभं, तन्मनो न मनागपि । न चाङ्गेऽप्यभवत्तस्य, रोमोद्भेदो भयोद्भवः ।।१०।।
तत्स्वरूपं ततो राज्ञे, प्रोचुस्ते राजपूरुषाः । सोऽपि स्वस्थतया भुक्त्वा, जगाम क्ष्मापसन्निधौ ।।११।।
ततोऽवबूध्य तं शूरं, बद्धीं वृत्तिं ददौ नृपः । शिवभूतिस्ततो भूपं, सिषेवे तमहर्निशम् ।।१२।।
अन्यदा स नृपः सेनापत्यादीनखिलान् भटान् । इत्यादिदेश मथुरानगरी गृह्यतां द्रुतम् ।।१३।।
ततः सर्वाभिसारेण, चेलुस्ते मथुरां प्रति । पुराद्बहिश्च गत्वेति, परस्परमचिन्तयन् ।।१४।।
वयं हि मथुरां जेतुं, प्रस्थिताः पार्थिवाज्ञया । द्वे चात्र मथुरापुर्यौ, विद्येते दक्षिणोत्तरे ।।१५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद्गोचरो विशेषश्च, नोक्तः कोऽपि महीभृता । चण्डस्वभावो भूपश्च, न प्रष्टुं शक्यते पुनः ।।१६।।
तदस्माभिः क्व गन्तव्यं, ध्यायन्त इति तेऽखिलाः । स्थातुं गन्तुं चासमर्था, यावन्मार्गेऽवतस्थिरे ।।१७।।
शिवभूतिस्तावदागात्तत्र तांश्चैवमब्रीवत् । किं स्थिता यूयमशुभनिमित्तस्खलिता इव ।।१८।।
यथास्थितेऽथ तैरुक्ते, सोऽवादीच्चिन्तया कृतम् । सममेव ग्रहीष्यामो, वयं तन्नगरीद्वयम् ।।१९।।
ते प्रोचुरस्याः सेनायाः, विभागयुगले कृते । नाऽऽदातुं शक्यतेऽस्माभिरेकापि नगरी सखे ! ।।२०।।
भावी भूयस्तरः काल, एकस्या अपि निर्जये । एकां जित्वा तदन्यस्या, निर्जयोऽप्यऽतिदुष्करः ।।२१।।
शिवभूतिस्ततोऽवादीद्यद्येवं तर्हि भो भटाः ! । तयोर्मध्ये दुर्जया या, सा सद्यो मम दीयताम् ।।२२।।
द्वयोर्मध्ये दविष्ठा या, तां व्रजेत्युदितेऽथ तैः । सोऽपाच्यमथुरादेशं, ययौ बुद्धिबलोर्जितः ।।२३।।
तस्य देशस्य च प्रान्त्यान्, ग्रामादीन् साधयन् स्वयम् । दुर्गान् जग्राह निखिलान्, क्रमाच्च नगरीमपि ।।२४।।
वशीकृत्याथ तद्राज्यं, शिवभूतिर्महामतिः । गत्वा च भूभुजोऽभ्यर्णे, सर्वं व्यतिकरं जगौ ।।२५।।
ततः प्रीतोऽवदद्भूपः, कामितं ते ददामि किम् ? किञ्चिद्विमृश्य सोऽप्यूचे, स्वातन्त्र्यं देहि मे प्रभो ! ।।२६।।
यथा हि मां मनोभीष्टां, क्रीडां कुर्वन्तमुच्चकैः । यत्तद्वा वस्तु गृह्णन्तं, न कोऽपि प्रतिषेधयेत् । २७।।
एवमस्त्विति भूपोऽपि, सत्यसन्धोऽभ्यधात्ततः । सोऽपि नानाविधाः क्रीडाः, कुर्वंस्तत्राऽभ्रमत्पुरे ।।२८।।
द्यूतकारैः समं रेमे, स कदाचिद्दिवानिशम् । कदाचित्तु सुरां पीत्वा, क्षीबः क्षीबैः सहारमत् ।।२९।।
कदाचित्तु सिषेवेऽसौ, सुन्दरं गणिकागणम् । कदाचित्तु जलक्रीडां, चकार जलहस्तिवत् ।।३०।।
विजहार कदाचित्तु, कानने नन्दनोपमे । कुर्वन् पुष्पोच्चयक्रीडां, वृतो विटजनैर्घनैः ।।३१।।
भ्रमन्नेवं स स्वसौधे, निशीथेऽप्याऽऽययौ नवा । उल्लङ्घते हि मर्यादां, प्रायो वीतभयो जनः ।।३२।।
यावच्च स गृहे नागात्तावत्तस्य वशास्वयम् । नाश्नाति स्म न चाशेत, पालयन्ती सतीव्रतम् ।।३३।।
नित्यं क्षुधाजागराभ्यां, साऽथ खिन्ना मनस्विनी । अन्यदा तस्य जननीमिति स्माह सगद्गदम् ।।३४।।
पुत्रो युष्माकमायाति, निशीथे प्रत्यहं गृहे । यावदागमनं चाहं, न भुञ्जे न शयेऽन्वहम् ।।३५।।
नित्यं क्षुज्जागराभ्यां तत्पीडा मे जायते भृशम् । तत्किङ्करोम्यहं मातस्त्वदादेशवशंवदा ।।३६।।
श्वश्रूः शशंस सुभगे !, स्वपिहि त्वं यथासुखम् । अद्याहमेव जागर्मि, तयेत्युक्ताऽस्वपीद्वधूः ।।३७।।
गृहद्वारं पिधायास्थात्तस्य माता तु जाग्रती । सोऽथाऽऽगतोऽवदत्सद्यो, द्वारमुद्घाट्यतामिति ।।३८।।
माता प्रोचेऽधुना यत्र, द्वारमुद्घाटितं भवेत् । तत्र प्रयाहि न ह्यत्र, द्वारमुद्घाट्यतेऽधुना ।।३९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदाकर्ण्याऽखर्वगर्वः, शिवभूतिरचिन्तयत् । मात्राऽपमानितोऽद्याऽहं, तद्याम्यन्यत्र कुत्रचित् ।।४०।।
यतः-"स्थानस्थादपमानेऽपि, देहिनस्तद्वरं रजः । पादाहतं यदुत्थाय, मूर्द्धानमधिरोहति ।।४१।।"
विमृश्येति निजाद्गेहाद्व्याघुट्य नगरे भ्रमन् । दैवादुद्घाटितद्वारं, साधूपाश्रयमैक्षत ।।४२।।
ततस्तत्र प्रविश्यार्यकृष्णाचार्यान् प्रणम्य तान् । मां प्रव्राजयतेत्यूचे, ते तु प्राव्राजयन्न तम् ।।४३।।
स्वयमेव ततस्तेन, लुञ्चिते, स्वीयमस्तके । गुरवो ददिरे तस्मै, लिङ्गं धर्मध्वजादिकम् ।।४४।।
तमुपात्तव्रतं ज्ञात्वा, प्रातस्तत्राऽऽययौ नृपः । मामनापृच्छ्य किमिदं, त्वया कृतमिति ब्रुवन् ? ।।४५।।
स प्रोचे पृष्टमेवैतत्स्वातन्त्र्यप्रार्थिना मया । ततो नृपस्तं नत्वाऽगाद्विमनास्तद्वियोगतः ।।४६।।
बहिर्विहृत्य तत्राऽऽगुः, सूरयोऽप्यऽन्यदा पुनः । तदा शिवं नृपः स्नेहादाहूय स्वगृहेऽनयत् ।।४७।।
अनीच्छतोऽपि तस्याऽदाद्भूधवो रत्नकम्बलम् । तमादायागतं सूरिः, शिवभूतिं तदेत्यवक् ।।४८।।
किमयं भवता वत्स !, जगृहे रत्नकम्बलः । न हि नो बहुमूल्यस्य, वस्त्रादेर्ग्रहणं मतम् ।।४९।।
इत्युक्तोऽपि स सूरीन्द्रैस्तं न तत्याज मूर्च्छया । किन्तूपधौ गोपयित्वा, ररक्ष छन्नमन्वहम् ।।५०।।
अस्य मूर्च्छानिदानेन, किमनेनेति सूरयः । तस्मिन् क्वापि गते रत्नकम्बलं तमकर्षयन् ।।५१।।
विधाय तस्य शकलान्निषद्यायै तपस्विनाम् । आर्पयंस्तच्च विज्ञाय, शिवभूतिरदूयत ।।५२।।
कृतावहित्थस्तस्थौ च, गुरोश्छिद्राणि मार्गयन् । अन्यदा वर्णयंश्चैवं, सूरयो जिनकल्पिकान् ।।५३।।
भवन्ति द्विविधास्तावज्जिनकल्पिकसाधवः । तत्रै के भुञ्जते पाणावन्ये त्वश्नन्ति पात्रके ।।५४।।
तेऽपि प्रत्येकमुदिता, द्विविधा जिनपुङ्गवैः । तत्र वस्त्रधरा एकेऽन्ये तु चीवरवर्जिताः ।।५५।।
श्रुत्वेत्यादि शिवोऽवोचज्जिनकल्पोऽधुना कुतः । विधीयते न निर्ग्रन्थैर्निष्परिग्रहतार्थिभिः ? ।।५६।।
सूरिर्जगाद व्युच्छिन्नो, जिनकल्पो हि भारते । श्रीवीरस्वामिपौत्रेण, श्रीजम्बूस्वामिना समम् ।।५७।।
सोऽवादीदल्पसत्त्वानां, व्युच्छिन्नोऽसौ न मादृशाम् । मादृशो हि महासत्त्वः, कर्तुमीष्टेऽधुनाप्यमुम् ।।५८।।
मोक्षार्थिना हि सकलस्त्याज्य एव परिग्रहः । वस्त्रपात्रादिकमपि, तत्त्यक्ष्यामि परिग्रहम् ।।५९।।
सूरयः प्रोचिरे वत्स !, वस्त्रपात्रादिकं ह्यदः । धर्मोपकरणं तेन, न परिग्रह उच्यते ।।६०।।
तद्रक्षणे च नो कश्चिद्दोषो मोक्षार्थिना भवेत् । लोभादेव हि मोक्षस्य, विघ्नः स्यान्न तु चीवरात् ।।६१।।
प्रयोगश्चात्र वस्त्रादि, न दोषाय तपस्विनाम् । धर्मोपष्टम्भदायित्वात्, शुद्धाहारादिवत्स्फुटम् ।।६२।।
न च हेतुरसिद्धोऽयमिति वाच्यं त्वया यतः । धर्मोपष्टम्भदायित्वं, तस्याऽध्यक्षेण दृश्यते ।।६३।।
तथा हि-स्थानोपवेशनस्वापनिक्षेपग्रहणादिषु । जन्तुप्रमार्जनार्थं हि, रजोहरणमिष्यते ।।६४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सम्पातिमादिसत्त्वानां, रक्षायै मुखवस्त्रिकाम् । भक्तपानस्थजन्तूनां, परीक्षायै च पात्रकम् ।।६५।।
सम्यक्त्वज्ञानचारित्रतपासाधनहेतवे । चीवराणि च कल्पादीन्यङ्गीकुर्वन्ति साधवः ।।६६।।(युग्मम्)
वस्त्रैर्विना तु शीतोष्णदंशादिभिरुपद्रुतः । अपध्यानान्मुनिर्जातु, सम्यक्त्वादेः स्खलेदपि ।।६७।।
धर्मोपकरणस्यैवं, धर्मोपष्टम्भदायिता । सुनिश्चितेति व्रतिनां, तदादानं न दुष्यति ।।६८।।
विनोपकरणं यस्तु, जीवादीस्त्रातुमिश्वरः । जिनेन्द्रवत्तस्य दोषः, स्यात्तदग्रहणेऽपि न ।।६९।।
स चाद्यसंहननवानेव स्यान्नाऽपरः पुनः । तच्च संहननं कस्याऽप्यधुना नास्ति भारते ।।७०।।
युक्त्येत्यादिकयोक्तोऽपि, शिवोऽत्यक्तकदाग्रहः । हित्वा वस्त्रादिकं नग्नो, निरगान्नगराद्बहिः ।।७१।।

[उत्तरा० निह्नवधिकार० श्लोक-३ तः ७३]

५. मानध्याने श्रीउपदेशमालाहेयोपादेयावृत्तिव्यावर्णितबाहुबलीकथानकः ।

भरते चक्रवर्तिनि निजाज्ञाग्राहणोद्यते तत्कनिष्ठभ्रातरो विहाय राज्यानि ऋषभदेवान्तिके प्राव्राजिषुः। समुत्पन्नानि च सर्वेषां केवलज्ञानानि । बाहुबली पुनस्तद्भ्रातैव कथमहमेतद्भ्रयादाज्ञां प्रव्रज्यां वा करिष्यामीत्यमर्षादभ्युत्थितः, संलग्नं द्वयोरपि युद्धं, दृष्टिवाग्बाहुमुष्टिदण्डप्रहारयुद्धेषु निर्जितो भरतः, चिन्तितमनेन किमयं चक्रवर्तीति ? अत्रान्तरेऽर्पितं देवतया चक्रम् । गृहीतचक्रो दृष्टो बाहुबलिना चिन्तितमनेन चूर्णयामि सचक्रमेनन् अथवा किमस्य गतमर्यादाजीवितस्य मारणेन ! अहो दुरन्ता विषयाः । यदासक्ता न कुर्वन्ति योग्यायोग्यविचारम् । यदुक्तम्-

न मातरं न पितरं, न स्वसारं न सोदरं, । गुणैः सम्पश्यति तथा, विषयान् विषयी यथा ।।१।।

इति सञ्जातवैराग्येण तेन निःसृष्टो भुवि दण्डः, कृतः पञ्चमुष्टिको लोचः, अर्पितं देवतया रजोहरणादि, प्रपन्नः प्रव्रज्यां, इति तदवलोक्य लज्जितः स्वकर्मणा भरतः प्रसाद्यानेकविधं वन्दित्वा गतः स्वस्थानम् । बाहुबली पुनः कथमहं छद्मस्थतया केवलिनो लघुभ्रातॄन् वन्दिष्ये ? इत्यभिप्रायात्स्थितस्तत्रैव कायोत्सर्गेण तिष्ठतो गतं वर्षं, शीतवातातपैर्दवदग्धस्थाणुकल्पं कृतं शरीरकं, प्रसरिताः समन्ततो वल्लर्यः, प्ररूढा दर्भशूच्यः, समुद्गताश्चरणयोर्वाल्मीकाः, प्रसूताः कूर्चादौ शकुनय इति । भगवता तद्भगिन्यौ ब्राह्मीसुन्दर्यौ 'भ्रातर ! अवतर हस्तिन' इति वक्तव्यं गत्वा युवाभ्यामित्युपदिश्य तत्पार्श्वं प्रहिते । गत्वाभिहितं ताभ्यां, चिन्तितमनेन । कुतो मुक्तसङ्गस्य हस्ती ! आ ! ज्ञातं ! मान इति । धिग् मा दुष्टचित्तकं ! वन्द्यास्ते भगवन्तो, व्रजामि वन्दितुं, इत्युत्पादितं चरणेन सह केवलज्ञानमिति । यदि गर्वं नाकरिष्यत्त् तदादित एवोत्पाटयिष्यत् । अतो न मदेन धर्मो भवतीति स्थितम् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

५. मानध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रान्तर्गतश्रीविश्वभूतिकथाश्लोकानि ।

ब्रह्मलोकात्परिच्युत्य स बभ्राम बहून् भवान् । भवो ह्यनन्तीभवति स्वकर्मपरिणामतः ।।१।।
इतश्चाभूद्राजगृहे विश्वनन्दी महीपतिः । पत्न्यां प्रियंगौ विशाखनन्दी तस्याभवत्सुतः ।।२।।
विशाखभूतिर्युवराड् राज्ञस्तस्यानुजोऽभवत् । युवराजस्य तस्याभूद्धारिणी नामतः प्रिया ।।३।।
मरीचिजीवः प्राग्जन्मोपार्जितैः शुभकर्मभिः । विशाखभूतेर्धारिण्यां विश्वभूतिः सुतोऽभवत् ।।४।।
उद्यौवनो विश्वभूतिर्वने पुष्पकरण्डके । रेमे सान्तः पुरो देवकुमार इव नन्दने ।।५।।
विशाखनन्दी क्रीडेच्छू राट्पुत्रोऽस्थात्तु तद्बहिः । पुष्पाद्यर्थं गता दास्यो ददृशुस्तौ तथास्थितौ ।।६।।
ताभ्यो ज्ञात्वा प्रियंगुस्तत् कोपौकः कुपिता ययौ । तदीप्सितार्थं राजापि यात्राभेरीमवादयत् ।।७।।
उद्वृत्तः पुरुषसिंहः सामन्तस्तज्जयाय तत् । यास्यामीति सभामध्ये मायया चावदन्नृपः ।।८।।
तच्च श्रुत्वा विश्वभूतिर्ऋजुरेत्य वनात्ततः । भक्त्या निवार्य राजानं प्रयाणमकरोत् स्वयम् ।।९।।
गतश्च पुरुषसिंहं दृष्ट्वाऽऽजावर्तिनं पुनः । ववले तत्र च ययौ वने पुष्पकरण्डके ।।१०।।
विशाखनन्दी मध्येऽस्तीत्युक्तो द्वाःस्थेन तत्र सः । अचिन्तयन्मायया‌ऽहं कृष्टः पुष्पकरण्डकात् ।।११।।
क्रुद्धः कपित्थं मुष्ट्याहंस्तत्फलैः पतितैर्भुवम् । छादितां दर्शयन् सोऽथ जगाद द्वारपालकम् ।।१२।।
पातयामि शिरांस्येवं सर्वेषां भवतां पुनः । ज्यायसी ज्यायसि ताते न चेद्भक्तिर्भवेन्मम ।।१३।।
भोगैरीदृग्वञ्चनाद्यैर्ममालमिति स ब्रुवन् । संभूतिमुनिपादान्ते गत्वा व्रतमुपाददे ।।१४।।
तं च प्रव्रजितं श्रुत्वा राजा सावरजोऽप्यगात् । नत्वा च क्षमयित्वा च राज्यायार्थयते स्म च ।।१५।।
विश्वभूतिमनिच्छन्तं ज्ञात्वा भूपोऽगमद् गृहम् । ततो व्यहार्षीदन्यत्र स पुनर्गुरुणा सह ।।१६।।
स गुर्वनुज्ञयैकाकिविहारेण तपः कृशः । विहरन्नेकदागच्छन्नगरीं मथुराभिधाम् ।।१७।।
तदा विशाखनन्द्यागादुद्वोढुं तन्नृपात्मजाम् । विश्वभूतिश्च मासान्ते पारणायाविशत्पुरीम् ।।१८।।
विशाखनन्दिनः सोऽथ शिबिराभ्यर्णमागतः । विश्वभूतिः कुमारोऽसावित्यदर्श्यत पूरुषैः ।।१९।।
विशाखनन्दी तं सद्यः प्रेक्ष्य द्विषमिवाकुपत् । गवैकया विश्वभूतिः पर्यस्तश्च तदाऽपतत् ।।२०।।
कपित्थपातनं स्थाम क्व ते चेत्यहसच्च सः । धृत्वा गां शृङ्गयोर्विश्वभूतिश्चाभ्रमयत्क्रुधा ।।२१।।
भूयिष्ठवीर्यो भूयासं मृत्यवेऽस्य भवान्तरे । अनेन तपसोग्रेण निदानमिति सोऽकरोत् ।।२२।।
संपूर्य कोटिवर्षायुरनालोच्य च तन्मृतः । विश्वभूतिर्महाशुक्रे प्रकृष्टायुः सुरोऽभवत् ।।२३।।

[त्रिषष्टि० १० पर्व० श्लोक० ८५ त : १०७]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

५. मानध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रान्तर्गतसुभूमचक्रवर्त्तिपरशुरामाख्यानकः ।

अरतीर्थकृतस्तीर्थे सुभूमस्याथ चक्रिणः । अष्टमस्य क्रमायातं चरितं कीर्तयिष्यते ।।१।।
इहैव भरतक्षेत्रे विशालनगरेऽभवत् । भूपालो नाम भूपालः पालयन् क्षत्रियव्रतम् ।।२।।
सोऽन्यदैकत्र संग्रामे बहुभिः परिपन्थिभिः । एकीभूय पराजिग्ये वृन्दं हि बलवत्तरम् ।।३।।
स वैरिभिः पराभूतोऽपमानमलिनाननः । संभूतमुनिपादान्ते परिव्रज्यामुपाददे ।।४।।
प्रभुत्वभोगविषयं निदानं तपसोऽथ सः । कृत्वावसानं चासाद्य महाशुक्रे सुरोऽभवत् ।।५।।
इतश्चर्षभनाथस्य कुरुरित्यभवत् सुतः । यस्य नाम्ना कुरुदेशो हस्तिनाम्ना च तत्सुतः ।।६।।
यन्नाम्ना हास्तिनपुरं तीर्थकृच्चक्रिजन्मभूः । तद्वंश्योऽनंतवीर्योऽभूत्तत्र राजा महाभुजः ।।७।।
इतश्च भरतक्षेत्रे वसंतपुरपत्तने । उच्छिन्नवंश एकोऽभूदग्रिको नाम दारकः ।।८।।
सोऽन्यदा चलितस्तस्मात् स्थानाद्देशान्तरं प्रति । सार्थाद्धीनः परिभ्राम्यन्नगमत्तापसाश्रमम् ।।९।।
तमग्निं तनयत्वेनाग्रहीत् कुलपतिर्जनः । जमदग्निरिति ख्यातिं स लोकेषु ततोऽगमत् ।।१०।।
तप्यमानस्तपस्तीव्रं प्रत्यक्ष इव पावकः । तेजसा दुःसहेनासौ पप्रथे पृथिवीतले ।।११।।
तदा च श्राद्धः प्राग्जन्मनाम्ना वैश्वानरः सुरः । धन्वंतरिश्च तापसभक्तो व्यवदतामिति ।।१२।।
एक आहार्हतां धर्मः प्रमाणमितरः पुनः । तापसानां विवादेऽस्मिन् व्यधातामिति निर्णयम् ।।१३।।
आर्हतेषु जघन्यो यः प्रकृष्टस्तापसेषु यः । परीक्षणीयावावाभ्यां को गुणैरतिरिच्यते ।।१४।।
तदानीं मिथिलापुर्या नवधर्मपरिष्कृतः । श्रीमान् पद्मरथो नाम प्रस्थितः पृथिवीतले ।।१५।।
दीक्षां स वासुपूज्यान्ते ग्रहीतुं भावतो यतिः । गच्छंश्चंपापुरीं ताभ्यां देवाभ्यां ददृशे पथि ।।१६।।
परीक्षाकांक्षया ताभ्यां पानान्ने ढौकिते नृपः । तृषितः क्षुधितोऽप्यौज्झद्धीराः सत्त्वाच्चलन्ति न ।।१७।।
क्रकचैरिव चक्राते क्रूरैः कर्करकंटकैः । पीडां देवौ नृदेवस्य मृदुनोः पादपद्मयोः ।।१८।।
पादाभ्यां प्रक्षरद्रक्तधाराभ्यां तादृशेऽध्वनि । तूलिकातलवच्चारु संचचार तथापि सः ।।१९।।
निर्ममे गीतनृत्तादि ताभ्यां क्षोभाय भूपतेः । तन्मोघमभवत्तत्र दिव्यास्त्रमिव गोत्रजे ।।२०।।
तौ सिद्धपुत्ररूपेण पुरोभूयेदमूचतुः । तवाद्यापि महाभाग महदायुर्युवासि च ।।२१।।
स्वच्छन्दं भुंक्ष्व तद्भोगान् का धीर्यद्यौवने तपः । निशीथकृत्यं कः प्रातः कुर्यादुद्योगवानपि ।।२२।।
यौवने तदतिक्रान्ते देहदौर्बल्यकारणम् । गृह्णीयास्त्वं तपस्तात द्वितीयमिव वार्धकम् ।।२३।।
राजोचे यदि बह्वायुर्बहुपुण्यं भविष्यति । जलमानेन नलिनीनालं हि परिवर्धते ।।२४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लोलेन्द्रिये यौवने हि यत्तपस्तत्तपो ननु । दारुणास्त्रे रणे यो हि शूरः शूरः स उच्यते ।।२५।।
तस्मिन्नचलिते सत्त्वात् साधु साध्विति वादिनौ । तौ गतौ तापसोत्कृष्टं जमदग्निं परीक्षितुम् ।।२६।।
न्यग्रोधमिव विस्तारिजटासंस्पृष्टभूतलम् । वल्मीकाकीर्णपादान्तं दान्तं तौ तमपश्यताम् ।।२७।।
तस्य श्मश्रुलताजाले नीडं निर्माय मायया । तदैव देवौ चटकमिथुनीभूय तस्थतुः ।।२८।।
चटकश्चटकामूचे यास्यामि हिमवद्गिरौ । अन्यासक्तो नेष्यसि त्वमिति तं नाप्यमंस्त सा ।।२९।।
गोघातपातकेनाहं गृह्ये नायामि चेत्प्रिये । इत्युक्तशपथं भूयश्चटकं चटकाब्रवीत् ।।३०।।
ऋषेरस्यैनसा गृह्ये शपेथा इति चेत् प्रिय । विसृजामि तदैव त्वां पंथानः सन्तु ते शिवाः ।।३१।।
इत्याकर्ण्य वचः क्रुद्धो जमदग्निमुनिस्ततः । उभाभ्यामपि हस्ताभ्यामुभौ जग्राह पक्षिणौ ।।३२।।
आचचक्षे ततः सोऽपि कुर्वाणे दुष्करं तपः । उष्णरश्माविव ध्वांतमाः पापं मयि कीदृशम् ।।३३।।
अर्थर्षिं चटकोवाच मा कुपस्ते मुधा तपः । अपुत्रस्य गतिर्नास्तीत्यश्रौषीस्त्वं न किं श्रुतिम् ।।३४।।
तथेति मन्यमानस्तु मुनिरेवमचिन्तयत् । ममाकलत्रपुत्रस्य प्रवाहे सूत्रितं तपः ।।३५।।
तं दृष्ट्वा क्षुभितं ध्यायन् भ्रमितस्तापसैरिति । जज्ञे धन्वन्तरिः श्राद्धः प्रत्येति प्रत्ययान्न कः ।।३६।।
बभूवतुरदृश्यौ च तावपि त्रिदशौ तदा । जमदग्निश्च संप्राप पुरं नेमिककोष्टकम् ।।३७।।
जितशत्रुं महीपालं तत्र भूयिष्ठकन्यकम् । स प्रेप्सुः कन्यकामेकां गौरीं हर इवागमत् ।।३८।।
कृत्वाभ्युत्थानमुर्वीशः प्रांजलिस्तमभाषत । किमर्थमागता यूयं ब्रूत किं करवाण्यहम् ।।३९।।
कन्यार्थमागतोऽस्मीति मुनिनोक्तेऽब्रवीन्नृपः । मध्ये शतस्य कन्यानां त्वां येच्छति गृहाण ताम् ।।४०।।
स कन्यान्तः पुरे गत्वा जगाद नृपकन्यकाः । धर्मपत्नी मम काचिद्भवतीभ्यो भवत्विति ।।४१।।
जटिलः पलितः क्षामो भिक्षाजीवी वदन्निदम् । न लज्जसे त्वमिति ताः कृतथृत्कारमूचिरे ।।४२।।
समीरण इव क्रुद्धो जमदग्निर्मुनिस्ततः । अधिज्येष्वासयष्ट्याभाः कन्याः कुब्जीचकार ताः ।।४३।।
अथांगणे रेणुपुंजै रममाणां नृपात्मजाम् । एकामालोकयामास रेणुकेत्यब्रवीच्च ताम् ।।४४।।
स तस्या इच्छसीत्युक्त्वा मातुलिंगमदर्शयत् । तया प्रसारितः पाणिः पाणिग्रहणसूचकः ।।४५।।
तां मुनिः परिजग्राह रोरो धनमिवोरसा । सार्धं गवादिभिस्तस्य ददौ च विधिवन्नृपः ।।४६।।
स श्यालीः स्नेहसंबंधादेकोनं कन्यकाशतम् । सज्जीचक्रे तपःशक्त्या धिङ्मूढानां तपोव्ययः ।।४७।।
नीत्वाश्रमपदं तां च सुमुग्धमधुराकृतिम् । हरिणीमिव लोलाक्षीं प्रेम्णा मुनिरवर्धयत् ।।४८।।
अंगुलीभिर्गणयतो दिनान्यस्य तपस्विनः । यौवनं चारुकंदर्पलीलावनमवाप सा ।।४९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

साक्षीकृत्य ज्वलदग्निं जमदग्निमुनिस्ततः । यथावदुपयेमे तां भूतेश इव पार्वतीम् ।।५०।।
ऋतुकाले स ऊचे तां चरुं ते साधयाम्यहम् । यथा ब्राह्मणमूर्धन्यो धन्य उत्पद्यते सुतः ।।५१।।
सोवाच हास्तिनपुरेऽनंतवीर्यस्य भूपतेः । पत्न्यस्ति मत्स्वसा तस्यै चरुः क्षात्रोऽपि साध्यताम् ।।५२।।
ब्राह्मं सधर्मचारिण्यै क्षात्रं तज्जामयेऽपरम् । स चरुं साधयामास पुत्रीयमुपजीवितुम् ।।५३।।
साचिन्तयदहं तावदभूवमटवी मृगी । माभून्मादृक् सुतोऽपीति क्षात्रं चरुमभक्षयत् ।।५४।।
सादाद्ब्राह्मं चरुं स्वस्रे जातौ च तनयौ तयोः । तत्र रामो रेणुकायाः कृतवीर्यश्च तत्स्वसुः ।।५५।।
विद्याधरोऽन्यदा तत्र कोऽप्यागादतिसारकी । विद्या तस्यातिसारार्त्या विस्मृताकाशगामिनी ।।५६।।
रामेण प्रतिचरितो भेषजाद्यैः स्वबन्धुवत् । रामाय सेवमानाय विद्यां पारशवीं ददौ ।।५७।।
मध्येशरवणं गत्वा तां च विद्यामसाधयत् । रामः परशुरामोऽभूत्ततः प्रभृति विश्रुतः ।।५८।।
अन्येद्युः पतिमापृच्छय रेणुकोत्कंठिता स्वसुः । जगाम हास्तिनपुरे प्रेम्णो दूरे न किंचन ।।५९।।
श्यालीति लालयन् लोललोचनां तत्र रेणुकाम् । अनंतवीर्यो रमयत् कामः कामं निरंकुशः ।।६०।।
ऋषिपत्न्या तया राजाहल्ययेव पुरंदरः । अन्वभूच्च यथाकामं संभोगसुखसंपदम् ।।६१।।
अनंतवीर्यात्तनयो रेणुकायामजायत । ममतायामिवोतथ्यः सधर्मिण्यां बृहस्पतेः ।।६२।।
तेनापि सह पुत्रेण रेणुकामानयन्मुनिः । स्त्रीणां लुब्धो जनः प्रायो दोषं न खलु वीक्षते ।।६३।।
तां पुत्रसहितां वल्लीमकालफलितामिव । संजातकोपः परशुरामः परशुनाच्छिदत् ।।६४।।
तद्भगिन्या स वृत्तांतोऽनंतवीर्यस्य शंसितः । कोपमुद्दीपयामास कृशानुमिव मारुतः ।।६५।।
ततश्चावार्यदोर्वीर्योऽनंतवीर्यो महीपतिः । जमदग्न्याश्रमं गत्वाभांक्षीन्मत्त इव द्विपः ।।६६।।
तापसानां कृतत्रासः समादाय गवादि सः । मंदं मंदं परिक्रामन् केसरीव न्यवर्तत ।।६७।।
त्रस्यत्तपस्वितुमुलं श्रुत्वा ज्ञात्वा च तां कथाम् । क्रुद्धः परशुरामोऽथाधावत् साक्षादिवान्तकः ।।६८।।
सुभटग्रामसंग्रामकौतुकी जमदग्निजः । पर्शुना खंडशश्चक्रे दारुवद्दारुणेन तम् ।।६९।।
राज्ये निवेशयांचक्रे तस्य प्रकृतिपूरुषैः । कृतवीर्यो महावीर्यः स एव तु वयोलघुः ।।७०।।
तस्याभवच्च महिषी तारा तारविलोचना । बुभुजाते च तौ भोगानविघ्नममराविव ।।७१।।
भूपालराजजीवोऽपि स्वमायुः परिपूर्य सः । महाशुक्रात् परिच्युत्य ताराकुक्षावावातरत् ।।७२।।
कृतवीर्योऽन्यदा मातुर्मुखाच्छ्रुत्वा पितुः कथाम् । आदिष्टाहिरिवागत्य जमदग्निममारयत् ।।७३।।
रामः पितृवधक्रुद्धो द्राग्गत्वा हस्तिनापुरे । अमारयत्कृतवीर्यं किं यमस्य दवीयसि ।।७४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जामदग्न्यस्ततस्तस्य राज्ये न्यविशत स्वयम् । राज्यं हि विक्रमाधीनं न प्रमाणं क्रमाक्रमौ ।।७५।।
रामाक्रांतपुराद्राज्ञी कृतवीर्यस्य गुर्विणी । व्याघ्राघ्रातवनादेणीवागमत्तापसाश्रमम् ।।७६।।
कृपाधनैर्भृगुहान्तः सा निधाय निधानवत् । तपस्विभिर्गोप्यते स्म क्रूरात् परशुरामतः ।।७७।।
चतुर्दशमहास्वप्नसूचितोऽस्याः सुतोऽजनि । गृह्णन् भूमिं सुखेनाभूत् सुभूमो नामतस्ततः ।।७८।।
क्षत्रियो यत्र यत्रासीत्तत्र तत्राप्यदीप्यत । पर्शुः परशुरामस्य कोपाग्निरिव मूर्तिमान् ।।७९।।
रामोऽगादन्यदा तत्राश्रमे पर्शुश्च सोऽज्वलत् । क्षत्रं चासूचयद्धूम इव धूतध्वजं तदा ।।८०।।
किमत्र क्षत्रियोऽस्तीति पृष्टास्तेन तपस्विनः । इत्यूचुस्तापसीभूताः क्षत्रिया वयमास्महे ।।८१।।
रामोऽप्यमर्षान्निःक्षत्रां सप्तकृत्वो वसुंधराम् । निर्ममे निस्तृणां शैलतटीमिव दवानलः ।।८२।।
क्षुण्णक्षत्रियदंष्ट्राभी रामः स्थालमपूरयत् । यमस्य पूर्णकामस्य पूर्णपात्रश्रियं दधत् ।।८३।।
रामः पप्रच्छ नैमित्तानयेद्युर्मे कुतो वधः । सदा वैरायमाणा हि शंकंते परतो मृतिम् ।।८४।।
यो दंष्ट्राः पायसीभूताः सिंहासन इह स्थितः । भोक्ष्यतेऽमूस्ततस्त्यस्ते वधो भावीति तेऽब्रुवन् ।।८५।।
रामोऽथ कारयामास सत्रागारमवारितम् । धुरि सिंहासनं तत्रास्थापयत् स्थालमग्रतः ।।८६।।
अथाश्रमे स्वर्णवर्णोऽष्टाविंशतिधनून्नतिः । गतोऽङ्गणद्रुम इव सुभूमो वृद्धिमद्भुताम् ।।८७।।
विद्याधरो मेघनादोऽन्येद्युर्नैमित्तिकानिति । परिपप्रच्छ पद्मश्रीः कन्या मे कस्य दीयताम् ।।८८।।
तस्या वरं वरीयांसं सुभूमं तेऽप्युपादिशन् । दत्वा कन्यां ततस्तस्मै तस्यैवाभूत् स सेवकः ।।८९।।
कूपभेक इवानन्यगोपः पप्रच्छ मातरम् । सुभूमः किमियानेव लोकोऽयमधिकोऽपि किम् ।।९०।।
माताप्यचीकथदथो लोकोऽनन्तो हि वत्सक । मक्षिकापदमात्रं हि लोकमध्येऽयमाश्रमः ।।९१।।
अस्मिँल्लोकेऽस्ति विख्यातं नगरं हस्तिनापुरम् । पिता ते कृतवीर्योऽभूत्तत्र राजा महाभुजः ।।९२।।
हत्वा ते पितरं रामो राज्यं स्वयमशिश्रियत् । क्षितिं निःक्षत्रियां चक्रे तिष्ठामस्तद्भयादिह ।।९३।।
तत्कालं हास्तिनपुरे सुभूमो भौमवज्ज्वलन् । जगाम वैरिणो क्रुद्धः क्षात्रं तेजो हि दुर्धरम् ।।९४।।
तत्र सत्रे ययौ सिंह इव सिंहासनेऽविशत् । दंष्ट्रास्ताः पायसीभूताः सुभुजो बुभुजे च सः ।।९५।।
उत्तिष्ठमाना युद्धाय ब्राह्मणास्तत्र रक्षकाः । जघ्निरे मेघनादेन व्याघ्रेण हरिणा इव ।।९६।।
प्रस्फुरद्दंष्ट्रिकाकेशो दशनैरधरं दशन् । ततो रामः क्रुधा कालपाशाकृष्ट इवाययौ ।।९७।।
रामेण मुमुचे रोषात् सुभूमाय परश्वधः । विध्यातस्तत्क्षणं तस्मिन् स्फुलिंग इव वारिणि ।।९८।।
शस्त्राभावात् सुभूमोऽपि दंष्ट्रास्थालमुदक्षिपत् । चक्रीबभूव तत्सद्यः किं न स्यात् पुण्यसम्पदः ।।९९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चक्रवर्त्यष्टमः सोऽथ तेन चक्रेण भास्वता । शिरः परशुरामस्य पंकजच्छेदमच्छिदत् ।।१००।।
क्षितिं निःक्षत्रियां रामः सप्तकृत्वो यथा व्यधात् । एकविंशतिकृत्वस्तां तथा निर्ब्राह्मणामसौ ।।१०१।।
क्षुण्णक्षितिपहस्त्यश्वपदातिव्यूहलोहितैः । वाहयन् वाहिनीर्नव्याः स प्राक् प्राचीमसाधयत् ।।१०२।।
स च्छिन्नानेकसुभटमुंडमंडितभूतलः । आक्रामद्दक्षिणां दक्षिणाशापतिरिवापरः ।।१०३।।
भटास्थिभिर्दंतुरयन् शुक्तिशंखैरिवाभितः । रोघो नीरनिधेः सोऽथ प्रतीचीमजयद्दिशम् ।।१०४।।
हेलोद्घाटितवैताढ्यकंदरं स्थाममंदरः । म्लेच्छान् विजेतुं भरतोत्तरखंडं विवेश सः ।।१०५।।
उच्छलच्छोणितरसच्छटाच्छुरितभूतलः । म्लेच्छांस्तत्राथ सोऽभांक्षीदिक्षूनिव महाकरी ।।१०६।।
मेघनादाय वैताढ्यगिरिश्रेण्योर्द्वयोरपि । विद्याधरेन्द्रपदवीं सुभूमश्चक्रभृद्ददौ ।।१०७।।
षष्टिवर्षसहस्रायुश्चतुर्दिशमिति भ्रमन् । निहत्य सुभटानुर्वीं स षट्खंडामसाधयत् ।।१०८।।
उज्जासयन्नसुमतामिति नित्यरौद्रध्यानानलेन सततं ज्वलदन्तरात्मा ।
आसाद्य कालपरिणामवशेन मृत्युं तां सप्तमीं नरकभूमिमगात् सुभूमः ।।१०९।।
कुमारभावेऽब्दसहस्रपंचकं तन्मंडलित्वेऽथ शतानि पंच ।
जयेऽर्धलक्षं पुनरब्दपंचशत्यूनमस्याजनि चक्रभृत्त्वे ।।११०।।

५. मानध्याने श्रीत्रिषष्टिशलाकापुरुषाऽन्तर्गता सङ्गमकथा ।

तदा शक्रः सुधर्मायां सभायां परिवारितः । सहस्रैश्चतुरशीत्या सामानिकदिवौकसाम् ।।१।।
त्रयस्त्रिंशत्त्रायस्त्रिंशैः पर्षद्भिस्तिसृभिस्तथा । चतुर्भिर्लोकपालैश्च संख्यातीतैः प्रकीर्णकैः ।।२।।
प्रत्येकं चतुरशीत्या सहस्रैरंगरक्षकैः । दृढाबद्धपरिकरैः ककुप्सु चतसृष्वपि ।।३।।
सेनाधिपतिभिः सेनापरिवीतैश्च सप्तभिः । देवदेवीगणैराभियोग्यैः किल्बिषिकादिभिः ।।४।।
तूर्यत्रयादिभिः कालं विनोदैरतिवाहयन् । गोप्ता दक्षिणलोकार्धं शक्रसिंहासने स्थितः ।।५।।
अवधिज्ञानतो ज्ञात्वा भगवन्तं तथा स्थितम् । उत्थाय पादुके त्यक्त्वोत्तरासंगं विधाय च ।।६।।
जान्वसव्यं भुवि न्यस्य सव्यं च न्यंच्य किंचन । शक्रस्तवेनावन्दिष्ट भूतलन्यस्तमस्तकः ।।७।।
समुत्थाय च सर्वांगोदञ्चद्रोमाञ्चकञ्चुकः । शचीपतिरुवाचेदमुद्दिश्य सकलां सभाम् ।।८।।
भो भोः सर्वेऽपि सौधर्मवासिनस्त्रिदशोत्तमाः ! । शृणुत श्रीमहावीरस्वामिनो महिमाद्भुतम् ।।९।।
दधानः पञ्चसमितीर्गुप्तित्रयपवित्रितः । क्रोधमानमायालोभानभिभूतो निराश्रवः ।।१०।।
द्रव्ये क्षेत्रे च काले च भावे चाऽप्रतिबद्धधीः । रूक्षैकपुद्गलन्यस्तनयनो ध्यानमास्थितः ।।११।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अमरैरसुरैर्यक्षै रक्षोभिरुगैर्नरैः । त्रैलोक्येनापि शक्येत ध्यानाच्चालयितुं न हि ।।१२।।
इत्याकर्ण्य वचः शाक्रं शक्रसामानिकः सुरः । ललाटपट्टघटितभ्रुकुटीभंगभीषणः ।।१३।।
कंपमानाधरः कोपाल्लोहितायतलोचनः । अभव्यो गाढमिथ्यात्वसंगः संगमकोऽवदत् ।।१४।।
मर्त्यः श्रमणमात्रोऽयं यदेवं देव वर्ण्यते । स्वच्छन्दं सदसद्वादे प्रभुत्वं तत्र कारणम् ।।१५।।
देवैरपि न चाल्योऽयं ध्यानादित्युद्भटं प्रभो ! । कथं धार्येत हृदये धृतं वा प्रोच्यते कथम् ? ।।१६।।
रुद्धान्तरिक्षः शिखरैर्मूलै रुद्धरसातलः । यैः किलोदस्यते दोष्णा सुमेरुर्लोष्टुलीलया ।।१७।।
सकुलाचलमेदिन्याः प्लावनव्यक्तवैभवः । येषामेष सुगंडूषंकरश्च मकराकरः ।।१८।।
अप्येकभुजदंडेन प्रचण्डां छत्रलीलया । उद्धरन्ति सहानेकभूधरां ये वसुन्धराम् ।।१९।।
तेषामसमऋद्धीनां सुराणाममितौजसाम् । इच्छासंपन्नसिद्धीनां मर्त्यमात्रं कियानयम् ।।२०।।
एषोऽहं चालयिष्यामि तं ध्यानादित्युदीर्य सः । करेण भूमिमाहत्योदस्थादास्थानमण्डपात् ।।२१।।
अर्हन्तः परसाहाय्यात्तपः कुर्वन्त्यखंडितम् । मा ज्ञासीदिति दुर्बुद्धिः शक्रेण स उपेक्षितः ।।२२।।
ततो वेगानिलोत्पातपतापतघनाघनः । रौद्राकृतिदुरालोको भयापसरदप्सराः ।।२३।।
विकटोरः स्थलाघातपुञ्जितग्रहमण्डलः । स पापस्तत्र गतवान् यत्रासीत्परमेश्वरः ।।२४।। युग्मम्।।
निष्कारणजगद्बन्धुं निराबाधं तथा स्थितम् । श्रीवीरं पश्यतस्तस्य मत्सरो ववृधेऽधिकम् ।।२५।।
गीर्वाणपांसनः पांसुवृष्टिं दुष्टोऽतनिष्ट सः । अकांडघटितारिष्टामुपरिष्टाज्जगत्प्रभोः ।।२६।।
विधुर्विधुन्तुदेनेव दुर्दिनेनेव भास्करः । पिदधे पांसुपूरेण सर्वांगीणं जगत्प्रभोः ।।२७।।
समन्ततोऽपि पूर्णानि तथा श्रोतांसि पांसुभिः । यथा समभवत् स्वामी निःश्वासोच्छ्वासवर्जितः ।।२८।।
तिलमात्रमपि ध्यानान्न चचाल जगद्गुरुः । कुलाचलश्चलति किं गजैः परिणतैरपि ।।२९।।
अपनीय ततः पांशुं वज्रतुण्डाः पिपीलिकाः । स समुत्पादयामास प्रभोः सर्वांगपीलिकाः ।।३०।।
प्राविशन्नेकतोऽङ्गेषु स्वैरं निर्ययुरन्यतः । विध्यन्त्यस्तीक्ष्णतुण्डाग्रैः सूच्यो निवसनेष्विव ।।३१।।
निर्भाग्यस्येव वाञ्छासु मोघीभूतासु तास्वपि । स दंशान् रचयामास नाकृत्यान्तो दुरात्मनाम् ।।३२।।
तेषामेकप्रहारेण रक्तैर्गोक्षीरसोदरैः । क्षरिद्भिरभवन्नाथः सनिर्झर इवाद्विराट् ।।३३।।
तैरप्यक्षोभ्यमाणेऽथ जगन्नाथे स दुर्मतिः । चक्रे प्रचण्डतुण्डाग्रा दुर्निवारा घृतेलिकाः ।।३४।।
शरीरे परमेशस्य निमग्नमुखमण्डलाः । ततस्ताः समलक्ष्यन्त रोमालीव सहोत्थिता ।।३५।।
ततोऽप्यविचलच्चित्ते योगवित्ते जगद्गुरौ । स महावृश्चिकांश्चक्रे ध्यानवृश्चननिश्चयी ।।३६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रलयाग्निस्फुलिंगाभैस्तप्ततोमरदारुणैः । तेऽभिन्दन् भगवद्देहं लांगूलांकुटकण्टकैः ।।३७।।
तैरप्यनाकुले नाथे कूटसंकल्पसंकुलः । सोऽनल्पान् कल्पयामास नकुलान् दशनाकुलान् ।।३८।।
खिखीति रसमानास्ते दंष्ट्राभिर्भगवत्तनुम् । खण्डखण्डैस्त्रोटयन्तो नांसखण्डान्यपातयन् ।।३९।।
तैरप्यकृतकृत्योऽसौ यमदोर्दण्डदारुणान् । अत्युत्कटफटाटोपान् कोपात्प्रायुंक्त पन्नागान् ।।४०।।
आशिरः पादमत्यर्थं महावीरं महोरगाः । अवेष्टन्त महावृक्षं कपिकच्छूलता इव ।।४१।।
प्रजहुस्ते तथा तत्र स्फुटन्ति स्म फटा यथा । तथा दशन्ति स्म यथाऽभज्यन्त दशना अपि ।।४२।।
उद्वान्तगरलेष्वेषु लम्बमानेषु रज्जुवत् । स वज्रदशनानाशु मूषिकानुदपीपदत् ।।४३।।
स्वाम्यंगं खनकाश्चखुर्नखैर्दन्तैर्मुखैः करैः । मोमूत्र्यमाणास्तत्रैव क्षते क्षारं निचिक्षिपुः ।।४४।।
तेष्वप्यकिञ्चिद्भूतेषु भूतीभूत इव क्रुधा । उद्दण्डदन्तमुशलं हस्तिरूपं ससर्ज सः ।।४५।।
सोऽधावत् पादपातेन मेदिनीं नमयन्निव । उड्डून्युदस्तहस्तेन नभस्तस्त्रोटयन्निव ।।४६।।
कराग्रेण गृहीत्वा च दुवरिण स वारणः । दूरमुल्लालयामास भगवन्तं नभस्तले ।।४७।।
विशीर्य कणशो गच्छत्वसाविति दुराशयः । दन्तावुदस्य स व्योम्नः पतन्तं स्म प्रतीच्छति ।।४८।।
पतितं दन्तघातेन विध्यति स्म मुहुर्मुहुः । वक्षसो वज्रकठिनात्समुत्तस्थुः स्फुलिंगकाः ।।४९।।
न शशाक वराकोऽसौ कर्तुं किंचिदपि द्विपः । यावत्तावत्सुरश्चक्रे करिणीं वैरिणीमिव ।।५०।।
अखण्डतुण्डदन्ताभ्यां भगवन्तं बिभेद सा । स्वैरं शरीरनीरेण विषेणेव सिषेच च ।।५१।।
करेणो रेणुसाद्भूते तस्याः सारे सुराधमः । पिशाचरूपमकरोन्मकरोत्कटदंष्ट्रकम् ।।५२।।
ज्वालाजालाकुलं व्यात्तव्यायतं वक्त्रकोटरम् । अभवद्भीषणं तस्य वह्निकुण्डमिव ज्वलत् ।।५३।।
यमौकस्तोरणस्तम्भाविव प्रोत्तंभितौ भुजौ । अभूच्च तस्य जंघोरु तुंगं तालद्रुमोपमम् ।।५४।।
स साट्टहासः फेत्कुर्वन् स्फूर्जत्किलकिलारवः । कृत्तिवासाः कर्त्रिकाभृद्भगवन्तमुपाद्रवत् ।।५५।।
तस्मिन्नपि हि विध्याते क्षीणतैलप्रदीपवत् । व्याघ्ररूपं क्रुधा ध्मातः शीघ्रं चक्रे स निर्घृणः ।।५६।।
अथ पुच्छच्छटाच्छोटैः पाटयन्निव मेदिनीम् । बूत्कारप्रतिशब्दैश्च रोदसी रोदयन्निव ।।५७।।
दंष्ट्राभिर्वज्रसाराभिर्नखरैः शूलसोदरैः । अव्यग्रं व्यापिपर्ति स्म व्याघ्रो भुवनभर्तरि ।।५८।।
तत्र विच्छायतां प्राप्ते दवदग्ध इव द्रुमे । सिद्धार्थराजरूपं स विचक्रे विबुधाधमः ।।५९।।
किमेतद्भवता तात प्रक्रान्तमतिदुष्करम् । प्रव्रज्यां मुञ्च माऽस्माकं प्रार्थनामवजीगणः ।।६०।।
वार्धके मामशरणं त्यक्तवान्नन्दिवर्धनः । विकृता त्रिशला चैवं विललाप मुहुर्मुहुः ।।६१।।युग्मम्।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततस्तयोर्विलापैरप्यलिप्तमनसि प्रभौ । आवासितं दुराचारः स्कन्धावारमकल्पयत् ।।६२।।
तत्रानासाद्य दृषदं सूदः सादर ओदने । चुल्लीपदे प्रभोः पादौ कृत्वा स्थालीं न्यवेशयत् ।।६३।।
तत्कालं ज्वालितस्तेन जज्वाल ज्वलनोऽधिकम् । पादमूले जगद्भर्तुर्गिरेरिव दवानलः ।।६४।।
तप्तस्यापि प्रभोः स्वर्णस्येव न श्रीरहीयत । ततः सुराधमश्चक्रे पक्कणं दारुणक्कणम् ।।६५।।
पक्कणोऽपि प्रभोः कण्ठे कर्णयोर्भुजदण्डयोः । जंघयोश्च क्षुद्रपक्षिपंजराणि व्यलम्बयत् ।।६६।।
खगैश्चंचुनखाघातैस्तथा दद्रे प्रभोस्तनुः । यथा छिद्रशताकीर्णा तत्पञ्जरनिभाभवत् ।।६७।।
तत्राप्यसारतां प्राप्ते पक्कणे पक्कपत्रवत् । उत्पादितमहोत्पातं खरवातमजीजनत् ।।६८।।
अन्तरिक्षे महावृक्षांस्तृणोत्क्षेपं समुत्क्षिपन् । विक्षिपन् पांशुविक्षेपं दिक्षु च ग्रावकर्करान् ।।६९।।
सर्वतो रोदसीगर्भं भस्त्रापूरं च पूरयन् ।
उत्पाट्योत्पाट्य वातोऽसौ भगवन्तमपातयत् ।।७०।।युग्मम्।।
तेनापि खरवातेनाऽपूर्णकामो विनिर्मिमे । द्युसत्कुलकलंकोऽसौ द्राक् कलंकलिकाऽनिलम् ।।७१।।
भूभृतोऽपि भ्रमयितुमलंकर्मीणविक्रमः । भ्रमयामास चक्रस्थमृत्पिंडमिव स प्रभुम् ।।७२।।
भ्रम्यमाणोऽर्णवावर्तेनेव तेन नभस्वता । तदेकतानो न ध्यानं मनागपि जहौ प्रभुः।।७३।।
वज्रसारमनस्कोऽयं बहुधापि कदर्थितः । न क्षुभ्यति कथमहं भग्नगूर्यामि तां सभाम् ।।७४।।
तदस्य प्राणनाशेन ध्यानं नश्यति नान्यथा । चिन्तयित्वेति चक्रे स कालचक्रं सुराधमः ।।७५।।
अहाय तदयोभारसहस्रघटितं ततः । उद्दधार सुरः शैलं कैलासमिव रावणः ।।७६।।
पृथिवीं संपुटीकर्तुं कृतं मन्ये पुटान्तरम् । उत्पत्य कालचक्रं स प्रचिक्षेपोपरि प्रभोः ।।७७।।
ज्वालाजालैरुच्छलद्भिर्दिशः सर्वाः करालयत् । तत्पपात जगद्भर्तर्यौर्वानल इवार्णवे ।।७८।।
कुलक्षितिधरक्षोदक्षमस्यास्य प्रहारतः । ममज्जाऽऽजानु भगवानन्तर्वसुमतीतलम् ।।७९।।
एवं भूतेऽपि भगवानशोचदिदमस्य यत् । तितारयिषवो विश्वं वयं संसारकारणम् ।।८०।।
कालचक्रहतोऽप्येष प्रपेदे पंचतां न यत् । अगोचरस्तदस्त्राणामुपायः क इहापरः ।।८१।।
अनुकूलैरुपसर्गैः क्षुभ्येद्यदि कथंचन । इति बुद्ध्या विमानस्थः स पुरोऽस्थादुवाच च ।।८२।।
सद्यः प्रकाशमानाशं क्रोशत्खगकुलाकुलम् । प्रातःकालमकालेऽपि दर्शयामास दुष्टधीः ।।८३।।
तां च दैवीमसौ मायां मन्यमानो महामनाः । न मुमोच विभुर्ध्यानमभिग्रहकृताग्रहः ।।८४।।
ताडंकहारकेयूरकिरीटद्योतिताम्बरः । तत्संहृत्य विमानस्थः स पुरोऽस्थादुवाच च ।।८५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

महर्षे ! तव तुष्टोऽस्मि सत्त्वेन तपसौजसा । प्राणानपेक्षभावेनारब्धनिर्वहणेन च ।।८६।।
पर्याप्तं तपसाऽनेन शरीरक्लेशकारिणा । ब्रूहि याचस्व मा कार्षीः शंकां यच्छामि किं तव ? ।।८७।।
इच्छामात्रेण पूर्यन्ते यत्र नित्यं मनोरथाः । किमनेनैव देहेन त्वां स्वर्गं प्रापयामि तम् ? ।।८८।
अनादिभवसंरूढकर्मनिर्मोलक्षणम् । एकान्तपरमानन्दं मोक्षं वा त्वां नयामि किम् ? ।।८९।।
अशेषमंडलाधीशमौलिलालितशासनम् । अथवाऽत्रैव यच्छामि साम्राज्यं प्राज्यमृद्धिभिः ? ।।९०।।
इत्थं प्रलोभनावाक्यैरक्षोभ्यमनसि प्रभौ । अप्राप्तप्रतिवाक् पापः पुनरेवमचिन्तयत् ।।९१।।
मोघीकृतमनेनैतन्मम शक्तिविजृम्भितम् । तदिदानीममोघं स्याद्यद्येकं कामशासनम् ।।९२।।
यतः कामास्त्रभूताभिः कामिनीभिः कटाक्षिताः । दृष्टा महापुमांसोऽपि लुम्पन्तः पुरुषव्रतम् ।।९३।।
इति निश्चित्य चित्तेन निर्दिदेश सुरांगनाः । तद्विभ्रमसहायान् षट् प्रायुंक्त स ऋतूनपि ।।९४।।
कृतप्रस्तावना मत्तकोकिलाकलकूजितैः । कंदर्पनाटकनटी वसन्तश्रीरशोभत ।।९५।।
मुखवासं सज्जयन्ती विकसन्नीपरेणुभिः । सैरन्ध्रीव दिग्वधूनां ग्रीष्मलक्ष्मीरजृम्भत ।।९६।।
राज्याभिषेककामस्य मंगल्यतिलकानिव । सर्वांगं केतकव्याजात् कुर्वती प्रावृडाबभौ ।।९७।।
सहस्रनयनीभूय नवनीलोत्पलच्छलात् । स्वसंपदमिवोद्दामां पश्यन्ती शुशुभे शरद् ।।९८।।
जयप्रशस्तिं कामस्य श्वेताक्षरसहोदरैः । हेमन्तश्रीर्लिलेखेव प्रत्यग्रैः कुन्दरकुड्मलैः ।।९९।।
गणिकेवोपजीवन्ती हेमन्तसुरभीसमम् । कुन्दैश्च सिन्दुवारैश्च शिशिरश्रीरचीयत ।।१००।।
एवमुज्जृम्भमाणेषु सममेवर्तुषु क्षणात् । मीनध्वजपताकिन्यः प्रादुरासन् सुरांगनाः ।।१०१।।
संगीतमविगीतांग्यः पुरो भगवतस्ततः । ताः प्रचक्रमिरे जैत्रं मंत्रास्त्रमिव मान्मथम् ।।१०२।।
तत्राविसूत्रितलयं गान्धारग्रामबन्धुरम् । काभिश्चिदुदगीयन्त जातयः शुद्धवेसराः ।।१०३।।
क्रमव्युत्क्रमगैस्तानैर्व्यक्तैर्व्यंजनधातुभिः । प्रवीणाऽवादयद्वीणां काचित् सकलनिष्कलाम् ।।१०४।।
स्फुटत्तकारधोंकारप्रकारैर्मधनिस्वनान् । काश्चिच्च वादयामासुर्मृदंगांस्त्रिविधानपि ।।१०५।।
नभोभूगतचारीकं विचित्रकरणोद्भटम् । दृष्टिभावैर्नवनवैः काश्चिदप्यनरीनृतुः ।।१०६।।
दृढांगहाराभिनयैः सद्यस्त्रुटितकंचुका । बध्नन्ती श्लथधम्मिल्लं दोर्मूलं काऽप्यदीदृशत् ।।१०७।।
दंडपादाभिनयनच्छलात् काऽपि मुहुर्मुहः । चारुगोरोचनागौरमूरुमूलमदर्शयत् ।।१०८।।
श्लथचंडातकग्रन्थिदृढीकरणलीलया । काऽपि प्राकाशयद्वापीसनाभि नाभिमंडलम् ।।१०९।।
व्यपदिश्येभदन्ताऽऽख्यहस्तकाभिनयं मुहुः । गाढमंगपरिष्वंगसंज्ञां काचिच्च निर्ममे ।।११०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संचारयन्त्यन्तरीयं नीवीनिबिडनच्छलात् । नितम्बबिंबफलकं काचिदाविरभावयत् ।।१११।।
अंगभंगापदेशेन वक्षः पीनोन्नतस्तनम् । सुचिरं रोचयामास काचिद्रुचिरलोचना ।।११२।।
यदि त्वं वीतरागोऽसि रागं तन्नस्तनोषि किम् ? । शरीरनिरपेक्षश्चेद्दत्से वक्षोऽपि किं न नः ? ।।११३।।
दयालुर्यदि वाऽसि त्वं तदानीं विषमायुधात् । अकाण्डाकृष्टकोदण्डादस्मान्न त्रायसे कथम् ? ।।११४।।
उपेक्षसे कौतुकेन यदि नः प्रेमलालसाः । किंचिन्मात्रं हि तद्युक्तं मरणान्तं न युज्यते ।।११५।।
स्वामिन् ! कठिनतां मुंच पूरयास्मन्मनोरथान् । प्रार्थनाविमुखो मा भूः काश्चिदित्यूचिरे चिरम् ।।११६।।
एवं गीतातोद्यनृत्तैर्विकारैरांगिकैरपि । चाटुभिश्च सुरस्त्रीणां न चुक्षोभ जगद्गुरुः ।।११७।।
एवं विंशत्युपसर्गी तत्र रात्रौ सुराधमः । चक्रे संगमकः कायोत्सर्गस्थस्य जगद्गुरोः ।।११८।।
प्रातः संगमकश्चैवमचिन्तयदहो अयम् । नेषदप्यचलद्ध्यानान्मर्यादाया इवार्णवः ।।११९।।
तत्किं यामि दिवं भ्रष्टप्रतिज्ञो यामि वा कथम् । क्षोभयिष्याम्युपसर्गैः स्थित्वाऽहं चिरमप्यमुम् ।।१२०।।
पथि सूर्यकरस्पृष्टे युगमात्रप्रदत्तदृक् । भगवान् वालुकाऽभिख्यं ग्रामं प्रत्यचलत्ततः ।।१२१।।
सुराधमः संगमकः पंचचौरशतीं पथि । विचक्रे बालुकां चोच्चैर्वालुकार्णवसन्निभाम् ।।१२२।।
मातुल ! मातुलेत्युच्चैर्जल्पन्तो दस्यवः प्रभुम् । तथा सस्वजिरे गाढं यथा गिरिरपि स्फुटेत् ।।१२३।।
जगाम वालुकाग्रामं प्रशमामृतसागरः । जानुदध्न्यां वालुकायां मज्जत्पादो जगद्गुरुः ।।१२४।।
निसर्गक्रूरधीरित्थमुपसर्गान् सुराधमः । पुरे ग्रामे वनेऽन्यत्राप्यनुगच्छन् प्रभोर्व्यधात् ।।१२५।।
उपसर्गकृतो जग्मुर्मासाः संगमकस्य षट् । अथाऽगाद्गोकुले स्वामी तदाऽऽसीत्तत्र चोत्सवः ।।१२६।।
षडप्युपोषितो मासान् भगवानतिलंघ्य तान् । कर्तुकामः पारणकं भिक्षार्थं गोकुलेऽविशत् ।।१२७।।
यत्र यत्र गृहे स्वामी प्रययौ तत्र तत्र च । अनेषणां प्रविदधे पापधीः स सुराधमः ।।१२८।।
दत्तोपयोगो ज्ञात्वा तमनिवृत्तं सुराधमम् । स्वामी निवृत्त्य भिक्षायास्तस्थौ प्रतिमया बहिः ।।१२९।।
किं भग्नपरिणामोऽयमिति सोऽप्यवधेः सुरः । यावदैक्षिष्ट तावच्चापश्यदक्षुभितं प्रभुम् ।।१३०।।
स सुरोऽचिन्तयच्चैवं षण्मासीं सन्ततैः कृतैः । नोपसर्गैः कम्पितोऽसौ सह्योऽर्णवजलैरिव ।।१३१।।
दीर्घेणाप्येष कालेन ध्यानान्न हि चलिष्यति । वृथा मे प्रक्रमोऽत्राभूद्वज्रस्येवाद्रिभेदने ।।१३२।।
स्वर्विलाससुखं हित्वा शापभ्रष्ट इवावनिम् । कियच्चिरं ह हाऽभ्राम्यं निजदुर्बुद्धिवञ्चितः ।।१३३।।
एवं विचिन्त्य स सुरः प्रणम्य च जगद्गुरुम् । कृताञ्जलिर्म्लानमुखो ह्रीणश्चैवमभाषत ।।१३४।।
यथा सभायां शक्रेण कीर्तितोऽसि तथा ह्यसि । तद्वचोऽश्रद्दधानेन मयाऽस्येवमुपद्रुतः ।।१३५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सत्यप्रतिज्ञस्त्वं भ्रष्टप्रतिज्ञोऽहमसौ पुनः । न व्यधायि मया साधु तत्क्षमस्व क्षमानिधे ! ।।१३६।।
द्यां यास्याम्युपसन्नोऽहमुपसर्गपराङ्मुखः । व्रज त्वमपि निःशंको ग्रामाकरपुरादिषु ।।१३७।।
ग्रामेषु विश भिक्षायै भुंक्ष्वाहारमदूषितम् । भिक्षादोषा अपि पुरा विहितास्ते मयैव हि ।।१३८।।
स्वाम्यवोचत नश्चिन्तां मुञ्च संगमकामर ! । कस्याप्यधीना न वयं विहरामो निजेच्छया ।।१३९।।
इत्युक्तवन्तं श्रीवीरं प्रणम्य स सुराधमः । सानुतापः प्रचचाल पुरुहूतपुरीं प्रति ।।१४०।।
इतश्च कालं तावन्तं सुराः सौधर्मवासिनः । निरानन्दा निरुत्साहा उद्विग्नाश्चावतस्थिरे ।।१४१।।
शक्रोऽपि मुक्तनेपथ्यांगरागोऽत्यन्तदुःखितः । संगीतकादिविमुखो मनस्येवमचिन्तयत् ।।१४२।।
इयतामुपसर्गाणां निमित्तमभवं ह्यहम् । मया स्वामिप्रशंसायां कृतायां सोऽकुपत्सुरः ।।१४३।।
अत्रान्तरे संगमकः पापपंकमलीमसः । प्रणष्टकान्तिप्राग्भारोऽम्भःस्पृष्ट इव दर्पणः ।।१४४।।
भ्रष्टप्रतिज्ञो मन्दाक्षमन्दीभूताक्षिपंकजः । देवराजाधिष्ठितां तां सुधर्मामाययौ सभाम् ।।१४५।। युग्मम्
शक्रः संगमकं दृष्ट्वा सद्यो भूत्वा पराङ्मुखः । इत्यूचे भोः सुराः ! सर्वेऽप्याकर्णयत मद्वचः ।।१४६।।
अयं हि कर्मचण्डालः पापः संगमकामरः । दृश्यमानोऽपि पापाय तद् द्रष्टुं नैष युज्यते ।।१४७।।
बह्वनेनापराद्धं हि यत्स्वामी नः कदर्थितः । नास्मभ्यमपि किं भीतो भवाद्भीतो न यद्ययम् ।।१४८।।
अर्हन्तो नान्यसाहाय्यात्तप्यन्ते तप इत्यहम् । तथोपसर्गकालेऽपि नामुं पापमशिक्षयम् ।।१४९।।
अतः परमिह तिष्ठन्नस्माकमपि पाप्मने । निर्वासनीयस्तदसौ कल्पादस्मात्सुराधमः ।।१५०।।
इत्युदित्वा वज्रपाणिर्वज्रेणेव शिलोच्चयम् । जघान वामपादेन सुराधममामर्षणः ।।१५१।।
पर्यस्यमानो विविधायुधैर्माघवनैर्भटैः । आक्रुश्यमानस्त्रिदिवस्त्रीभिर्मोटितपाणिभिः ।।१५२।।
सामानिकैर्हस्यामानो यानकाख्यविमानगः । स शिष्टैकार्णवायुष्को मेरुचूलं सुरो ययौ ।।१५३।। (युग्मम्)
महिष्यः संगमकस्य शक्रमेवं व्यजिज्ञपन् । स्वनाथमनुगच्छामस्त्वदादेशो भवेद्यदि ।।१५४।।
अनुगन्तुं संगमकं दीनास्या अन्वमस्त ताः । अवारयत्परीवारमशेषमपि वासवः ।।१५५।।

[त्रिषष्टि० १० पर्व० श्लोक १६४ तः ३१८]

६. मायाध्याने श्रीआवश्यकहारिभद्रीयवृत्तौ धनश्रियाः कथानकम् ।

अहवा सव्वंगसुंदरित्ति/वसंतपुरं णयरं, जियसत्तू राया, धणवईधणावहा भायरो सेट्ठी, धणसिरी य से भगिणी, सा य बालरंडा परलोगरया य, पच्छा मासकप्पगयधम्मघोसायरियसगासे पडिबुद्धा, भायरोवि सिनेहेणं तहेव, सा पव्वइउमिच्छइ, ते तं संसारनेहेणं न देंति, सा य धम्मव्वयं खद्धं खद्धं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

करेइ, भाउज्जायाओ से कुरुकुरायंति, तीए विचिंतियं-पेच्छामि ताव भाउगाण चित्तं, किमेयाहिंति ?, पच्छा नियडीए आलोइऊण सोवणयपवेसकाले वीसत्थं वीसत्थं बहुं धम्मगयं जंपिऊण तओ नट्ठखिड्डेणं जहा से भत्ता सुणेइ तहेगा भाउज्जाया भणिया-किं बहुणा ? साडियं रक्खेज्जासि, तेण चिंतियं-नूणमेसा दुच्चारिणित्ति, वारियं च भगवया असईपोसणंति, तओ णं परिट्ठवेमित्ति पल्लंके उवविसंती वारिया, सा चिंतेइ-हा ! किमेयंति, पच्छा तेण भणियं-घराओ मे णीहि, सा चिंतेइ-किं मए दुक्कडं कयंति, न किंचि पासइ, तओ तत्थेव भूमिगयाए किच्छेण णीया रयणी, पभाए उल्लुग्गंगी निग्गया, धणसिरीए भणिया-कीस उल्लुग्गंगित्ति, सा रुयंती भणइ-न याणामो अवराहं, गेहाओ य धाडिया, तीए भणियं-वीसत्था अच्छह, अहं ते भलिस्सामि, भाया भणिओ-किमेयमेवंति, तेण भणियं-अलं मे दुट्ठसीलाए, तीए भणियं-कहं जाणासि ?, तेण भणियं-तुज्झ चेव सगासाओ, सुया से धम्मदेसणा निवारणं च, तीए भणियं-अहो ते पंडियत्तणं वियारक्खमत्तं च धम्मे य परिणामो, मए सामन्नेण बहुदोसमेयं भगवया भणियं तीसे उवइट्ठं वारिया य, किमेतावतैव दुच्चारणी होइ, तओ सो लज्जिओ, मिच्छादुक्कडं से दवाविओ, चिंतियं च णाए–एस ताव मे कसिणधवलपडिवज्जगो, बीओवि एवं चेव विण्णासिओ, नवरं सा भणिया-किं बहुणा ?, हत्थं रक्खिज्जसित्ति, सेसविभासा तहेव, जाव एसोऽवि मे कसिणधवलपडिवज्जगोत्ति एत्थ पुण इमाए नियडिए अभक्खाणदोसओ तिव्वं कम्ममुवनिबद्धं, पच्छा एयस्स अपडिक्कमिय भावओ पव्वइया, भायरोऽवि से सह जायाहिं पव्वइया, अहाउयं पालइत्ता सव्वाणि सुरलोगं गयाणि, तत्थवि अहाउयं पालयित्ता भायरो से पढमं चुया सागेए णयरे असोगदत्तस्स इब्भस्स समुद्दत्तसायरदत्ताभिहाणा पुत्ता जाया, इयरीवि चविऊण गयपुरे णयरे संखस्स इब्भसावस्स धूया आयाया, अईवसुंदरित्ति सव्वंगसुंदरी से नामं कयं, इयरीओ वि भाउज्जायाओ चविऊणं कोसलाउरे णंदणाभिहाणस्स इब्भस्स सिरिमइकंतिमइणामाओ धूयाओ आयाओ, जोव्वणं पत्ताणि, सव्वंगसुंदरी कहवि सागेयाओ गयपुरमागएण असोगदत्तसिट्ठिणा दिट्ठा, कस्सेसा कन्नगत्ति, संखस्स सिट्ठिस्स सबहुमाणं समुद्दत्तस्स मग्गिया लद्धा विवाहो य कओ, कालंतरेण सो विसज्जावगो आयओ, उवयारो से कओ, वासघरं सज्जियं । एत्थंतरंमि य सव्वंगसुंदरीए उइयं तं नियडिनिबंधणं पढमकम्मं, तओ भत्तारेण से वासघरट्ठिएण वोलेंती देविगी पुरिसच्छाया दिट्ठा, तओऽणेण चिंतियं-दुट्ठसीला मे महिला, कोवि अवलोएउं गओत्ति, पच्छा साऽऽगया, ण तेण बोल्लाविया, तओ अट्टदुहट्टयाए धरणीए चेव रयणी गमिया, पहाए से भत्तारो अणापुच्छिय सयणवग्गं एगस्स धिज्जाइयस्स कहेत्ता गओ सागेयं णयरं, परिणीया यऽणेण कोसलाउरे णंदणस्स धूया सिरिमइत्ति, भाउणा य से तीसे भइणी कंतिमई, सुयं च णेहिं, तओ गाढमद्धिई जाया, विसेसओ तीसे, पच्छा ताणं गमागमसंववहारो वोच्छिन्नो, सा धम्मपरा जाया,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पच्छा पव्वइया, कालेण विहरंती पव्वत्तिणीए समं साकेयं गया, पुव्वभाउज्जायाओ उवसंताओ भत्तारा य तासिं न सुट्ठु । एत्थंतरंमि य से उदियं नियडिनिबंधणं बितियकम्मं, पारणगे भिक्खट्ठं पविट्ठा, सिरिमई य वासघरं गया हारं पोयति, तीए अब्भुट्ठिया, सा हारं मोत्तूण भिक्खत्थमुट्ठिया, एत्थंतरंमि चित्तकम्मोइण्णेणं मयूरेणं सो हारो गिलिओ, तीए चिंतियं-अच्छरीयमिणं, पच्छा साडगद्धेण ठइयं, भिक्खापडिग्गाहिया निग्गया य, इयरीए जोइयं-जाव नत्थि हारोत्ति, तीए चिंतियं-किमेयं वट्टखेडुं ?, परियणो पुच्छिओ, सो भणइ-न कोइ एत्थ अज्जं मोत्तूण पविट्ठो अन्नो, तीए अंबाडिओ, पच्छा फुट्टं । इयरीएवि पवत्तिणीए सिट्ठं, तीए भणियं-विचित्तो कम्मपरिणामो, पच्छा उग्गतरतवरया जाया, तेसिं चाणत्थभीयाणं तं णेडुं ण उग्गाहइ, सिरिमई कंतिमइओ भत्तारेहिं हसिज्जंति, ण य विप्परिणमंति, तीएवि उग्गतवरयाए कम्मसेसं कयं, एत्थंतरंमि सिरिमई भत्तारसहगया वासहरे चिट्ठइ, जाव मोरेण चित्ताओ ओयरिऊण निग्गिलिओ हारो, ताणि संवेगमावण्णाणि, अहो से भगवईए महत्थता जं न सिट्ठमिदंति खामेउं पयट्टाणि, एत्थंतरंमि से केवलमुप्पण्णंति, देवेहि य महिमा कया, तेहिं पुच्छियं, तीएऽवि साहिओ परभववुत्तंतो, ताणि पव्वइयाणि, एरिसी दुहावहा मायत्ति ।

७. लोभध्याने श्रीआवश्यकनिर्युक्तिहारीभद्रीयवृत्तौ वणिक्मित्रकथा ।

चेडगणिहाणे - दो मित्ता, तेहिं निहाणगं दिट्ठं, कल्ले सुनक्खत्ते णेहामो, एगेण हरिऊण इंगाला छूढा, बीयदिवसे इंगाला पेच्छइ, सो धुत्तो भणइ - अहो मंदपुन्ना अम्हे किह ता इंगाला जाया ?, तेण णायं, हिययं ण दरिसेइ, तस्स पडिमं करेइ, दो मक्कडे लएइ, तस्स उवरि भत्तं देइ, ते छुहाइया तं पडिमं चडंति । अन्नया भोयणं सज्जिय दारगा णीया, संगोविया न देइ, भणइ मक्कडा जाया, आगओ, तत्थ लेप्पणट्ठाणे ठाविओ, मक्कडगा मुक्का, किलिकिलिंता विलग्गा, भणिओ एए ते तव पुत्ता, सो भणइ - कहं दारगा मक्कडा भवंति ?, सो भणइ - जहा दिनारा इंगाला जाया तहा दारगावि, एवं णाए दिण्णो भागो ।

७. लोभध्याने श्रीउपदेशप्रासादे सिंहकेसरिसाधोः दृष्टान्तः ।

चम्पायां सुव्रतनामा साधुः मासक्षपणपारणे द्रव्याद्यभिग्रहं चतुर्विधं द्रव्यक्षेत्रकालभावाद्गृहीत्वा प्रथमपौरुष्यामेव गोचर्यर्थं निर्गतः । उत्कृष्टतपोयुक्तत्वात्सर्वः कालो गोचरीयोग्यः । यत उक्तं- "निच्चभत्तस्स भिखुस्स कप्पति एगं गोयरकालं" इत्यादि सामाचारीसूत्रं ज्ञेयम्, नित्यमेकाशनिनः साधोरेकवारं गोचर्याः काले गृहस्थगृहे पारणार्थं निष्क्रमितुं प्रवेष्टुं च कल्पते, न तु द्वितीयवारम् । यद्येकवारं भुक्ते सति आचार्योपाध्यायग्लानादीनां वैयावृत्त्यं कर्तुं न शक्नोति तदा द्विरपि

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भुङ्क्ते, तपसो हि वैयावृत्त्यं गरीय इति । अथवा बस्तिकूर्चकक्षादिरोमाणि न जातानि तावत्क्षुल्लकी-क्षुल्लकयोरपि द्विर्भुञ्जानयोर्न दोषः । एकान्तरोपवासिनः साधोरेकगोचरकालेन न निर्वाहस्तदा द्वितीयवारं स भिक्षते । षष्ठभक्तकस्य द्वौ गोचरकालौ । अष्टमभक्तकस्य चतुःपञ्चोपवासकारकस्य च सर्वेऽपि गोचरकालाः, यदेच्छा भवति तदा भिक्षते, न तु प्रातर्गृहीतमेव धारयेत्, संचये जीवसंसक्तादिदोषसम्भवात्, इति प्रसङ्गात् (दर्शितं) । अथ स मुनिराहारार्थं पुरे भ्रमन् स्वजनादौ सिंहकेशरमोदकस्य लाहणीं (प्रभावनां) जायमानां वीक्ष्याचिन्तयत्--"अद्य मया मोदका एव ग्राह्या स्तेऽपि सिंहकेशरका एव" इत्यभिग्रहं संप्रधार्य भिक्षायां प्रविष्टः, लोलुपतयाऽन्यत् प्रतिषेधति, तांश्चालभमानः संजातक्लिष्टाध्यवसायः केशरानेव ध्यायन् परिभ्रमति स्म । मध्याह्नो जातः । ततो "न लब्धा मया मोदका" इति प्रणष्टचित्तो बभूव । ततो गृहद्वारे प्रविशन् धर्मलाभस्थाने सिंहकेशरा इति वदति । एवं सकलमपि दिनं भ्रान्त्वा रात्रौ तथैवापणवीथीचत्वरचतुष्पथादिषु भ्रमति स्म । पश्चात्पौरुषीप्रतिलेखनप्रतिक्रमणक्रियादिकालोल्लङ्घनमपि न स्मृतिगोचरीकृतम् । भास्वदंशुभिश्शुम्बिते लोकैः प्रारब्धगमनागमने मार्गे जन्तुरक्षार्थमालोक्य गमनं कार्यमित्यपि न स्मृतम् इत्थं भ्रमन् रजनीयामद्वयं व्यतिचक्राम । ततः श्रावकगृहे प्रविवेश । धर्मलाभस्थाने सिंहकेशरा इत्युवाच । सोऽपि श्रावकोऽभ्युत्थानादिकं विधाय "अतर्कितमकाले मुनेरागमनं कथं जातं ?" इति विचिन्त्य दध्यौ-"अयं साधुः क्षपकोऽद्यैव वासरे मयाऽप्रमत्तभावान्वितो दृष्टः, प्रागप्ययं धनधान्यसुवर्ण-कामिनीदासदास्यादिसंभृतं गृहं त्यक्त्वा वैराग्येण प्रव्रजितः, तत्सर्वमहं वेद्मि, गीतार्थोऽयमस्ति, परं सहसाऽत्रागमनं रात्रौ जातं तस्य को हेतुः ? यद्यस्य विद्यमानदोषान् प्रत्यक्षं कथयामि तदा श्राद्धत्वं मयि कुतः ? परमनेकसिद्धान्तपरार्थज्ञस्याग्रे मम वक्तुं नार्हम् । अथवा महापुरुषाणां चरित्रम-गम्यमकलनीयं चास्मादृशां विषयादिरतानाम्, अतो ज्ञानिन एव जानन्ति परमार्थमस्य मनोगतं, स्वल्पबाह्यव्यवहारातीतचेष्टावीक्षणेन गुणिनां गुणेषु दोषो नोद्भावनीयः । तथापि गुणग्रहण-बुद्ध्याऽवश्यं परीक्षा कार्या । यतोऽसौ प्रतिपातभावयुक्तोऽस्ति ? अथवा लेशमात्रेण ?" इति विचिन्त्य पुनर्दध्यौ-"नास्य काचिद्विषयोन्मुखी चेष्टा दृश्यते, न च परधनस्वर्णहरणादिचेष्टा वीक्ष्यते, वस्त्राच्छादितास्येन भाषते, क्रमेण पदस्थापनयतनापरश्च दृश्यते, अतो नासौ मूलगुणघातकः । आहाराभिलाषुकस्तु ज्ञायते" । इति ध्यात्वा तेन नानारसवत्यः शर्कराः खडखज्जकघृतपूरमोती-चूरकूरकर्पूरवासितसुखाद्याश्चोपढौकिताः । मुनिवरस्तु पुनः पुनः "नेदं ममार्हं नेदं ममार्हं" इत्यवोचत् । तन्निशम्य स श्राद्धो दध्यौ-"अद्यापि साधुरयं मार्गरतः, यतोऽभिग्रहानुचितं नाङ्गीकरोति, तदनुसारेण याञ्चामपि न विधत्ते, ततः कथं ज्ञायतऽस्याभिग्रहः ? परं प्रवेशसमये सिंहकेशरा इति प्रोक्तमस्ति, तेन परिज्ञायते, नूनमनेनैते न क्वापि लब्धाः, तेनास्य चित्तं प्रणष्टं" । ततस्तेन लाहणिकागतमोदकभृतभाजनमुपढौकितं "भगवन् ! ममानुग्रहं कुरु, गृहाण सिंहकेशरान्" । तेन ते

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गृहीताः, स्वस्थीभूतं तस्य मनः । ततः श्राद्धो दध्यौ-"चत्वारो भङ्गा मुनीनां विद्यन्ते, तथाहि-१-रात्रौ गृहीतान्नं रात्रावेव भुङ्क्ते २-रात्रौ गृहीतं दिवसे भुङ्क्तेः ३- दिवसे गृहीतं रात्रौ ४-दिवसगृहीतं दिवसे च । एषु भङ्गेषु अन्त्य एवार्हः, शेषास्त्रयस्तु नार्हाः । कदाचिल्लोलुपतयाऽऽहारं करिष्यति तदोत्तर-गुणहानिर्भविष्यति, क्रमेण मूलगुणघातोऽपि स्यात्, तेन महती क्षतिः, रात्रिभोजनमनन्तदोषदूषितं इत्यसौ गीतार्थत्वाज्जानन्नपि अधुना चेतसि तन्न स्फुरति । अथाहं तथा कुर्वे यदस्य कालनिर्णयेन महागुणः स्यात्" । इति ध्यात्वा युक्तया च विनयं विधायोक्तवान्-"स्वामिन् ! अद्य महद्भाग्यं मम यद्यूयं जङ्गमकल्पवृक्षा गुरुपार्श्वे गृहीतद्वयशिक्षाः सहसा मद्गृहे समागताः, भवदीयसाधुस्वरूपा-वलोकनेन पूर्वमनुयः पुण्डरीकाद्याः सर्वेऽप्यवेक्षिताः, एवं धन्यः संतोषी त्वं, पीयूषसमं भवदाचरणं चरणकरणं च । अहं मोहग्रस्तः कृतेन्द्रियसौख्यप्रशंसः पुत्रकलत्रासक्तश्चैकमुखेन युष्मदीयसद्भाव-वर्णनायामक्षमः । ईदशेऽपि मयि अत्र पादावधारणेन महती कृपा कृता । अथैकं प्रश्नोत्तरं प्रयच्छ-- प्रत्यहं प्रभाते द्वित्रतारकनिरीक्षते गगने सति नमस्कारादि प्रत्याख्यानं करोमि, अद्य मया पुरिमड्ढं प्रत्याख्यातं, तत्किं पूर्णं न वेति ?" ततो मुनिना श्रुतदत्तोपयोगेन तारामण्डलं निरीक्षितं तेनोल्लक्षिता यामद्वयातीता मध्यरात्रीति । उक्तं चोत्तराध्ययने षड्विंशाध्ययने-

पढमं पोरिसिं सज्झायं, बीअं झाणं झीयायई ।
तइयाए निद्दमोखं तु, चउत्थिए भूयोऽवि सज्झायं ।।१।।

अथ रात्रिभागचतुष्कज्ञानोपायमाह-

जं नेइ जया रत्तिं, नखत्तं तंमि नह चउज्झाए । संपत्ते विरमिज्जा, सज्झाय पओसकालम्मि ।।१।।

यन्नयति प्रापयति समाप्तिं यदा रात्रिं नक्षत्रं यस्मिन् दिने यस्मिन् क्षेत्रे यस्मिन्नक्षत्रेऽस्तमिते रात्रिपर्यन्तो भवति, तच्च नक्षत्रं रविनक्षत्रात् प्रायश्चतुर्दशं भवतीति वृद्धाः, तस्मिन्नक्षत्रे नभश्चतुर्थभागे संप्राप्ते विरमेत् निवर्तेत स्वाध्यायात् प्रदोषकाले रात्रिमुखे प्रारब्धादिति शेषः । इत्थं ज्ञात्वाऽपि मनोभ्रमं हा मूढेन मया विरूपमाचरितं, धिङ्मे लोभाभिभूतस्य जीवितम् । भोः श्रावक ! जैनशासनतत्त्वज्ञ ! धन्योऽसि कृतपुण्योऽसि त्वं, यदहं सिंहकेशरप्रदानात्पूर्वार्धप्रत्याख्यानप्रश्नेन संसारे निमज्जन् रक्षितः । सत्येयं तव चोदना, मार्गभ्रष्टस्य मम मार्गप्रापकत्वात् त्वं धर्मगुरुरसि, तव चातुर्यं धैर्यं च वागगोचरं" इत्यात्मनिन्दां तस्य स्तुतिं च विधाय निशां ज्ञात्वा गमनेऽनाचारः स्यात् । अथ गृहं मार्गयित्वा तत्रैकान्ते तस्थौ ध्यानपरः । प्रभाते तदाहारपरिष्ठापनार्थं शुद्ध-स्थण्डिलभूमौ गत्वा विधिना मोदकाँश्चूरयन् ढण्ढणसाधुरिव भावनां दध्यौ, शुकध्यानानलेन कर्मेन्धनानि प्रज्वालयितुं प्रवृत्तो यथा क्षणमात्रेण सकलान्यपि घातिकर्माण्युच्छेद्योत्पन्नकेवलज्ञानो जातः । देवैः स्वर्णाम्बुजं विहितं, तत्र स्थित्वा देशनां ददौ । तदृष्ट्वा तच्छ्रावकादीनां विस्मयोऽभूत् ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

८. रागध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्राऽन्तर्गता विक्रमयशसः कथा ।

अस्तीह काञ्चनपुरं दधानं काञ्चनश्रियम् । भोगावत्यमरपुरीलंकादिभ्योऽतिशायिनीम् ।।१।।
तत्रासीद्विक्रमयशा नाम प्रवरविक्रमः । रिपुरस्त्रैणास्त्रनीरेद्धप्रतापेरंमदो नृपः ।।२।।
तस्य पंचशतान्यासन्नंतःपुरमृगीदृशाम् । यूथभर्तुर्द्विपस्येव करिण्यः प्रेमभाजनम् ।।३।।
तदा चासीत् पुरे तस्मिन् सार्थवाहो महर्द्धिकः । नागदत्तोऽभिधानेन निधानमिव संपदाम् ।।४।।
सौभाग्यलावण्यवती रूपातिशयसालिनी । विष्णोः श्रीरिव विष्णुश्रीर्नाम्ना तस्य गृहिण्यभूत् ।।५।।
अन्योऽन्यनीलिकारागप्रेमाणौ तौ विजहतुः । अव्याहतस्मरक्रीमासरसौ सारसाविव ।।६।।
काकतालीयन्यायेन कथमप्येकदा तु सा । दृक्पथं विक्रमयशोवसुधाभर्तुराययौ ।।७।।
तां प्रेक्ष्य विक्रमयशा दस्युनेव मनोभुवा । लुंट्यमानविवेकस्वश्चेतस्येवमचिन्तयत् ।।८।।
अहो विलोकने अस्या मृग्या इव मनोरमे । बंधुरः केशपाशश्च कलाप इव केकिनः ।।९।।
पक्वबिंबं द्विधाभूतमिवोष्ठौ कोमलारुणौ । पीनोन्नतौ कुचावेतौ स्मरक्रीडाचलाविव ।।१०।।
प्रत्यग्रे इव च लते भुजे सकलकोमले । मध्यं नितान्तक्षमं च मुष्टिग्राह्यं पवेरिव ।।११।।
शेवलालीव रोमावल्यावर्त इव नाभ्यपि । नितम्बः पुलिनमिव लावण्यसरितस्त्वसौ ।।१२।।
रंभास्तंभाविवोरू च पादौ च कमले इव । किमन्यत् सर्वमप्यस्या मनो हरति कस्य न ।।१३।।
जराविक्लवचित्तत्वादनौचित्येन वेधसा । निवेशिता काप्यपात्रे शक्रस्तंभः श्मशानवत् ।।१४।।
एतामपहरिष्यामि क्षेप्स्याम्यन्तःपुरे निजे । अनौचित्यनिवेशित्वदोषः स्रष्टुः प्रयातु च ।।१५।।
एवं मनसि निश्चित्य कंदर्पविधुरोऽथ ताम् । जग्राह विक्रमयशा यशो म्लानीचकार च ।।१६।।
अंतरंतःपुरं क्षिप्त्वा रमयामास तां सदा । विचित्रस्मरलीलाभिरेकतानः स भूपतिः ।।१७।।
आविष्ट इव भूतेन धत्तूरमिव लीढवान् । अपस्मारमिव प्राप्तो मदिरामिव पीतवान् ।।१८।।
आघ्रात इव सर्पेण सन्निपातमिवाप्तवान् । विधुरस्तद्वियोगेन सार्थवाहो बभूव सः ।।१९।। युग्मम् ।।
तया सह वियुक्तस्य सार्थवाहस्य तस्य च । संयुक्तस्य च नृपतेः कालोऽगाद्दुःखसौख्यकृत् ।।२०।।
विष्णुश्रिया रममाणे नृपे तस्मिन्निरंतरम् । ईर्ष्यया कार्मणं चक्रुः क्रुद्धाः शुद्धांतयोषितः ।।२१।।
कार्मणेन च सा तेन क्षीयमाणा क्षणे क्षणे । मूलवम्येव लतिका जीवितेन व्यमुच्यत ।।२२।।
नृपोऽपि मृत्युना तस्या जीवन्मृत इव स्थितः । प्रलापी च विलापी च नागदत्त इवाभवत् ।।२३।।
नादत्त चानले क्षेप्तुं तद्विष्णुश्रीकलेवरम् । प्रिया ममैषा प्रणयतूष्णीकेत्यनिशं वदन् ।।२४।।
मंत्रिणो मंत्रयित्वाथ वञ्चयित्वा च भूपतिम् । अरण्ये चिक्षिपुर्नीत्वा तद्विष्णुश्रीकलेवरम् ।।२५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

त्वामासीरधुनैवेह किं प्रिये न निरीक्ष्यसे । तिरोधानक्रीड्यालं वियोगस्य वयस्यया ।।२६।।
नर्मणापि वियोगाग्निर्मर्माविद्युज्यते न हि । मदर्त्या तव किं नार्तिरावां ह्येकात्मकौ सदा ।।२७।।
एकाकिनी किमगच्छः क्रीडासरिति कौतुकात् । क्रीडाद्रिमथवारोहः क्रीडोद्यानमथाध्यगाः ।।२८।।
मां विना क्रीडसि कथमायाम्येष इति ब्रुवन् । तेषु तेषु प्रदेशेषु बभ्रामोन्मत्तवन्नृपः ।।२९।।
राज्ञश्च त्यक्तपानान्नवृत्तेर्गतवति त्र्यहे । मरणाशंकिनोऽमात्यास्तस्या वपुरदर्शयन् ।।३०।।
अच्छभल्लवदत्यन्तविसंस्थुलशिरोरुहम् । शशवच्छशरे वन्या कंकैराकृष्टलोचनम् ।।३१।।
चर्वितोरसिजद्वंद्वं गृध्रैः पिशितगृध्नुभिः । समाकृष्टांत्रभारं च शिवाभिरशिवाकृति ।।३२।।
छादितं मक्षिकावृंदैर्मधुमंडकजालवत् । पिपीलिकाभिश्चाश्लिष्टं पातभग्नांडभाण्डवत् ।।३३।।
पूतिगंधि तदालोक्य सद्यो विष्णुश्रियो वपुः । विरक्तो विक्रमयशाश्चिन्तयामासिवानिति ।।३४।।

।। चतुर्भिः कलापकम् ।।

अहो असारे संसारे सारं वस्तु न किंचन । सारबुद्ध्या धिगेतस्यां मोहिताः स्मः कियच्चिरम् ।।३५।।
आहार्यैरेव हि गुणैर्हरिद्रारागसन्निभैः । अहो ह्रियन्ते नारीभिर्न कश्चित् परमार्थवित् ।।३६।।
यकृच्छकृन्मलश्लेष्ममज्जास्थिपरिपूरिताः । स्नायुस्यूता बहीरम्याः स्त्रियश्चर्मप्रसेविकाः ।।३७।।
बहिरन्तर्विपर्यासः स्त्रीशरीरस्य चेद्भवेत् । तस्यैव कामुकः कुर्याद्बध्रगोमायुगोपनम् ।।३८।।
स्त्रीशस्त्रेणापि चेत् कामो जगदेतज्जिगीषति । तुच्छपिच्छमयं शस्त्रं किं नादत्ते स मूढधीः ।।३९।।
संकल्पयोनिना येन हहा विश्वं विडम्बितम् । तदुत्खनामि संकल्पमूलमस्यैव सर्वतः ।।४०।।
एंव विचिन्त्य संसारविरक्तः स महामनाः । सुव्रताचार्यपादान्ते गत्वा दीक्षामुपाददे ।।४१।।
चतुर्थषष्ठमासादितपोभिर्देहनिस्पृहः । आत्मानं शोषयामास करैर्जलमिवार्यमा ।।४२।।
दुस्तपं स तपस्तप्त्वा कालयोगाद्विपद्य च । सनत्कुमारे कल्पेऽभूत् प्रकृष्टायुः सुरोत्तमः ।।४३।।

८. रागध्याने श्रीआवश्यकहारिभद्रीयवृत्तौ दामन्नकोदाहरणम् ।

दामण्णगोदाहरणं तु-रायपुरे णगरे एगो कुलपुत्तो जातीतो, तस्स जिणदासो मित्तो, तेण सो साधुसगासं णीतो, तेण मच्छयमंसपञ्चक्खाणं गहितं, दुब्भिक्खे मच्छाहारो लोगो जातो, इतरोवि सालेहिं महिलाए खिंसिज्जमाणो गतो, उदिण्णे मच्छे दट्ठुं पुणरावत्ती जाता, एवं तिण्णि दिवसे तिण्ण वारं गहिता मुक्का य, अणसणं कातुं रायगिहे णगरे मणियारसेट्ठिपुत्तो दामण्णगो णाम जातो, अट्ठवरिसस्स कुलं मारीए उच्छिण्णं, तत्थेव सागरवोदसत्थवाहस्स गिहे चिट्ठइ, तत्थ य गिहे

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भिक्खट्ठं साधुणो पइट्ठा, साधुणा संघाडइल्लस्स कहितं, एतस्स गिहस्स एस दारगो अधिपती भविस्सति, सुतं सत्थवाहेण, पच्छा सत्थवाहेण पच्छन्नं चंडालाण अप्पितो, तेहिं दूरं णेतुं अंगुलिं छेत्तुं भेसि तो णिव्विसओ कतो, णासंतो तस्सेव गोसंधिएण गहितो पुत्तोत्ति, जोव्वणत्थो जातो, अण्णता सागरपोतो तत्थ गतो तं दट्ठूण उवाएण परियणं पुच्छति-कस्स एस ?, कथितं अणाधोत्ति इहागतो, इमो सोत्ति, ता लेहं दाउं घरं पावेहित्ति विसज्जितो, गतो रायगिहस्स बाहिपरिस देवउले सुव्वति, सागरपोतधूता विसा णाम कण्णा तीए अज्झणियवावडाए दिट्ठो, पितुमुद्दमुद्दितं लेहं दट्ठुं वाएति-एतस्स दारगस्स असोइयमक्खितपादस्स विसं दातव्वं, अणुस्सारफुसणं, कण्णगदाणं, पुणोवि मुद्देति, णगरं पविट्ठो, विसाऽणेण विवाहिता, आगतो सागरपोतो, मातिघरअज्झणिय-विसज्जणं, सागरपुत्तमरणं सोतुं सागरपोतो हितयफुट्टणेण मतो, रण्णा दामण्णगो घरसामी कतो, भोगसमिद्धी जाता ।

८. रागध्याने श्रीमहावीरचरित्रव्यावर्णितः सांख्यमतप्रस्थापककपिलदृष्टान्तः

अण्णया य धम्मदेसणं कुणमाणस्स तस्स कविलो नाम रायपुत्तो सगासमल्लीणो, तेणावि पंचमहव्वयरक्खणपहाणो पसमाइगुणाहिट्ठिओ पंचिंदियनिग्गहविसुद्धो निस्सेयसफलदायी परूविओ से सुस्समणधम्मो, कविलेण य वुत्तं-भयवं ! अण्णहा तुम्हे बज्झनेवत्थमुव्वहह, इमं च अण्णहा पण्णवेह, किमेत्थ तत्तं ?, मिरिइणा भणियं-भद्दा ! एसो सुसाहुधम्मो तुह निवेइओ, इमं पुण जहुत्तसाहु-धम्मासमत्थयाए पबलपावकम्मयाए दुग्गइगमणसीलयाए य सबुद्धिसिप्पपरिकप्पियं कुलिंगं मए अब्भुवगयं, तात ! एयं पारगच्छियं, अओ पडिवज्जसु निस्संसयं समणधम्मं, कविलेण वुत्तं-भयवं ! तुम्ह संतिए एत्थ तहावि अत्थि किंपि णिज्जराठाणं नवा ?, मिरिइणा भणियं-भद्द ! समणधम्मे ताव अत्थि, इहावि मणागंति, एवं च तेण अजहट्ठियवत्थुदेसणओ निविट्ठो सागरोवम-कोडाकोडिमेत्तो संसारोत्ति । नणु किं एत्तियमेत्तविवरीयकहणेऽवि एवं संभवइ ?, किमिह चोज्जं ?, जेण-

विवरीयजिणागमपयमेत्त(स्स)परूवणेऽवि मिच्छत्तं । अप्पत्थभोयणेण व दुज्जणगं रोगमज्जिणइ ।।१७८।।

एत्तोच्चिय मूलुत्तरगुणगणविरहेऽवि लिंगधारीवि । सुव्वइ सव्वन्नुमयं जहट्ठियं पन्नवेमाणो ।।१७९।।

किं एत्तोऽवि हु ए(पा)वं जं सरणगए णु भवभएण जणे । उम्मग्गदेसणातिक्खखग्गधाएण विद्दवइ ।।१८०।।

गरुयंपि कयं पावं न तहा जीवस्स दुक्खमावहइ । जह जिणवरवयणपसूयसमयविवरीयपरिकहणं ।।१८१।।

अलं वित्थरेण । पत्थुयं भण्णइ -

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सो कविलो सन्निवायाभिभूओ इव परमोसहं महागहपरिग्गहिओ इव तहाविहं मंतकिरियं पुव्ववुग्गाहिओ इव सम्मपरिकहणं महापबलमिच्छत्तणओ न पडिवण्णो मणागंपि समणधम्मं, तओ मिरिइणा चिंतियं-न ताव परिगिण्हइ एस जइधम्मं, ममावि छत्तगाइपरियरुव्वहणे गामंतरगमणे सरीरगेलण्णे अङ्गंतिगपओयणे एगेण सहाइणा कज्जमत्थि, तम्हा पव्वावेमि एयंति चिंतिऊण कविलो गाहिओ नियदिक्खं, सिक्खविओ किंपि बज्झं कट्ठाणुट्ठाणं, एवं च सो नियंसियकासायवत्थजुयलो पाणिपरिग्गहियतिदंडो पवित्तिगाप-मुहोवगरणपरियरिओ गामाणुगामं पियरं व देवयं व सामियं व परमोवगारिणं व रयणनिहाणदेसगं व जीवियदायारं व मिरिइं पज्जुवासंतो परिभमइत्ति, एवं च काले वोलंतंमि मिरिई चउरासीइं पुव्वसयसहस्साइं सव्वाउयं पालइत्ता अणालोइयपडिक्कंतनियदुच्चरिओ कालं काऊण बंभलोए कप्पे दससागरोवमाऊ देवो जाओत्ति ।

सोऽवि कविलो अपढियसत्थपरमत्थो बज्झोवगरणधरणमेत्तरसिगो जहादिट्ठकट्ठाणुट्ठाणपत्तपरमकट्ठो एगागी परियडइ । मुणिविलक्खणागारदंसणेण पुव्वकमेण समल्लियइ य से समीवे धम्मसवणत्थं बहू जणो, सोऽवि अवियक्खणत्तणओ समणसत्थेसु तहाविहधम्मदेसणमवियाणमाणो 'युक्तायुक्तपरिज्ञान-शून्यचित्तस्य देहिनः । अलब्धमध्यताहेतुर्मौनं सर्वार्थसाधनम् ।।१।।' इति परिचिंतंतो गाढपरिग्ग-हियमोणव्वओ दिणगमणियं करेइ । अन्नया य आसुरिरायपुत्तपमुहं सिस्सगणं पव्वाविऊण जथादिट्ठं बज्झाणुट्ठाणं दंसिऊण य चिरकालं कयबालतवो मरिऊण बंभलोए कप्पे देवो उववज्जइ तहिं च –

असुयं अदिट्ठपुव्वं सुरलच्छिं पेच्छिऊण तारिच्छं । अणुचिंतिउं पयत्तो अइविम्हियमाणसो कविलो ।।१८२।।
किं मन्ने होज्ज मए दारुणरूवं तवं समायरिउं (यं) ? । किं मयलंछणसच्छहमणुचरियमणुत्तमं सीलं ? ।।१८३।।
किं वा दुक्करतवनियमनिरयचित्तेसु साहुपत्तेसु । होज्ज निहित्तं वित्तं नियभुयजुयलज्जियं पुव्विं ? ।।१८४।।
किं वा साहसमवलंबिऊण खित्तं हवेज्ज नियदेहं । पज्जलियतिव्वजालासहस्सजडिलंमि जलणंमि ।।१८५।।
एमाइविविहसंसयसंकियचित्तो खणं विगमिऊणं । सम्मं वियाणणट्ठा ओहिण्णाणं पउंजेइ ।।१८६।।
पारिव्वज्जपवन्नं अह देहं नियइ तं विगयजीयं । तेऽवि ससिस्से गंथत्थबाहिरे मुद्धबुद्धीए ।।१८७।।
ताहे नियदंसणपक्खवायओ चत्तदेवकायव्वो । ओयरिओ आयासे सिस्साणं तत्थ(त्त) कहणट्ठा ।।१८८।।
वरपंचवण्णमंडलमज्झगओऽदिस्समाणरूवो य । आसुरिपमुहे सिस्से भासइ संबोहिऊवेणं ।।१८९।।
अव्वत्ताओ वत्तं पभवइ इच्चाइ तत्तसंदोहं । तो सट्ठितंतगंथं तं सोच्चा आसुरी कुणइ ।।१९०।।
अव्वोच्छित्ती य तओ जाया सीसप्पसीसवग्गस्स । एवं सति वित्थरियं सव्वत्थ तिदंडिपासंडं ।।१९१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

९. द्वेषध्याने श्रीआवश्यकहारिभद्रियटीकादर्शिता मधुदेवपिप्पलादयोः कथा ।

इह सुलसासुभद्रानामकं परिव्राजिकाद्वयमासीत्, सुलसा अतीवानेकशास्त्रकोविदा, अत्रान्तरे याज्ञवल्क्यनाम्ना परिव्राजकेन यो मां वादे विजयते तस्याहं शिष्य इत्युद्घोषणापूर्वकं पटहो दापितः, सुलसया च जितोऽसौ, तच्छिष्यत्वं चानेन प्रपन्नम्, अतिपरिचये च तयोरकार्यप्रवृत्तिरभूद्, गर्भश्च सुलसायाः समभवद्, विज्ञाते च सुभद्रया निष्ठुरमुपालब्धाऽसौ, प्रच्छन्ने च धृता, अन्यस्मिंश्च वासरे रात्रौ पुत्रं प्रसूता, अविज्ञाता च सुभद्रया पिप्पलवृक्षस्याधस्तात्पुत्रं परित्यज्य परिव्राजकेन सह रजन्यामेव निर्जगाम, प्रातश्च पदानुसारेणान्वेषयन्त्या सुभद्रया डिम्भो दृष्टः, अयं च बुभुक्षितो विस्रसातः पिप्पलफलं मुखे पतितमास्वादितवानिति पिप्पलाद इति नाम तस्य कृतं, वृद्धिं नीतः, पाठितश्चासौ सुभद्रया, वाग्गमी चातीव जातः, श्रुतमातृपितृसम्बन्धश्च मातरि पितरि च प्रद्वेषमापन्नोऽनार्यान् वेदाँश्चकार, तेषु चेदं प्ररूपितवान्-यदुत राजभिरशिवादिशान्तिनिमित्तं स्वर्गावाप्तये च पशुतुरगगजमानुषादिभिर्यागः करणीय इति, तस्य च 'अलिएहि य वसुराया' इत्यादिकथानकप्रसिद्धः पर्वतको नाम मित्रमभूत्, तेन चोक्तं-अजैर्यष्टव्यमिति वेदेऽपि प्रतिपादितमेवेति शोभनं त्वया प्ररूपितमिति । अपरं च मधुनामा राजपुत्रः कुत्रचित् स्वयंवरमण्डपमिलितसमस्तराजवर्गेणापमानितस्तेषु च प्रद्वेषमापन्नो मृत्वा व्यन्तरेषूत्पन्नः, स चाचिन्तयद्-भव्यमिदं परिव्राजकसुतेन परिकल्पितं, यद्येतद्राजानोऽनुतिष्ठन्ति तदा सर्वेऽपि अमी नरकं यान्तीति मम वैरसिद्धिर्भवतीति विचिन्त्य च तमुवाच-प्ररूपय त्वमिदं लोके साहाय्यमहं करिष्यामीत्यभिधाय सर्वत्र रोगानुत्पादितवान्, परिव्राजकेन च राजानोऽभिहिताः-यदि पश्वादिभिर्यज्ञं कुरुत तदा सर्वमिदमुपशाम्यति, तेऽपि च पश्वादयो यज्ञे निहता दिवं यास्यन्ति, नात्र कश्चिद्दोष इति, राजानोऽपि च तथैवानुष्ठितवन्तः, त्रिदिवगमनप्रतीतिनिमित्तं यज्ञनिहतपश्वादीन्विमाने समारोप्य नभसा गच्छतो मधुदेवो जनस्य दर्शयति रोगाँश्च सर्व्वानुपशमयतीति लोकस्यात्रार्थे स्थिरता बभूव, ततश्च पिप्पलादेनेत्थं प्ररूपयता गच्छता कालेन राज्ञः सकाशादानीय मोक्षमेतौ गमिष्यत इति व्याजेन मातापितरौ यज्ञे हुतौ, तदर्थत्वादेव सर्व्वारम्भस्येति, तत्कालादारभ्यानार्यवेदप्रवृत्तिरिति संक्षेपः ।

९. द्वेषध्याने श्रीआख्यानकमणिकोशाऽन्तर्गतधर्मरुचिनाविकनन्दयोः प्रसंगपटः ।

बहुजीवसंकुलाए गंगाए हसियसुरसमूहाए । उत्तारइ मोल्लेणं जणनिवहं नाविओ नंदो ।।१।।

अह अन्नया य साहू धम्मरुई विविहलद्धिसंपन्नो । उत्तिन्नो गंगाए धरिओ सो तेण मोल्लकए ।।२।।

अइकंते पहरदुगे वि जाव न हु मेल्लए तओ विहिओ । सहस त्ति छारपुंजो मुणिणा सो तेउलेसाए ।।३।।

मरिऊण समुप्पन्नो सभाए घरकोइल्ले किलिट्ठमणो । धम्मरुई वि य पत्तो विहरंतो तत्थ कालेण ।।४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गामाओ विणिक्खंतो भिक्खं गहिऊण भुंजए जाव । तत्थ घरकोइलो सो पुव्वभवब्भासओ रोसा ।।५।।
विक्खिरइ कयवराई मुणी वि अन्नत्थ उट्ठिउं जाइ । सो कुणइ तं तहेव य एवं तइए वि ठाणम्मि ।।६।।
तो चिंतइ धम्मरुई को एसो नंदसरिसगो पावो । कूरं निरिक्खिऊणं सो वि हु भासीकओ तेण ।।७।।
तत्तो मयंगतीरे हंसो मरिऊण सो समुप्पन्नो । कालेण तत्थ पत्तो विहरंतो धम्मरुइसाहू ।।८।।
तं दट्ठुं सो हंसो पक्खउडं भरिय सीयलज्जलस्स । पुव्वभवकोववसओ आछंटइ सिसिरसमयम्मि ।।९।।
एवं पुणो पुणो वि हु थक्कइ न हु जाव ताव मुणिणा वि । को एस नंदकप्पो ?त्ति झामिओ तेउलेस्साए ।।१०।।
मरिऊणं संजाओ अंजणसेलम्मि दुद्धरो सीहो । सह सत्थेणं पत्तो कालेणं तत्थ साहू वि ।।११।।
दट्ठूण तयं सहसा सत्थं मोत्तूण धावए कुविओ । जा मुणिवरस्स समुहो निवारिओ ताव लोएण ।।१२।।
जा कह वि नो नियत्तइ को एसो नंददेसिओ पावो ? । मुणिणा वि विगप्पउं सहसा छारीकओ सो वि ।।१३।।
मरिऊणं सो जाओ बडुओ वाणारसीए नयरीए । भिक्खट्ठाए पविट्ठो दिट्ठो सो तेण धम्मरुई ।।१४।।
तो डिंभे रममाणं मोत्तूणं कुणइ जाव उवसग्गं । पुव्वभववइरभावा ता तत्थ वि मारिओ तेण ।।१५।।
मरिऊणं संजाओ राया तत्थेव सुमरिउं जाइं । चिंतेइ तेण मुणिणा दड्ढो हं एत्तियभवेसु ।।१६।।
इन्हिं पि जइ डहेज्जा न हु होही रज्जसंपया मज्झ । पेच्छेमि तयं जइ ता तो हं खामेमि नियमेण ।।१७।।
तज्जाणणानिमित्तं सड्ढसिलोगेण पुव्वभवचरियं । नियइं सव्वजणेणं पढावई तं सिलोगमिमं ।।१८।।

"गंगाए नाविओ नंदो, सभाए घरकोएलो ।
हंसो मयंगतीराए, सीहो अंजणपव्वए ।।१।।
वाणारसीए बडुओ, राया तत्थेव आगओ ।"

एवं बीयसिलोगं, जो पूरइ तस्स पत्थिवो देइ । रज्जस्सऽद्धं उग्घोसियं च नयरीए तो लोगो ।।१९।।
रइउं सबुद्धिविहवाणुसारओ पच्छिमऽद्धमवणिवइं । अणुसरइ तयं दट्ठुं न पच्चओ होइ नरवइणो ।।२०।।
अह धम्मरुई विहरिय अन्नत्थ समागओ तहिं वुत्थो । उज्जाणम्मिं उज्जाणपालएणं पढिज्जंतं ।।२१।।

गंगाए नाविओ इय पयाइं निसुणित्तु तेण सो भणिओ ।
वारं वारं परिपढसि कीस तं भद्द ! एयं ? ति ।।२२।।

सव्वो वि साहिओ तेण वइयरो तस्स मुणिय परमत्थं । तत्तो मुणिणा तं पच्छिमद्धमापूरियं एवं ।।२३।।

एएसिं घायगो जो उ सो एत्थेव समागओ ।।२।। त्ति

तो तं संपुन्नपयं धेत्तूणाऽऽरामिओ निवसयासं । पत्तो निवेइयं तं दट्ठुं राया भउव्विग्गो ।।२४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मुच्छावसेण महिमंडलम्मि पडिओ तओ परियणेण । एसो असोक्खकारी पहुणो इय जायकोवेण ।।२५।।
पिट्टिज्जंतो सो आह कव्वमेयं कयं मए नेय । किंतु महं समणेणं समप्पियं दुक्खमूलं ति ।।२६।।
उवलद्धचेयणेणं रन्ना उज्जाणपालओ पुट्ठो । केण कयं कव्वमिमं ? सो भणइ वणम्मि मुणिण त्ति ।।२७।।
तो तत्थ निवो पत्तो रिसिणो वंदणयखामणनिमित्तं । वंदित्तु खामिऊणं पडिवज्जिय सावगं धम्मं ।।२८।।
संपत्तो नियभवणे मुणी वि सरिऊण पुव्वदुच्चरियं । आलोइय पडिकंतो सम्मं गुरुपायमूलम्मि ।।२९।।
सुक्कज्झाणानलदड्ढघाइकम्मिंधणो विमलनाणो । निम्महियसेसकम्मो सासयसोक्खं सिवं पत्तो ।।३०।।

९. द्वेषध्याने श्रीकल्पसूत्रसुबोधिकायां वीरकदेवस्यावसरः ।

कुत्रचिन्नगरे केनचिद्राज्ञा वीरकशालापतिभार्या वनमालानाम्नी सुरूपेति स्वान्तः पुरे क्षिप्ता, स च शालापतिस्तस्या वियोगेन विकलो जातो, यं कञ्चन पश्यति ते 'वनमाला' 'वनमाला' इति जल्पति, एवं च कौतुकाक्षिप्तैरनेकैर्लोकैः परिवृतः पुरे भ्रमन् वनमालया समं क्रीडता राज्ञा दृष्टः, ततश्चाऽस्माभिरनुचितं कृतमिति चिन्तयन्तौ तौ दम्पती तत्क्षणाद्विद्युत्पातेन मृतौ हरिवर्षक्षेत्रे युगलिकत्वेन समुत्पन्नौ, शालापतिश्च तौ मृतौ श्रुत्वा 'आः पापिनोः पापं लग्नम्' इति सावधानोऽभूत्, ततोऽसौ वैराग्यात्तपस्तप्त्वा व्यन्तरोऽभूद्, विभङ्गज्ञानेन च तौ दृष्ट्वा चिन्तितवान्-अहो इमौ मद्वैरिणौ युगलसुखमनुभूय देवौ भविष्यतस्तत इमौ दुर्गतौ पातयामीति विचिन्त्य स्वशक्त्या सङ्क्षिप्तदेहौ तौ इहाऽऽनीतवान्, आनीय च राज्यं दत्वा सप्त व्यसनानि शिक्षितौ, ततस्तौ तथाभूतौ नरकं गतौ, अथ तस्य वंशो हरिवंशः, अत्र युगलिकस्याऽत्राऽऽनयनं शरीरायुः सङ्क्षेपणं नरकगमनं चेति सर्वमाश्चर्यम् ।

१०. मोहध्याने श्रीपाण्डवचरित्रग्रन्थे विष्णुतनुं वहतो बलभद्रस्य मोहविडम्बना ।

अथेत्यव्याहतज्ञानो, व्याजहार मुनीश्वरः । बलः सलिलमादाय, केशवान्तिकमाययौ ।।१।।
जल्पति स्म च तं भ्रातरुत्तिष्ठोत्तिष्ठ सत्वम् । स्फीतमस्तीदमानीतमम्भः सुरभि शीतलम् ।।२।।
तत् प्रक्षाल्य क्षणादास्यं, कणेहत्य निपीय च । दूरकान्तारसंचारसूतिः श्रान्तिर्विनीयताम् ।।३।।
अव्याहरति कंसारौ, सीरभृत् पुनरब्रवीत् । किमु रुष्टोऽस्यरिष्टारे !, कालक्षेपान्मनागपि ? ।।४।।
एष तेऽसांप्रतं रोषः, सांप्रतं तु प्रसीद मे । देशे दवीयसि प्राप्तिर्वारिणोऽत्रापराध्यति ।।५।।
तथाप्यस्मिन्नजल्पाके, सीरपाणिरचिन्तयत् । शयानोऽस्ति पथि श्रान्तः, शेतां नामैष तन्मनाक् ।।६।।
इत्यालक्ष्य स्थितः कृष्णं, परितः कृष्णमक्षिकाः । भ्रमन्तीर्वीक्ष्य संभ्रान्तः, सोऽपि(प)निन्येऽवगुण्ठनम् ।।७।।
ततोऽपश्यदपेतासुं, कंसविध्वंसनं हली । शोणितैश्चोल्बणं भल्लिव्रणं चरणपल्लवे ।।८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

कोपाटोपात्ततः सिंहनादमुज्चैश्चकार सः । येनारण्यमृगास्त्रेसुः, कम्पते स्म च काश्यपी ।।९।।
जगाद च मदाध्मातः, पातकी ननु कोऽस्ति भोः ? । निद्राणमतुलप्राणं, योऽवधीन्मम बान्धवम् ।।१०।।
सुप्त-मत्त-प्रमत्तेषु, बाल-स्त्री-मुनि-गोष्वपि । क्रूरकर्मैकचाण्डालोऽप्यभिज्ञः प्रहरेत कः ? ।।११।।
दोर्दर्पोऽप्यस्ति चेत् कश्चित्, तत् स्वमाविःकरोतु सः । भुजोष्मज्वरिणां बाहुः, सर्वेषामेष भेषजम् ।।१२।।
इत्याद्यनेकशः कोपाद्विरमुद्गीर्य लाङ्गली । तारं पूत्कारमुन्मुच्य, मूर्छितः क्ष्मातलेऽपतत् ।।१३।।
क्षणाच्चैतन्यमासाद्य, शीतैः कान्तारमारुतैः । रोदयञ्श्वापदान् काममाक्रन्दैर्विललाप सः ।।१४।।
हा ! विश्वेष्वेकशौण्डीर !, हा ! रिपुष्वेकरोषण ! । हा ! गुणिष्वेकधौरेय !, हा ! गुरुष्वेकवत्सल ! ।।१५।।
हा ! कंसध्वंसघोरांस !, हा ! कालनलनीरद ! । हा ! निःसन्धजरासन्ध !, हा ! रणक्रूरविक्रम ।।१६।।
हा ! लक्ष्मीकेलिपल्यङ्क !, हा ! निःशङ्कशिरोमणे ! । हा ! यशःकैरवाराम !, हा ! रामनयनोत्सव ! ।।१७।।
शस्त्राघातैर्द्विषां तैस्तैः, श्रमोऽप्यासीन्न ते पुरा । संप्रत्यङ्घ्रिव्रणादस्मान्मृत्युः श्रद्धीयतां कथम् ? ।।१८।।
तदुत्तिष्ठ द्रुतं भानुरारोहत्यन्तरम्बरम् । न खल्वत्यातपेऽल्पीयोऽप्यग्रतो गन्तुमीश्वहे ।।१९।।
चरणव्रणपीडाभिर्न चेच्चलितुमीशिषे । तदाऽऽरोह मम स्कन्धं, बन्धो ! किमसि मोहितः ? ।।२०।।
किमिति क्रन्दतोऽप्येवं, वितरस्युत्तरं न मे ? । इमे हि श्रवसी पातुमुत्सुके ते वचोऽमृतम् ।।२१।।
रोषं मयि पुराऽकार्षीः, साऽऽगस्यपि न जातुचित् । इदानीं तु विनाऽप्यागः, केयं ते दीर्घरोषिता ? ।।२२।।
हा ! दैव ! यद्ययं नेतुं, चिन्तितोऽभूदशामिमाम् । तत्त्वया किं कृतो विश्वमौलिललितशासनः ? ।।२३।।
यद्वा ज्ञातं नितान्तं यं, विडम्बयितुमीहसे । तस्य कन्दलयस्येवमतीव महतीः श्रियः ।।२४।।
एतैर्वा किमुपालम्भैर्भ्रातर्यावः पुरः क्वचित् । दैवाय प्रभविष्यावस्तत्रामुष्मै दुरात्मने ।।२५।।
निद्रासुखासिकालोभाद्, गन्तुमुत्सहसे न चेत् । भ्रातस्तदद्य तिष्ठावः, सच्छायेऽत्रैव कानने ।।२६।।
इत्यादि प्रलपन्नुच्चावचेन वचसा मुहुः । सीरभृत्तं दिनं तां च, यामिनीत्यवाहयत् ।।२७।।
प्रगे च वचनैस्तैस्तैरनुतिष्ठन्तमच्युतम् । जीवद्बुद्ध्या निजस्कन्धमध्यारोप्य बलोऽचलत् ।।२८।।
स्कन्धन्यस्तहरिर्बन्धुस्नेहव्यामोहितो हली । भ्राम्यति स्म सरिच्छैलकाननानि दिवानिशम् ।।२९।।
पुष्पैर्वन्यद्रुमाणां च, नित्यमानर्च शार्ङ्गिणम् । एवं रामोऽतिचक्राम, षण्मासान् पर्यटन् वने ।।३०।।
प्राप प्रावृडथाऽऽशान्तान्नीलयन्ती बलाहकैः । नूतनैरङ्कुरोद्गारैर्मेदिनीमण्डलं पुनः ।।३१।।
अथ ग्रावमयं शैलादुत्तीर्ण हेलया हली । स्यन्दनं कंचिदद्राक्षीत्, समभूभागभङ्गुरम् ।।३१।।
सज्जयंस्तं जजल्पेऽथ, सारथिः सीरपाणिना । रथेऽस्मिन् कणशो भग्ने, कस्ते मूढ ! मुधा श्रमः ? ।।३३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सारथिस्तमथोवाच, संगरेषु सहस्रशः । निर्व्यूढोऽप्यधुना पादप्रहारेणापि यो मृतः ।।३४।।
सोऽयं चेद्विश्वजीवातुर्जीविता तव बान्धवः । खण्डशस्तद्गतोऽप्येष, प्रगुणीभविता रथः ।।३५।।
क्व मे बन्धुर्मृतोऽस्तीति, कामं सासूयमानसः । तं मुहुः कुटिलं पश्यन्नचालील्लाङ्गली पुरः ।।३६।।
रोपयन्तं निरूप्याथ, शिलायां नलिनीं क्वचित् । सारम्भमभ्यधात् कंचिदुच्चैःशब्दं हसन् हली ।।३७।।
जणकयनिग्घिणसम्माभिहाणओ निग्घिणत्तणओ ।।१०५।।
संबलबलमवलंबिय एयस्स अहं सुहेण लंघिस्सं ।
इय चिंतिय संचलिओ कयसंभासेण सह तेण ।।१०६।।
तो पहरदुगे सलिलप्पएसमासज्ज सद्धडो तुरियं ।
अवलोडिऊण सलिलेण सत्तुए जिमइ एगागी ।।१०७।।
अह तेण मूलदेवो वयणेण वि न हु निमंतिओ जाव ।
चिंतेइ नूणमिण्हिं विस्सरियमिमस्स मह सुहिणो ।।१०८।।

अवरण्हे उण नियमा न वंचिही एस चिंतए जाव । चित्तम्मि मूलदेवो तो भोज्जा बंभणो पत्तो ।।१०९।।

तुंदं परामुसंतो मलमाणो हत्थजुयलमणवरयं । दाढियमवलूहंतो उड्डग्गारे प्रमुंचंतो ।।११०।।

अह बहलतरुतलम्मिं खणमेत्तं ताव विस्समामो त्ति ।
खरकिरणताविय़तणू मज्झत्थो जाव दिवसयरो ।।१११।।
पच्छा पुरओ गमणं काहामो इय कुमारभणियम्मि ।
वीसमिउं खणमेक्कं पुणो पयट्टा पहे गंतुं ।।११२।।
एत्थंतरम्मि कुमरं आवइकलियं वियाणिउं रन्नो ।
मित्तो अत्थनिमित्तं व दूरमवगाहए जलहिं ।।११३।।
तो सद्धडेण भुत्तं तहेव एगागिणा वियाले वि ।
न य वायामेत्तेण वि निमंतिओ कढिणहियएण ।।११४।।
बीयदियहे वि तह वि हु निमंतिओ तेण न य मणागं पि ।
तइयम्मि दिणे अडविं अइकंता दो वि ते कह वि ।।११५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संपत्तवसिमदेसो तस्साऽऽसाधरियनिययपाणधणो ।
चिंतेइ मूलदेवो उवयारी बंभणो मज्झ ।।११६।।

पभणइ वज्ज जहिच्छं भद्द ! तुमं किंतु एज्ज कइया वि ।
मह रज्जसंपयं जाणिऊण जं देमि ते गामं ।।११७।।

इय भणिय मूलदेवो पहरदुगे गाममागओ संतो । करकलियपत्तपुडओ भिक्खं भमिउं समाढत्तो ।।११८।।
केवलकुम्मासेहिं भरित्तु पुडयं तडागमणुसरिउं । जा निग्गच्छइ तत्तो संपेच्छइ मुणिवरं एगं ।।११९।।
मासोववाससोसियसरीरसंपत्तिमसमसुहलेसं । पारणगपत्तदिवसं पविसंतं गाममज्झम्मि ।।१२०।।
दट्ठूण मूलदेवो चिंतइ मह पुन्नपरिणई एसा । मरुरन्नम्मि व एसो जं दिट्ठो कप्परुक्खो व्व ।।१२१।।
इय चिंतिऊण पभणइ भत्तिभरुल्लसियबहलरोमंचो । गिण्हसु करुणं काउं कुम्मासे मज्झ मुणिनाह ! ।।१२२।।
दव्वाइचउहसुद्धिं पउंजिउं गिण्हए मुणिवरो वि । एत्थंतरम्मि कुमरो रंजियहियओ भणइ एवं ।।१२३।।
धन्नाणं खु नराणं कुम्मासा हुंति साहुपारणए । इय भणिए भणइ तओ मुणिभत्ता देवया गयणे ।।१२४।।
मग्गसु वरं महायस ! जं रोयइ तुज्झ उत्तरद्धेण । गणियं च देवदत्तं दंतिसहस्सं च रज्जं च ।।१२५।।

इय भणइ जाव कुमरो भणइ तओ देवया पहिट्ठमणा ।
मुणिदाणपुन्नपायवफलमिणमचिरेण तुह होही ।।१२६।।

उव्वरियसेसकुम्मासभोयणाणंतरं पसत्थगई । मुणिदाणपुन्नकलिओ चलिओ बिन्नायडाभिमुहं ।।१२७।।
पइदियहपयाणेहिं वेन्नायडनयरमागओ संतो । सुत्तो देसिकुडीए सुमिणं पेच्छइ निसासेसे ।।१२८।।

अमयमयकिरणनिम्महियतावमसमाणकंति जणसुहयं ।
पविसंतं नियवयणे केरविणीरमणपडिबिंबं ।।१२९।।

कप्पडिओ वि हु पासित्तु तारिसं कहइ सुमिणमियराण ।
ते वि हु भणंति गुड-नेहमंडियं मंडयं लहसि ।।१३०।।

तो तेण बीयदिवसे छाइज्जंतम्मि कम्मिवि घरम्मि । भिक्खाए पविट्ठेणं लद्धो गुडमंडओ एगो ।।१३१।।

कुमरो वि मणे मुणिउं मणोरहाणं अपावणिज्जं ति ।
सुमिणमिणं मणहरणं पहाणपुरिसाण कहणीयं ।।१३२।।

अह उग्गयम्मि सूरे कुमरो कुसुमाणमंजलिं भरिउं । सुविणन्नुयस्स पासे संपत्तो परमविणएण ।।१३३।।
पूइत्तु पायकमलं पणामपुव्वं पयासए सुमिणं । अह चिंतइ सुविणविऊ रज्जफलत्ते एस सुमिणो त्ति ।।१३४।।
लायन्नपुन्नकलियं अह तं परिणाविऊण नियधूयं । साहइ जह तुइ होही सत्तदिणब्भंतरे रज्जं ।।१३५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एयं निसामिऊणं थक्को सो तम्मि चेव नयरम्मि । कोउगअक्खित्तमणो दिणे दियन्तो नयरसोहं ।।१३६।।
कहमेत्थ निद्धणोहं विलसिस्सं चिंतिऊण नयरीए । ईसरगिहम्मि खत्तं खणिऊणं गहियगिहसारो ।।१३७।।
जा निगच्छइ तत्तो पत्तो आरक्खिएहिं सहस त्ति । तो बंधिऊण नीओ करणे मंतिस्स पासम्मि ।।१३८।।
चोरो त्ति काउमेसो भणियममच्चेण देहचायस्स । ता निंति वज्झभूमीए किंकरा लद्धआएसा ।।१३९।।
पुव्वुत्तमलियमेयं किं होही जाव चिंतए कुमरो । ता दुग्गसूलवेयणविवसो तन्नयरनरनाहो ।।१४०।।
मरइ अपुत्तो तो मंतिपमुहसामंत-पउरलोएण । अहिवासिऊण सम्मं गयपभिई पंचदिव्वाइं ।।१४१।।
मग्गिज्जइ नररयणं पुव्वभवुप्पन्नपुन्नपब्भारं । रज्जनिमित्तं नयरे तिय-चच्चर-देउलाईसु ।।१४२।।
तो जंताइं ताइं दिव्वाइं नयरबाहिरुद्देसे । पेच्छंति खरारूढं रत्तंदणलित्तसव्वंगं ।।१४३।।
सिरिउवरिधरियछित्तिरमारोवियगलसरावमालं च । वज्जंतवज्झडिंडिममुग्घोसिज्जंतचोरवहं ।।१४४।।
तं मूलदेवचोरं गलगज्जी ता गाएण पारद्धा । गुरुहरिसपरवसेणं हएण हेसारवो विहिओ ।।१४५।।
कलसं घेत्तूण करी अहिसिंचिय नेइ खंधदेसम्मि । ढलियं चामरजुयलं उवरि ठियं सेयवरछत्तं ।।१४६।।
उच्छलिओ तूररवो जयजयसद्दो पवड्ढिओ झत्ति । उद्दामबंदिविंदेण परिगओ पउरलोएण ।।१४७।।
रायसहाए पत्तो मुत्तामणिमंडिए चउक्कम्मि । सिंहासणे निविट्ठो पणओ सामंतमंतीहिं ।।१४८।।
अह देवयाए गयणे भणिया सामंतमंतिणो सव्वे । जह एस पुन्नकलिओ विक्कमराओ महाराओ ।।१४९।।
जो आणाए वट्टइ न सम्ममेयस्स तस्स न खमामि । तप्पभिइ अमङ्गाई संजाया आणतल्लिच्छा ।।१५०।।
जाओ महानरिंदो पडुपयडपयावपत्तमाहप्पो । निट्ठवियवइरिविंदो जहत्थमणुपालए रज्जं ।।१५१।।
अह अन्नया कयाई राया चित्तम्मि चिंतए एवं । सह दंतिसहस्सेणं लद्धं रज्जं जहुद्दिट्ठं ।।१५२।।
किन्तु-
किमणेण देवदत्तारहिएणं सुंदरेण रज्जेण ? । जेण पियसंपओगो रज्जं कज्जं किमन्नेण ? ।।१५३।।
तो पट्ठविओ लेहो उज्जेणिनराहिवस्स नरवइणा । भणिओ य मज्झ नेहो एईए देवदत्ताए ।।१५४।।
जइ पडिहासइ तीए तुम्हाणं सव्वहा अभिमयं च । मह जीयनिव्विसेसं ता पेससु तं सिणेहेण ।।१५५।।
इय वाईऊण लेहं रन्ना लेहारिया इमं भणिया । भो भो ! किमेवमेयं बिन्नायडसामिणा लिहियं ? ।।१५६।।

कि अम्हाणं तस्स य कोइ विसेसो समत्थि रज्जम्मि ? ।
जेणाहं नियरज्जं सव्वमिणं तस्स कप्पेमि ।।१५७।।

हक्कारिऊण भणिया गणिया रन्ना जहा तए भद्दे ! । विन्नत्तमासि पुव्वं जह मोत्तुं मूलदेवं मे ।।१५८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्नो न पेसियव्वो पुरिसो ता एस सो महाराया । संजाओ पुव्वज्जियपुन्नमहापरिणइवसेण ।।१५९।।

तो तुज्झाऽऽणयणत्थं नियपुरिसा पेसिया एहं तेण ।
ता जाहि तस्स पासे पडिहासइ तुज्झ जइ चित्ते ।।१६०।।

तो भणइ देवदत्ता देव ! सया वि हु मणोरहो आसि । संपुण्णो पुण इण्हिं तुम्हाणुन्नाए अम्हाणं ।।१६१।।

विभवेण पूइऊणं पट्ठविया मूलदेवपासम्मि । पत्ता य तत्थ तेण वि पवेसिया गुरुविभूईए ।।१६२।।

तीए सह विसयसोक्खं उवभुंजतंस्स जाइ जा कालो । ता सद्धडभट्टेणं निसुया रज्जस्स संपत्ती ।।१६३।।

तत्थाऽऽगओ पविट्ठो पडिहारनिवेइओ निवसमीवे । दिन्नो गामो रन्ना वि तस्स भणिउं इमं वयणं ।।१६४।।

पालेज्जसु नियगामं अज्जप्पभिइं परं तुमं किंतु । मह नयणगोयरे मा हवेज्ज कइया वि जा जीवं ।।१६५।।

अह अन्नया य अयलो उज्जेणीए धणज्जणनिमित्तं । बिन्नायडम्मि नयरे पत्तो बहुलोगपरियरिओ ।।१६६।।

मंजिट्ठाइकयाणगमज्झे गोवित्तु परमवत्थूणि । मंजिट्ठाईण पुणो सुंकं पाडेउमारद्धो ।।१६७।।

नाओ सुंकियलोएण कह वि तो दंसिओ नरवइस्स ।
जह देव ! सुंकचोरीए वाणिओ सावराहु त्ति ।।१६८।।
राया वि संभमब्भंतलोयणो जा पलोयए सम्मं ।
कह अयलसत्थवाहो ? अव्वो ! अच्छरियमेयं ति ।।१६९।।
तो भणियं नरवइणा परियाणसि को अहं ? भणइ अयलो ।
नियकित्तिभरियभुवणं देव ! तुमं को न याणेइ ।।१७०।।

तो नरवइणा साहियनियवुत्तंतो विसज्जिओ अयलो । सम्माणदाणपरिओसपुव्वयं सुंकपरिमुक्को ।।१७१।।

अह मूलदेवराया नएण परिपालिऊण नियरज्जं । सावगधम्मं च तहा मरिउं देवेसु उववन्नो ।।१७२।।

१८. तृषाध्याने श्रीमद्भावविजयकृते श्रीउत्तराध्ययनवृत्तौ धनशर्मनामक्षुल्लककथा ।

अभूदुज्जयिनीपुर्य्यां, धनमित्राभिधो वणिक् । धनशर्माश्रयस्तस्य, धनशर्मा सुतोऽभवत् ।।१।।

गुरुवाणीं समाकर्ण्य, गुरुवैराग्यवान् धनः । पुत्रेण पुण्यसत्रेण, सत्रा तत्राऽऽददे व्रतम् ।।२।।

स्वस्मिन् परे च सहितौ, सहितौ तौ व्रतिव्रजैः । प्रस्थितावेलगपुराऽध्वनि मध्यंन्दिनेऽन्यदा ।।३।।

तदा च भीष्मग्रीष्मार्ककरसम्पाततापितः । पिपासापीडितो बालः, स चचाल शनैः शनैः ।।४।।

मुनयोऽन्येऽग्रतो जग्मुर्धनमित्रमुनिः पुनः । पश्चाच्चचाल सूनोस्तत्प्रेमपाशनियन्त्रितः ।।५।।

मार्गे तत्राययौ रगंत्तरंगाथ तरङ्गिणी । ततः पिताऽलपत्पुत्रं, तां निरीक्ष्य प्रमोदभाक् ।।६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जानामि चेष्टया वत्स !, त्वां पिपासापराजितम् ।
मदभ्यर्णे च नास्त्यम्भः, प्रासुकं तत्करोमि किम् ? ।।७।।
तदिदानीं नदीनीरं, पीत्वोदन्यानि हन्यताम् । निषिद्धमपि कार्यं हि, कार्यमापदि धीधनैः ।।८।।
यदुक्तं "निषिद्धमप्याचरणीयमापदि, क्रिया सती नाऽवति यत्र सर्वथा ।
घनाम्बुना राजपथेऽति पिच्छिले, क्वचिद्बुधैरप्यपथेन गम्यते" ।।९।।
मृत्युदामापदमिमां, तदुल्लङ्घ्य कथञ्चन । पञ्चादालोचयेः पापं, समीपे सद्गुरोरिदम् ।।१०।।
इत्युदीर्य समुत्तीर्य, स नदीमित्यचिन्तयत् । नूनं मद्दर्शने पुत्रो, ह्रिया पास्यति नोदकम् ।।११।।
ह्रीमान् कुर्वन्न कार्यं हि, स्वच्छायातोऽपि शङ्कते । तद्दर्शनपथादस्यापसरामि शनैः शनैः ।।१२।।
ध्यात्वेति स पुरोऽचालीत्, क्षुल्लोऽथ प्राप निम्नगाम् । तृषार्त्तोऽपि न तत्तोय-मपिबच्च दृढव्रतः ।।१३।।
अन्ये त्वाहुरुदन्यानि, बाधितः स शिशुर्भृशम् । शुष्यत्तालुमुखोरस्कश्चेतसीति व्यचिन्तयत् ।।१४।।
पिबाम्यऽनादेयमपि, नाऽऽदेयं वारि साम्प्रतम् । प्रायश्चित्तं ग्रहीष्यामि पश्चात्सद्गुरुसन्निधौ ।।१५।।
विमृश्येति समुत्पाट्य, पातुमञ्जलिना जलम् । निन्ये यावन्मुखस्याग्रे, सोऽध्यासीदिति तावता ।।१६।।
पिबामीमान् कथं जीवानहं विज्ञातजैनगीः । उदबिन्दौ यदेकत्राऽसङ्ख्यजन्तून् जिना जगुः ।।१७।।
त्रसाः पूतरमत्स्याद्याः, स्थावराः पनकादयः । नीरे स्युरिति तद्घाती, सर्वेषां हिंसको भवेत् ।।१८।।
तत्कियद्भिर्दिनैर्यान्ति, रक्षिता अपि ये ध्रुवम् । तान् प्राणान् रक्षितुं दक्षः, परप्राणान्निहन्ति कः ? ।।१९।।
सजीवं जीवनमिदं, तत्र पास्यामि सर्वथा । निर्णीयेति शनैर्नद्यां, स मुमोचाञ्जलेर्जलम् ।।२०।।
बालोऽप्यबालधैर्यस्तामुत्तीर्य तटिनीं ततः । तत्तीर एव सोऽपतत्तृष्णया गन्तुमक्षमः ।।२१।।
धर्मस्थैर्यं दधच्चित्ते, पिपासाविवशोऽपि सः । स्मृतपञ्चनमस्कारो, विपद्य त्रिदिवं ययौ ।।२२।।
प्रयुज्याथावधिज्ञानं ज्ञात्वा पूर्वभवं निजम् । पुरो गत्वा स्थितं तातं, प्रेक्ष्य स्वाङ्गे प्रविश्य च ।।२३।।
अन्वगाद्धनमित्रर्षिं, ततश्चलयितुं सुरः । समायान्तं सुतं दृष्ट्वा, हृष्टः सोऽप्यचलत्पुरः ।।२४।। (युग्मम्)
अथोदन्या व्यथार्त्तानां, मुनीनामनुकम्पया । धनशर्माऽमरो भूरिगोकुलान्यध्वनि व्यधात् ।।२५।।
तेभ्योऽधिगत्य तक्रादि, साधवः स्वास्थ्यमासदन् । सुधाकुण्डेभ्य आसाद्य, पीयूषमिव निर्जराः ।।२६।।
विहरन्तः सुखेनैवं, तत्कृतै व्रजिका व्रजे । उल्लङ्घ्यारण्यमापुस्ते, क्रमादन्तिमगोकुलम् ।।२७।।
ततोऽग्रे गच्छतां तेषां, मध्यात्कस्यापि विण्टिकाम् । स्वं जिज्ञापयिषुः सोऽथ, तत्र व्यस्मरयत्सुरः ।।२८।।
दूरं गत्वा विण्टिकां च, स्मृत्वा स वलितो व्रती । उपधेर्विण्टिकां तत्राऽपश्यत्स्वां न तु गोकुलम् ।।२९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तामादाय प्रचलितो, मिलितोऽन्यतपोधनैः अवदद्विण्टिकालाभं, गोकुलादर्शनं च सः ।।३०।।
जाताश्चर्यास्तदाकर्ण्य, मुनयो व्यमृशन्निति । नूनं दिव्यानुभावेन, गोकुलान्यभवन् वने ।।३१।।
अत्रान्तरे प्रादुरासीत्, स सुरः कान्तिभासुरः । विहाय पितरं सर्वान्, मुनीनऽन्यान्ननाम च ।।३२।।
एनं कुतो न नमसीत्युक्तः स व्रतिभिस्ततः । स्वीयं व्यतिकरं सर्वं, निवेद्येत्यवदत्सुरः ।।३३।।
सजीवाम्भोऽपि पातुं यत्तदासौ मे मतिं ददौ । तत्पूर्वभववप्तापि, साधुरेष न वन्द्यते ।।३४।।
स्नेहादपि रिपोरेव, कार्यं विहितवानसौ । यद्दुर्गतिनिमित्तं मे, तदा तदुपदिष्टवान् ।।३५।।
अपास्यं चेत्सचित्ताम्बु, तदैवद्वचनादहम् । व्रतभङ्गभवात्पापादभ्रमिष्यं तदा भवे ।।३६।।
स एव हि बुधैः पूज्यो, गुरुश्च जनकोऽपि च । शिष्यं सुतं च यः क्वापि, नैवोन्मार्गे प्रवर्त्तयेत् ।।३७।।
धनशर्मसुपर्वैवमुदीर्यागात्त्रिविष्टपम् । साधवोऽपि ततः स्थानाद्विजहुस्ते यथासुखम् ।।३८।।

क्षुल्लो यथाऽयं धनशर्मनामा, सेहे पिपासां सुदृढप्रतिज्ञः ।
एवं समग्रैरपि संयतैः सा, सह्या महानन्दपदानुक्तैः ।।३९।।

१९. क्षुद्ध्याने श्रीआख्यानकमणिकोशे राजगृहस्थद्रमकः ।

रागगिहम्मि पुरवरे आजम्मदरिद्दिओ वसइ दमओ । भिक्खामेत्तुवजीवी अहऽन्नया ऊसवे जाए ।।१।।
सव्वो वि नयरलोओ घेत्तूणं खज्ज-पेज्ज-लेज्झाई । वेभारगिरिसमीवे सव्वत्तुगचारुउज्जाणे ।।२।।
उज्जाणियाए पत्तो एत्तो जाएसु दोसु पहरेसु । कप्परयकरो दमओ नयरे भिक्खं परिब्भमइ ।।३।।
पडिभवणं हिंडंतो भणिज्जए भवणरक्खवालेहिं । सव्वो वि जणो घेत्तूण भोयणं अज्ज उज्जाणे ।।४।।
संपत्तो ता तं पि हु वञ्चसु तत्थेव तयणु सो जाव । तत्थ गओ ता लोगो भोत्तूण मणोन्नमाहारं ।।५।।
तत्तो ताल्य-रासय-नाडय-पेक्खणय-महुरगीएहिं । अक्खित्तमणो न हु कोइ तस्स भिक्खं पयच्छेइ ।।६।।
सुइरं जायं तस्स वि उत्तरमवि तस्स देइ न हु कोइ । तन्हा-छुहाकिलंतो तत्तो सो कोवमावन्नो ।।७।।
वेभारसेलसिहरं समारुहेऊण महरिहसिलाए । उवविसियमहोभागे हणणकए सयललोयस्स ।।८।।
रोद्दज्झवसाएणं खणइ तओ सो वि चूरिओ तीए । मरिउमसिपत्तदारुणनरए सो नारओ जाओ ।।९।।
निवडंतसिलाखडहडसद्दं सोऊण पउरपुरलोगो । नट्ठो तम्हा वज्जह असुहं भावं पयत्तेण ।।१०।।

२०. पथिध्याने श्रीपरिशिष्टपर्वसंवलितः वल्कलचीरिणः दृष्टान्तः ।

अथाख्यद्भगवान् राजन्नगरे पोतनाभिधे । अभूत्सौम्यतया चन्द्रः सोमचन्द्रो महीपतिः ।।१।।
सधर्मचारिणी तस्य धारिणी धर्मधारिणी । बभूव शीलालङ्कारा विवेकजलदीर्घिका ।।२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सा गवाक्षेऽन्यदा पत्युरासीनस्य कचोच्चयम् । स्वयं करसरोजाभ्यां विवरीतुं प्रचक्रमे ।।३।।
ददर्श च तदा राज्ञः पलितं मूर्ध्नि धारिणी । स्थानं स्वीकृत्यभिज्ञानं जरयेव निवेशितम् ।।४।।
व्याजहार च राजानं स्वामिन् ! दूतोऽयमागतः । दिशोऽवलोक्य राजाऽपि प्रोचे किं नेह दृश्यते ? ।।५।।
राज्ञ्यथादर्शयद्राज्ञः पलितं मूर्ध्न्युवाच च । प्राणेश ! केशराजोऽयं प्रशस्यो धर्मदौत्यकृत् ।।६।।
तृतीयवयसः शस्त्रमिव यौवनघातकम् । तन्मूर्ध्नि पलितं दृष्ट्वा राजा दुरमनायत ।।७।।
अभ्यधाद्धारिणी देव ! किं वृद्धत्वेन लज्जसे ? । अप्येकं पलितं दृष्ट्वा यद्येवं दुर्मनायसे ।।८।।
पटहोद्घोषणां कृत्वा लोकः सर्वो निषेत्स्यते । न यथा वृद्धभावं ते वार्तयाऽपि प्रकाशयेत् ।।९।।
राजा प्रोवाच जिह्रेमि नाहं पलितदर्शनात् । दौर्मनस्ये पुनरिदं कारणं जीवितेश्वरि ! ।।१०।।
अदृष्टपलितैरस्मत्पूर्वजैराददे व्रतम् । अहं तु विषयासक्तः प्रिये ! पलितवानपि ।।११।।
अहमद्दाय गृह्णामि व्रतमेवं स्थितेऽपि हि । किं तु दुग्धमुखे सूनौ राज्यमारोप्यते कथम् ? ।।१२।।
यद्वा मे व्रतमादित्सोः किं राज्येन सुतेन किम् । धीमति ! व्रतमादास्ये त्वं स्वं संवर्धयाऽऽत्मजम् ।।१३।।
धारिण्यभिदधे नाहं त्वां विना स्थातुमीश्वरी । सत्यः पत्यनुयायिन्यः समये यत्र तत्र वा ।।१५।।
तद्बालेऽपि सुते राज्यं निदधीथा अहं पुनः । शुश्रूषिष्ये वनेऽपि त्वां देहच्छायेव पार्श्वगा ।।१५।।
अरण्यजस्तरुरिव सुतः स्वैरेव कर्मभिः । प्रसन्नचन्द्रो बालोऽपि वर्धतां तेन किं मम ।।१६।।
सोमचन्द्रस्ततो राज्यमारोप्य तनुजन्मनि । दिक्प्रोषितस्तापसोऽभूत् पत्न्या धात्र्या च संयुतः ।।१७।।
स आश्रमपदं किञ्चिच्चिरशून्यमशिश्रयत् । दुस्तपं च तपस्तेपे शुष्कपत्रादिभोजनः ।।१८।।
पलाशपत्राण्यादाय स आश्रमकुटीं व्यधात् । मृगाणामध्वगानां च शीतच्छायाऽमृतप्रपाम् ।।१९।।
स्वादुस्वादून्युदकानि वनस्पतिफलानि च । सोमेन्दुरानयत्पन्त्यै स्यूतस्तत्प्रेमतन्तुभिः ।।२०।।
तत्रापि धारिणी सा तु पत्यावत्यन्तभक्तिभाक् । तल्यं प्रकल्पयामास तदर्थं कोमलैस्तृणैः ।।२१।।
तत्रेङ्गुदानि पक्वानि पेषं पेषं च धारिणी । स्नेहं जग्राह दिवसे चक्रे च निशि दीपकान् ।।२२।।
अरण्यगोमयैरार्द्रैः सा लिलेपाऽऽश्रमाङ्गणम् । पत्युः सुखासिकाहेतोर्मार्जयामास चासकृत् ।।२३।।
तत्राश्रमे दम्पती तौ लालयन्तौ मृगार्भकान् । तपः कष्टमजानन्तौ कञ्चित्कालं व्यतीयतुः ।।२४।।
सन्तोषसुखधारिण्याः धारिण्याः पूर्वसम्भवः । तत्र क्रमेण ववृधे गर्भोऽनुत्पादितव्यथः ।।२५।।
धारिण्या सूनुरन्यूनलक्षणः सुषुवेऽन्यदा । कान्त्या दीप इवातैलपूरोऽन्तःसूतिकागृहम् ।।२६।।
आश्रमे वल्कलान्येवेत्यवेष्ट्यत स वल्कलैः । पित्रा वल्कलचीरीति ततस्तन्नाम कल्पितम् ।।२७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विपेदे धारिणी सूतिरोगेण तनयः पुनः । अदृष्टमातृकः सोऽभूत् पुमानिव निरक्षरः ।।२८।।
अरण्यमहिषीक्षीरं पाययित्वा मुहुर्मुहुः । सोमेन्दुरार्पयद्धात्र्या धारणाय तमर्भकम् ।।२९।।
अवाप साऽपि पञ्चत्वं कालेन कियताऽपि हि । धात्री दैववशेनानुयियासुरिव धारिणीम् ।।३०।।
अपीप्यन्महिषीक्षीरं सोमेन्दुस्तं शिशुं स्वयम् । यान्निषण्णः शयानो वा स्वयमङ्के दधार च ।।३१।।
स क्रमाद्वर्धमानोऽभूत्पादचंक्रमणक्षमः । चक्रे च प्रत्यहं पांशुक्रीडां वनमृगार्भकैः ।।३२।।
एधोभिः स्वयमानीतैर्नीवारैः स्वयमाहृतैः । स्वयं रसवतीं कृत्वा सोमेन्दुस्तमभोजयत् ।।३३।।
वनधान्यैर्वनफलैः पोषं पोषं तमर्भकम् । सोमचन्द्रो व्यधादात्मसखं तपसि दुस्तपे ।।३४।।
यौवनाभिमुखश्चालङ्कर्मीणः सर्वकर्मसु । पितृचर्याप्रवीणोऽभूदथ वल्कलचीर्यपि ।।३५।।
फलाद्यानयनैर्नित्यमङ्गसंवाहनेन च । शुश्रूषां स पितुश्चक्रे सा हि सर्वव्रतोत्तमा ।।३६।।
आजन्मब्रह्मचार्येव व्रती वल्कलचीर्यभूत् । स्त्रीणां नामापि नाज्ञासीदस्त्रीके निवसन्वने ।।३७।।
प्रसन्नचन्द्रः शुश्राव वनस्थस्यान्यदा पितुः । धारिणीकुक्षिसम्भूतं सुतं सोदरमात्मनः ।।३८।।
कीदृशोऽस्ति स मे भ्राता ? मिलिष्यति कथं पुनः ? । इत्युभूद्रणरणको राज्ञो मनसि दुर्धरः ।।३९।।
अथादिशच्चित्रकरांस्तत्र यात तपोवने । यच्छ्रीमत्तातपादानां पादपद्मैरलङ्कृतम् ।।४०।।
पितृपादाब्जहंसस्य मदीयस्यानुजन्मनः । वने निवसतो रूपमालिख्यानयत द्रुतम् ।।४१।। युग्मम् ।।
प्रमाणमादेश इति प्रोच्य चित्रकरा अपि । ययुस्तत्र वने पुण्यीकृते वल्कलचीरिणा ।।४२।।
ते विश्वकर्मणो मूर्त्यन्तराणीवातिकौशलात् । तमालिखन्यथावस्थमादर्शप्रतिबिम्बवत् ।।४३।।
आनीय दर्शयामासू रूपं वल्कलचीरिणः । ते चित्रकारिणो राज्ञः सुधावर्तिनिभं दृशोः ।।४४।।
दध्यौ नृपतिराकृत्या मत्पितुर्नैष हीयते । आत्मा वै जायते पुत्रः श्रुतिरेषा हि नान्यथा ।।४५।।
दिष्ट्या सोदर ! दृष्टोऽसीत्यभिधायासकृन्नृपः । तं सस्वजे मूर्ध्नि जघ्रौ न चाङ्कादुदतारयत् ।।४६।।
वल्कलाच्छादनधरं दृष्ट्वा वल्कलचीरिणम् । उदश्रुर्द्रागभूद्राजा सनिर्झर इवाचकः ।।४७।।
ऊचे च प्रवयास्तातो युक्तमाचरतु व्रतम् । मद्भ्रातुस्त्वस्य बालस्य वनवासोऽपि नार्हति ।।४८।।
अहं राज्यसुखह्रदे मग्नः क्रीडामि हंसवत् । पुलिन्द इव मे भ्राता वनवृत्त्याऽनुजीवति ।।४९।।
अरण्यजो जीव इव दुरानेयः स पत्तने । कष्टं तु मम राज्येऽपि तस्मिन्नाज्याविभागिनि ।।५०।।
वनकष्टमिति भ्रातुरनुशोचन्महीपतिः । एवमाज्ञापयामास वेश्याश्चातुर्यशालिनीः ।।५१।।
मुनिवेषेण गत्वाऽङ्गस्पर्शैर्नवनवोक्तिभिः । प्रलोभ्य खाण्डैश्च फलैरिहानयत मेऽनुजम् ।।५२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इति राजाऽऽज्ञया वेश्या मुनिवेषभृतो द्रुतम् । तदाश्रमपदं जग्मुः सोमचन्द्रेण सेवितम् ।।५३।।
फलान्यादाय बिल्वादीन्यायान्तमृषिपुत्रकम् । वल्कलाच्छादनं तत्र ददृशुस्तं मृगीदृशः ।।५४।।
मुनिवेषभृतां तासां सोऽकार्षीदभिवादनम् । ऋजुधीरित्यपृच्छच्च के यूयं ? को व आश्रमः ? ।।५५।।
ताः प्रोचुर्वयमृषयः पोतनाश्रमवासिनः । तवागताः स्मोऽतिथयः किमातिथ्यं करिष्यसि ? ।।५६।।
उवाच स फलान्येतान्याहृतानि मया वनात् । यूयमश्नीत पक्वानि मधुराणि महर्षयः ! ।।५७।।
ताश्चोचुराश्रमपदेऽस्मदीये नेदृशान्यहो । फलानि कश्चिदश्नाति नीरसान्यतिनीरसः ।।५८।।
अस्मदाश्रमवृक्षाणामीक्षस्व फलवर्णिकाम् । इत्युक्त्वा ता निषेदुर्द्रुमूले तं च न्यषादयन् ।।५९।।
ताश्च तं प्राशयन् खण्डफलान्यविफलाशयाः । सोऽपि सद्यस्तदास्वादाद्बिल्वाद्युद्वेगभागभूत् ।।६०।।
एकस्थानस्थितं तास्तं स्वाङ्गस्पर्शमचीकरन् । तत्करं च न्यधुः पीनकुचकुम्भे निजोरसि ।।६१।।
स ऊचे कोमलमिदं किमङ्गं वो महर्षयः ? । किमुन्नते स्थले एते यौष्माकीणे च वक्षसि ? ।।६२।।
ताः प्रोचुस्तं स्पृशन्त्यः स्वैः कोमलैः पाणिपल्लवैः । अस्मद्वनफलास्वादे हीदृक् स्यादङ्गमार्दवम् ।।६३।।
आस्वादितैर्वनफलैरस्मदीयैर्महारसैः । अत्यन्तोपचयादेते जायेते हृदि च स्थले ।।६४।।
तद्विमुञ्चाश्रममिममसाराणि फलानि च । अस्मदाश्रममागत्य त्वमप्यस्मादृशो भव ।।६५।।
अथ खण्डफलास्वादलुब्धो वल्कलचीर्यपि । सङ्केतमग्रहीन्मुग्धस्ताभिः सह यियासया ।।६६।।
संस्थाप्य तापसभाण्डमागाद्वल्कलचीर्यपि । यथोदितं च सङ्केतस्थानं ताभिरधिष्ठितम् ।।६७।।
तदा च ददृशे वृक्षाधिरुढैश्चरपूरुषैः । आगच्छन्सोमचन्द्रर्षिरकथ्यत च योषिताम् ।।६८।।
मा शाप्सीदेष इति तास्तस्माद्भीता द्रुतद्रुतम् । नेशुर्मृग्य इव व्याधादमिलन्त्यः परस्परम् ।।६९।।
स्थानं गते च पितरि कुमारस्ताः पणाङ्गनाः । नष्टस्वः स्वमिवान्वेष्टुमुपाक्रंस्ताखिले वने ।।७०।।
ददर्श रथिनं चैकं स धावन्मृगवद्वने । तमप्यृषिं मन्यमानोऽवदत्तातेति वादये ।।७१।।
रथ्यपृच्छत्कुमार ! त्वं क्व गमिष्यसि सोऽवदत् । गमिष्याम्याश्रमपदं महर्षे ! पोतनाभिधम् ।।७२।।
रथ्यवादीदहमपि यियासुः पोतानाश्रमम् । ततोऽन्वगात्तमग्रेगूमिव वल्कलचीर्यपि ।।७३।।
स तापसकुमारोऽपि पथि यान्रथिकप्रियाम् । रथाधिरूढां तातेति भाषेत स्म मुहुर्मुहुः ।।७४।।
रथिनं तत्प्रियाऽवोचत् केयमस्योपचारगीः । यत्तापसकुमारोऽयं मयि तातेति जल्पति ।।७५।।
रथिकः स्माह मुग्धोऽयमस्त्रीकेऽस्मिन्वने वसन् । स्त्रीपुंसयोरभेदज्ञो नरं त्वामपि मन्यते ।।७६।।
प्रवीयमानान्दृष्ट्वाऽश्वानूचे वल्कलचीर्यदः । वाह्यन्ते किममी तात ! मृगा नार्हत्यदो मुनेः ।।७७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

व्याजहाराथ रथिकः स्मित्वा वल्कलचीरिणम् । हंहो कर्मेदमेवैषां मृगाणां नात्र दुष्यति ।।७८।।
रथिको मोदकान्स्वादून्ददौ वल्कलचीरिणे । सोऽखादच्च तदास्वादसुखमग्नो जगाद च ।।७९।।
ईदृशानि वनफलान्यहमग्रेऽप्यखादिषम् । महर्षिभिः प्रदत्तानि पोतनाश्रमवासिभिः ।।८०।।
अभूच्च मोदकास्वादात्पोतनं गन्तुमुत्सुकः । कषायरूक्षैर्नटितः स बिल्वामलकादिभिः ।।८१।।
रथिनश्चाभवद्युद्धं चौरेणैकेन दोष्मता । रथी गाढप्रहारेण तं चौरं निजघान च ।।८२।।
चौरोऽप्युवाच घातो हि वैरिणोऽपि प्रशस्यते । मामजैषीः प्रहारेण तेन तुष्टोऽस्मि मानव ! ।।८३।।
विपुलं धनमत्रास्ति मदीयं तद् गृहाण भोः! । त्रयोऽप्यारोपयामासुरथ तद् द्रविणं रथे ।।८४।।
क्रमेण पोतनं प्राप्तो रथी वल्कलचीरिणम् । प्रोवाच प्रेप्सितो यस्ते पोतनाश्रम एष सः ।।८५।।
किंचिच्च द्रविणं तस्मै रथी तापससूनवे । प्रददौ मार्गसुहृदे स्मयमानो जगाद च ।।८६।।
अमुष्मिन्नाश्रमपदे न विना द्रव्यमाश्रयः । तदाश्रमार्थी कस्मैचिद्दद्याद् द्रव्यमवक्रये ।।८७।।
किमत्र यामि याम्यत्र किं वेति सकले पुरे । उत्प्रेक्षमाणो हर्म्याणि बभ्राम मुनिपुङ्गवः ।।८८।।
नराणामथ नारीणामृषिबुद्ध्या स मुग्धधीः । अभिवादनवातूल उपाहास्यत नागरैः ।।८९।।
पुरे भ्रमन्नथैकस्या वेश्यायाः स निकेतने । विवेश त्वरितं चापमुक्तः शर इवास्खलन् ।।९०।।

[श्री परिशिष्टपर्व. श्लो. ९२ तः १८९]

२१-४६. प्रस्थानध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रे सनत्कुमारं गवेषयतो महेन्द्रसिंहस्य कथा ।

चिरं शक्रश्रियं भुक्त्वा कल्पात् पूर्णायुरादिमात् । स जीवो जिनधर्मस्य तस्याः कुक्षाववातरत् ।।१।।
मुखे प्रविशतः स्वस्मिन् सहदेव्यपि तत्क्षणम् । कुंजरादीन् महास्वप्नांश्चतुर्दश ददर्श सा ।।२।।
समयेऽसूत सा सूनुं सर्वलक्षणलक्षितम् । अद्वैतरूपविभवं जात्यजांबूनदद्युतिम् ।।३।।
महीयसाथोत्सवेन जगदानंददायिना । सनत्कुमार इत्याख्यां चक्रे तस्य महीपतिः ।।४।।
कनकच्छेदगौरांगो बालो बाल इवोडुपः । प्रीणन्नेत्राणि लोकानां स क्रमेण व्यवर्धत ।।५।।
अंकादंके नरेंद्राणां संचरन् स व्यराजत । अरविंदादरविंदे सितच्छद इवोज्ज्वकैः ।।६।।
रूपेणाप्रतिरूपेण स बालोऽपि मृगीदृशाम् । जहार दृष्टमात्रोऽपि नेत्राणि च मनांसि च ।।७।।
सांगानि शब्दशास्त्राणि समस्तज्ञानमातृकाः । पपौ गुरुमुखोद्गीर्णान्येष गंडूषलीलया ।।८।।
राज्यश्रीभुवनस्तंभान् स्वदोःस्तंभानिवापरान् । स आददे शस्त्रशास्त्राण्यर्थशास्त्राणि चाभितः ।।९।
अन्या अपि कलाः सर्वाः कलयामास लीलया । क्रमेण वर्धमानः स कलानिधिरिवामलः ।।१०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स सार्धैकचत्वारिंशद्धनुरुन्नतविग्रहः । मर्त्यलोकादिव दिवं शैशवात् प्राप यौवनम् ।।११।।
तस्याभूत् परमं मित्रं कालिंदीसूरनंदनः । महेन्द्रसूर इत्याख्याख्यातः प्रख्यातविक्रमः ।।१२।।
प्राप्ते वसंते सोऽन्येद्युः कालिंदीसूनुना समम् । मकरंदाख्यमुद्यानं कौतुकात् क्रीडितुं ययौ ।।१३।।
क्रीडाभिस्तत्र चित्राभिश्चिक्रीड सुहृदा समम् । सनत्कुमारो गीर्वाणकुमार इव नंदने ।।१४।।
तदा च राज्ञोऽश्वपतेः प्राहिणोत् प्राभृतान् हयान् । धारापंचकचतुरान् सर्वलक्षणलक्षितान् ।।१५।।
नाम्ना जलधिकल्लोलं कल्लोलमिव चंचलम् । एकं सनत्कुमारस्याप्यर्पयामास वाजिनम् ।।१६।।
त्यक्त्वा क्रीडां कुमारस्तमारुरोह तुरंगमम् । हस्त्यश्वे राजपुत्राणां कौतुकं सर्वतोऽधिकम् ।।१७।।
कशामुत्क्षिप्य चैकेन वल्गां चैकेन पाणिना । आसनास्पृष्टपर्याण उरूभ्यां प्रैरयच्च तम् ।।१८।।
पर्यधाविष्ट वेगेन पादैः क्ष्मामस्पृशन्निव । गच्छन् बहुतरं व्योम्नि सोऽश्वान् द्रष्टुं रवेरिव ।।१९।।
वल्गया चकृषे सोऽश्वः कुमारेण यथा यथा । तथा तथा विपरीतशिक्षोऽधिकमधावत ।।२०।।
सादिनां राजपुत्राणां धावतामपि मध्यतः । निर्ययौ स क्षणादश्वोऽश्वमूर्तिरिव राक्षसः ।।२१।।
पश्यतामपि भूपानामुडूनामिव चन्द्रमाः । स आरूढकुमारोऽश्वोऽभूददृश्यः क्षणादपि ।।२२।।
अश्वेन सूनुमाकृष्टं नदीपूरेण पोतवत् । प्रत्यानेतुमन्वचालीदश्वसेनोऽश्वसेनया ।।२३।।
यात्यसौ यात्यसावश्वः पदान्येतानि तस्य हि । फेनलालास्तस्य चेमा यावदाख्यदिदं जनः ।।२४।।
तावद्वात्योदभूच्चंडा पूर्णब्रह्मांडभस्त्रिका । अकालिका कालरात्रिरिवांधंकरणी दृशाम् ।।२५।। युग्मम् ।।
अपटीभिरिवौकांसि दिशोऽच्छाद्यंत रेणुभिः । स्तंभितानीव सैन्यानि नोद्धर्तुं पादमप्यलम् ।।२६।।
पदफेनानि चिह्नानि गच्छतस्तस्य वाजिनः । अशेषाण्यपि भग्नानि पांसुकल्लोमालया ।।२७।।
न निम्नं नोन्नतं नापि स्थपुटं न द्रुमाद्यपि । अलक्षि पाताल इव प्रविष्टोऽभूज्जानोऽखिलः ।।२८।।
मूढोपायाः सैनिकास्ते पर्याकुल्यभवन्नथ । अब्धावंभःपूर्यमाणयानाः सांयात्रिका इव ।।२९।।
नत्वा महेंद्रसिंहोऽश्वसेनमेवं व्यजिज्ञपत् । देव दैवस्य घटना दुर्घटान्यस्य खल्वियम् ।।३०।।
अन्यथा हि कुमारः क्व दूरदेशो हयः क्व च । तत्र चाज्ञातशीले क्व कुमारस्याधिरोहणम् ।।३१।।
कुमारस्यापहरणं तेन दुर्वाजिना क्व च । क्व वा वात्येयमुद्दंडरजश्छादितदृक्पथा ।।३२।।
पर्यन्तसामंतमिव दैवं जित्वा तथापि हि । आनेष्याम्यहमन्विष्य स्वमित्रं स्वामिसन्निभम् ।।३३।।
कंदरेषु गिरींद्राणं तुंगेषु शिखरेषु च । निरंतरतरुस्तोमदुर्गमास्वटवीषु च ।।३४।।
रोधोरंध्रेषु पातालकल्पेषु सरितामपि । निर्जलेष्वपि देशेषु विषमेष्वपरेष्वपि ।।३५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ममाल्पपरिवारस्य क्वचिदेकाकिनोऽपि वा । ईषत्करं चरस्येव कुमारान्वेषणं प्रभो ।।३६।।
देवस्यामितसैन्यस्यासम्मातो यत्र कुत्रचित् । तत्राहं ह्स्वरथ्यायां प्रवेश इव दंतिनः ।।३७।।
भूयो भूयोऽप्येवमुक्त्वा पादलग्नेन तेन तु । निवर्तितोऽश्वसेनः स्वं दुःखितो नगरं ययौ ।।३८।।
मितसारपरीवारो दुर्वार इव वारणः । महेंद्रसिंहः सहसा प्रविवेश महाटवीम् ।।३९।।
पाषाणैः खड्गिविषाणोत्क्षिप्तैर्विषमपद्धतिम् । घर्मार्तप्रविशत्क्रोडपंकिलीकृतपल्वलाम् ।।४०।।
प्रौढभल्लूकहिक्काभिः प्रतिशब्दितगह्वराम् । गह्वरासीनशार्दूलकृतबूत्कारदारुणाम् ।।४१।।
उत्फालचित्रककुलव्याकुलैणकुलाकुलाम् । गलितश्वापदैर्बाढवाहसैर्वेष्टितद्रुमाम् ।।४२।।
चमूरुचक्रैराक्रांतमार्गच्छायावनीरुहाम् । सिंहीसखीपयःपायिसिंहरुद्धाध्वनिम्नगाम् ।।४३।।
मत्तकुंजरभग्नाध्वशाखिशाखातिदुर्गमाम् । सनत्कुमारमन्वेष्टुं स विष्वक् तामगाहत ।।४४।।
।। पंचभिः कुलकम् ।।

विकटां कंटकितरुश्वापदैरवटैः स्थलैः । महाटवीं तामटतस्तस्त सैन्यं व्यशीर्यत ।।४५।।
खिन्नखिन्नैर्मुच्यमानो मंत्रिमित्रादिकैरपि । त्यक्तसंगो मुनिरिव स एकाकी क्रमादभूत् ।।४६।।
भूयो महानिकुंजेषु गिरीणां कंदरेष्वपि । पल्लीपतिरिवैकोऽपि स बभ्राम धनुर्धरः ।।४७।।
बृंहिते वननागानां सिंहगुंजारवेष्वपि । सोऽधावत् सनत्कुमारवीरध्वनितशंकया ।।४८।।
स्वमित्रं तत्र चापश्यन्नुच्छलन्निर्झरध्वनौ । तदाशंक्यन्यतोऽधावत् प्रेम्णो हि गतिरीदृशी ।।४९।।
नदीकरिहरीनूचे मद्बंधोर्ध्वनिरेष यत् । स वः पार्श्वे ततो लभ्यं सर्वं ह्येकांशदर्शनात् ।।५०।।
सर्वत्राप्रेक्ष्य सुहृदमुच्चैरारुह्य शाखिनः । दिशो न्यरूपयद्भूयो मार्गभ्रांत इवाध्वगः ।।५१।।
बद्धशोक इवाशोकेष्वाकुलो बकुलेष्वपि । असहः सहकारद्रुष्वमल्लो मल्लिकास्वपि ।।५२।।
न्यक्कारी कर्णिकारेषु पाटलः पाटलास्वपि । दूरस्थः सिंदुवारेषु सोत्कंपश्चंपकेष्वपि ।।५३।।
पराङ्मुखश्च मलयानिलेष्वपि खलेष्विव । स्फुटत्कर्णः कोकिलानां पंचमोच्चारितेष्वपि ।।५४।।
अशांततापः पीयूषरश्मेरपि हि रश्मिषु । स वसंतमतीयाय रोरपुत्र इवैककः ।।५५।।
।। चतुर्भिः कलापकम् ।।

कुकूलैरिव विस्तीर्णैः पादपद्मनखंपचैः । भृज्यमानोऽर्कांशुतप्तैर्भूरजोभिः पदे पदे ।।५६।।
सद्यो निर्वाणदावाग्निभस्मदुःसंचरेऽध्वनि । पादतापमजानानोऽग्निस्तंभमिव सूत्रयन् ।।५७।।
उष्णवात्याभिरनलज्वालाभिरिव भूरिभिः । वपुस्तापमगणयन् करी गिरिचरो यथा ।।५८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्काथान् रोगीव सरितां पंकिलान्यूष्मलानि च ।
पिबन् पयांसि स ग्रीष्मं भ्राम्यन्नेकोऽत्यवाहयत् ।।५९।। ।। चतुर्भिः कलापकम् ।।
रक्षोभिरिव जीमूतैरुद्यद्विद्युन्मुखाग्निभिः । अक्षोभ्यमाणहृदयो विश्वविक्षोभणैरपि ।।६०।।
अखंडप्रसरैर्धारासारैः शितशरैरिव । विध्यमानोऽपि संनद्ध इवामुह्यन् मनागपि ।।६१।।
पदे पदे वननदीर्वेगोन्मूलितपादपाः । दुस्तरा अप्यनायासं राजहंस इवोत्तरन् ।।६२।।
आक्रामन् पंकिलं मार्गं वराह इव लीलया । मित्रान्वेषी पर्यटन् स वर्षा अप्यत्यवाहयत् ।।६३।।
।। चतुर्भिः कलापकम् ।।
मूर्ध्नि चित्रातपं घोरं पादयोस्तप्तवालुकाः । सहमानोऽग्निशरावसंपुटांतर्वसन्निव ।।६४।।
स्वच्छे तोये तोयजेषु हंसादिषु च पक्षिषु । अविश्रांतमनाः क्कासि क्कासि मित्रैवमुद्वृणन् ।।६५।।
मदगंधिसप्तपर्णकुद्धधावितदंतिनाम् । मध्येन गच्छन् दंतीव वनांतरसमागतः ।।६६।।
सख्येव पवमानेन प्रेर्यमाणेऽब्जगंधिना । अत्यगाच्छरदमपि स भ्रमन् शरदभ्रवत् ।।६७।।
।। चतुर्भिः कलापकम् ।।
उत्तरेण समीरेण हिमाद्रेरिव बंधुना । हिमसात् क्रियमाणेषु सरसीसरिदंबुषु ।।६८।।
दवाग्निनाप्यदाह्यासु दह्यमानासु सर्वतः । जलांतःपद्मकल्हारकैरवोत्पलपंक्तिषु ।।६९।।
शीतार्त्तेषु किरातेषु दवानलमपीच्छुषु । हेमन्तमप्यतीयाय स बाढं दृढनिश्चयः ।।७०।।
।। त्रिभिर्विशेषकम् ।।
शीर्णेषु जीर्णपर्णेषु जानुदघ्नेषु भूरुहाम् । छन्नाहिवृश्चिकेष्वंघ्रिन्यासं निःशंकमादधत् ।।७१।।
कर्णमर्माविद्धिरिव मर्मरैरति दुःश्रवैः । प्रबुद्धोत्कर्णपंचास्यबूत्कारेष्वप्यकंपितः ।।७२।।
प्रत्यग्रपल्लवास्वादमात्रेणैवोदरंभरिः । शिशिरं गमयामासाशिशिरो मित्रपीडया ।।७३।।
।। त्रिभिर्विशेषकम् ।।
एवं सन्तकुमारस्यान्वेषणायाटतोऽटवीम् । एको महेन्द्रसिंहस्य जगाम परिवत्सरः ।।७४।।
तस्यामटव्यामन्येद्युर्गत्वा कियदवस्थितः । दिशो विलोकयामास नैमित्तिक इवोन्मुखः ।।७५।।
ततः कारंडवक्रौंचहंससारसपक्षिणाम् । क्षणादाकर्णयामास कोलाहलमनाकुलः ।।७६।।
मरुता पंकजामोदवाहिनाश्वासितश्च सः । सरः किंचिदिहास्तीति निश्चिकायानुमानतः ।।७७।।
आनंदबाष्पतोयेन निश्चिन्वन् मित्रसंगमम् । सरोवरस्याभिमुखं स ययौ राजहंसवत् ।।७८।।
गच्छन्नग्रे च शुश्राव गीतं गांधारबंधुरम् । मधुरं वेणुनादं च वीणाक्काणं च हारिणम् ।।७९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

विचित्रवस्त्रनेपथ्यरमणीमध्यवर्तिनम् । मित्रं सनत्कुमारं स ददर्श प्रियदर्शनम् ।।८०।।

असौ प्रियसुहृत् किं मे माया कस्यापि कापि वा । इन्द्रजालमिदं किं वा हृदयान्निर्गतोऽथ मे ।।८१।।

इति सोऽचिंतयद्यावत्तावत् कर्णरसायनम् । वैतालिकेन केनापि पठ्यमानमदोऽशृणोत् ।।८२।।

कुरुवंशसरोहंसाश्वसेनाब्धिनिशाकर । सनत्कुमार सौभाग्यमनोभव चिरं जय ।।८३।।

जय विद्याधरवधूदोर्लतालिंगनद्रुम । आढ्यंभविष्णो वैताढ्यश्रेणिद्वयजयश्रिया ।।८४।।

एवं समाकर्ण्य सनत्कुमारस्य स दृक्पथम् । जगाम ग्रीष्मसंतप्तो जलाशयमिव द्विपः ।।८५।।

[श्री त्रिषष्टिशलाका० पर्व-६ श्लो-७४ तः १५८]

२२. निद्राध्याने श्रीविशेषावश्यकभाष्ये पञ्चदृष्टान्ताः ।

पोग्गल-मोयग-दन्ते फरुसग-वडसालभंजणे चेव । थीणद्धियस्स एए आहारणा होंति नायव्वा ।।२३५।।

स्त्यानर्द्धिनिद्रोदयवर्तिन एतानि पौद्गलादीन्युदारणानि ज्ञातव्यानि भवन्ति । तद्यथा-'पोग्गलेत्यादि' तत्र समयपरिभाषया पौद्गलं मांसमुच्यते, तदुदाहरणं यथा-एकस्मिन् ग्रामे कुटुम्बिकः कोऽप्यासीत्, स च मांसगृद्ध आमानि, पक्वानि, तलितानि, केवलानि, तीमनादिमध्यप्रक्षिप्तानि च मांसानि भक्षयति । अन्यदा च गुणातिशायिभिः स्थविरैः कैश्चित् प्रतिबोधितो दीक्षां कक्षीकृतवान् । तेन च ग्रामाऽनुग्रामं विहरता कदाचित् क्वचित् प्रदेशे मांसलुब्धैः कैश्चिद् विकृत्यमानो महिषः समीक्षाञ्चक्रे । तं च संवीक्ष्य तदामिषभक्षणे तस्याऽप्यभिलाषः समजायत । स चाऽभिलाषोऽस्य भुञ्जानस्य विचारभूमीं गतस्य चरमां सूत्रपौरुषीं, प्रतिक्रमणक्रियां, प्रादोषिकपौरुषीं च कुर्वतो न निवृत्तः; किं बहुना ?, तदभिलाषवत्यैव प्रसुप्तोऽसौ । ततः स्त्यानर्द्धिनिद्रोदयो जातः । तदुदये चोत्थाय ग्रामाद् बहिर्महिषमण्डलमध्ये गत्वाऽन्यं महिषमेकं विनिहत्य तदामिषं भक्षितवान्। तदुद्धरितशेषं च समानीयोपाश्रयोपरि क्षिप्त्वा प्रसुप्तः । समुत्थितश्च प्रत्युषसि स 'मयेत्थंभूतः स्वप्नो दृष्टः' इत्येवं गुर्वन्तिक आलोचयामास । साधुभिश्चोपाश्रयोपरि तदामिषमदृश्यत । ततः 'स्त्यानर्द्धिनिद्रोदयोऽस्याऽस्ति' इति ज्ञातम् । तथा च संघेन लिङ्गमपहृत्य विसर्जितोऽसौ ।। **इति स्त्यानर्द्धिनिद्रोदये प्रथममुदाहरणमिति** ।।१।।

अथ द्वितीयं मोदकोदाहरणमुच्यते, यथा-एकः कोऽपि साधुर्भिक्षां पर्यटन् क्वचिद् गृहे पटलकादिव्यवस्थापितानातिप्रचुरान् सुरभिस्निग्धमधुरमनोज्ञान् मादकानद्राक्षीत् । तेन चोर्ध्वस्थितेन ते सुचिरमुद्वीक्षिताः । न च किमपि तन्मध्याल्लब्धम् । ततः सोऽप्यविच्छिन्नतदभिलाष एव सुष्वाप । स्त्यानर्द्धिनिद्रोदये च रजन्यां तद्गृहं गत्वा, स्फोटयित्वा कपाटानि, मोदकान् स्वेच्छया भक्षयित्वा,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

उद्वरितांस्तु पतद्ग्रहके क्षिप्त्वोपाश्रयमागत्य पतद्ग्रहकं स्थाने मुक्त्वा प्रसुप्तः । उत्थितेन च तथैवाऽऽलोचितं गुरूणाम् । ततः प्रत्युपेक्षणासमये भाजनादि प्रत्युपेक्षमाणेन साधुना पतद्ग्रहके दृष्टास्ते मोदकाः । ततो गुर्वादिभिर्ज्ञातोऽस्य स्त्यानर्द्धिनिद्रोदयः । तथैव च संघेन लिङ्गपाराञ्चिकं दत्त्वाऽयमपि विसर्जितः ।।२।।

दन्तोदाहरणं तृतीयमुच्यते, यथा-एकः साधुर्दिवा द्विरदेन खेदितः कथमपि पलाय्योपाश्रयमागतः। तं च दन्तिनं प्रत्यविच्छिन्नकोप एव निशि प्रसुप्तः । स्त्यानार्द्धिनिद्रोदयश्च जातः । तदुदये च वज्रऋषभनाराचसंहननवतः केशवार्धबलसंपन्नता समये निगद्यते । अतो नगरकपाटानि भङ्क्त्वा मध्ये गत्वा तं हस्तिनं व्यापाद्य दन्तद्वयमुत्पाट्य स्वोपाश्रयद्वारे क्षिप्त्वा सुप्तः । प्रबुद्धेन च 'स्वप्नोऽयम्' इत्यालोचितम् । दन्तदर्शने च ज्ञातः स्त्यानर्द्धिनिद्रोदयः । तथैव च लिङ्गं गृहीत्वा संघेन विसर्जितः ।।३।।

फरुसगशब्देन समयप्रसिद्ध्या कुम्भकारोऽभिधीयते, तदुदाहरणं चतुर्थमुच्यते-एकः कुम्भकारो महति गच्छे प्रव्रजितः । अन्यदा च सुप्तस्याऽस्य स्त्यानर्द्धिनिद्रोदयो जातः । ततोऽसौ पूर्वं यथा मृत्तिकापिण्डानत्रोटयत्, तथा तदभ्यासादेव साधूनां शिरांसि त्रोटयित्वा कबन्धैः सहैवैकान्ते उज्झाञ्चकार । ततः शेषाः केचन साधवोऽपसृताः । प्रभाते च ज्ञातं सम्यगेव सर्वं तच्चेष्टितम् । संघेन तथैव विसर्जितः ।।४।।

अथ वटशाखाभञ्जनोदाहरणं पञ्चममुच्यते, यथा- कोऽपि साधुर्ग्रामान्तराद् गोचरचर्यां विधाय प्रतिनिवृत्तः । स चौष्ण्याऽभिहतो भृतभाजनस्तृषितो बुभुक्षितश्छायार्थी मार्गस्थो वटवृक्षस्याऽधस्तादागच्छन्नतिनीचैर्वर्तिन्या तच्छाखया मस्तके घट्टितः, गाढं च परितापितः, अव्यवच्छिन्नकोपश्च प्रसुप्तः । स्त्यानर्द्धिनिद्रोदये रात्रौ गत्वा वटशाखां भङ्क्त्वोपाश्रयद्वारे क्षिप्त्वा पुनः प्रसुप्तः । 'स्वप्नो दृष्टः' इत्यालोचिते, स्त्यानर्ध्युदये च ज्ञाते लिङ्गापनयनतः संघेन विसर्जित इति ।।५।।

२३. निदानध्याने श्रीउपदेशमालाहेयोपादेयायां नन्दिषेणकथा ।

नन्दिग्रामे चक्रचरधिग्वर्णदारकस्य नन्दिषेणनाम्नो अव्यक्तस्यैव मृतौ माता-पितरौ, स्थितो मातुलसमीपे । किमत्र कर्म मुधिकया करोषि ? किं वा न दारसङ्ग्रहं द्रव्योपार्जनद्वारेणेति विप्रतारितोऽसौ लोकैः । ततो निर्गन्तुकामः स्वसुतां ते दास्यामीति वदता विधृतो मातुलेन । यौवनस्था चोपस्थापिता सा तस्य तेन, तया च तं निरीक्ष्य तद्दौर्भाग्य-वैरूप्याभ्यां जातवैमुख्यया पितरं प्रत्युक्तं यदि मामस्मै दास्यसि ततोऽहं मरिष्ये । ततो द्वितीयां दास्यामि, इयं तु नेच्छतीति सम्भाव्य धृतो निर्गच्छन्नसौ तेन । एवं सप्तभिस्तत्सुताभिर्मरणाभ्युपगमेनानिष्टस्य जातमस्य वैराग्यं,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चिन्तितमनेन स्वपापतरुफलमिदं, तत् किं दारसङ्ग्रहेण ? करोमि तदुन्मूलने यत्नमिति सञ्चिन्त्याटता तेन दृष्टः कश्चिदाचार्यः, धर्मं श्रुत्वा प्रव्रजितस्तत्सकाशे । अभ्यस्तक्रियाकलापो गृहीतागमश्च पञ्चशतिकगच्छस्य गृहीताभिग्रहो वैयावृत्त्यं कर्तुमारब्धः । कुर्वतश्च सोत्साहं कृतकृत्यमात्मानं भावयतो गतो बहुः कालः ।

अन्यदा स्वःसभायां धन्यः कृतार्थो नन्दिषेणो यो देवैरपि न धर्माच्च्याव्यत इति श्लाघितः शक्रेण । तदश्रद्धानोऽवतीर्णः कश्चिद्देवः स्थित्वा साधूपाश्रयद्वारे स प्राह-अटव्यां ग्लानतपस्वी तिष्ठतीति । तदाकर्ण्य षष्ठपारणके गृहीतप्रथमकवलस्तं परित्यज्य सहसा निर्गतो नन्दिषेणः परिपृच्छ्य तं प्रदेशमवस्थां च प्रविष्टः पानकौषधाद्यर्थं गोचरे । देवविहितानेषणामदीनमनस्को लाभान्तरायक्षयोपशमस्योत्कटतया निर्जित्य गृहीत्वैषणीयं पानकादिकं गतस्तं प्रदेशम् । दर्शितो देवेनाशुचिबीभत्सो धिग्दुर्मुण्ड ! स्वोदरभरणक्षणिक ! इत्यादिकर्कशवचनैर्विरारट्यमानो ग्लानसाधुः ।

ततो बत मयाऽधन्येनाऽस्य महामुनेर्मनः खेदः सम्पादितः, कथं चायं प्रगुणो भविष्यतीति चिन्तयता तेन क्षालितस्तद्देहः । धीरो भव, करोमि निरुजं भवन्तम्, आगच्छोपाश्रयमिति समाश्वासितो मधुरवचनैर्नन्दिषेणेन स प्राह - 'आः पाप ! न जानीषे मेऽवस्थां, न शक्नोम्यहं पदमपि गन्तुम् । ततः समारोप्य स्वपृष्ठदेशे तमितरो गन्तुमारब्धः । देवोऽपि मुञ्चति दुर्गन्ध्यशुच्यादीनि, 'धिग् दुरात्मन् ! वेगविघातं करोषि !' इत्यादिभिः शपते च कटुकवाक्यैः । इतरोऽपि प्रवर्धमानतीव्रतरशुभपरिणामः कथमयं महात्मा स्वस्थः स्यादिति चिन्तयन् मिथ्यादुष्कृतमिदानीं शोभनं नयामीति वदन् गच्छति स्म । ततो देवस्तच्चरितावर्जितमानसः स्थाने शक्रस्य पक्षपात इति सञ्चिन्त्य मायां संहृत्य प्रकटितदिव्यरूपः पतितः पादयोर्निवेद्य वृत्तान्तमाह च-किं मया कर्तव्यं ? मुनिराह-यथाशक्ति धर्मोद्यम इति । गतोऽसौ स्वस्थानम् । मुनिश्च पृच्छतां साधूनां कथितवान् यथावृत्तम् ।

पश्चादवसानकाले स्मृतगृहस्थावस्थादौर्भाग्येण मनुष्यभवेऽहं सुभगो भूयासमिति कृतमिति तेन निदानम् । गतो दिवम्, ततश्च्युत्वा जातो दशमदशारो वसुदेवनामा । प्राप्तयौवनेन च तेन भ्रमता कृता हृतहृदयाः सुरसुन्दर्यः स्वगृहकर्मापि त्यक्तवत्यः । ततो नागरिकविज्ञप्तसमुद्रविजयोपरोधान्निर्गतेन देशकालिकया पर्यटता वसुधाम् । रूपातिशयाक्षिप्तमनोभिः सर्वलोकैरपरापरस्थानेषु नीयमानेन परिणीता बहुसहस्रसङ्ख्या विद्याधरनरपतिवरकन्यकाः, प्राप्तो वैषयिकसुखातिरेकः । पश्चान्मिलितेन च बन्धुभिः समुत्पन्नेऽर्धचक्रवर्तिनी कृष्णे सुतोत्तमे, जातेषु प्रद्युम्नादिषु तद्वरतनयेषु लब्धं हरिवंशपितामहत्त्वमिति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

२३. निदानध्याने श्रीसंवेगरङ्गशालायां गङ्गदत्तस्यावसरः ।

पुरनगरनिगमसंकुल-कुलगिरिगुरुदेवभवणरमणिज्जे ।
वच्छाविसए नयर, जयबद्धणमाऽऽसि सुपसिद्धं ।।१।।

सिद्धंतपसिद्धविसुद्धधम्म-कम्मेक्कबद्धपडिबंधो । बंधुपिओ नाम तहिं, अहेसि सिट्ठी नयविसिट्ठो ।।२।।

सिट्ठाऽणुमओ पुत्तो य, गंगदत्तो त्ति तस्स सुविणीतो ।
सो य कमेणऽणुपत्तो, तारुण्णं तरुणिमणहरणं ।।३।।

तं च तहाविहमऽवलोइऊण, पिउणा सयंभुनामस्स ! वणिणो धूया वरिया, वीवाहऽट्ठं पहिट्ठेणं ।।४।।

अह सुपसत्थे हत्थग्गहस्स, जोग्गम्मि तिहिमुहुत्तम्मि । सा हरिसमुवगएणं, उव्वूढा गंगदत्तेणं ।।५।।

नवरं जब्वेलं चिय, तीसे सो पाणिपल्लवे लग्गो । तव्वेलं चिय तीए, वियंभिओ दुस्सहो दाहो ।।६।।

किं हुयवहेण आलिंगियम्हि, सित्तम्हि किं विसरसेण ।
इति चिंतंती पल्हत्थ-वामहत्थाऽऽणणा विमणा ।।७।।

अच्छिन्नमऽच्छिपुडसं-घडंतवाहच्छडा वलियगीवा । निहुयं परिदेवंती, सयभुणा एवमुल्लविया ।।८।।

वच्छे ! हरिसट्ठाणे वि, कीस संतावमेवमुव्वहसि ।
पहसिरवयणा जं सहि-जणं पि नाऽऽलवसि सप्पणयं ।।९।।

किंच न पेच्छसि तुह छणए, लोयणाऽऽणंदनिब्भरमणस्स ।
सविलासगीयनट्टाइं, सयणलोयस्स पुत्ति ! तुमं ।।१०।।

ता कुण सरलं गीवा-मुणालमऽवणेहि नयणजलकणियं ।
सच्छायं मुहलच्छिं, पयडेहि विमुंच सोगमिमं ।।११।।

अह अत्थि गाढतरसोग-कारणं किंपि ता तमऽविसंकं ।
फुडवयणेहिं साहेहि, जेण अवणिज्जए सज्जो ।।१२।।

तीए पयंपियं ताय !, इण्हिं किमऽईयवत्थुकहणेण । नक्खत्तमग्गणा मुंडिए सिरे कं गुणं कुणइ ।।१३।

भणियं सयंभुणा पुत्ति !, तहवि साहेहि एत्थ परमत्थं ।
तो तीए सव्वो वि य, वरवुत्तंतो समाऽऽइट्ठो ।।१४।।

सोऊण तं च वज्जाऽऽहओ व्व अवहरियगेहसारो व्व ।
मसिसलिललोहलिओ इव, सो विच्छायत्तमऽणुपत्तो ।।१५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वित्तो य विवाहविही, सयणजणो वि य गओ सगेहेसु ।
अह अवरवासरम्मि, ससुरगिहे निज्झमाणीए ।।१६।।

अच्चंतदइयदोहग्ग-खग्गनिब्भिज्जमाणहिययाए । अन्नं मोक्खोवायं, थेवं पि अपेच्छमाणीए ।।१७।।

पासायसिहरमाऽऽरुहिय, तीए मरणऽट्ठया लहु विमुक्को ।
अप्पा निवडियमेत्ता य, सा गया झत्ति पंचत्तं ।।१८।।

मिलिया अम्मापिउणो, सयणजणो वि य समागतो तुरियं ।
विहिओ य से समग्गो, सरीरसक्कारपमुहविही ।।१९।।

तम्मरणनिमित्तं पि य, सव्वत्थ पुरम्मि तत्थ वित्थरियं ।
नियदोहग्गेण दढं च, लज्जिओ गंगदत्तो वि ।।२०।।

नवरं पिउणा भणिओ, मा वच्छ ! विसायमेत्थ थेवं पि ।
काहिसि तहा जहस्सं जह अवरा होज्ज तुह भज्जा ।।२१।।

अह कहवि दूरपुरवासि-वणियधूयं पुणो वि सो तेण ।
परिणाविओ तहाविह-पभूयतरदव्वविणिओगा ।।२२।।

सा वि तहज्झिय हत्थ-ग्गहाओ उड्ढं गया परमसोगं । तग्गिहगमणाऽवसरे, नवरं उल्लंबणेण मया ।।२३।।

तो सव्वत्थ वि देसे, दुस्सहदोहग्गदूसणं पत्तो । सोगभरविहुरियंऽगो य, गंगदत्तो विचिंतेइ ।।२४।।

किं पुव्वभवेसु मए, पावं पावेणुवज्जियं गरुयं । जस्स पभावेणेवं, भवामि वेसोऽहमित्थीणं ।।२५।।

धन्ना भयवंतो ते, सणंकुमाराऽऽइणो महासत्ता । दढपणयसालिणं पि हु, तत्तियमंऽतेउरं मोत्तुं ।।२६।।

लग्गा संजममग्गे, अहं तु निब्भग्गवग्गवग्गू वि । दोहग्गवमित्थीणं, सुमिणे वि अपत्थणिज्जो य ।।२७।।

मिगपोयगो व्व मायण्हियाए. निव्विसयविसयतण्हाए ।
विणडिज्जामि हयाऽऽसाए, अहह ! एत्तो सुहं कत्तो ।।२८।।

इय जाव सो विचिंतइ, ताव पिया से समाऽऽगओ भणइ ।
वच्छ ! परिज्झय सोगं, निरत्थयं कुणसु कायव्वं ।।२९।।

चिरभवपरंपरोवज्जियाण, पावाण विलसियं एयं ।
वयणिज्जमेत्थ कस्स वि, परमऽत्थेणं अओ नत्थि ।।३०।।

ता एहि पुत्त ! जामो, भयवं गुणसायरो इहं सूरी । सुव्वइ समोसढो तं च, वंदिमो नाणरयणनिहिं ।।३१।।

पडिवन्नं तेण ततो, सूरिसमीवे गया विणयपूव्वं । वंदित्तु तं निसन्ना, सनिहियम्मि धरावट्ठे ।।३२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सूरी वि दिव्वनाणो-वओगविन्नायसव्वनायव्वो ।
अक्खेवणिविक्खेवणि-सरूवमऽह कहइ धम्मकहं ।।३३।।

अह पत्थावं उवलब्भ, गंगदत्तेण पुच्छिओ सूरी । भयवं ! पुरा मए किं ?, दोहग्गकरं कयं कम्मं ।।३४।।

जेणेहभवे परमं, विद्देसं पाविओ म्हि जुवईण । इति तेण पुच्छियम्मि, भणइ गुरू भो ! निसामेहि ।।३५।।

नयरम्मि सयदुवारे, रन्नो सिरिसेहरस्स तं भज्जा । अच्चंतवल्लहा आसि, गाढकामाऽणुबंधा य ।।३६।।

तस्स य रन्नो निम्मेररूवलायन्नमणहरंऽगीण । भज्जाणमऽणूणाइं, हुन्ताणि सयाणि किर पंच ।।३७।।

ताणि य तुमए विद्देसणाऽऽइ-बहुकूडमंततंतेहिं ।
हणियाणि जहिच्छमऽविग्घ-मवणिवइरमणवंछाए ।।३८।।

समुवज्जिउं च वज्जं व, दारुणं भूरिपावसंभारं । तप्पच्चयं च अच्चंत-दुग्गदोहग्गकम्मं पि ।।३९।।

पज्जन्ते य सुदुस्सह-सासाऽऽइपभूयपबलरोगेहिं । मरिऊण नरयतिरिएसु, णेगसो सहिय दुक्खाइं ।।४०।।

कहकहवि कम्मलाघव-वसेण एत्थोवलद्धमणुयत्तो ।
पुव्वकयपावदोसेण, इन्हि दोहग्गमऽणुहवसि ।।४१।।

एवं सोच्चा संजाय-धम्मसद्धो भवाउ उव्विग्गो । आपुच्छिऊण पियरं, सो पव्वज्जं पवज्जित्ता ।।४२।।

गामाऽऽगरनगरेसुं, विहरइ वाउ व्व चत्तपडिबंधो ।
गुरुकुलवासोऽवगतो, सुत्तऽत्थविभावणुज्जुत्तो ।।४३।।

अह केत्तियं पि कालं, पव्वज्जं निक्कलंकमऽणुचरिउं ।
भत्तपरिन्नाविहिणा, उवट्ठिओ अणसणं काउं ।।४४।।

भणिओ थेरिहं तओ, अहो महाभाग ! अणुचियमिमं ते ।
उवचियसोणियमंसस्स, अणसणं एत्थ पत्थावे ।।४५।।

चत्तारि विचित्ताइं, विगईनिजूहियाइं चत्तारि । इच्चाऽऽइणा कमेणं, तम्हा संलेहणं कुणसु ।।४६।।

संलिहियदव्वभावो, पच्छाऽणुट्ठेज्ज वंछियऽत्थंपि ।
इहरा विसोत्तिया वि हु, भवेज्ज बहुविग्घमिममाऽऽहु ।।४७।।

इय पन्नविओ वि बहुं, तग्गिरमऽवगन्निऊण सच्छंदो ।
घेत्तूण अणसणं गिरि-सिलायले सो निसन्नो त्ति ।।४८।।

अह तस्स तहा झाण-ट्ठियस्स पडिरुद्धदुट्ठजोगस्स । अणसणगयस्स जं किर, वित्तं तं संपइ सुणेइ ।।४९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ताविच्छगुच्छसच्छह-सुकंतकुंतलकलावकलियाहिं ।
छणमयलंछणसच्छह-मुहजोन्हाधवलियदिसाहिं ।।५०।।

निम्मलमऊहमुत्ताकलावरेहं तथोरथणयाहिं । सुसिलिट्ठलट्ठमणिकंचि-दामसोहंतरमणीहिं ।।५१।।
वट्टाऽणुपुव्वरंभा-ऽभिरामदिप्पंतजंघजुयलाहिं । चरणपरिलग्गरणझणिर-मंजुमंजीररम्माहिं ।।५२।।
अच्चंतविचित्तमहग्घमुल्ल-दोगुल्लवरनियत्थाहिं । मदारकुसुमपरिमल-मिलंतभसलोलिसामाहिं ।।५३।।
सुंदेरमणहराहिं, तरुणीहिं परिगतो अणेगाहिं । विज्जाहररायसुओ, अणंगकेऊ त्ति सुपसिद्धो ।।५४।।
सिद्धाऽऽययणाइं वंदिऊण, सगिहं पडुच्च वच्चंतो । मुणिमऽणसणट्ठियं जाणि-ऊण भूमितलम्मोइन्नो ।।५५।।
तो गंगदत्तमऽइभूरि-भत्तिभरनिस्सरंतरोमंचो । सुचिरं थुणिऊण गतो, रामाजणपरिवुडो सपुरं ।।५६।।
साहू वि तस्स सोहग्ग-मुग्गमऽबलामणोहरणदक्खं । दट्ठुं पडिभग्गमणो, चिंतिउमेवं समाढत्तो ।।५७।।
एस महप्पा एवं, विलासिणीसत्थपरिगओ लल्लइ । अहयं तु पावकम्मो, तइ तइया ताहिं परिभूओ ।।५८।।

ता धी ! निरत्थयं मज्झ, जीवियं दुट्ठु, माणुसं जम्मं ।
निरुवहयंऽगो वि तहा, विडंबणं जोऽणुपत्तो म्हि ।।५९।।
इय कुवियप्पवसगतो, तो जंपइ जइ इमस्स फलमऽत्थि ।
सामन्नस्स तया हं, इमो व्व होज्जामि परजम्मे ।।६०।।

एयं नियाणबंधं, काऊण मओ महिंदकप्पम्मि । उववन्नो पवरसुरो, तत्थ य विसए निसेवित्ता ।।६१।।
आउगंविगमम्मि चुओ, उववन्नो भूमितिलयभूयाए । उज्जेणीए पुरीए, रन्नो सिरिसमरसीहस्स ।।६२।।
भज्जाए सोमनामाए पुत्तभावेण पवरसुमिणेहिं । कयसूओ नीरोओ, समुचियसमए पसूओ य ।।६३।।
विहियं बद्धावणयं पत्थावे ठावियं च से नामं । रणसूरो त्ति कमेणं, तारुन्नं पन्नरमऽणुपत्तो ।।६४।।

अह पुव्वऽज्जियनिरवग्ग-हुग्गसोहग्गसंगतो जत्थ ।
सो भमइ तत्थ जुवईण, तम्मि निक्खित्तक्खूण ।।६५।।

मयणवसविहियबहुहाव-भावविब्भमविलासलीलाण । अवहत्थियलज्जाणं, अवरे विरमंति वावारा ।।६६।।
राइसरसेणावइ-महिब्भसामंतमंतिधूयाहिं । एसीऽम्ह पई अहवा वि, हुयवहो इइ वयंतीहिं ।।६७।।
उव्वूढो गाढपरूढ-पणयसाराहिं ताहिं समगं च । पंचविहविसयसोक्खं, अणुभुंजइ दीहरं कालं ।।६८।।

मरिउं च भवुत्थसुतिक्ख-दुक्खलक्खाण भायणं भूओ ।
नियदुव्विलसियवसओ, चिरकालं गंगदत्तो त्ति ।।६९।।

[संवेगरंगशाला श्लोक ४०९४ तः ४१६२]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

२३, ६३. निदानध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्राऽन्तर्गता चित्रसंभूतिमुनेः कथा ।

वाराणस्यां ततोऽभूतां भूतदत्ताभिधस्य तौ । महाधनसमृद्धस्य मातंगाधिपतेः सुतौ ।।१।।
चित्रसंभूतनामानौ तौ मिथः स्नेहशालिनौ । न कदापि व्ययुज्येतां संबद्धौ नखमांसवत् ।।२।।
वाराणस्यां तदा चाभूच्छंख इत्यवनीपतिः । आसीच्च सचिवस्तस्य नमुचिर्नाम विश्रुतः ।।३।।
अपरेद्युः सोऽपराधे महीयसि महीभुजा । अर्पितो भूतदत्तस्य प्रच्छन्नं वधहेतवे ।।४।।
तेनोचे नमुचिश्छन्नं त्वां रक्षामि निजात्मवत् । पाठयस्यात्मजौ मे त्वं यदि भूमिगृहस्थितः ।।५।।
प्रतिपन्नं नमुचिना तन्मातंगपतेर्वचः । जनो हि जीवितव्यार्थी तन्नास्ति न करोति यत् ।।६।।
विचित्राश्चित्रसंभूतौ स तथाध्यापयत् कलाः । रेमेऽनुरक्तया सार्धं मातंगपतिभार्यया ।।७।।
ज्ञात्वा तद्भूतदत्तेनारेभे मारयितुं तु सः । सहेत कः स्वदारेषु पारदारिकविप्लवम् ।।८।।
ज्ञात्वा मांतगपुत्राभ्यां स दूरेणापसारितः । सैवास्मै दक्षिणा दत्ता प्राणरक्षणलक्षणा ।।९।।
ततो निःसृत्य नमुचिर्गतवान् हस्तिनापुरे । चक्रे सनत्कुमारेण सचिवश्चक्रिणा निजः ।।१०।।
इतश्च चित्रसंभूतौ बभतुर्नवयौवनौ । कुतोऽपि हेतोरायातौ पृथिव्यामाश्विनाविव ।।११।।
तौ स्वादु जगतुर्गीतं हाहाहूहूपहासिनौ । वादयामासतुर्वीणामतितुंबुरुनारदौ ।।१२।।
गीतप्रबंधानुगतैः सुव्यक्तैः सप्तभिः स्वरैः । तयोर्वादयतोर्वीणां किंकरंति स्म किन्नराः ।।१३।।
मुरजं धीरघोषं तौ वादयन्तौ च चक्रतुः । गृहीतमुरकंकालातोद्यकृष्णविडंबनाम् ।।१४।।
शिवः शिवोर्वशीरंभायुंजकेशीतिलोत्तमाः । यन्नाट्यं न विदांचक्रुस्तौ तदप्यभिनिन्यतुः ।।१५।।
सर्वगान्धर्वसर्वस्वमपूर्वं विश्वकार्मणम् । प्रकाशयद्भ्यां च ताभ्यां न जह्रे कस्य मानसम् ।।१६।।
तस्यां पुरि प्रवतृते कदाचिन्मदनोत्सवः । निरीयुः पौरचर्चर्यस्तत्र संगीतपेशलाः ।।१७।।
चर्चरी निर्ययौ तत्र चित्रसंभूतयोरपि । जग्मुस्तत्रैव तद्गीताकृष्टाः पौरा मृगा इव ।।१८।।
राज्ञो व्यज्ञपि केनापि मातंगाभ्यां पुरीजनः । गीतेनाकृष्य सर्वोऽयमात्मवन्मलिनः कृतः ।।१९।।
क्ष्मापेनापि पुराध्यक्षः साक्षेपमिदमाज्ञपि । न प्रवेशः प्रदातव्यो नगर्यामनयोः क्वचित् ।।२०।।
ततः प्रभृति तौ वाराणस्या दूरेण तस्थतुः । प्रवृत्तश्चैकदा तत्र कौमुदीपरमोत्सवः ।।२१।।
राजशासनमुल्लंघ्य लोलेन्द्रियतया च तौ । प्रविष्टौ नगरीं भृंगौ गजगंडतटीमिव ।।२२।।
उत्सवं प्रेक्षमाणौ तौ सर्वांगीणावगुंठनौ । दस्युवन्नगरीमध्ये छन्नं छन्नं विचेरतुः ।।२३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्रोष्टुवत् क्रोष्टुशब्देन पौरगीतेन तौ ततः । अगायतां तारतारमलंघ्या भवितव्यता ।।२४।।
आकर्ण्य कर्णमधुरं तद्गीतं युवनागरैः । मधुवन्मक्षिकाभिस्तौ मातंगौ परिवारितौ ।।२५।।
कावेताविति विज्ञातुं लोकैः कृष्टावगुंठनौ । अरे तावेव मातंगावित्याक्षेपेण भाषितौ ।।२६।।
नागरैः कुट्यमानौ तौ यष्टिभिर्लोष्टुभिस्ततः । श्वानाविव गृहात्पुर्या नतग्रीवौ निरीयतुः ।।२७।।
तौ सैन्यशशवल्लोकैर्हन्यमानौ पदे पदे । स्खलत्पादौ कथमपि गभीरोद्यानमीयतुः ।।२८।।
तावचिन्तयतामेवं धिङ्नौ दुर्ज्ञातिदूषितम् । कलाकौशलरूपादि पयो घ्रातमिवाहिना ।।२९।।
उपकारो गुणैरास्तामपकारोऽयमावयोः । तदिदं क्रियमाणायाः शान्तेर्वेताल उत्थितः ।।३०।।
कलालावण्यरूपाणि स्यूतानि वपुषा सह । तदेवानर्थसदनं तृणवत्त्यज्यतां क्वचित् ।।३१।।
इति निश्चित्य तौ प्राणपरिहाणपरायणौ । मृत्युं साक्षादिव द्रष्टुं चेलतुर्दक्षिणामभि ।।३२।।
ततो दूरं प्रयातौ तौ गिरिमेकमपश्यताम् । यत्रारूढैर्भुवीक्ष्यंते करिणः किरिपोतवत् ।।३३।।
भृगुपातेच्छया ताभ्यामारोहद्भ्यां महामुनिः । ददृशे पर्वते तस्मिन्नंगमो गुणपर्वतः ।।३४।।
प्रावृषेण्यमिवांभोदं मुनिं गिरिशिरः स्थितम् । दृष्ट्वा प्रणष्टसंतापप्रसरौ तौ बभूवतुः ।।३५।।
तौ प्राग्दुःखमिवोज्झन्तावानन्दाश्रुजलच्छलात् । तत्पादपद्मयोर्भृंगाविव सद्यो निपेततुः ।।३६।।
समाप्य मुनिना ध्यानं कौ युवां किमिहागतौ । इति पृष्टौ स्ववृत्तांतं तावशेषमशंसताम् ।।३७।।
स ऊचे भृगुपातेन वपुरेव हि शीर्यते । शीर्यते नाशुभं कर्म जन्मान्तरशतार्जितम् ।।३८।।
त्याज्यं वपुरिदं वां चेद्गृह्णीतं वपुषः फलम् । तच्चापवर्गस्वर्गादिकारणं परमं तपः ।।३९।।
इत्यादिदेशनावाक्यसुधानिर्धौतमानसौ । तस्य पार्श्वे जगृहतुर्यतिधर्ममुभावपि ।।४०।।
अधीयानौ क्रमेणाथ तौ गीतार्थौ बभूवतुः । आदेरण गृहीतं हि किं वा न स्यान्मनस्विनाम् ।।४१।।
षष्टाष्टमप्रभृतिभिस्तौ तपोभिः सुदुस्तपैः । क्रशयामासतुर्देहं प्राक्तनैः कर्मभिः सह ।।४२।।
ततो विहरमाणौ तौ ग्रामाद्ग्रामं पुरात् पुरम् । कदाचित्प्रतिपेदाते नगरं हस्तिनापुरम् ।।४३।।
तौ तत्र बहिरुद्याने चेरतुर्दुश्चरं तपः । संभोगभूमयोऽपि स्युस्तपसे शान्तचेतसाम् ।।४४।।
संभूतमुनिरन्येद्युर्मासक्षपणपारणे । पुरे प्रविष्टो भिक्षार्थं यतिधर्मोऽङ्गवानिव ।।४५।।
गेहाद्गेहं परिभ्राम्यन्नीर्यासमितिपूर्वकम् । स राजमार्गापतितो दृष्टो नमुचिमंत्रिणा ।।४६।।
मातंगदारकः सोऽयं मद्वृत्तं ख्यापयिष्यति । मंत्रीति चिन्तयामास पापाः सर्वत्र शंकिताः ।।४७।।
यावन्मन्मर्म कस्यापि प्रकाशयति न ह्यसौ । तावन्निर्वासयाम्येनमिति पत्तीन्न्ययुंक्त सः ।।४८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स ताडयितुमारेभे तेन पूर्वोपकार्यपि। क्षीरपाणमिवाहीनामुपकारोऽसतां यतः ।।४९।।
लकुटैः कुट्यमानः स सस्यबीजमिवोत्कटैः । स्थानात्ततोऽपचक्राम त्वरितत्वरितं मुनिः ।।५०।।
अमुच्यमानः कुट्टाकैर्निर्यन्नपि मुनिस्तदा । शांतोऽप्यकुप्यदापोऽपि तप्यन्ते वह्नितापतः ।।५१।।
निर्जगाम मुखात्तस्य बाष्पोत्पीडं समंततः । अकालोपस्थितांभोदविभ्रमं बिभ्रदंबरे ।।५२।।
तेजोलेश्योल्ललासाथ ज्वालापटलमालिनी । तडिन्मंडलसंकीर्णामिव द्यामभितन्वती ।।५३।।
अतिप्रकुपितं तं च तेजोलेश्याधरं ततः । प्रसादयितुमाजग्मुः पौराः सभयकौतुकाः ।।५४।।
राजा सनत्कुमारोऽपि ज्ञात्वा तत्र समाययौ । उत्तिष्ठति यतो वह्निस्तत्र विध्यापयेत्सुधीः ।।५५।।
नत्वोचे तं नृपः किं वो युज्यते भगवन्निदम् । चन्द्राश्मार्काशुतप्तोऽपि नार्चिर्मुंचति जातुचित् ।।५६।।
एभिरत्यपराद्धं यत्कोपोऽयं भवता मतः । क्षीराब्धेर्मथ्यमानस्य कालकूटमभून्न किम् ।।५७।।
न स्यात्स्याच्चेच्चिरं न स्याच्चिरं चेत्तत्फलेऽन्यथा । खलस्नेह इव क्रोधः सतां तद्भूमहेऽत्र किम् ।।५८।।
तथापि नाथ नाथामि कोपं मुंचेतरोचितम् । भवादृशाः समदृशो ह्यपकार्युपकारिषु ।।५९।।
चित्रोऽप्यत्रान्तरे ज्ञात्वा संभूतमुनिमभ्यगात् । सांत्वयितुं भद्रमिव द्विपं मधुरभाषितैः ।।६०।।
तस्य कोप उपशाम्यच्चित्रवाक्यैः श्रुतानुगैः । पयोवाहपयःपूरैर्गिरेरिव दवानलः ।।६१।।
तीव्रकोपतमोमुक्तः शशांक इव पार्वणः । क्षणादासादयामास प्रसादं स महामुनिः ।।६२।।
वंदित्वा क्षमयित्वा च लोकस्तस्मान्न्यवर्तत । संभूतश्चित्रमुनिना तदुद्यानमनीयत ।।६३।।
पश्चात्तापं चक्रतुस्तौ पर्यटद्भिर्गृहे गृहे । आहारमात्रककृते प्राप्यते व्यसनं महत् ।।६४।।
शरीरं गत्वरमिदं ह्याहारेणापि पोषितम् । किमनेन शरीरेण किं वाहारेण योगिनाम् ।।६५।।
चेतसेति विनिश्चित्य कृतसंलेखनौ पुरा । उभौ चतुर्विधाहारप्रत्याख्यानं प्रचक्रतुः ।।६६।।
कः पराभूतवान् साधुं वसुधां पाति मय्यपि । इति जिज्ञासतो राज्ञो मंत्री व्यज्ञपि केनचित् ।।६७।।
अर्च्यान्नार्चति यः सोऽपि पापः किमुत हंति यः । इत्यानाययदुर्वीशो दस्युवत्संयमय्य तम् ।।६८।।
अन्योऽपि साधुविध्वंसं मा विधादिति शुद्धधीः । तं बद्धं पुरमध्येन सोऽनैषीत्साधुसंनिधौ ।।६९।।
नमन्नुपशिरोरत्नभानिरंभोमयीमिव । कुर्वन्नुर्वीं स उर्वीशपुंगवस्तावबन्दत ।।७०।।
सव्यपाणिगृहीतास्यवस्त्रिकापिहिताननौ । उद्दक्षिणकरौ तौ तमाशशंसतुराशिषा ।।७१।।
यो वोऽपराद्धवान् सोऽस्तु स्वकर्मफलभाजनम् । राज्ञा सनत्कुमारेणेत्यदर्शि नमुचिस्तयोः ।।७२।।
अमोचि नमुचिः प्राप्तः पंचत्वोचितभूमिकाम् । सनत्कुमारतस्ताभ्यामुरगो गरुडादिव ।।७३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

निर्वास्य कर्मचंडालश्चंडाल इव पत्तनात् । वध्योऽप्यमोचि राज्ञा स मान्यं ही गुरुशासनम् ।।७४।।
सपत्नीभिश्चतुःषष्टिसहस्रैः परिवारिता । वंदितुं तौ सुनंदागात् स्त्रीरत्नमथ चक्रिणः ।।७५।।
सा संभूतमुनेः पादपद्मयोर्लुलितालका । पपातास्येन कुर्वाणा भुवमिन्दुमतीमिव ।।७६।।
तस्याश्चालकसंस्पर्शं संभूतमुनिरन्वभूत् । रोमांचितश्च सद्योऽभूच्छलान्वेषी हि मन्मथः ।।७७।।
अथ सान्तःपुरे राज्ञि तावनुज्ञाप्य जग्मुषि । रागाभिभूतः संभूतो निदानमिति निर्ममे ।।७८।।
दुष्करस्य मदीयस्य यद्यस्ति तपसः फलम् । ततः स्त्रीरत्नपतिरहं भूयासं भाविजन्मनि ।।७९।।
चित्रोऽप्यूचे कांक्षसीदं मोक्षदात्तपसः फलम् । मौलियोग्येन रत्नेन पादपीठं करोषि कम् ।।८०।।
मोहात्कृतं तन्निदानमिदानीमपि मुच्यताम् । मिथ्यादुष्कृतमस्यास्तु मुह्यंति न भवादृशाः ।।८१।।
एवं निवार्यमाणोऽपि संभूतश्चित्रसाधुना । निदानं नामुचदहो विषयेच्छा बलीयसी ।।८२।।
निर्व्यूढानशनौ तौ तु प्राप्तायुः कर्मसंक्षयौ । सौधर्मे समजायेतां विमाने सुन्दरे सुरौ ।।८३।।

[श्री त्रिषष्टिशलाका० पर्व-६ श्लोक-१ तः १०२]

२३. निदानध्याने श्रीपाण्डवचरित्रोक्तं द्रौपदीकथानकम् ।

अथावसरमासाद्य, देशनान्ते मुनीश्वरम् । किं धवाः पञ्च पाञ्चाल्या ?, इत्यपृच्छज्जनार्दनः ।।१।।
सोऽब्रवीदेतया पूर्वजन्मोपात्तनिदानया । वृताः पञ्च धवास्तद्धोः !, कृतं मीमांसयाऽनया ।।२।।
पुरा हि पुरि चम्पायां, भूमिदेवास्त्रयोऽभवन् । सोमदेव-सोमभूति-सोमदत्ताः सहोदराः ।।३।।
तेषामासन् क्रमात्तिस्रः, प्रेमजन्मभुवः प्रियाः । नागश्रीरथ भूतश्रीर्यक्षश्रीश्चेति नामतः ।।४।।
मिथः स्निग्धतया तेषामियमासीद्व्यवस्थितिः । यत् पर्यायेण भोक्तव्यं, सर्वैरेकस्य वेश्मनि ।।५।।
अथ क्रमात् समायाते, भुक्तिवारकवासरे । नागश्रीराश्रितानेकरसां रसवतीं व्यधात् ।।६।।
कटुतुम्बीफलं तस्यामनेकद्रव्यसंस्कृतम् । अपाक्षीदियमज्ञासीत्, पाकान्ते च कथंचन ।।७।।
नानावस्तुव्ययोद्भूतं, कार्पण्येन न साऽत्यजत् । केवलं क्वचिदेकान्ते, निध्राय तदधारयत् ।।८।।
तदन्यैर्विविधैर्भोज्यैः, स्वादुभिः पतिदेवरान् । भोजयामास सा प्रीता, क्षणात् तेऽपि बहिर्ययुः।।९।।
तदा सुभूमिभागाख्ये, पुरोद्याने महामनाः । धर्मघोषाभिध; सूरिर्ज्ञानवान् समवासरत् ।।१०।।
तस्य धर्मरुचिः शिष्यो, मासक्षपणपारणे । किरात्या इव कल्पद्रुर्गृहं नागश्रियो ययौ ।।११।।
वृथा मा भूदिदं तावद्भवेदेषोऽपि तोषितः। इत्यालोच्य तया तस्मै, तत्तुम्बीव्यञ्जनं ददे ।।१२।।
अपूर्वमिति संचिन्त्य, तद्ग्रहानुग्रहेच्छया । असौ वसतिमागत्य, गुरूणां तददर्शयत् ।।१३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तेऽपि तद्गन्धमाघ्राय, वात्सल्यादिदमूचिरे । यदीदं भोक्ष्यसे वत्स !, सद्यो मृत्युमवाप्स्यसि ।।१४।।
विशुद्धे स्थण्डिले मङ्क्षु, तत् परिष्ठापय क्वचित् । इत्यादेशाद्गुरोः सोऽपि, जगाम नगराद्बहिः ।।१५।।
बिन्दौ निपतिते तस्य, कथंचित् तत्र पात्रतः । सक्ताः स मुनिरद्राक्षीन्म्रियमाणाः पिपीलिकाः ।।१६।।
दध्यौ च बद्धसंवेगो, बिन्दुरप्यस्य यद्यसौ । प्राणिनामियतां हन्ता, तत्सर्वं किं करिष्यति ? ।।१७।।
वरमेकस्य मे मृत्युः, कोटिशो न तु देहिनाम् । इत्यालोच्य सरोमाञ्चस्तदसौ बुभुजे स्वयम् ।।१८।।
सिद्धप्रत्यक्षमालोच्य, समाधिमधुरं मनः । दधत् सर्वार्थसिद्धेऽगान्मुनिः प्राणान् विहाय सः ।।१९।।
बहिर्धर्मरुचेः कस्माद्विलम्ब ? इति वेदितुम् । गुरुः श्रीधर्मघोषोऽथ, निदिदेश परान् मुनीन् ।।२०।।
तं परासुं बहिर्वीक्ष्य, तद्रजोहरणादिकम् । आदाय गुरुपादानां, तेऽपि सर्वं न्यवेदयन् ।।२१।।
विज्ञायातीन्द्रियज्ञानोपयोगेन यथास्थितम् । सर्वं मुनीनां नागश्रीवृत्तान्तं तेऽप्यचीकथन् ।।२२।।
ज्ञात्वा कथंचिल्लोकानां, वाक्परम्परया जनाः । सोमदेवादिविप्राणां, तस्या दुश्चेष्टितं जगुः ।।२३।।
काममाक्रुश्य विप्रास्ते, तां गृहान्निरवासयन् । लोकैर्धिक्क्रियमाणा च, साऽपि बभ्राम सर्वतः ।।२४।।
कास-श्वास-ज्वरोत्कम्पकुष्ठाद्यैः क्रान्तविग्रहा । रोगैः षोडशभिर्लेभे, साऽत्रैव नरकव्यथाम् ।।२५।।
क्षुत्पिपासार्दिता लोकैर्निन्द्यमाना पदे पदे । दुःखं भ्रमन्ती सा मृत्वा, षष्ठं नरकमासदत् ।।२६।।
तस्मादुत्पद्य मीनेषु, सप्तमं नरकं ययौ । पुनर्मीनत्वमासाद्य, तस्मिन्नेव जगाम सा ।।२७।।
द्विर्द्विरेवं सिषेवेऽसौ, नरकान् सकलानपि । पृथ्वीकायादिषूत्पेदे, तदुद्धृत्ता च भूरिशः ।।२८।।
चम्पायामथ सा कर्मलाघवात् सुकुमारिका । सुता सागरदत्तस्य, सुभद्राकुक्षिभूरभूत् ।।२९।।
जिनदत्तात्मजस्तत्र, भद्राजश्चास्ति सागरः । वेश्मस्थां तत्पिताऽन्येद्युर्ददर्श सुकुमारिकाम् ।।३०।।
तनयस्य मदीयस्य, योग्येयमिति चिन्तयन् । सह बन्धुभिरभ्येत्य, पितरं तामयाचत ।।३१।।
सोऽप्यूचेऽतिप्रिया मेऽसौ, न भवाम्यनया विना । ममास्तु गृहजामाता, सागरस्तत् तवात्मजः ।।३२।।
सुतमालोचयामीति, जिनदत्तोऽगमद् गृहम् । सागरस्य तदाख्यच्च, मौनमालम्ब्य स स्थितः ।।३३।।
अनिषिद्धं ह्यनुमतमिति न्यायेन तत्पिता । मेने सागरदत्ताय, गृहजामातरं सुतम् ।।३४।।
आश्चर्यकृत्तयोर्जज्ञे, पाणिग्रहमहोत्सवः । नक्तं शिश्रियतुस्तौ च, पल्यङ्कं वासवेश्मनि ।।३५।।
पूर्वकर्मवशात्तस्याः, स्पर्शमङ्गारसोदरम् । आसाद्य सागरस्तस्थौ, क्षणं तत्र कथंचन ।।३६।।
तस्यां सुखप्रसुप्तायां, स प्रणश्य गृहं ययौ । निद्रात्ययेऽरुदत् कान्तमपश्यन्ती च सा भृशम् ।।३७।।
अथादिष्टा तयोर्दन्तशौचहेतोः सुभद्रया । प्रातरैक्षिष्ट तां चेटी, रुदन्तीं वल्लभोज्झिताम् ।।३८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सा गत्वाऽऽख्यत् सुभद्रायै, साऽपि स्वप्रेयसे क्षणात् । पितुरेषोऽपि जामातु-रुपालम्भं ददौ स्वयम् ।।३९।।
सोऽप्याह तनयं वत्स !, न युक्तं विदधे त्वया । गच्छाधुनाऽपि तत् तत्र, माऽन्यथा मद्वचः कृथाः ।।४०।।
सागरोऽप्यूचिवानग्नौ, वरं झम्पां तनोम्यहम् । न पुनस्तात ! गन्तास्मि, वेश्म तस्याः कदाचन ।।४१।।
इदं सागरदत्तोऽपि, तत्कुड्यान्तरितोऽशृणोत् । जगाद च गृहं गत्वा, निराशः सुकुमारिकाम् ।।४२।।
कथंचित् सर्वथा वत्से !, विरक्तः सागरस्त्वयि । तन्मा खिद्यस्व कोऽप्यन्यः, पतिस्तव विधास्यते ।।४३।।
कौपीनाम्बरमात्रैककर्परं मक्षिकावृतम् । भिक्षुकं कंचिदद्राक्षीत्, स गवाक्षस्थितोऽन्यदा ।।४४।।
आहूय तेन सोऽम्भोभिः, स्नपयित्वा सुगन्धिभिः । विलिप्य चन्दनैर्दिव्यवासांसि परिधाप्य च ।।४५।।

ऊचे तुभ्यं मया दत्ता, पुत्रीयं सुकुमारिका ।
मदीयां विलसन् लक्ष्मीं, सुखमास्स्व सहानया ।।४६।। (युग्मम्)

इत्युक्तः सोऽविशद्वासवेश्म साकं तया निशि । मेने च तद्वपुःश्लेषमग्निप्लोषमिवात्मनः ।।४७।।
सहसोत्थाय वेषं स्वमादाय स पलायितः । तथैव रुदतीं तां च, विलोक्य जनकोऽब्रवीत् ।।४८।।
सोऽयं प्राक्कर्मणां वत्से!, विपाकोऽन्यन्न कारणम् । तदास्स्व ददती दानं, शान्तात्मा मम वेश्मनि ।।४९।।
तथैव कुर्वती तस्थौ, सा धर्मैकपरायणा । प्रापुस्तद्गेहमन्येद्युः, साध्व्यो गोपालिका इति ।।५०।।
शुद्धैरशनपानाद्यैः, सा भक्त्या प्रतिलाभ्य च । तन्मुखाद्धर्ममाकर्ण्य, विरक्ता व्रतमग्रहीत् ।।५१।।
तपोऽथ कुर्वती नित्यं, तुर्यषष्ठाष्टमादिकम् । आर्यिकाभिः सहैताभिर्विहारमकरोदियम् ।।५२।।
आर्यास्ताः सा कदाऽप्यूचे, तनोम्यातापनामहम् । सुभूमिभागोद्यानस्था, दत्तदृष्टि र्विवस्वति ।।५३।।
सा प्रत्यभिदधे ताभिरिति ह स्मागमोक्तयः । आतापना न साध्वीनां, कल्पते वसतेर्बहिः ।।५४।।
अनाकर्ण्य च तद्वाचं, वने तस्मिन्नुपेत्य सा । यावदारभते क्षिप्तचक्षुरातापनां रवौ ।।५५।।
तावदुत्सङ्गमेकस्य, श्रयन्तीमपरस्य तु । अङ्केन्यस्ताङ्घ्रिमन्येन, बध्यमानावतंसकाम् ।।५६।।
परेण विधृतच्छत्रां, वीजितामितरेण च । गणिकामागतां तत्र, देवदत्तां ददर्श सा ।।५७।।

तां वीक्ष्यापूर्णभोगेच्छा, निदानमिति साऽकरोत् । (त्रिभिर्विशेषकम्)
भवेयं तपसाऽनेन, पञ्चप्रेयस्यसाविव ।।५८।।

तन्वती देहशौचाद्यमभ्युक्षन्ती क्षणे क्षणे । वार्यमाणेयमार्याभिर्मनसीदमधारयत् ।।५९।।
पुरा बहुमताऽभूवमार्यिकाणामगारिणी । तिरस्कुर्वन्ति मामेता, भिक्षुकीमधुना पुनः ।।६०।।
इत्यालोच्य विनिर्गत्य, विभिन्नवसतिस्थिता । व्रतं सा पालयामास, चिरं स्वच्छन्दवर्तिनी ।।६१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मासान् संलेखनामष्टौ, कृत्वाऽनालोच्य संस्थिता । नवपल्योपमायुष्का, सौधर्मे देव्यभूदियम् ।।६२।।
च्युताऽभवच्च कृष्णेयं, प्राचीनाच्च निदानतः । भर्तारो जज्ञिरेऽमुष्याः, पञ्चैते कोऽत्र विस्मयः ? ।।६३।।

[श्री पाण्डवचरित्रे श्लोक-३२४ तः ३८६]

२४. स्नेहध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रोक्तः मरुदेवीमातृविस्तारः ।

इतोऽपि च विनीतायां, विनीतो भरतेश्वरः । आजगाम नमस्कर्तुं, मरुदेवां दिवामुखे ।।१।।
तनूजविरहोद्भूतैरश्रान्तैरस्रवारिभिः । जातनीलिकया लुप्तलोचनाब्जां पितामहीम् ।।२।।

ज्येष्ठः पौत्रो नमत्येष, देवि ! त्वत्पादपङ्कजे ।
स्वयं विज्ञपयन्नेवं, भरतः प्रणनाम ताम् ।।३।। (युग्मम्)

स्वामिनी मरुदेवाऽपि, भरतायाऽशिषं ददौ । हृद्यमान्तीं शुचमिव, गिरमित्युज्जगार च ।।४।।
मां त्वां महीं प्रजां लक्ष्मीं, विहाय तृणवत् तदा । एकाकी गतवान् वत्सो, दुर्मरा मरुदेव्यहो ! ।।५।।
सूनोश्चन्द्रातपच्छायमातपत्रं क्व मूर्द्धनि ? । सर्वाङ्गसन्तापकरः, क्वेदानीं तपनातपः ? ।।६।।
सलीलगतिभिर्यानैर्यानं हस्त्यादिभिः क्व तत् ? । वत्सस्य पादचारित्वं, क्वेदानीं पथिकोचितम् ? ।।७।।
क्व तद् वारवधूत्क्षिप्तचारुचामरवीजनम् ? । मत्सूनोः क्वाऽधुना दंशमशकाद्यैरुपद्रवः ? ।।८।।
क्व तद् देवसमानीतदिव्याहारोपजीवनम् ? । क्व भिक्षाभोजनं तस्याऽभोजनं वाऽपि सम्प्रति ? ।।९।।
रत्नसिंहासनोत्सङ्गे, महर्द्धेः क्व तदासनम् ? । मत्सूनोः खड्गिन इव, क्व निरासनताऽधुना ? ।।१०।।
आरक्षैरात्मरक्षैश्च, रक्षिते क्व पुरे स्थितिः ? । सूनोः क्व वासः सिंहाहिदुःश्वापदपदे वने ? ।।११।।
क्व तद् दिव्याङ्गनागीतं, कर्णामृतरसायनम् ? सूनोः क्वोन्मत्तफेरुण्डफेत्काराः कर्णसूचयः ।।१२।।
अहो ! कष्टमहो ! कष्टं, यन्मे सूनुस्तपात्यये । पद्मखण्ड इव मृदुः, सहते वारिविद्रवम् ।।१३।।
हिमर्त्तौ हिमसम्पातसंक्लेशविवशां दशाम् । अरण्ये मालतीस्तम्ब, इव याति निरन्तरम् ।।१४।।
उष्णर्त्तावुष्णकिरणकिरणैरतिदारुणैः । सन्तापं चाऽनुभवति, स्तम्बेरम इवाऽधिकम् ।।१५।।
तदेवं सर्वकालेषु, वनेवासी निराश्रयः । पृथग्जन इवैकाकी, वत्सो मे दुःखभाजनम् ।।१६।।
तत्तद्दुःखाकुलं वत्सं, पश्यन्त्यग्रे दृशोरिव । वदन्ती नित्यमप्येवं, हा ! त्वामपि दुनोम्यहम् ।।१७।।
इति दुःखाकुलां देवीं, मरुदेवीमुदञ्जलिः । वाचाऽवोचन्नवसुधासधीच्या वसुधाधवः ।।१८।।
स्थैर्याद्रेर्वज्रसारस्य, महासत्त्वशिरोमणेः । तातस्य जननी भूत्वा, किमेवं देवि ! ताम्यसि ? ।।१९।।
तातस्तरीतुं सहसा, संसाराम्भोधिमुद्यतः । कण्ठबद्धशिलाप्रायान्, स्थाने तत्याज नः प्रभुः ।।२०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वने विहरतो भर्त्तुः, प्रभावाच्छापदा अपि । नोपद्रवं कर्त्तुमलं, पाषाणघटिता इव ।।२१।।
क्षुत्पिपासातपप्राया, दुःसहा ये परीषहाः । सहायाः खलु तातस्यं, ते कर्मद्वेषिसूदने ।।२२।।
न चेत् प्रत्येषि मद्वाचा, प्रत्येष्यसि तथाऽपि हि । तातस्य न चिराज्जातकेवलोत्सववार्त्तया ।।२३।।
अत्रान्तरे महीभर्त्तुर्ज्ञापितौ वेत्रपाणिना । नाम्ना यमक-शमकौ, पुरुषावभ्युपेयतुः ।।२४।।
प्रणम्य यमकस्तत्र, भरतेशं व्यजिज्ञपत् । दिष्ट्याऽद्य वर्धसे देवाऽनया कल्याणवार्त्तया ।।२५।।
पुरे पुरिमतालाख्ये, कानने शकटानने । युगादिनाथपादानामुदपद्यत केवलम् ।।२६।।
प्रणम्य शमकोऽप्युच्चैःस्वरमेवं व्यजिज्ञपत् । इदानीमायुधागारे, चक्ररत्नमजायत ।।२७।।
उत्पन्नकेवलस्तात, इतश्चक्रमितोऽभवत् । आदौ करोमि कस्याऽर्चामिति दध्यौ क्षणं नृपः ।।२८।।
क्व विश्वाभयदस्तातः ?, क्व चक्रं प्राणिघातकम् ? । विमृश्येति स्वामिपूजाहेतोः स्वानादिदेश सः ।।२९।।
यथोचितमथो दत्त्वा, पुष्कलं पारितोषिकम् । विससर्ज नरेन्द्रस्तौ, मरुदेवामुवाच च ।।३०।।
देवि ! त्वं सर्वदाऽपीदमादिक्षः करुणाक्षरम् । भिक्षाहारो यदेकाकी, वत्सो मे दुःखभाजनम् ।।३१।।
त्रैलोक्यस्वामिताभाजः, स्वसूनोस्तस्य सम्प्रति । पश्य सम्पदमित्युक्त्वाऽऽरोहयामास तां गजे ।।३२।।
सुवर्णवज्रमाणिक्यभूषणैस्तुरगैर्गजैः । पत्तिभिः स्यन्दनैर्मूर्त्तश्रीमयैः सोऽचलत् ततः ।।३३।।
सैन्यैर्भूषणभाःपुञ्जकृतजङ्गमतोरणैः । गच्छन् दूरादपि नृपोऽपश्यद् रत्नध्वजं पुरः ।।३४।।
मरुदेवामथाऽवादीद्, भरतः परतो हृदः । प्रभोः समसरणं, देवि ! देवैर्विनिर्मितम् ।।३५।।
अयं जयजयारावतुमुलस्त्रिदिवौकसाम् । श्रूयते तातपादाब्जसेवोत्सवमुपेयुषाम् ।।३६।।
गम्भीरमधुरं मार्तर्दिव्ययं दुन्दुभिर्नदन् । तनोति हृदयानन्दं, वैतालिक इव प्रभोः ।।३७।।
स्वामिपादाब्जवन्दारुवृन्दारकविमानभूः । अनणुः किङ्किणीनादः, श्रवणातिथिरेष नः ।।३८।।
स्वामिदर्शनहृष्टानां, क्ष्वेडानादो दिवौकसाम् । स्तनितं स्तनयित्नूनामिवैष श्रूयते दिवि ।।३९।।
गन्धर्वाणामियं गीतिर्ग्रामरागपवित्रिता । स्वामिवाचो भुजिष्येव, पुष्पत्यानन्दमद्य नः ।।४०।।
शृण्वत्यास्तत् ततो देव्या, मरुदेव्या व्यलीयत । आनन्दाश्रुपयःपूरैः, पङ्कवन्नीलिका दृशोः ।।४१।।
साऽपश्यत् तीर्थकृल्लक्ष्मीं, सूनोरतिशयान्विताम् । तस्यास्तद्दर्शनानन्दात्, तन्मयत्वमजायत ।।४२।।
साऽऽरुह्य क्षपकश्रेणिमपूर्वकरणक्रमात् । क्षीणाष्टकर्मा युगपत्, केवलज्ञानमासदत् ।।४३।।
करिस्कन्धाधिरूढैव, स्वामिनी मरुदेव्यथ । अन्तकृत्केवलित्वेन, प्रपेदे पदमव्ययम् ।।४४।।

[श्री त्रिषष्टि० पर्व-१ श्लोक-४८८ तः ५३१]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

२४. स्नेहध्याने श्रीपरिशिष्टपर्वमध्ये वज्रं प्रति सुनन्दायाः स्नेहविलापः ।

इतश्च वज्रस्तत्रस्थः क्रमेणाभूत्त्रिहायनः । तदा च धनगिर्याद्यास्तत्र साधव आययुः ।।१।।
आयास्यति धनगिरिर्ग्रहीष्यामि स्वमात्मजम् । सुनन्दैवं चिन्तयन्ती तेष्वायातेष्वमोदत ।।२।।
सुनन्दापि महर्षिभ्यः स्वनन्दनमयाचत । ते पुनर्नार्पयामासुः प्रत्यभाषन्त चेदृशम् ।।३।।
अयाचितस्त्वया दत्तो मुग्धेऽस्मभ्यमयं शिशुः । वान्तान्नमिव को दत्तं पुनरादातुमिच्छति ? ।।४।।
विक्रीडेष्विव दत्तेषु स्वामित्वमपगच्छति । मा याचिष्ठाः सुतं दत्त्वा त्वयैष परसात्कृतः ।।५।।
पक्षयोरुभयोरेवमुच्चैर्विवदमानयोः । लोकोऽवादीदमुं वादं राजा निर्धारयिष्यति ।।६।।
ततः सुनन्दा लोकेन सहिता नृपपर्षदि । जगाम सङ्घसहिताः श्रमणा अपि ते ययुः ।।७।।
राज्ञो न्यषीदद्वामेन सुनन्दा दक्षिणेन तु । श्रीमान्सङ्घः समस्तोऽपि यथास्थानमथापरे ।।८।।
परिभाव्य द्वयोर्भाषामुत्तरं चावदन्नृपः । येनाहूतः समायाति बालस्तस्य भवत्वसौ ।।९।।
तं निर्णयममंसातां तौ तु पक्षावुभावपि । इति चोचतुरादौ कः सूनुमाह्वातुमर्हति ।।१०।।
स्त्रीगृह्याः प्रोचिरे पौरा व्रतिनामेष बालकः । चिरसङ्गटितप्रेमा तद्वचो नातिलङ्घते ।।११।।
मातैवाह्वयतामादावियं दुष्करकारिणी । नारीति चानुकम्प्यापि भवत्येतद्धि नान्यथा ।।१२।।
ततः सुनन्दा बहुशो बालक्रीडनकानि च । विविधानि च भक्ष्याणि दर्शयन्त्येवमभ्यधात् ।।१३।।
हस्तिनोऽमी अमी अश्वाः पत्तयोऽमी अमी रथाः । तव क्रीडार्थमानीतास्तद्गृहाणैहि दारक ! ।।१४।।
मोदका मण्डका द्राक्षाः शर्कराश्चान्यदप्यदः । यदिच्छसि तदस्त्येव गृह्यतामेहि दारक ! ।।१५।।
तवायुष्मन्कृषीयाहं सर्वाङ्गमवतारणे । चिरं जीव चिरं नन्द सुनन्दामाशु मोदय ।।१६।।
मम देवो मम पुत्रो ममात्मा मम जीवितम् । त्वमेवासीति मां दीनां परिष्वङ्गेण जीवय ।।१७।।
विलक्षां मा कृथा वत्स ! मां लोकस्यास्य पश्यतः । हृदयं मेऽन्यथा भावि पक्कवालुङ्कवद् द्विधा ।।१८।।
एहि हंसगते वत्स! ममोत्सङ्गं परिष्कुरु । कुक्षिवासावक्रयो मे न लभ्यः किमियानपि ।।१९।।
एवं क्रीडनकैर्भक्ष्यप्रकारैश्चादुकैरपि । सौनन्देयः सुनन्दाया नाभ्यगच्छन्मनागपि ।।२०।।
न मातुरुपकारणां कोऽपि स्यादनृणः पुमान् । एवं विदन्नपि सुधीर्वज्र एवमचिन्तयत् ।।२१।।
यदि सङ्घमुपेक्षिष्ये कृत्वा मातुः कृपामहम् । तदा स्यान्मम संसारो दीर्घदीर्घतरः खलु ।।२२।।
इयं च धन्या माता मेऽल्पकर्मा प्रव्रजिष्यति । उपेक्ष्यमस्या ह्यापातमात्रजं दुःखमप्यदः ।।२३।।
दीर्घदर्शी विमृश्यैवं वज्रो वज्रदृढाशयः । प्रतिमास्थ इव स्थानान्न चचाल मनागपि ।।२४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

राजावादीत्सुनन्दे ! त्वमपसर्प शिशुर्ह्यसौ । नागादाहूयमानस्त्वामजानन्निव मातरम् ।।२५।।
ततो राज्ञा धनगिरिः प्राप्तावसरमीरितः । रजोहरणमुत्क्षिप्य जगादैवं मिताक्षरम् ।।२६।।
व्रते चेद् व्यवसायस्ते तत्त्वज्ञोऽसि यदि स्वयम् । तद्रजोहरणं धर्मध्वजमादत्स्व मेऽनघ ! ।।२७।।
वज्रस्तदैव कलभ इवोत्क्षिप्तकरो द्रुतम् । दधावाभिधनगिरिं प्रक्रणत्पादघर्घरः ।२८।।
गत्वा च पितुरुत्सङ्गमधिरुह्य विशुद्धधीः । तद्रजोहरणं लीलासरोजवदुपाददे ।।२९।।
वज्रेण पाणिपद्माभ्यां रजोहरणमुद्धृतम् । विरराज रोमगुच्छ इव प्रवचनश्रियः ।।३०।।
उल्लसत्कुन्दकलिकाकारदन्तद्युतिस्मितः । स रजोहरणाद् दृष्टिं नान्यत्रादान्मनागपि ।।३१।।
दिनात्यये पद्मिनीव सद्यो म्लानिमुपेयुषी । हस्तविन्यस्तचिबुका सुनन्दैवमचिन्तयत् ।।३२।।
भ्राता मम प्रव्रजितो भर्ता प्रव्रजितोऽथ मे । प्रव्रजिष्यति पुत्रोऽपि प्रव्रजाम्यहमप्यतः ।।३३।।
न मे भ्राता न मे भर्ता न मे पुत्रोऽपि सम्प्रति । तन्ममापि परिव्रज्या श्रेयसी गृहवासतः ।।३४।।
स्वयमेवेति निर्णीय सुनन्दा सदनं ययौ । वज्रमादाय वसतिं प्रययुर्मुनयोऽपि ते ।।३५।।
व्रतेच्छुर्न पपौ स्तन्यं वज्रस्तावद्वया अपि । इत्याचार्यैः परिव्राज्य साध्वीनां पुनरार्प्यत ।।३६।।
उद्यद्भाग्यविशेषेण भववैराग्यभूद्भृशम् । सुनन्दापि प्रवव्राज तद्गच्छाचार्यसन्निधौ ।।३७।।

[श्री परिशिष्टपर्व श्लोक० १०० तः १३६]

२४. स्नेहध्याने श्रीउत्तराध्ययनसूत्रे अर्हन्नकमातृकथा ।

तगरा नयरी, तत्थ अरिहमित्तो नाम आयरिओ, तस्स समीवे दत्तो नाम वाणियओ भद्दाए भारियाए पुत्तेण य अहन्नएणसद्धिं पव्वइओ, सो तं खुड्डगं ण कयाइ भिक्खाए हिंडावेइ, पढमालियाईहिं किमिच्छएहिं पोसेति, सो सुकुमालो, साहूण अप्पत्तियं, ण तरंति किंचि भणिउं । अन्नया सो खंतो कालगतो, साहूहिं दो तिन्नि वा दिवसे दाउं भिक्खस्स ओयारिओ, सो सुकुमालसरीरो गिम्हे उवरिं हिट्ठा य डज्झति पासे य, तिण्हाभिभूतो छायाए वीसमंतो पउत्थवतियाए वणियमहिलाए दिट्ठो, ओरालसुकुमालसरीरोत्तिकाउं तीसे तहिं अज्झोववाओ जाओ, चेडीए सद्दाविंतो, किं मग्गसि ?, भिक्खं, दिण्णा से मोयगा, पुच्छितो-कीस तुमं धम्मं करेसि ?, भणइ-सुहनिमित्तं, सा भणइ-तो मए चेव समं भोगे भुंजाहि, सो य उण्हेण तज्जिओ उवसग्गिज्जंतो य पडिभग्गो भोगे भुंजति । सो साहूहिं सव्वहिं मग्गितो ण दिट्ठो अप्पसागारियं पविट्ठो, पच्छा से माया उम्मत्तिया जाया पुत्तसोगेण, णयरं परिभमंती अरहन्नयं विलवंती जं जहिं पासइ तं तहिं सव्वं भणति-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अत्थि ते कोइ अरहन्नओ दिट्ठो ?, एवं विलवमाणी भमइ, जाव अन्नया तेण पुत्तेण ओलोयणगएण दिट्ठा, पञ्चभिन्नाया, तहेव ओयरित्ता पाएसु पडिओ, तं पिच्छिऊण तहेव सत्थचित्ता जाया, ताहे भण्णइ-पुत्त ! पव्वयाहि, मा दुग्गइं जाहिसि, सो भणइ-न तरामि काउं संजमं, जदि परं अणसणं करेमि, एवं करेहि, मा य असंजओ भवाहि, मा संसारं भमिहिसि, पच्छा सो तहेव तत्ताए सिलाए पाओवगमणं करेइ, मुहुत्तेण सुकुमालसरीरो उण्हेण विलाओ, पुव्विं तेण नाहियासिओ पच्छा तेणऽहियासितो ।

२५. कामध्याने श्रीअष्टाह्निकाप्रवचने कुमारनन्दिसुवर्णकारसम्बन्धः ।

चंपायामाजन्म स्त्रीलंपटः कुमारनंदिः स्वर्णकृत् यां यां सुरूपां कन्यां शृणोति तां स्वर्णपंचशतीं दत्त्वा गृह्णाति, एवं पंच शतानि (५००) स्त्रियो जाताः, ताभिः सहैकस्तंभसौधेऽरंसीत्, तस्य नागिलश्राद्धः मित्रमस्ति, एकदा पंचशैलाधिपव्यंतरदेव्यौ शक्राज्ञया नंदीश्वरे प्रास्थिषातां, तदानीं तत्पतिर्विद्युन्माली च्युतः, ततस्ते 'हासा' 'प्रहासा'नाम्न्यौ कामुकं तं स्वर्णकृतं दृष्ट्वा तत्रावातरतां, ते दृष्ट्वा परिरब्धुकामः स्वर्णकारः प्रोवाच-के युवाम् ? किमर्थमागते ?, ते प्रोचतुः-भवदर्थम्, प्राप्तसंज्ञः स हेमकृत् प्रार्थनां चक्रे, ते ऊचतुः-त्वं पंचशैले समागच्छेः, तत्रावयोः संगो भावीत्युक्त्वा ते उत्पतिते, सोऽपि स्वर्णकारः, भूभुजे स्वर्णं दत्त्वा इति पटहमवादयत्, -"यो मां पंचशैलद्वीपे नेता स द्रव्यकोटिं लप्स्यते" एकेन निर्यामकस्थविरेण पटहो धृतः कोटिधनं चाददे, तेन यानपात्रं सज्जीकृतं, स्वर्णकृता साकं पोतस्थो वृद्धोऽब्धिवर्त्मनि सुदूरमागत्य तमित्यूचे-भो कुमार ! दूरे प्रेक्षसे किंचित् ?, सोऽवोचत्-दृश्यते वृक्ष एकः, स ऊचे-अब्धिकूले तच्छैलपादजातोऽयं वटो दृश्यते, यदा पोतोऽस्याधो याति तदाऽस्य शाखायां त्वं विलगेः, निश्यत्र भारंडाः समेष्यंति, तेषु सुप्तेषु कस्यचिद्रंध्रौ पटेन स्वं बद्ध्वा दृढमुष्टिना विलगेः, प्रातरुड्डीनास्ते त्वां पंचशैले नेष्यंति, यदि वटेऽविलग्नस्त्वं तदा एतद्यानपात्रमिव महावर्त्ते पतित्वा विनंक्ष्यसि, तथा कृते स पक्षिणा तत्र निन्ये, स क्रमेण, हासाप्रहासाभ्यां दृष्टः, तेनापि भोगार्थं प्रार्थिते, ताभ्यां प्रोचे-अनेनाङ्गेनावयोः संगो न भवेत्, किंतु अग्निप्रवेशादिना कृतनिदानेन त्वं पंचशैलेशो भव, स दध्यौ-उभयतो भ्रष्टोऽहमिति, चिंतार्त्तस्ताभ्यां खपुरे मुक्तः, ततः स देवाङ्गनाङ्गमोहितोऽग्निसाधनं प्रारेभे, तदा नागिलश्राद्धेनोक्तम्-मित्र ! बालमरणं नार्हं तवेत्यादि, तेन वार्यमाणोऽपि निदानेनाग्निशरणं कृत्वा स पंचशैलेशो जज्ञे, नागिलस्तद्वैराग्यात्प्रव्रज्याच्युते देवो जातः । अन्यदा नंदीश्वरयात्रार्थं प्रस्थितानां देवानां पुरो गातुं तदाज्ञया हासाप्रहासे चलिते स्वपतिमूचतुः-स्वामिन् ! त्वं पटहं वादय, सोऽहंकारेण नोऽवादयत्, तदा दुष्कर्मणा पटहः कंठे व्यलगत्, तदानीं ताभ्यामुक्तं-भो प्राणेश ! कुलोचितं कुरु, मा त्वं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लङ्गस्व, ततो विद्युन्माली देवो गायन्तीभ्यां ताभ्यां सह पटहं वादयन् त्रिदिवौकसां पुरतश्चचाल, तदानीं नागिलः स्वर्गी यात्रायां व्रजन् विद्युन्मालिनं निजपूर्वभवमित्रं अवधिना ददर्श, ततः स्वर्गिणा स भाषितः-भद्र ! त्वं मां जानासि ?, स जगौ-तेजस्विन्नाहं जाने, त्वं कोऽसि ?, ततस्तेन श्राद्धरूपं कृत्वा स्वस्य तस्य च पूर्वभवस्वरूपं तेन धर्मेण प्राप्तं देवस्वरूपं तच्चोक्तम्, तच्छ्रुत्वा स एवमवदत्-भो मित्र ! किमहं करोमि ?, अच्युतसुरेणोक्तं-मित्र ! गार्हस्थ्येन चित्रगृहे कायोत्सर्गे स्थितस्य भावसाधोर्वीरविभोर्मूर्तिं त्वं कारय, तव बोधिबीजमुत्पत्स्यते, तदुक्तमुररीकृत्य गृहे प्रतिमास्थं श्रीवीरमपश्यत्, ततो देवो हिमवति शैले गत्वा गोशीर्षचंदनं छित्त्वा यथादृष्टं मूर्तिं सविभूषणां चक्रे ।

२५. कामध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रे रावणः ।

शोकेन तेन वैदेहीविप्रलम्भरुजापि च । फालच्युत इव द्वीपी तल्पे तस्थौ निपत्य सः ।।१।।
अथ मन्दोदरी देवी तमुपेत्याभ्यधादिति । कथं प्राकृतवत् स्वामिन्निश्चेष्ट इव तिष्ठसि ।।२।।
रावणोऽप्यब्रवीदेवं वैदेहीविरहज्वरात् । न चेष्टितुं न वक्तुं च न चालोकयितुं क्षमः ।।३।।
मया चेज्जीवता तेऽर्थस्तन्मानं प्रोज्झ्य मानिनि । गत्वानुनय वैदेहीं यथा मयि रिरंसते ।।४।।
नान्यनारीमनिच्छन्तीं भुञ्जे जातुचिदप्यहम् । अर्गलानियमो ह्यत्र ममास्ति गुरुसाक्षिकः ।।५।।
पीडिता पीडया पत्युः कुलीना सापि तत्क्षणम् । जगाम देवरमणोद्याने सीतामुवाच च ।।६।।
एषा मन्दोदरी नाम दशाननमहिष्यहम् । प्रपत्स्ये त्वयि दासीत्वं भजस्व दशकन्धरम् ।।७।।
सीते त्वमेव धन्यासि यां सिसेविषतेऽनिशम् । विश्वसेव्याङ्घ्रिकमलः पतिर्मम महाबलः ।।८।।
अद्यापि तव रामेण भूचरेण तपस्विना । पत्तिमात्रेण किं पत्या प्राप्यते चेद्दशाननः ।।९।।
रुषा बभाषे सीतैवं क्व सिंहः क्व च जम्बुकः । क्व सुपर्णः क्व वा काकः क्व रामः क्व च ते पतिः ।।१०।।
दम्पतित्वमहो युक्तं तव तस्य च पाप्मनः । रिरंसुरेकोऽन्यस्त्रीषु दूतीभवति चापरा ।।११।।
द्रष्टुमप्युचिता नासि किमु सम्भाषितुं हले । स्थानादितो गच्छ गच्छ त्यज दृष्टिपथं मम ।।१२।।
रावणोऽपि तदा तत्राजगाम निजगाद च । कुपितासि कुतः सीते दासी मन्दोदरी तव ।।१३।।
दासस्ते स्वयमप्यस्मि प्रसादं कुरु देवि मे । जानकि त्वं जनममुं प्रीणासि न दृशापि किम् ।।१४।।
सीता पराङ्मुखीभूयेत्यभाषत महासती । कृतान्तदृष्ट्या दृष्टोऽसि हरन्मां रामगेहिनीम् ।।१५।।
धिगाशां ते हताशस्याप्रार्थितप्रार्थकस्य रे । जीविष्यसि कियद्रामे सानुजे द्विषदन्तके ।।१६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तयेत्याक्रुश्यमानोऽपि भूयो भूयो दशाननः । तथैवोवाच धिगहो कामावस्था बलीयसी ।।१७।।
अत्रान्तरे विपन्मग्नां सीतां द्रष्टुमिवाक्षमः । निममज्ज निधिर्धाम्नां पश्चिमे लवणाम्बुधौ ।।१८।।
प्रावर्तत निशा घोरा घोरबुद्धिश्च रावणः । सीतायै क्रोधकामान्ध उपसर्गान् प्रचक्रमे ।।१९।।
घूत्कारिणो महाघूकाः फेत्कुर्वाणाश्च फेरवः । वृका विचित्रं क्रन्दन्त ओतवोऽन्योऽन्ययोधिनः ।।२०।।
पुच्छाच्छोटकृतो व्याघ्राः फूत्कुर्वाणाः फणाभृतः । पिशाचप्रेतवेतालभूताश्चाकृष्टकर्त्रिकाः ।।२१।।
उल्ललन्तो दुर्ललिता यमस्येव सभासदः । विकृता रावणेनेयुरुपसीतं भयङ्कराः ।।२२।।
।। त्रिभिर्विशेषकम् ।।
ध्यायन्ती मनसा पञ्चपरमेष्ठिनमस्क्रियाम् । सीता तस्थावभीतैव न तु भेजे दशाननम् ।।२३।।
[श्रीत्रिषष्टिशलाका० पर्व-७ श्लोक-१२६ तः १४८]

२६. कलुषध्याने श्रीउपदेशमालाहेयोपादेयायामुदितः पीठ-महापीठावसरः ।

महाविदेहे गृहस्थपर्यायचक्रवर्तिवैरनाभाचार्यान्तेवासिनस्तल्लघुभ्रातरो बाहु-सुबाहु-पीठ-महापीठा-एकादशाङ्गधरा आसन् । तत्र बाहुः क्षयोपशमवशात् पञ्चशतिकगच्छस्य वैयावृत्त्यमकरोत् । सुबाहुर्मर्दनादिना खेदविनोदम्, इतरौ स्वाध्यायमिति । अन्यदा कस्मिंश्चित्प्रस्तावे तद्गुणानुत्कीर्त्य धन्यौ कृतार्थावेताविति श्लाघितौ बाहु-सुबाहू गुरुणा । ततोऽद्यापि राजस्वभावं नैते मुञ्चन्ति येनात्मकृत्योद्यतावेतौ श्लाघयन्ति, न पुनः स्वाध्यायरतावावामिति जातमितरयोर्गुरुविषयं मनाक् चित्तकालुष्यम् । तदवधीरणया विशेषतोऽनालोच्य कालं कृत्वा सर्वार्थसिद्धावमाने समुत्पद्य ततश्च्युत्वा तन्मनोदुष्कृतकर्मपरिणतिवशात् समुत्पन्नौ स्त्रीभावेन ब्राह्मीसुन्दरी चेति, वैरनाभ-बाहु-सुबाहवस्तु तस्मिन्नेवोत्पद्य ततश्च्युत्वा ऋषभदेव-भरत-बाहुबलिभावेन जाता इति ।

२६. कलुषध्याने श्रीउपदेशमालाहेयोपादेयावृत्तौ सिंहगुहावासिनः साधोः द्रष्टान्तः ।

पाटलीपुत्रे आर्यसम्भूतविजयाऽऽचार्यस्य शिष्या वर्षाकालाऽऽद्यदिने स्वशक्तिधृतिप्रत्यायित-गुरवोऽभिग्रहानेवम्भूतान् गृह्णन्ति स्म । एकः सिंहगुहायां निरशनश्चातुर्मासम्, अन्यस्तथैव सर्पदरीसमीपे, अपरस्तथैव कूपफलके, स्थूलभद्रस्तु गृहस्थावस्थोपभुक्तायाः कोशागणिकाया गृहे सभोजनं गृहीतवान् ।

गृहीत्वा गताः स्वस्थानेषु । उपशमितौ सिंहभुजगौ । कोशा पुनः प्रायः परीषहपराभग्नोऽयमित्य-भिप्रायेणविविधबिब्बोकैः स्थूलभद्रमुपसर्गयन्ती तन्निष्प्रकम्पतां निरीक्ष्य निर्विण्णा पतिता तच्चरणयोः । ज्ञाताभिप्रायेण कथितस्तेन धर्मः । जाता श्राविका राजाभियोगं विहाय गृहीतम-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ब्रह्मविरतिव्रतम् । समाप्तेऽभिग्रहे समायाताः साधवः, स्थूलभद्रं विहायेतरे दुष्करकारका इति वदतोपबृंहिताः शेषसाधुसमक्षं गुरुणा । समागतः स्थूलभद्रः, तं प्रति ससम्भ्रमं दुष्करदुष्करकारक इति वदता कृतोपबृंहणा । ततः प्राक्तनमैश्वर्यमधिकृत्याऽयं सुकरकारकोऽपि वर्ण्यते गुरुभिः । अहो लोकाचारपरतामीषाम् ! इति जातमितरेषां चित्तकालुष्यम् । ततः पुनः समाहिण्ड्याऽन्यत्र अन्यस्मिन् वर्षे तत्रैवागतेष्वभिग्रहग्रहणोद्यतेषु साधुषु सिंहगुहावासिनोक्तमहं कोशाभगिन्युपकोशासदने चातुर्मासं निरशनः स्थास्यामीति । नोचितस्त्वमस्येति निवारितो गुरुणा, प्रतिकूल्य तद्वचो गतो तद्भवनम् । दृष्टस्तया, स्थूलभद्राऽसूययाऽयमागत इति भावज्ञतया संलक्ष्यानुज्ञाता तया तस्य वसतिः । ततो दर्शयाम्यस्य तद्गुणाऽसहनफलमिति सञ्चिन्त्य रात्रावतिचर्चितशरीरा मदनोत्कोचकारिभिर्गात्रवचन-विभ्रमैरुपसर्गैरुपसर्गयितुमारब्धा । ततश्चलचित्ततया विस्मृतात्मावस्थेन तेन प्रार्थिता सा प्राह, न वयं निर्धानानां भवामः । सोऽचिन्तयदुत्तरापथे श्रूयतेऽपूर्वसाधोर्लक्षमूल्यकम्बलदाता राजा तद् गच्छामि, तत्र गतः, लब्ध्वा कम्बलमागतः समर्पितवाश्च तस्याः । तयापि तस्य पश्यत एव निक्षिप्तोऽसौ वर्चोगृहे स प्राह-किमयं त्वया विनाशितः !' इतराऽऽह-'किमिदं जानीषे ?' स प्राह- 'किमत्र ज्ञातव्यं ?' इतराऽऽह 'यद्येवं तर्हि किमित्यशुचिपूर्णेन मामकदेहेनाऽनर्घ्यगुणरत्नाव्यतिरिक्तात्मा सम्पर्कमभिलसति ?' तदाकार्ण्य पुनरागतश्चरणपरिणामः । अहो ! निरन्तरं भवगर्ते पतन्नहमुद्धृत इति विचिन्त्यासावाह-'साधुविवेकिनि साधु ! इच्छाम्यनुशास्तिं, निवृत्तोऽहमितो दुरध्यवसायात् ।' सा प्राह- युक्तमिदं भवादृशां, ततो गत्वा गुरुसमीपं दत्तालोचनो विहितप्रायश्चित्तो भावसारं प्रतिक्रान्त इति ।

२७. कलहध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रे दुर्योधनप्रसंगः ।

रुक्मिण्याश्च गृहेऽन्येद्युरतिमुक्तर्षिरागतः । तं दृष्ट्वा सत्यभामापि तत्रैवाशु समाययौ ।।१।।
रुक्मिण्याप्रच्छि स मुनिः किं मे स्यात्तनयो न वा । भावी कृष्णसमः पुत्रस्तवेत्युक्त्वा ययौ च सः ।।२।।
सत्यभामा मुनिवचो मन्यमाना तदात्मगम् । उवाच रुक्मिणीं सूनुर्भावी कृष्णसमो मम ।।३।।
प्रत्यूचे रुक्मिणी नर्षिवचनं फलति च्छलात् । एवं विवदमाने ते कृष्णाभ्यर्णमुपेयतुः ।।४।।
तदा दुर्योधनो राजा तत्रायातः स्वसोदरः । भामयोचे मम सुतो जामाता ते भविष्यति ।।५।।
रक्मिण्यापि तथोक्तः स स्माह दास्ये सुतामहम् । तस्मै यं युवयोरेका तनयं प्रसविष्यते ।।६।।
भामोवाच सुतो यस्याः प्रथमं परिणेष्यति । तद्विवाहेऽन्यया केशा देयास्तस्याः स्वकाः खलु ।।७।।
साक्षिणः प्रतिभुवश्च रामपादा जनार्दनः । दुर्योधनश्चेत्युदित्वा स्वौको द्वे अपि जग्मतुः ।।८।।

[श्रीत्रिषष्टिशलाका० पर्व-८ श्लोक-११० तः ११७]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

२७. कलहध्याने श्रीआवश्यकहारिभद्रीयवृत्तिदर्शितं नारदोदाहरणम् ।

वारवईए बलदेवपुत्तस्स निसढस्स पुत्तो सागरचंदो रूवेणं उक्किट्ठो, सव्वेसिं संबादीणं इट्ठो, तत्थ य यारवईए वत्थव्वस्स चेव अण्णस्स रण्णो कमलामेलानाम धूआ उक्किट्ठसरीरा, सा य उग्गसेण-पुत्तस्स णभसेणस्स वरेल्लिया, इतो य णारदो सागरचंदस्स कुमारस्स सगासं आगतो, अब्भुट्ठिओ, उवविट्ठे समाणे पुच्छति-भगवं ! किंचि अच्छेरयं दिट्ठं ?, आमं दिट्ठं, कहिं ? कहेह, इहेव वारवईए कमलामेलाणाम दारिया, कस्सइ दिण्णिआ ?, आमं, कथं मम ताए समं संपओगो भवेज्जा ?, ण याणामित्ति भणित्तागतो । सो य सागरचंदो तं सोऊण णवि आसणे णवि सयणे धितिं लभति, तं दारियं फलए लिहंतो णामं च गिण्हंतो अच्छति, णारदोऽवि कमलामेलाए अंतिअं गतो, ताएवि पुच्छिओ-किंचि अच्छेरयं दिट्ठपुव्वंति, सो भणति—दुवे दिट्ठाणि, रूवेण सागरचंदो विरूवत्तणेण णभसेणओ, सागरचंदे मुच्छिता णहसेणए विरत्ता, णारएण समासासिता, तेण गंतुं आइक्खितं-जहा इच्छातित्ति । ताहे सागरचंदस्स माता अण्णे अ कुमारा आदण्णा मरइत्ति, संबो आगतो जाव पेच्छति सागरचंदं विलवमाणं, ताहे णेण पच्छतो ठाइऊण अच्छीणि दोहिवि हत्थेहि छादिताणि, सागरचंदेण भणितं-कमलामेलत्ति, संबेण भणितं-णाहं कमलामेलः, कमलामेलोऽहं, सागरचंदेण भणितं-आमं तुमं चेव ममं विमलकमलदललोअणिं कमलामेलं मेलिहिसि, ताहे तेहिं कुमारेहिं संबो मज्जं पाएत्ता अब्भुवगच्छाविओ, विगतमदो चिंतेति-अहो मए आलो अब्भुवगओ, इदाणीं किं सक्कमण्ण-हाकाउं ?, णिवहियव्वंति पज्जण्णं पण्णत्तिं मग्गिऊण जंदिवसं तस्स णभसेणस्स विवाहदिवसो तद्दिवसं ते सागरचंदसंबप्पमुहा कुमारा उज्जाणं गंतुं णारदस्स सरहस्सं दास्या सुरंगाए उज्जाणं णेत्तुं सागरचंदो परिणाविओ, ते तत्थ किड्डंता अच्छंति । इतरे य तं दारियं ण पेच्छंति, मग्गंतेहिं उज्जाण दिट्ठा, विज्जाहररूवा विउव्विया, णारायणो सबलो णिग्गओ, जाव अपच्छिमं संबरूवेणं पाएसु पडिओ, सागरचंदस्स चेव दिण्णा, णभसेण तणया अ खमाविया । एत्थ सागरचंदस्स संबं कमलामेलं मण्णमाणस्स अणणुओगो णाहं कमलामेलेति भणिते अणुओगो ।

२८ युद्धध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्राऽन्तर्गतं चेटकेन सह कोणिकनृपस्य युद्धावसरम् ।

अथ सेचनकारूढौ दिव्यकुंडलमंडितौ । दिव्यहारांशुकधरौ भूगतौ स्वर्गिणाविव ।।१।।

अत्यद्भुतश्रियौ हल्लविहल्लौ निजदेवरौ । दृष्ट्वा पद्मावती दध्यौ स्वस्य स्त्रीत्वस्य सन्निभम् ।।२।।

हारकुंडलवासोभिर्दिव्यैः सेचनकेन च । विना हि मन्यते राज्यं नेत्रहीनमिवाऽऽननम् ।।३।।

ततो हल्लविहल्लाभ्यां तान्याहर्तुं कृताग्रहा । बभाण कूणिकं राज्ञी कूणिकोऽप्येवमभ्यधात् ।।४।।

पितृदत्तं वस्त्वनयोर्नाहर्तुं युज्यते मम । विशेषेण प्रसादार्हाविमौ ताते दिवं गते ।।५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तस्याश्चात्याग्रहाद्राजा मेने हारादियाचनम् । स्त्रीग्रहः खलु मत्कोटग्रहादपि विशिष्यते ।।६।।
अन्यस्मिंश्च दिने हल्लविहल्लौ पृथिवीपतिः । ययाचे त्यक्तसौभ्रात्रस्तद्धारादिचतुष्टयम् ।।७।।
प्रमाणमादेश इति प्रतिपद्य गृहं गतौ । आ(अ)मंत्रयेतां तावित्थं बुद्धिमन्तावुभावरपि ।।८।।
न शोभनोऽस्याभिप्रायः किमेनन प्रयोजनम् । प्रयावोऽन्यत्र कुत्रापि श्रियः सर्वत्र दोष्मताम् ।।९।।
इति निश्चित्य तौ सान्तः पुरौ सेचनकद्विपम् । हारादीन्यप्युपादाय वैशाल्यां निशि जग्मतुः ।।१०।।
मातामहश्चेटकस्तौ परिरभ्य समागतौ । स्नेहेन प्रतिपत्त्या च ददर्श युवराजवत् ।।११।।
वैशाल्यां च गतौ ज्ञात्वा तौ प्रतारितधूर्तवत् । हस्तविन्यस्तचिबुकश्चिन्तयामास कूणिकः ।।१२।।
न मे हस्त्यादिरत्नानि न च तौ भ्रातरावपि । जातोऽहमुभयभ्रष्टः स्त्रीप्रधानतया खलु ।।१३।।
भवतु व्यसने प्राप्तेऽमुष्मिंस्तौ नाऽऽनयामि चेत् । पराभवसहिष्णोर्मे वणिजश्च किमन्तरम् ।।१४।।
अनुशिष्य ततो दूतं वैशाल्यामुपचेटकम् । प्रैषीद् भ्रात्रोर्मार्गणाय रत्नान्यादाय जग्मुषोः ।।१५।।
दूतोऽपि पुर्यां वैशाल्यां गत्वा चेटकपर्षदि । प्रणम्य चेटकं स्थाने चाऽऽसित्वोचे ससौष्ठवः ।।१६।।
इह नंष्ट्वा समायातौ रत्नैः सह गजादिभिः । कुमारौ हल्लविहल्लौ कूणिकस्य समर्पय ।।१७।।
अनर्पयन्निमौ राज्यभ्रंशमासादयिष्यसि । कीलिकार्थे देवकुलं न भ्रंशयितुमर्हसि ।।१८।।
चेटकोऽवोचदन्योऽपि नार्प्येत शरणागतः । दौहित्रौ किं पुनरिमौ विश्वस्तौ पुत्रवत्प्रियौ ।।१९।।
दूतोऽब्रवीच्छरण्यस्त्वं न ह्यर्पयसि चेदिमौ । तद्रत्नान्यनयोर्हित्वा राजन्मत्स्वामिनेऽर्पय ।।२०।।
चेटकः स्माह धर्मोऽयं समानो राजरंकयोः । अन्यस्य वित्तं न ह्यन्यो दातुमीशीत जातुचित् ।।२१।।
न प्रसह्य न वा साम्नाऽनयोर्गृह्णमि किंचन । धर्मपात्रं हि दौहित्रौ दानार्हौ मे विशेषतः ।।२२।।
दूतोऽप्यागत्य चंपायां तां गिरं चेटकोदिताम् । आख्यत् स्वस्वामिनः क्रोधवह्निवात्यामनाकुलः ।।२३।।
कूणिकोऽपि हि तत्कालं जयभंभामवीवदत् । सिंहा इव पराक्षेपं न सहन्ते महौजसः ।।२४।।
सैन्यान्यनन्यसामान्यतेजसस्तस्य भूपतेः । सद्यः सर्वाभिसारेण सज्जीभूयावतस्थिरे ।।२५।।
कालादयः कुमाराश्च दशापि हि महाबलाः । पुरो बभूवुः संनह्य सर्वसन्नहनेन ते ।।२६।।
सहस्राणि त्रीणि गजास्तावन्तो वाजिनोऽपि हि । तावन्तश्च रथाः कोट्यस्तिस्रोऽपि च पदातयः ।।२७।।
तेषां दशानां प्रत्येकं कुमाराणामिदं बलम् । एतावत्कूणिकस्यापि प्रभुत्वं त्वतिरिच्यते ।।२८।।
(युग्मम्)

सैन्येनैतावता गच्छंश्चंपेशश्चेटकं प्रति । तिरयामास धरणिं तरणिं च रजोभरैः ।।२९।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चेटकोऽप्यमितैः सैन्यैः कूणिकायाभ्यषेणयत् । राजभिर्बद्धमुकुटैरष्टादशभिरावृतः ।।३०।।
द्विपास्त्रीणि सहस्राणि तावन्तश्च तुरंगमाः । तावन्तश्च स्थास्तिस्रः कोटयश्च पदातयः ।।३१।।
अष्टादशानां प्रत्येकं राज्ञां बलमदोऽभवत् । तत्तुल्यसंख्यं नृपतेश्चेटकस्याऽप्यभूद्बलम् ।।३२।।
स्वदेशसीम्नि गत्वाऽस्थाच्चेटकः सेनया तया । दुर्भेदं सागरव्यूहं रचयामास चोच्चकैः ।।३३।।
चंपाधिपोऽपि तत्रागाच्चम्वा प्रागुक्तसंख्यया । चक्रे च गरुडव्यूहमभेद्यं परसेनया ।।३४।।
रणतूराणि घोराणि सैन्ययोरुभयोरपि । रोदः कुक्षिंभरिध्वानान्यताड्यन्त सहस्रशः ।।३५।।
कीर्तिस्तंभैरिवोत्तब्धैः खेटीधवलितैः खरैः । संशप्तकाश्च संचेरुर्द्वयोरपि हि सैन्ययोः ।।३६।।
कूर्णिकस्य बले कालः कुमारो बलनायकः । आदावपि प्रववृते योद्धुं चेटकसेनया ।।३७।।
युयुधे सादिना सादी निषादी च निषादिना । रथी च रथिना पत्तिः पत्तिना च बलद्वये ।।३८।।
स्तंबेरमैस्तुरंगैश्च कुन्तघातनिपातितैः । अजायत तदा शैलगंडशैलवतीव भूः ।।३९।।
स्थैर्यभग्नैर्हतैर्वीरैः समरे रुधिराऽऽपगाः । सान्तरीपा इव साऽऽम्भोमानुषा इव चाऽऽबभुः ।।४०।।
स्फुरद्भिरसिभिर्वीरकुञ्जराणां रणाजिरे । असिपत्रवनमिव प्रादुर्भूतमदृश्यत ।।४१।।
असिच्छिन्नैरुच्छलद्भिर्वीराणां पाणिपंकजैः । कौणपाः पूरयामासुरवतंसकुतूहलम् ।।४२।।
स्वान् रुंडानपि युद्धायाऽऽदिशन्त इव हुंकृतैः । पेतुर्भटानां मूर्धानः खड्गधाराभिराहताः ।।४३।।
इत्थं च सागरव्यूहं कालः पोत इवांबुधिम् । अवगाह्य ययौ पारमिव चेटकसन्निधिम् ।।४४।।
कालं कालमिवाकालेऽप्यायान्तं प्रेक्ष्य चेटकः । चिन्तयामास केनापि नैष वज्रमिवाऽस्खलि ।।४५।।
अभ्यापतन्तं तदिमं रणसागरमन्दरम् । क्षणादपि निगृह्णामि दैवतेन पतत्त्रिणा ।।४६।।
इति दिव्येषुणा वैरिप्राणसर्वस्वदस्युना । प्रहृत्य चेटकः कालं प्रापयामास पंचताम् ।।४७।।
तदा चास्तमुपेयाय भास्वान् कालकुमारवत् । शुचेव चंपेशबलं तमसा जग्रसे जगत् ।।४८।।
युद्धं विसृज्य चंपेशबलं जाग्रदवास्थित । निद्रा ह्यभक्तभार्याणामिव वैरवतां कुतः ।।४९।।
चेटकस्य पुनः सैन्ये वीरा वीरजयन्तिकाम् । कुर्वन्तो जयवादित्रवादनेनात्यगुर्निशाम् ।।५०।।
चंपानाथेनाभिषिक्तं सेनानीत्वेऽपरेऽहनि । महाकालं कालमिव मारयामास चेटकः ।।५१।।
अष्टौ सेनापतीनन्यानपि श्रेणिकनन्दनान् । एकैकमहन्येकैकस्मिन् पूर्ववच्चेटकोऽवधीत् ।।५२।।
भ्रातृष्वात्मसमानेषु कालादिषु दशस्वपि । चेटकेन हतेष्वेवं चंपापतिरचिन्तयत् ।।५३।।
देवतायाः प्रसादेन जेतैकेनापि पत्त्रिणा । न ह्ययंचेटको जय्यो मर्त्यैः कोटिमितैरपि ।।५४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रभावं चेटकस्याऽमुं मया हा धिगजानता । मयैव निधनं नीता देवाभा भ्रातरो दश ।।५५।।
बभूव या गतिस्तेषां भविष्यति ममापि सा । युज्यते नापसर्तुं च दृष्टभ्रातृवधस्य मे ।।५६।।
तद्देवतां समाराध्य तत्प्रभावाज्जयाम्यरिम् । दिव्यप्रभावो दिव्येन प्रभावेण हि बाध्यते ।।५७।।
उपायमिति निश्चित्य कृत्वा च हृदि देवताम् । तस्थावष्टमभक्तेन राजा श्रेणिकनन्दनः ।।५८।।
पूर्वजन्मसंगतेन नुन्नौ तत्तपसापि च । शक्रश्च चमरेन्द्रश्च तत्कालं तमुपेयतुः ।।५९।।
ऊचाते तौ च देवेन्द्रासुरेन्द्रौ भोः किमिच्छसि ? । सोऽप्यूचे यदि तुष्टौ स्थश्चेटकस्तन्निहन्यताम् ।।६०।।
शक्रो भूयोऽप्यभाषिष्टाऽपरं किमपि याच्यताम् । साधर्मिकश्चेटको मे तं निहन्मि न जातुचित् ।।६१।।
तथापि देहरक्षां ते करिष्यामि महीपते ! । यथा न जीयसे तेन सोऽब्रवीदेवमस्त्विति ।।६२।।
चमरेन्द्रोऽप्यथ महाशिलाकंटकमाहवम् । अन्यं च रथमुशलं जैत्रं कर्तुममन्यत ।।६३।।
आद्ये शिलासन्निभः स्यात् पतितः कर्करोऽपि हि । कंटकोऽपि च जायेत महाशस्त्राधिकः खलु ।।६४।।
द्वितीये रथमुशले भ्राम्यती भ्रमिकं विना । परितः पिष्यते ताभ्यां वैरिसैन्यं रणोत्थितम् ।।६५।।
सुरेन्द्रश्चासुरेन्द्रश्च नरेन्द्रश्चापि कूणिकः । ततस्त्रयो युयुधिरे सह चेटकसेनया ।।६६।।
पौत्रोऽथ नागरथिनो द्वादशव्रतपालकः । सम्यग्दृष्टिः षष्टभोजी सदा भवविरक्तधीः ।।६७।।
राजाभियोगतः षष्टभक्तान्तेऽपि कृताष्टमः । श्रीचेटकक्षितीशेन स्वयमत्यर्थमर्थितः ।।६८।।
संग्रामे रथमुशले दुःसहे तादृशेऽपि हि । प्राविशद्वरुणो नाम सेनानीः सत्यसंगरः ।।६९।।

।(त्रिभिर्विशेषकम्)

स चंपापतिसेनान्यं रणहेतोः समाक्षिपन् । प्रससार महासारो रथेनाऽसह्यरंहसा ।।७०।।
तौ संमुखीभूतस्थौ डुढौकाते रणेच्छया । वैरायमाणौ भूमिष्ठभानुस्वर्भानुभीषणौ ।।७१।।
चंपापतेश्चमूनाथो वरुणं रणमार्गणम् । प्रहर प्रहरेत्युच्चैर्व्याजहार पुरः स्थितम् ।।७२।।
वरुणः स्माह हे दोष्मन् ! श्रावकस्यास्ति मे व्रतम् । अनिघ्नते न प्रहारं करवै वैरिणेऽपि हि ।।७३।।
साधु साधु महासत्त्वेत्युक्त्वा चंपेशसैन्यपः । मुमोच बाणं वरुणो विविधे तेन मर्मणि ।।७४।।
ततः कूणिकसेनान्यं वरुणोऽरुणलोचनः । एकेनैव प्रहारेण निनाय यमसद्मनि ।।७५।।
गाढप्रहारविधुरो निःसृत्य वरुणो रणात् । तृणसंस्तरमासूत्र्य निषद्येदमचिन्तयत् ।।७६।।
सर्वात्मना शरीरेण स्वामिकार्यमनुष्ठितम् । इदानीमन्तकालो मे स्वार्थस्यावसरः खलु ।।७७।।
अर्हद्भट्टारकाः सर्वे सिद्धाः सर्वे च साधवः । केवल्युपज्ञो धर्मश्च भूयासुः शरणं मम ।।७८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

क्षमयामि सर्वाञ्जीवान् सर्वे क्षाम्यन्तु ते मयि । मैत्री मे सर्वभूतेषु वैरं मम न केनचित् ।।७९।।
मामकीनं न किमपि न वाऽहमपि कस्यचित् । ममकारमकार्षं यं तमपि व्युत्सृजाम्यहम् ।।८०।।
कानि कानि न मूढोऽहं पापस्थानान्यसेविषि । तन्मिथ्या दुष्कृतं मेऽस्तु गतरागस्य संप्रति ।।८१।।
देवत्वनृत्वतिर्यक्त्वनारकत्वेषु यन्मया । कृतं दुष्कर्म तद्गर्हे श्रीवीरोऽर्हन् गतिर्मम ।।८२।।
एवमाराधनां कृत्वा प्रत्याचख्यौ चतुर्विधम् । आहारमथ दध्यौ च नमस्कारं समाहितः ।।८३।।
तदा च वरुणस्यैकः सुहृन्मिथ्यादृगाहवात् । बहिर्भूत्वोपवरुणमागत्यैवमवोचत ।।८४।।
वयस्य ! तव सौहार्दक्रीतोऽहमपि संप्रति । त्वदासेवितमध्यानं प्रपन्नोऽस्म्यविदन्नपि ।।८५।।
नमस्कारपरावर्ती धर्मध्यानपरायणः । समाधिमरणं प्राप्य सौधर्मे वरुणो ययौ ।।८६।।
तद्विमानेऽरुणाभाख्ये चतुःपल्योपमप्रमम् । पूरयित्वायुरुत्पद्य विदेहेषु स सेत्स्यति।।८७।।
अज्ञानसेवितेनापि वरुणस्य तु वर्त्मना । विपद्य तत्सुहृद्भूयो मनुष्यः सुकुलेऽभवत् ।।८८।।
विदेहेषु मनुष्यत्वं पुनरासाद्य सत्कुले । मुक्तिमार्गं समाराध्य स मोक्षपदमाप्स्यति ।।८९।।
हते च वरुणेऽभूवंश्चेटकस्य चमूभटाः । युद्धाय द्विगुणोत्साहाः काण्डस्पृष्टवराहवत् ।।९०।।
गणराजसनाथैस्तैश्चेटकस्य चमूभटैः । अकुट्टि कूणिकचमूर्दशद्भिरधरं रुषा ।।९१।।
कुट्यमानं बलं दृष्ट्वा स्वकीयमथ कूणिकः । लोष्टाहतः सिंह इव क्रोधोद्धतमधावत ।।९२।।
सरसीव रणे क्रीडन् कूणिको वीरकुञ्जरः । दिशो दिशि परबलं पद्मखंडमिवाक्षिपत् ।।९३।।
कूणिकं दुर्जयं ज्ञात्वा चेटकोऽथात्यमर्षणः । तं दिव्यं मार्गणं शौर्यधनो धनुषि सन्दधे ।।९४।।
इतश्च वज्रकवचं कूणिकस्य पुरो हरिः । व्यधत्त चमरेन्द्रस्तु पृष्ठे सन्नाहमायसम् ।।९५।।
चापमाकर्णमाकृष्य वैशालीपतिनाऽप्यथ । स मुक्तः सायको वज्रवर्मणा स्खलितोऽन्तरा ।।९६।।
अमोघस्यापि बाणस्य तस्य मोघत्वदर्शनात् । चमूभटाश्चेटकस्य पुण्यक्षयममंसत ।।९७।।
द्वितीयं नाऽमुचद्बाणं सत्यसन्धस्तु चेटकः । अपसृत्य द्वितीयस्मिन् दिने तद्वदयुध्यत ।।९८।।
तथैव मोघबाणोऽभूद् द्वितीयेऽप्यह्नि चेटकः । एवं दिने दिने युद्धमतिघोरमभूत्तयोः ।।९९।।
लक्षाशीत्याऽधिका कोटिर्भटानां पक्षयोर्द्वयोः । विपेदे या सोदपादि तिर्यक्षु नरकेषु च ।।१००।।
नष्ट्वा स्वस्वपुरं यात्सु गणराजेषु चेटकः । प्रणश्य प्राविशत् पुर्यां कूणिकोऽपि रुरोध ताम् ।।१०१।।
तदा सेचनकारूढौ चंपेशस्याखिलं बलम् । वीरौ हल्लविहल्लौ तौ रात्रावभिबभूवतुः ।।१०२।।
न प्रहर्तुं नवा धर्तुं स हस्ती स्वप्नहस्तिवत् । केनाप्यशाकि चंपेशाशिबिरे सौप्तिकागतः ।।१०३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मारयित्वा मारयित्वा निशि हल्लविहल्लयोः । क्षेमेण गच्छतोर्मंत्रिमंडलीं स्माऽऽह कूणिकः ।।१०४।।
आभ्यां विद्रुतमस्माकं प्रायेण सकलं बलम् । तद् ब्रूत क इहोपायो जये हल्लविहल्लयोः ।।१०५।।
मंत्रिणोऽप्यूचिरे तौ हि जेतुं शक्यौ न केनचित् । अधिरूढौ हि यावत्तं हस्तिनं नरहस्तिनौ ।।१०६।।
तस्मात्तस्यैव करिणो वधाय प्रयतामहे । खादिरांगारसंपूर्णां कार्यतां पथि खातिका ।।१०७।।
छादयित्वा च वारीव दुर्लक्ष्या सा करिष्यते । तस्यां सेचनको वेगादभिधावन् पतिष्यति ।।१०८।।
चंपेशाऽकारयदथ खादिरांगारपूरिताम् । खातिकामुपरिच्छन्नां तदागमनवर्त्मनि ।।१०९।।
अथ हल्लविहल्लावप्यवस्कन्दकृते निशि । निरीयतुः सेचनकाधिरूढौ जितकाशिनौ ।।११०।।
अंगारखातिकोपान्तमेत्य सेचनकोऽपि हि । तां विभंगेन विज्ञाय तस्थौ यातममानयन् ।।१११।।
ततो हल्लविहल्लाभ्यामिति निर्भर्त्सितः करी । पशुरस्यकृतज्ञोऽसि कातरो यदभू रणात् ।।११२।।
विदेशगमनं बन्धुत्यागश्च त्वत्कृते कृतः । अस्मिन्दुर्व्यसने क्षिप्तस्त्वत्कृते चार्यचेटकः ।।११३।।
वरं श्वा पोषितः श्रेयान् भक्तः स्वामिनि यः सदा । न तु त्वं प्राणवाल्लभ्याद्योऽस्मत्कार्यमुपेक्षसे ।।११४।।
इति निर्भर्त्सितो हस्ती कुमारौ निजपृष्ठतः । वेगादुत्तारयामास भक्तंमन्यो बलादपि ।।११५।।
स्वयं तु तस्मिन्नंगारगर्ते झम्पां ददौ करी । सद्यो विपद्य चाद्यायामुत्पेदे नरकावनौ ।।११६।।
कुमारौ दध्यतुर्धिग्धिगावाभ्यां किमनुष्ठितम् । पशुत्वमावयोर्व्यक्तं न तु सेचनकः पशुः ।।११७।।
आर्यपादा यस्य कृते क्षिप्ता दुर्व्यसने चिरम् । तं स्वयं निधनं नीत्वा जीवावोऽद्यापि दुर्धियौ ।।११८।।
आर्यसैन्यस्य महतो नाशप्रतिभुवाविव । अकृष्वहि वृथा नाशं नीतो बन्धुरबन्धुताम् ।।११९।।
तन्नाऽद्य जीवितुं युक्तं जीवावश्चेदतः परम् । शिष्यीभूयार्हतो वीरस्वामिनः खलु नान्यथा ।।१२०।।
तदा शासनदेव्या तौ भावश्रमणतां गतौ । नीतौ श्रीवीरपादान्ते परिवव्रजतुर्द्रुतम् ।।१२१।।

[श्रीत्रिषष्टिशलाका० पर्व-१० श्लोक-१९० तः ३१०]

२९. नियुद्धध्याने श्रीउपदेशप्रासादे बाहुबलिभरतयोः प्रबन्धः ।

श्रीऋषभदेवपुत्रः षष्टिवर्षसहस्रैः षट्खण्डां पृथ्वीं साधयित्वा भरतोऽयोध्यायामाजगाम । तत्र द्वादशाब्दिके चक्रिराज्याभिषेके वर्तमाने स भूप आगतानागतान् जनानवलोकयन् तत्र निजानुजानना-यातान् विज्ञाय स्वबान्धवान् प्रति प्रत्येकं दूतान् प्रेषितवान् । ते गत्वा तानेवमाहुः-"भो भरत-बान्धवाः ! यूयं तं भूपं भजध्वं" । ततस्तैरुक्तं-"वयमपि नाभेयसूनवः भरतोऽपि पितुः सूनुः किमस्मत्तः सर्वेभ्योऽधिको योऽस्माकं सेवां वाञ्छति । भो दूताः ! यूयं स्वस्थाने यात, वयं तातं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पृष्ट्वोचितं करिष्यामः ।" ततस्ते सुवर्णगिरौ जिनान्तिके गत्वाऽभ्यधुः-"भोः तात ! षट्खण्डेन राज्येनातृप्तो भवद्भिर्दत्तमस्माकं राज्यं ग्रहीतुं समीहते । भगवदाज्ञया वयं सर्वेऽपि संभूय तस्य राज्यं गृह्णीमः" । स्वामिना तान्मुग्धान् प्रति धर्मदेशना दत्ता-

संबुज्झह किं न बुज्झह संबोहि खलु पेच्च दुल्लहा ।
नो हूवणमंति राइओ नो सुलहं पुणरवि जीवियं ।।१।।"

भगवद्देशनां श्रुत्वाऽष्टनवतिभरतानुजैर्व्रतं भेजे । तेषां राज्यानि भरतनृपो जग्राह । एकदा सेनापतिर्नरदेवं नत्वैवं व्यजिज्ञपत्-"स्वामिन् ! बाहुबली भूपालस्त्वया न जितः तस्मिन्नजिते त्वया षट्खण्डं जितमप्यजितं, यतश्चक्रं शस्त्रागारे न प्रविशति" । इति श्रुत्वा वाग्मी दूतः तक्षशिलां प्रति प्रेषितः । स्तोकप्रयाणैर्गच्छन् बहुलदेशे ग्रामे ग्रामे नगरे नगरे बहुजनमुखतो बाहुबलिनो यशः शृण्वन् तक्षशिलायां पुरि समागतः । ततः प्रतिहारेण सुवेगो दूतो बाहुबलिन आज्ञया स्वर्णवर्णाभमन्तःसभं प्रवेशितः । तं भूपं नमस्कृत्य पुरः स्थितः । बाहुबलिना बान्धवनगरादिकुशलं पृष्टं, तदुत्तरं दत्त्वा प्राह-"भो नृप ! तवाग्रजन्मा त्वन्मिलनोत्सुकस्त्वामाह्वयति । अतस्त्वमेकवारं तं नत्वा तस्याज्ञां शिरसि धृत्वाऽत्र समागच्छेः । यतो बान्धवोऽपि भरताज्ञां न मन्यते तर्ह्यस्याकिञ्चित्करः पराक्रम इति लोकापवादविध्वंसाय, अन्यथा तव राज्यसंशयो भविष्यति । यतः-

करालगरलः सर्पः पावकः पवनोद्धुरः ।
प्रभुः प्रौढप्रतापश्च विश्वास्या न त्रयोऽप्यमी ।।१।।

निर्जरा अपि यं पर्युपासते तस्य सेवया हीनत्वं नास्ति" ।। इति श्रुत्वा भूपो बभाषे-"हे दूत! तव भूपो मां वीक्ष्य लज्जिष्यति, यतो बाल्यावस्थायां जलकेल्यवसरे पादं धृत्वा नभसि कन्दुकवदुच्छालितस्तदपि विस्मृतं ! भो दूत ! षष्टिवर्षसहस्रेषु पापैर्भृतस्य तव भूपस्यान्यः कोऽपि प्रायश्चित्तदायको नास्ति, अहमेवास्मि । शीघ्रं समानय बलपरीक्षायै" । ततः सुवेगः सभयः प्रत्यावृत्तः स्तोकैरेव दिनैः स्वपुरीमागत्य भरतान्तिकेऽनुजस्य सर्वस्वरूपं गदितवान् । "बाहुबली शक्रेणापि जेतुं न शक्यते" इति श्रुत्वा भरतः सपादकोटिस्वपुत्रान्वितः ससैन्यस्तक्षशिलां प्रति चचाल । बाहुबल्यपि सम्मुखं समागात् । तस्य ज्येष्ठपुत्रः सोमयशा नृपः स एकोऽपि लक्षत्रयहस्तिहयरथानां जेता । अस्य त्रिलक्षतनयाः । तेषु कनिष्ठोऽप्येकोऽक्षौहिणीमितां सेनां जेतुं समर्थः । अक्षौहिणीमानं तुं-२१८९० गजाः, २१८९० रथाः, ६५६१० अश्वाः, १०९३५० पदातयः इति । अथ चक्रिसैन्ये चतुरशीतिलक्षाणि निस्वानानां समकालमवादिषुः, अष्टादशलक्षदुन्दुभीनां निर्घोषाः षोडशलक्षाणि तूर्याणि । तानि श्रुत्वा सोत्साहा भटा मिथो युयुधिरे प्रत्यहम् । एकदा बाहुबलिनो भक्तोऽनिलवेगो विद्याधरश्चक्रि-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सेनापतिमस्त्रैर्निर्जित्याकाशगत्या चक्रिगजसेनां व्यगाहत, कन्दुकानिव गजानुल्लाल्य पुनर्भूमौ पततो मुष्ट्या जघान । चक्री तमजय्यं वीक्ष्य चक्रं मुमोच । तद्वीक्ष्य भीतो नष्टः मेरुकन्दरसागरादिषु यत्र यत्र याति तत्र तत्र चक्रं पूर्वार्जितकर्मवत्पृष्ठं न मुञ्चति, तदा विद्यया वज्रपञ्जरं निर्माय तत्र प्रविष्टः ।

तदा चक्रसुराः प्राहुः-"रे रे रङ्क ! किं पौरूषं विडम्बयसि ?" । ततः षण्मासान्ते जातामर्षो बहिर्निःसृतः, तावच्चक्रं, तच्छिरश्छित्वा चक्रिहस्तेऽतिष्ठत् । एवं युध्यमानयोर्द्वादशवर्षाणि व्यतीयुः । एकदा चक्रिज्येष्ठात्मजः सूर्ययशा बाहुबलिसैन्ये दावाग्निरिव प्रससार, क्षणात् पितृव्याभ्यर्णे आगतः । तं बली प्राह-"वत्स ! त्वं लघुरसि, यदेवं मम सेनां विगाहसे तेनाहं हृष्टोऽस्मि, त्वया पुत्रेणास्माकं वंशः समुद्योतितः, परं त्रैलोक्येऽपि स कश्चिन्नास्ति यो मम क्रोधं सहते, तस्मान्मम दृष्टिं त्यक्त्वा दूरतो योहि" ।

स प्राह-"तात ! अद्य त्वया विना को मम सङ्ग्रामाभिलाषं पूरयति ?" इत्युक्त्वा धनुष्टङ्कारवं चकार । तदा सुराः संभूय परस्परसुभटयुद्धं निषिध्य द्वयोर्बन्ध्वोः शिक्षामिति प्राहुः-"भो युगादीशपुत्रौ ! तातेनेदं विश्वं पालितं अधुना युवां किं संहर्तुं प्रवृत्तौ ? एतन्न युज्यते युवयोः । बलपरीक्षार्थमुभाभ्यामेवास्मदादिष्टैर्दृष्टि १ वाग् २ मुष्टि ३ बाहु ४ दण्डास्त्र ५ लक्षणैः पञ्चभिर्युद्धैर्योद्धव्यं" । इति सुरवाक्ये द्वाभ्यामपि प्रतिपन्ने सुरनराः साक्षीभूय तस्थुः । तदा चक्रिसैनिका दध्युः-"अनेन सह द्वन्द्वयुद्धे शक्रस्यापि जयप्राप्तौ संदेहस्तर्हि अस्मत्स्वामी कथं जयं प्राप्स्यति ?" इति ध्यायतो भटान् वीक्ष्य चक्री स्वबलदर्शनायैकं महाकूपं कारयित्वा तस्योपकण्ठे स्थित्वा स्वस्य वामभुजं महालोहशृङ्खलाभिर्बद्ध्वा सर्वसैनिकान् प्राह-"यूयं सर्वेऽपि संभूय शृङ्खलाकर्षणेन मां गर्तायां क्षिपत" । तैः सर्वैः कर्षितोऽपि मनाग् न चचाल । यतश्चक्रिणं भरतोत्पन्नसर्वनरनारीगजाश्वादयः संभूयाकर्षणं कर्तुं तिलमात्रमपि न क्षमाः तर्हि सेनाभिः किं भवेत् ? । ततश्चक्री हृदयलेपकरणमिषेण स्वहस्तमाचकर्ष, तेन ते सर्वेऽपि शृङ्खलालग्ना लतालग्नाः पक्षिण इव लम्बन्ते स्म । इति पराक्रमं वीक्ष्य हृष्टाः साक्षिण इव दूरे तस्थुः ।

ततश्चक्रिभूपौ प्राग्दृष्टियुद्धार्थं संमुखं स्थितौ अनिमेषदृष्ट्याऽवलोकयतः स्म । ताम्रलोचनौ भयंकरावभूतां । ततो बाहुबलिमुखं भीषणाक्षं विलोकयतश्चक्रिणो लोचने बाष्पाकुले वेगात्प्रमिलिते । तत्सैन्यं सर्वं न्यग्मुखं जातं । ततो लज्जितं चक्रिणं स प्राह- "भ्रातः ! किमुद्विग्नोऽसि ? कुरु वाग्युद्धं मया सह" । इति तेनोक्तश्चक्री महाघोरं सिंहनादं चकार, तेन जातं बधिरं स्कन्धावार-मण्डलम् । ततः सामर्षो बाहुबली सिंहनादं चकार तेन सैनिकाः सर्वेऽपि मूर्छिता इव बभूवुः । पुनरपि चक्री भूपश्च सिंहनादं दुःसहं चक्रतुः । तदा चक्रिणो ध्वनिः पूर्वाह्णच्छायेव दुर्जनसौहृदमिव

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यथाक्रमं हीयमानोऽभूत् । तेन विलक्षं चक्रिणं भूपः स्माह–"हे भ्रातः ! मा विषीद, मया काकतालीयन्यायेन यदि जितं तर्हि किं जातं ? इदानीं सज्जो भव मुष्टियुद्धाय" इति भूपेनोत्साहितः प्रोच्चैर्भुजास्फोटं कृत्वोत्प्लुत्यान्योऽन्यमाश्लिष्य भुजाभ्यां पीडयन्तौ जगर्जतुः । ततो भूपश्चक्रिणं करेण गृहीत्वा लीलया कन्दुकवदुच्चैराकाशे उदलालयत् । क्षणाददृश्योऽभूत् । तेन सैन्यद्वयेऽपि हाहारवः प्रसृतः । भूपश्चिन्तया दध्यौ–"यावदार्योऽयं भूमौ पतित्वा न विशीर्यते तावदन्तरिक्षादेव गृह्णामि" इति विचिन्त्य तल्पाकारौ करौ कृत्वोर्ध्वदृष्टिस्तस्थौ । चिरेण स आययौ । बलिना बाहू प्रसार्य धृतः । ततः क्रोधाध्मातश्चक्री तन्मूर्ध्नि मुष्टिघातेन तममूर्छयत् । भूपोऽपि चिरेण प्राप्तचैतन्यश्चक्रिणं हृदि मुष्टिघातं कृत्वा मूर्छां गमितवान् । क्षणाल्लब्धसंज्ञश्चक्री रोषारुणो दण्डेन भूपमूर्ध्न्यताडयत्, तेन मुकुटः शतखण्डः कृतः । क्षणं नेत्रे निमील्य भूपो लोहमयदण्डेन चक्रिसन्नाहं शकलीचकार । ततश्चक्री दण्डघातेन भूपं जानुप्रमाणं भूमौ मग्नीचकार । ततो निर्गत्यायसदण्डेन भूपेन निहतश्चक्री आकण्ठं भूमौ मग्नः । क्षणाच्चैतन्यं प्राप्य निर्गतो दध्यौ-"भूपैश्चक्री न जीयते" इतीयं शाश्वती स्थितिरस्ति, अनेनाहं पञ्चभिर्युद्धैर्जितः तर्हि मयि चक्रित्वं न हि" इति ध्यायतस्तस्य पाणौ चक्ररत्नमुपागतम् । तदा चक्री भूपं स्माह–"अद्यापि तव किञ्चिन्न नष्टं, ममाज्ञां मन्यस्व, नो चेदनेन चक्रेण यमातिथिर्भविष्यसि" । भूपः स्माह–"वाक्याडम्बरं वृथा किं वहसि ? साम्प्रतमस्यापि बलं दर्शय" इत्यादि निर्भर्त्सितश्चक्री कोपाच्चक्रं मुमोच, तत्तं प्रदक्षिणीकृत्य पुनश्चक्रिकरे ययौ । यतः सामान्येऽपि चक्रिगोत्रे चक्रं न प्रभवति, तर्हि तथाविधे चरमशरीरिणि कोऽवकाशस्तस्य ? । अथ बाहुबली मुष्टिमुत्पाट्य "चक्रं वा यक्षसहस्रं वा तदधिपं वाऽद्य चूर्णयामि" इति विचिन्त्य चक्रिणं प्रत्यधावत । पुनर्दध्यौ–"अनेनावश्यं वधो भावी ततो मां विश्वे षट्खण्डनाथहन्तारं वदिष्यन्ति जनाः, अतो धिग्मयाऽहङ्कृत्याऽनेकपापान्यर्जितानि। धन्यास्ते ममानुजा यैः पूर्वमेव तातपादसमीपे दीक्षा गृहीता, धिग्मामद्यापि पापरतं" इति ध्यात्वा तेनैव मुष्टिना स्वमूर्ध्नि लोचं चकार । ततः "साधु साधु" इति वदन्तो देवास्तस्योपरि पुष्पवृष्टिं चक्रुः ।

२९. नियुद्धध्याने श्रीआवश्यकहारिभद्रीयवृत्तौ अट्टनमल्लकथा ।

उज्जेणित्ति णयरी, तीए जियसत्तूरण्णो अट्टणो मल्लो अतीव बलवं, सोपारए पट्टणे पुहइवई राया सिंहगिरी नाम मल्लवल्लहो, पतिवरिसमट्टणजओहामिएण अणेण मच्छियमल्ले कए जिएण अट्टणेण भरुगच्छाहरणीए दूरुल्लकूवियाए गामे फलिहमल्ले कएत्ति । एवमक्षरगमनिकाऽन्यासामपि स्वबुद्ध्या कार्या, कथानकान्येव कथयिष्यामः, अधिकृतगाथाप्रतिबद्धकथानकमपि विनेयजनहितायोच्यते– उज्जेणीणयरीए जियसत्तू राया, तस्स अट्टणो मल्लो सव्वरज्जेसु अजेओ, इओ य समुद्दतीरे सोपारयं णयरं, तत्थ सीहगिरी राया, सो य मल्लाणं जो जिणइ तस्स बहुं दव्वं देह, सो य अट्टणो तत्थ गंतूण

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वरिसे २ पडायं गिण्हइ, राया चिंतेइ-एस अन्नाओ रज्जाओ आगंतूण पडायं हरइ, एस मम ओहावणत्ति पडिमल्लं मग्गइ, तेण एगो मच्छिओ दिट्ठो वसं पिबंतो, बलं च से विन्नासियं, नाऊण पोसिओ, पुणरवि अट्टणो आगओ, सो य किर महो होहितित्ति अणागयं चेव सयाओ णयराओ अप्पणो पत्थयणस्स अवल्लं भरिऊण अव्वाबाहेणं एइ, संपत्तो य सोपारयं, जुद्धे पराजिओ मच्छियमल्लेणं, गओ य सयं आवासं चिंतेइ, एयस्स वुड्ढी तरुणयस्स मम हाणी, अण्णं मल्लं मग्गइ, सुणइ य-सुरट्ठाए अत्थित्ति, एएण भरुयच्छाहरणीए गामे दूरुल्लकूवियाए करिसगो दिट्ठो-एगेण हत्थेण हलं वाहेइ एगेण फलहिओ उप्पाडेइ, तं च दट्ठूण ठिओ पेच्छामि से आहारंति, आवल्ला मुक्का, भज्जा य से भत्तं गहाय आगया, पत्थिया, कूरस्स उज्झमज्जीए घडओ पेच्छइ, जिमिओ सण्णाभूमि गओ, तत्थवि पेच्छइ सव्वं वत्तियं, वेगालिओ वसहिं तस्स य घरे मग्गइ, दिन्ना, ठिओ, संकहाए पुच्छइ,-का जीविया ?, तेण कहिए भणइ-अहं अट्टणो तुमं ईसरं करेमित्ति, तीसे भज्जाए से कप्पासमोल्लं दिन्नं, अवल्ला य, सा सवलद्धा उज्जेणिं गया, वमणविरेयणाणि कयाणि पोसिओ निजुद्धं च सिक्खाविओ, पुणरवि महिमाकाले तेणेव विहिणा आगओ, पढमदिवसे फलहियमल्लो मच्छियमल्लो य जुद्धे एगोवि न पराजिओ, राया बिइयदिवसे होहितित्ति अइगओ, इमेवि सए सए आलए गया, अट्टणेण फलहिय-मल्लो भणिओ-कहेहि पुत्ता ! जं ते दुक्खावियं, तेण कहियं, मक्खित्ताऽक्खेवेणं पुणण्णवीकयं, मच्छियस्सवि रण्णा संमद्दगा पेसिया, भणइ-अहं तस्स पिउपि ण बिभेमि, को सो वराओ ?, बितियदिवसे समजुज्झा, ततियदिवसे अंबियपहारो वइसाहं ठिओ मच्छिओ, अट्टणेण भणिओ फलिहित्ति, तेण फलहिग्गाहेण गहिओ सीसे, तं कुंडियनालगंपिव एगंते पडियं, सक्कारिओ गओ उज्जेणिं, पंचलक्खणाण भोगाण आभागी जाओ, इयरो मओ ।

३०. सङ्घ्याने श्रीउपदेशप्रासादे रथनेमेः प्रबन्धः ।

अथ रथनेमिर्लघुभ्राता पाणिग्रहणलिप्सया राजीमतीं प्रति प्राभृतानि प्रसत्तये प्रैषीत् । तदा राजीमती दध्यौ-"स्वभ्रातुः प्रेमतो मयि एष प्राभृतं प्रेषयति, अतो गृह्णामि" । अन्येद्युर्विवाहाकाङ्क्षया प्रार्थयन्तं तं नृपाङ्गजेत्यब्रवीत्-"मदनफलमाघ्राय वान्त्वेदं भुङ्क्ष्व" । स स्माह-"किमहं श्वानोऽस्मि यद्वान्तं भुञ्जे ?" । सा स्माह-"तर्हि भ्रातृत्यक्तां मामुपभोक्तुं कथं वाञ्छसि ? अन्यच्च-

को नाम गजमुज्झित्वा, रासभं बहु मन्यते । को वा रत्नमनादृत्य, काचेऽपि कुरुते मतिः ।।१।।

मम जन्मान्तरेऽपि नेमिर्वरो भूयान्नापरः । अन्यदोत्पन्नपूर्णज्ञानो जगदीशः पुना रैवतके समवासरत् । तदा राजीमती व्रतमादाय महत्तरा जज्ञे । नेमेरनुजोऽपि व्रतमुपादत्ते स्म । अन्यदा जिनानुज्ञां प्राप्य भिक्षार्थं पुरे परिभ्रम्य पश्चान्निवृत्त इति दध्यौ-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मा भूद्विनाशो जलकायिकानां, मद्देहसङ्गेन तदेति वृष्ट्याम् ।
भिक्षानिवृत्तो रथनेमिसाधुर्विवेश कस्यांचन कन्दरायाम् ।।१।।

व्यावर्तमाना प्रणिपत्य नाथं, राजीमती साऽपि भयेन वृष्टेः ।
पूर्वप्रविष्टं तमजानती द्राग्विवेश तामेव गुहां नगस्य ।।२।।

गताऽपि मध्ये न तमन्धकारे, ददर्श कोणे स्थितमेतदीये ।
क्लिन्नानि किञ्चिद्वसनानि साध्वी, ततश्च निःशोषयितुं प्रवृत्ता ।।३।।

स्वर्गलोकजयायैव, साधयन्तीं तपःक्रियाम् ।
दृष्ट्वा विवसनां तन्वीं, बभूवोत्कलिकाकुलः ।।४।।

एतस्य सोदरेणाहमाजन्मापि तिरस्कृतः ।
इति भ्रातृविरोधेन, स्मरो मुनिमपीडयत् ।।५।।

पिण्डितं सृष्टिसर्वस्वमिवासौ हा मृगेक्षणा ।
नैकशोऽपि मया भुक्ता, धिग्मे जन्म निरर्थकम् ।।६।।

ईषत्कम्पवपुर्भृत्य, इवोत्थाय विसंस्थुलः ।
रथनेमिः पुरस्तस्यास्तस्थावुत्तानितेक्षणः ।।७।।

हे भद्रे ! स्वेच्छयाऽऽगच्छ, आवां जन्म सफलं कुर्वहे । पुनः प्रान्ते उभावपि तपोविधिं चरिष्यावः । श्रुत्वेत्यव्याजचित्ता सा धीरतां धारयित्वा सती स्पष्टमभाषिष्ट । यतः-

प्रावृत्य वासांसि तदैव साध्वी, साधुं सुधासोदरया गिरा तम् ।
प्रचक्रमे वक्तुमियं मुनीन्दो, न युज्यतेऽदस्तव सद्व्रतस्य ।।१।।

साधो क्व ते जन्म कुलेऽमलेऽस्मिन्, क्वेदं कुकर्माञ्जनतोऽपि कालम् ।
निर्वाहयस्व व्रतमेतदात्तं, क्षतव्रताः स्युर्न कदापि धीराः ।।२।।

अन्यच्च-

संयतीप्रतिसेवायां धर्मोड्डाहर्षिघातयोः । देवद्रव्यविनाशे च, बोधिघातो निवेदितः ।।३।।

पूर्वं गृहस्थया मया वाचाऽपि यस्त्वं नेहितः, व्रतप्रतिज्ञाता साऽहं त्वामद्य कथमाद्रिये ? अगन्धनकुलजा भुजङ्गमास्तेऽपि वर्याः ये वान्तं विषं नाश्नन्ति, त्वं तु ततोऽपि निकृष्टः, खण्डितशीलस्येदं जीवितं धिक् । यतः-

दृश्यं दृश्यं योषितं चेद्विधत्से, भावं कामाराधने साधुवर्य ।
तद्भो वातालिङ्गितो वाहवस्त्वं, मुग्धो धैर्येणास्थितात्मेव भावी ।।१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वराटिकाकृते तस्मान्मा स्म कोटिं विनाशय ।
तस्माद्धीरत्वमाधाय, शुद्धधर्मं समाचार ।।२।।
इत्यादितदुक्तिं युक्तियुक्तामाकर्ण्येदं दध्यौ-
स्त्रीजातावपि धन्याऽसौ, निधानं गुणसंपदाम् ।
कुकर्मजलधौ मग्नो, धिगहं पुरुषोऽपि हि ।।३।।
एवं तस्या राजिमत्याः सुमत्याः, श्रुत्वा शिक्षां दक्षमुख्यस्तदैव ।
दत्त्वा मिथ्यादुत्कृतं श्री जिनान्ते, भूयो धर्मं साधुचीर्णं चचार ।।४।।

३०. सङ्घध्याने श्रीपरिशिष्टपर्वान्तर्गता भवदेववार्त्ता ।

आचख्यौ प्रभुरप्येवं जम्बूद्वीपस्य भारते । मगधाख्ये जनपदे ग्रामे सुग्रामनामनि ।।२।।
आर्यवान्राष्ट्रकूटोऽभूत्तस्य पत्नी तु रेवती । भवदत्तो भवदेवश्चाभूतां तनयौ तयोः ।।२।। (युग्मम्)
भवदत्तो भवाम्भोधेरुत्तारणतरीं दृढाम् । यौवनेऽप्याददे दीक्षां सुस्थिताचार्यसन्निधौ ।।३।।
स व्रतं पालयन्खड्गधारोग्रं श्रुतपारगः । व्यहरद् गुरुणा सार्धं द्वैतीयकीव तत्तनुः ।।४।।
तस्मिन्गच्छे साधुरेकोऽन्यदाऽऽचार्यान् व्यजिज्ञपत् । अनुजानीत मां यामि यत्र बन्धुजनोऽस्ति मे ।।५।।
तत्रास्ति मे लघुभ्राता स भृशं स्नेहलो मयि । प्रव्रजिष्यति मां दृष्ट्वा प्रकृत्याऽग्रेऽपि भद्रकः ।।६।।
ततस्तं श्रुतभृत्साधुसमेतं गुरुरादिशत् । परनिस्तारणपरे गुरुः शिष्ये हि मोदते ।।७।।
स जगाम पितुर्धाम गतमात्रो ददर्श च । भ्रातुरुद्वाहमारब्धं मन्मथद्रुमदोहदम् ।।८।।
विवाहकौतुकव्यग्रः स भ्राता कन्यसो मुनेः । विस्मृतान्यकरणीयो मुद्वातूलस्तदाऽभवत् ।।९।।
विवाहसमये प्राप्तमजानन्निव सोऽग्रजम् । नाकार्षीत्स्वागतमपि व्रतादानकथाऽपि का ।।१०।।
विलक्षः स मुनिर्भूयोऽप्यागमत्सन्निधौ गुरोः । आलोच्याकथयत्सर्वामनुजस्य कथां तथा ।।११।।
भवदत्तोऽवददहो ! काठिन्यमनुजन्मनः । ज्यायांसं यदवाज्ञासीदृषिमभ्यागतं गृहे ।।१२।।
गुरुभक्तेरपि श्रेयः किं नामोद्वाहकौतुकम् ? । तत्परित्यज्य सानन्दः स ज्येष्ठं नान्वियाय यत् ।।१३।।
कश्चिदूचे तदा साधुर्भवदत्तासि पण्डितः । यदि त्वमनुजन्मानं निजं प्रव्राजयिष्यसि ।।१४।।
भवदत्तोऽब्रवीद्देशे मगधाख्ये गुरुर्यदि । विहरिष्यति तददः कौतुकं दर्शयिष्यते ।।१५।।
विहरन्तोऽन्यदा जग्मुर्मगधानेव सूरयः । समीरणवदेकत्र श्रमणानां स्थितिर्न हि ।।१६।।
आचार्यपादान् वन्दित्वा भवदत्तो व्यजिज्ञपत् । स्वजनानित आसन्नान्दिदृक्षे युष्मदाज्ञया ।।१७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भवदत्तं ततश्चैकमपि तत्राऽऽदिशद् गुरुः । एकाकिनोऽप्यर्हति हि विहारो वशिनो मुनेः ।।१८।।
भवदत्तो जगामाथ स्वेषां संसारिणां गृहे । प्रव्रज्याग्राहणेनानुग्रहीतुमनुजं निजम् ।।१९।।
नागदत्तस्य तनयां वासुकीकुक्षिसम्भवाम् । उपयेमे भवदेवो भवदत्तानुजस्तदा ।।२०।।
कृतोद्वाहोत्सवाः सर्वे बन्धवस्तं मुदाऽभ्ययुः । मन्यमाना उत्सवोपर्युत्सवं तत्समागमम् ।।२१।।
सद्यः पाद्येन तत्पादौ प्रक्षाल्य प्रासुकेन ते । पादोदकमवन्दन्त मत्वा तीर्थोदकाधिकम् ।।२२।।
भवाब्धिमज्जनभयादवलम्बमिवेच्छवः । लगित्वा पादयोः सर्वे बन्धवस्तं ववन्दिरे ।।२३।।
मुनिरप्यभ्यधाद्बन्धून् विवाहव्याकुलाः स्थ भोः ! । यामो विहर्तुमन्यत्र धर्मलाभोऽस्तु वोऽनघाः ! ।।२४।।
तमृषिं बन्धवः सर्वे भक्तपानदिभिर्मुदा । एषणीयकल्पनीयप्रासुकैः प्रत्यलाभयन् ।।२५।।
तदानीं भवदेवोऽपि कुलाचारं प्रपालयन् । सेव्यमानां वयस्याभिर्नवोढां मण्डयन्नभूत् ।।२६।।
चक्रेऽङ्गरागं प्रेयस्या श्रीचन्दनरसेन सः । चन्द्रातपरसेनेवाकृष्टेन शशिमण्डलात् ।।२७।।
तस्या मूर्ध्नि च धम्मिल्लं सुमनोदामगर्भितम् । बबन्ध ग्रस्तशशिनः स्वर्भाणोः श्रीमल्लिम्लुचम् ।।२८।।
तत्कपोलफलकयोः कस्तूर्या पत्रवल्लरीम् । मीनकेतोरिव जयप्रशस्तिमलिखत्स्वयम् ।।२९।।
कुचयोर्मण्डनं यावन्नवोढः स प्रचक्रमे । तावदागममश्रौषीद्भवदत्तमहामुनेः ।।३०।।
स भ्रातृदर्शनोत्तालः कितवो जयवानिव । द्रागुदस्थाद्विहायार्धमण्डितामपि वल्लभाम् ।।३१।।
हित्वाऽर्धमण्डितां कान्तां न गन्तुमुचितं तव । तस्याः सखीनामित्युक्तिं स एड इव नाशृणोत् ।।३२।।
साग्रहं वारयन्तीनां तासां चेत्युत्तरं ददौ । कृत्वा गुरुप्रणिपातं पुनरेष्यामि बालिकाः !।।३३।।
भवदत्तस्ततः स्थानात्प्लवमानः प्लवङ्गवत् । अभ्येत्य भवदत्तर्षिं तत्र स्थितमवन्दत ।।३४।।
वन्दित्वोत्थितमात्रस्यानुजस्य घृतभाजनम् । मुनिः श्रामण्यदानाय सत्यङ्कारमिवार्पयत् ।।३५।।
भवदत्तस्ततोऽगारादनगारशिरोमणिः । निर्जगाम धियां धाम मनाग्भ्रातरि दत्तदृक् ।।३६।।
भवदेवोऽपि तत्सर्पिर्भाजनं धारयन्करे । अन्वगाद्भवदत्तर्षिं तत्पदाम्भोजषट्पदः ।।३७।।
अन्येऽपि बहवो नार्यो नराश्च भवदेववत् । अन्वयुर्भवदत्तर्षिमुदूर्मिप्रमदह्रदाः ।।३८।।
मुनिर्न कञ्चिद्व्यसृजत् मुनीनामुचितं ह्यदः । अविसृष्टाश्च मुनिना न व्यावर्तिरे जनाः ।।३९।।
दूरं गत्वा च निर्विण्णास्तं वन्दित्वा महामुनिम् । स्वयमेव व्याजुघुटुरादौ नार्यो नरास्ततः ।।४०।।
भवदेवस्तु भद्रात्मा चिन्तयामासिवानिदम् । अप्यविसृष्टा व्याघुटन्त्वेते नैते हि सोदराः ।।४१।।
अहं तु सोदरोऽमुष्य द्वावावां स्नेहलौ मिथः । तदनेनाविसृष्टस्य न्याय्यं व्याघुटनं न मे ।।४२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भक्तपानादिभारेणाक्रान्तोऽयं नूनमग्रजः । ततो ममार्पयद्वोढुं प्रसीदन्घृतभाजनम् ।।४३।।
चिरादभ्यागतं श्रान्तं ज्यायांसं भ्रातरं मुनिम् । अमुक्त्वा तदमुं स्थाने न निवर्तितुमुत्सहे ।।४४।।
माऽसौ वलेदिति मनोव्याक्षेपार्थं कनीयसः । गार्हस्थ्यवार्तां प्राक्रंस्त भवदत्तो महामुनिः ।।४५।।
एते ते ग्रामपर्यन्तपादपाः पान्थमण्डपाः । भ्रातरावां वानरवद्येषु स्वैरमरंस्वहि ।।४६।।
सरोवराणि तान्येतान्यावाभ्यां यत्र शैशवे । अकारि नलिनीनालैर्हारश्रीः कण्ठयोर्मिथः ।।४७।।
एताश्च ग्रामपर्यन्तभूमयो भूरिवालुकाः । यत्रावां वालुकाचैत्यक्रीडां प्रावृष्यकृष्वहि ।।४८।।
भवदत्तोऽनुजन्मानमेवमध्वनि वार्तयन् । जगाम ग्राममाचार्यपादपद्मैः पवित्रितम् ।।४९।।
सानुजं भवदत्तर्षिं वसतिद्वारमागतम् । निरीक्ष्य क्षुल्लकाः प्रोचुः कृतवक्रोष्ठिका मिथः ।।५०।।
दिव्यवेषधरो नूनमनुजो मुनिनाऽमुना । प्रव्राजयितुमानीतः स्वं सत्यापयितुं वचः ।।५१।।
सूरिरूचे भवदत्त ! तरुणः कोऽयमागतः । सोऽवदद्भगवन्दीक्षां जिघृक्षुर्मेऽनुजो ह्यसौ ।।५२।।
सूरिणा भवदेवोऽपि पप्रच्छे किं व्रतार्थ्यसि ? । मा भूद् भ्राता मृषावादीत्येवमित्यवदत्स तु ।।५३।।
भवदेवस्तदैवाथ पर्यव्राज्यत सूरिभिः । साधुभ्यां सहितोऽन्यत्र विहर्तुं च न्ययोज्यत ।।५४।।
भवदेवः किमद्यापि नायात ? इति चिन्तया । स्वजनाः पृष्ठतोऽभ्येत्य भवदत्तं बभाषिरे ।।५५।।
भवदेवोऽन्वगाद्युष्मान्प्रियां हित्वाऽर्धमण्डिताम् । तन्मुदे किं त्वनायाते तस्मिन्जीवन्मृता वयम् ।।५६।।
खिद्यते चक्रवाकीव सा युक्तिविधवा वधूः । विश्राम्यति न तस्याश्च नयनाम्बु सिराम्बुवत् ।।५७।।
एकाक्यस्माननापृच्छ्य भवदेवः क्वचिद्व्रजेत् । इति स्वप्नेऽप्यसम्भाव्यं गतश्च क्वापि किं ह्यदः ।।५८।।
नष्टस्वानिव ग्रहिलान्भवदेवमपश्यतः । अस्माननुगृहाणर्षे ! कथय क्व स तेऽनुजः ? ।।५९।।
धर्मोदर्केच्छुरनुजस्योचे मिथ्याऽप्यथो मुनिः । यात आयातमात्रोऽपि न विद्यः स ययौ क्वचित् ।।६०।।
गतोऽन्येनाध्वना किं स ? इति जल्पन्त आशु ते । प्रत्यावर्तन्त दीनास्या दस्युभिर्मुषिता इव ।।६१।।
तां नवोढां हृदि ध्यायन्भ्रातृभक्त्यैव केवलम् । प्रव्रज्यां भवदेवोऽपि सशल्यां पर्यपालयत् ।।६२।।
महर्षिर्भवदत्तोऽपि कालेन बहुनेयुषा । विपेदेऽनशनं कृत्वा सौधर्मे च सुरोऽभवत् ।।६३।।
भवदेवोऽप्यदो दध्यौ नागिला प्रेयसी मम । प्रेयांस्तस्या अहमपि विरहो ही द्वयोरभूत् ।।६४।।
भ्रातुरेवोपरोधेन व्रतं चिरमपालयम् । तस्मिंस्तु स्वर्गते किं मे व्रतेनायासहेतुना ।।६५।।
न तथा व्रतकष्टेन दुष्करेणास्मि पीडितः । यथा तद्विरहेणोच्चैर्भविष्यति कथं नु सा ? ।।६६।।
गजीव चारीपतिता पद्मिनीव हिमाविला । मरालीव मरुगता वल्लीव ग्रीष्मतापभाक् ।।६७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यूथभ्रष्टेव हरिणी पाशबद्धेव शारिका । सा मन्ये दैन्यभाग्लोकानुकम्प्यैव भविष्यति ।।६८।। (युग्मम्)
यदि प्राप्स्यामि जीवन्तीं तां प्रियामायतेक्षणाम् । तदद्यापि हि गार्हस्थ्यातृप्तो रंस्ये तया सह ।।६९।।
चिन्तातन्तुभिरेवं स्वं नियच्छन्नूर्णनाभवत् । स्थविरर्षीननापृच्छ्य भवदेवो विनिर्ययौ ।।७०।।
तूर्णं जगाम च ग्रामं सुग्रामं राष्ट्रकूटभूः । तस्थौ च संवृतद्वारबाह्यायतनसन्निधौ ।।७१।।
गन्धमाल्यधरा नारी ब्राह्मण्या सममेकया । तन्नाभ्यागान्मुनिरसावित्यवन्दत तं च सा ।।७२।।
पप्रच्छ भवदेवस्तां राष्ट्रकूटः स आर्यवान् । पत्नी च रेवती तस्य भद्रे ! जीवति वा न वा ? ।।७३।।
कथयामास साप्येवमार्यवान्रेवती च सा । व्यपद्येतां तयोश्चागाद् भूयान्कालो विपन्नयोः ।।७४।।
भूयोऽप्यपृच्छत्स मुनिरार्यवत्सूनुना प्रिया । भवदेवेन या त्यक्ता नवोढा साऽस्ति वा न वा ? ।।७५।।
सा दध्यौ भवदेवोऽयं नूनमात्तव्रतोऽग्रजात् । यदि वा वार्तयाम्येतमनेनसमिहागतम् ।।७६।।
उवाच चिन्तयित्वैवमार्यवद्रेवतीसुतः । त्वमेव भवदेवोऽसि ? किमिहागास्तपोधन ! ।।७७।।
भवदेवोऽवदत्साधु त्वयाऽहमुपलक्षितः । स एव भवदेवोऽस्मि नागिलाजीवितेश्वरः ।।७८।।
तदाऽग्रजोपरोधेन तां विमुच्य निरीयुषा । अनिच्छतापि हि मया व्रतमादायि दुष्करम् ।।७९।।
विपन्ने साम्प्रतं भ्रातर्यहमङ्कुशवर्जितः । नागिला सा कथमभूदित्यागां तद्दिदृक्षया ।।८०।।
नागिला चिन्तयामास चिराद् दृष्टां हि मामसौ । न हि प्रत्यभिजानाति परावृत्तवयोगुणाम् ।।८१।।
आत्मानं ज्ञापयाम्येनमिति प्रोवाच नागिला । नागिला साऽस्म्यंह हन्त नवोढाऽत्याजि या त्वया ।।८२।।
एतावता च कालेन यौवनेऽपि व्यतीयुषि । किं नाम मयि लावण्यं पुण्याशय ! विमृश्यताम् ।।८३।।
मुक्त्वा रत्नत्रयं स्वर्गापवर्गफलदायकम् । वराटिकामात्रनिभां मा ग्रहीर्मां महाशय ! ।।८४।।
अत्यन्तघोरनरकपातप्रतिभुवामहो । विषयाणां स्मरास्त्राणां मा गास्त्वं भेदनीयताम् ।।८५।।
ग्राहितोऽसि व्रतं भ्रात्रा छद्मनाऽपि हितैषिणा । तमप्यनाप्तं मा मंस्था मयि पापखनौ रतः ।।८६।।
तदद्यापि निवर्तस्व गुरुपादाननुव्रज । मयि रागकृतं चाघमालोचय तदन्तिके ।।८७।।
यावदेवं भवदेवं नागिला भृशमान्वशात् । ब्राह्मण्या दारकस्तावत्तत्राऽऽगाद् भुक्तपायसः ।।८८।।
ऊचे च पायसं भुक्तं यन्मयाऽद्य सुधोपमम् । तद्वमिष्याम्यहं मातरधो धारय भाजनम् ।।८९।।
निमन्त्रितोऽहमन्यत्र लप्स्ये तत्र च दक्षिणाम् । अवान्तपायसो मातर्भोक्तुं शक्ष्यामि नो पुनः ।।९०।।

आदाय दक्षिणामत्रागतो भूयोऽपि पायसम् ।
स्वयं वान्तं स्वयं भोक्ष्ये का ह्रीः स्वोच्छिष्टभोजने ।।९१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ब्राह्मण्युवाच वान्ताशी जुगुप्स्यस्त्वं भविष्यसि । अलं जुगुप्सनीयेन कर्मणाऽनेन दारक !।।९२।।
तच्छ्रुत्वा भवदेवोऽपि निजगादेति हे बटो ! । त्वं भविष्यसि वान्ताशी निकृष्टः कुक्कुरादपि ।।९३।।
नागिलोवाच तमृषिं यद्येवं वेत्सि वक्षि च । तन्मामुद्वम्य किमिति भूयोऽप्युपबुभुक्षसे ।।९४।।
मांससृगस्थिविण्मूत्रपूर्णोऽहमधमाधमा । वान्तादपि जुगुप्स्याऽस्मि मामिच्छन् किं न लज्जसे ? ।।९५।।
पश्यस्यद्यौ ज्वलदग्निं न पुनः पादयोरधः । यत्परं शिक्षयस्येवं न स्वं शिक्षयसि स्वयम् ।।९६।।
का हि पुंगणना तेषां येऽन्यशिक्षाविचक्षणाः । ये स्वं शिक्षयितुं दक्षास्तेषां पुंगणना नृणाम् ।।९७।।
भवदेवोऽवदत्साधु शिक्षितोऽस्मि त्वयानघे ! । आनीतः पथि जात्यन्ध इव यानहमुत्पथे ।।९८।।
तदद्य स्वजनान्दृष्ट्वा यास्यामि गुरुसन्निधौ । व्रतातीचारमालोच्य तप्स्येऽहं दुस्तपं तपः ।।९९।।
नागिलाऽप्यवदत् किं ते स्वजनैः स्वार्थभाग्भव । मूर्तिमन्तो हि ते विघ्ना भाविनो गुरुदर्शने ।।१००।।
तद् गच्छ गुरुपादान्ते दान्तात्मा व्रतमाचर । प्रव्रजिष्याम्यहमपि व्रतिनीजनसन्निधौ ।।१०१।।
भवदेवोऽथ वन्दित्वाऽर्हद्बिम्बानि समाहितः । गत्वा गुर्वन्तिकेऽकार्षीत्कृत्यमालोचनादिकम् ।।१०२।।
श्रामण्यं निरतीचारं भवदेवः प्रपालयन् । कालं कृत्वाऽऽदिकल्पेऽभूच्छक्रसामानिकः सुरः ।।१०३।।

[परिशिष्टपर्व० श्लोक-२८७ तः ३८९]

३१. संग्रहध्याने श्रीआवश्यकहारिभद्रीयव्याख्यायां मम्मणस्याख्यानकम् ।

णयरे मम्मणोत्ति, तेण महया किलेसेण अइबहुगं दविणजायं मेलियं, सो तं ण खायइ ण पिवइ, पासाउवरिं चऽणेण अणेगकोडिनिम्मायगब्भसारो कंचणमओ दिव्वरयणपज्जत्तो वरवइरसिंगो महंतो एगो बलद्दो काराविओ, बीओ य आढत्तो, सोऽवि बहुनिम्माओ, एत्थंतरंमि वासारत्ते तस्स निम्मावणनिमित्तं सो कच्छोट्टगबिइज्जो णईपूराओ कट्ठविरूढगो कट्ठाणि य उत्तारेइ । इओ य राया देवीए सह ओलोयणगओ अच्छइ, सो तहाविहो अईव करुणालंबणभूओ देवीए दिट्ठो, तओ तीए सामरिसं भणियं-सच्चं सुव्वइ एयं मेहनइसमा हवंति रायाणो । भरियाइं भरेंति दढं रित्तं जत्तेण वज्जेइ ।।१।। रण्णा भणियं-किह वा ?, तीए भणियं-जं एस दमगो किलिस्सइ, रण्णा सद्दाविओ भणिओ य-किं किलिस्ससि ?, तेण भणियं-बलद्दसंघाडगो मे ण पूरिज्जइ, रण्णा भणियं-बलद्दसयं गेण्ह, तेण भणियं-ण मे तेहिं कज्जं, तस्सेव बितिज्जं पूरेह, केरिसो सोत्ति घरं नेऊण दरिसिओ, रण्णा भणियं-सव्वभंडारेणवि न पूरिज्जइ इमो, ता एत्तिगस्स विभवस्स अलं ते तिण्हाएत्ति, तेणं भणियं-जावेसो न पूरिओ ताव मे न सुहं, आरद्धो य उवाओ पेसियाणि दिसासु भंडाणि आढत्ताओ किसीओ आढत्ताणि गयतुरयसंडपोसणाणि, रण्णा भणियं-जइ एवं ता किं थेवस्स कए

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किलिस्ससि ?, तेण भणियं-किलेससहं मे सरीरं वावारंतरं चेयाणि नत्थि महग्घाणि य वासारत्ते दारुगाणित्ति निव्वहियव्वा य पइण्णत्ति अओ करेमित्ति, रण्णा भणियं-पुज्जंतु ते मणोरहा, तुमं चेव बितिज्जगं पूरिउं समत्थो न पुण अहंति निग्गओ, तेण कालेण पूरिओ ।

३३. क्रयविक्रयध्याने श्रीसंवेगरङ्गशालामध्ये नन्दकथा ।

पाडलिपुत्तं नगरे, बहुसमरविढत्तविजयजसपसरो । आसि जयसेणनामो, नरनाहो भूरिगुणकलिओ ।।१।।

तत्थ य पुरम्मि अधरिय-कुबेरधणवित्थरा परिवसंति ।
नंदपमोक्खा वणिणो, जिणदासाऽऽई सुसड्ढा य ।।२।।

अह एगम्मि अवसरे, समुद्दत्ताऽभिहाणवणिएण । चिरकालियं सरोवरमाऽऽरद्धं खाणिउं एक्कं ।।३।।

तत्थ खणिज्जंतम्मि, उड्डेहिं पुव्वपुरिसपक्खित्ता ।
लद्धा सुवन्नकुसया, चिरकालियकिट्टचयमलिणा ।।४।।

तो लोहमय त्ति वियाणिऊण, वणियाण तेहिं उवणीया ।
जिणदासेणं गहिया य, दोन्नि नाऊण लोहमया ।।५।।

अह तेण नियंतेणं, सम्मं नाउं सुवन्नमइय त्ति । परिमाणाऽइक्कमभया, दिन्ना तित्थयरभवणम्मि ।।६।।

अवरे पुणो न गहिया, नवरं नंदेण जाणमाणेण । आढत्ता ते घेत्तुं, समहियअत्थव्वएणाऽवि ।।७।।

उड्डा य इमं भणिया, लोहकुसे मा परस्स देज्जाह ।
अहमिच्छियं दलिस्सामि, तुम्ह तेहिं च पडिवण्णं ।।८।।

अवरम्मि दिणे मित्तेण, सो बला भोयणऽट्ठया नीओ ।
तेण य पुत्तो भणिओ, जह तह गिण्हेज्जसु कुस त्ति ।।९।।

पडिसुयमिमं सुएणं, भोत्तुं मित्तग्गिहे गओ ताहे । अच्चंतवाउलमणो, भोत्तुं च गिहंमुहो चलिओ ।।१०।।

अमुणियपरमत्थेण य, समऽहियमोल्ल त्ति नो कुसा गहिया ।
तेण सुएणं उड्डा य, जायकोवा परत्थ गया ।।११।।

जत्तो तत्तो य खिवंतयाण, अह कहवि ववगए किट्टे । एगस्स उ कुसयस्सा, पयडं चामीयरं जायं ।।१२।।

रायपुरिसेहिं तत्तो, उड्डा गहिउं समप्पिया रन्नो । पुट्ठा य कत्थ अन्ने, विक्कीया कहह कुसग त्ति ।।१३।।

तेहिं कहियं नराऽहिव !, दिन्ना जिणदाससेट्ठिणो दोन्नि ।
अवसेसा नीसेसा, उवणीया नंदवणियस्स ।।१४।।

एवं भणिए रन्ना, वाहरिउं पुच्छिओ हु जिणदासो । सिट्ठो य तेण सव्वो, जहट्ठिओ नियगवुत्तंतो ।।१५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ताहे रन्ना सम्माणिऊण, सो पेसिओ नियगिहम्मि । नंदो य नियगहट्ठं, समागओ पुच्छए पुत्तं ।।१६।।

किं रे ! कुसया गहिया, न व त्ति तेणं पयंपियं ताय ! ।
बहुमुल्ल त्ति न गहिया, तो ताडिंतो उरं नंदो ।।१७।।
हा ! हा ! मुट्ठो त्ति पयंपिरो य, जंघाउ भंजउ कुसेण ।
एयाणमेस दोसो, जेण गओ हं परगिहे त्ति ।।१८।।

तो वज्झो आणत्तो, सो रन्ना अवहडं च सव्वस्सं । एमाऽऽई बहू दोसा, इच्छाविणिवित्तिरहियाणं ।।१९।।

इय खमग ! मणांग पि हु, परिग्गहे मा मणो धरिज्जासि । खणदिट्ठनट्ठरूवे, का वंछा तत्थ धीराण ।।२०।।

एवं परिग्गहविसयं, पंचमगं पावठाणगं वुत्तं । कोवसरूवाऽऽवेयण-परमेत्तो भन्नइ छट्ठं ।।२१।।

[श्रीसंवेगरंगशाला श्लोक ५८८८ तः ५९०९]

३४. अनर्थदण्डध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रे गङ्गदत्तस्यावसरः ।

इतश्च हास्तिनपुरे श्रेष्ठ्यभूत् कोऽपि तस्य च । ललिताख्योऽभवत् पुत्रो मातुरत्यंतवल्लभः ।।१।।

श्रेष्ठिन्यान्यदा जज्ञे गर्भः संतापदो भृशम् । तया च विविधद्रव्यैः पात्यमानोऽपि नापतत् ।।२।।

जातश्च पुत्रः श्रेष्ठिन्या दास्यै त्यक्तुं च सोऽर्पितः । दृष्टश्च श्रेष्ठिना पृष्टा किमेतदिति दास्यथ ।।३।।

असावनिष्टः श्रेष्ठिन्यात्याज्यतेति तयोदिते । श्रेष्ठी गृहीत्वा तं छन्नमन्यत्र समवर्धयत् ।।४।।

गंगदत्त इति नामादत्त तस्य शिशोः पिता । मातुश्छन्नं ललितोऽपि लालयामास तं सदा ।।५।।

पितरं ललितोऽन्येद्युरभ्यधत्त मधूत्सवे । भोज्यते गंगदत्तोऽद्य सह चेच्छोभनं तदा ।।६।।

श्रेष्ठयूचे यदि ते माता तं पश्येत्तन्न शोभनम् । ललितोऽप्यब्रवीत्तात यतिष्ये तददर्शने ।।७।।

श्रेष्ठिनापि तथादिष्टो ललितो गंगदत्तकम् । तिरस्करिण्यांतरितं भोजनार्थं न्यषेदयत् ।।८।।

पुरस्तात् स्वयमासीनौ तौ श्रेष्ठिललितौ तदा । भुंजानौ गंगदत्ताय भोज्यं छन्नं च यच्छतः ।।९।।

वातोद्धूतेऽकांडपटे श्रेष्ठिनी तं ददर्श च । केशैः कृष्ट्वा कुट्टयित्वा गृहश्रोतसि चाक्षिपत् ।।१०।।

उद्विग्नौ श्रेष्ठिललितौ श्रेष्ठिन्याश्छन्नमेव तम् । स्नपयित्वाबोधयतां गंगदत्तं महामती ।।११।।

तदा च साधवस्तत्र भिक्षार्थं समुपागताः । पृष्टाश्च ताभ्यां श्रेष्ठिन्यास्तत्पुत्रद्वेषकारणम् ।।१२।।

अथैकः साधुरित्याख्यदेकस्मिन् संनिवेशने । अभूतां भ्रातरौ तौ तु बहिः काष्ठार्थमीयतुः ।।१३।।

काष्ठैर्भृत्वा तथा गंत्रीमग्रस्थो ज्येष्ठ आपतत् । ददर्श पथि वेलतीं चक्कलुण्डा महोरगीम् ।।१४।।

सोऽप्यवोचत् कनीयांसं गंत्र्याः सारथिमग्रतः । गंत्रीतो रक्षणीयेयं चक्कलुंडा वराकिका ।।१५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तच्छ्रुत्वा सर्पिणी सापि हृष्टा विश्वासभागभूत् । तत्रायातः कनिष्ठस्तां दृष्ट्वा चैवमवोचत ।।१६।।
ज्येष्ठेन रक्षितास्तीयं तथाप्यस्या उपर्यहम् । नेष्ये गंत्रीं श्रोतुमेतदस्थिभंगस्वरं मुदा ।।१७।।
तथा चक्रे स च क्रूरस्तच्छ्रुत्वा सापि पन्नगी । कोऽप्येष मम वैरीति चिन्तयन्ती व्यपद्यत ।।१८।।
सा जज्ञे तव भार्येयं ज्येष्ठो भ्राता विपद्य सः । अस्याः सूनुर्ललितोऽभूत् प्रियः प्राग्जन्मकर्मणा ।।१९।।
सोऽयं मृत्वा कनिष्ठोऽस्या अनिष्ठः पूर्वकर्मणा । गंगदत्तः समुत्पेदे प्राक्तनं कर्म नान्यथा ।।२०।।
ततो विरक्ता जगृहुः पिता पुत्रौ च ते व्रतम् । जग्मतुः श्रेष्ठिललितौ महाशुक्रमुभौ दिवम् ।।२१।।
तत्तु मातुरनिष्टत्वं गंगदत्तः पुनः स्मरन् । विश्ववाल्लभ्यनिदानी महाशुक्रदिवं ययौ ।।२२।।

३५. आभोगध्याने श्रीउपदेशप्रासादे ब्रह्मदत्तसम्बन्धः ।

कांपील्यपुरेशस्य ब्रह्मराज्ञश्चत्वारि मित्राणि सन्ति-काशीदेशपः कटकः, गजपुरेशः करेणुः (णेरुः), कोशलेशो दीर्घः, चंपाधीशः पुष्पचूलश्च । एते नृपाः स्नेहेनैकैकं वर्षं मिथो राज्येषु समुदितास्तिष्ठन्ति । अन्यदा ते सर्वे ब्रह्मपार्श्वे समागताः । तावता शिरोरोगे समुत्पन्ने ब्रह्मराजा तच्चतुर्णामुत्संगे सुतं मुक्त्वा 'युष्माभिरेतद्राज्यसंप्रदायः कारयितव्यः' इत्युक्त्वा मृतः । तेऽपि दीर्घं मुक्त्वा स्वराज्ये गताः । ततो दीर्घश्चुलण्यासक्तो जातः । तद्भावं धनुर्मंत्री ज्ञात्वा स्वपुत्रस्य वरधनुर्नाम्नो ज्ञापितवान्-यथैतत्स्वरूपमेकान्ते चूलनेयस्य ब्रह्मदत्तस्य ज्ञाप्यम् । तेन ज्ञापितोऽसौ कोकिलाकाकयोः संबन्धं कारयन्नन्तरःपुरे गत्वा काकं हत्वोवाच-'योऽन्योऽप्येवं करिष्यति, तमहं निग्रहीष्यामि'। तद्वार्तां दीर्घश्चुलनीं प्रत्याह-'अहं काकस्त्वं कोकिला' इति । साह-'बालोऽयं किं वेत्ति आवयोः स्वरूपं'। पुनरेकदा महिषहस्तिनीयुगमानीय पूर्वोक्तवाक्यमुक्त्वा महिषो हतः । ततो दीर्घः-'मत्पापमनेन ज्ञातं, अन्योक्त्या मां शिक्षयति' इति विचार्य राज्ञीं प्रति ज्ञापितोऽयं विचारः। ततः सा प्राह-"अयं पुत्रो हन्यते, आवयोः कुशलत्वे बहवोऽपि पुत्रा भविष्यन्ति" । तेनापि स्वीकृतम् । ततः सामन्तसुतां परिणाय्य तच्छयनार्थं जतुगृहं कारयित्वा दत्तम् । वरधनुर्मंत्रिणा गुप्तवृत्त्या तद्गृहमध्यतः पुरोद्यानं यावत्सुरंगा दापिता । शुभदिने जतुगृहे प्रविष्टस्य सवधूवरधनुःकुमारस्य रात्रियामद्वये गते गृहं प्रज्वालितम् । तौ तु सुरंगाय निर्गत्य पूर्वद्वारे मुक्ताश्वयुगलमारुह्य निर्गतौ । पृथ्वीं भ्रमतो ब्रह्मदत्तस्य सार्वभौमसंपदमिलत् । वरधनुः सैन्यपति-पदेऽभिषिच्य दीर्घसमीपे प्रेषितः । तदनु ब्रह्मदत्त आगत्य निजचक्रेण दीर्घवपुः कबन्धीकृत्य स्वगेह आगतः । अनुक्रमेण षट्खंडभरतं साधितम् ।

पुरा तस्यैकाकिनोऽटव्यां भ्रमतो द्विजेनैकेन नीरं पायितमभूत् । स द्विजस्तं चक्रवर्तिपदप्राप्तं ज्ञात्वा 'बहुसैन्ये मां कथं ज्ञास्यति' इति ध्यात्वा जीर्णसूर्पटकपादरक्षणकादिना विसदृशं रूपं कृत्वा

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भ्रमति । तद्दृष्ट्वा राज्ञा स्वसेवकादानायितः । तमुपलक्ष्य तुष्टो राजा वरं ददौ । स्त्रीवचसा विप्रो भोजनं दीनारयुंग च ययाचे गृहे गृहे । तेन तथा कृतं । एकदा विप्रेणोक्तं-'त्वद्भोज्यं दापय' । चक्रिणोक्तं-'मद्भोजनं ममैव जरति' । विप्रेणोक्तं-'कृपणोऽसि, दातुं न शक्तोऽसि' । ततो राज्ञा सकुटुम्बः स भोजितः । मदनोन्मत्तो जातः । रात्रौ मात्रादिषु मिथः पशुवत्प्रवृत्तः । मदे समुत्तीर्णे लज्जितः । ततः सर्वमनेन कृतमिति रूषैकदा तेनाजापालकं पिप्पलकपत्राणि धनुर्गोलिकाप्रयोगेण सच्छिद्राणि कुर्वन्तं वीक्ष्य तस्मै किंचित्समर्घ्य चक्रवर्तिनयनापनयनं कारितम् । स निगृहीतो हन्तुमारब्धः । रे कथमित्थं समाचरितं त्वयेत्युक्ते तेन विप्रो दर्शितः । तदा सकुटुम्बः स मारितः । तदनु विप्रजातौ रुष्टेन चक्रिणादिष्टं-'प्रतिदिनं द्विजाक्षीणि निष्कास्यानय' । मंत्री तान्यानीय दर्शयति । चक्री करेण मर्दयित्वा मुञ्चति । ततो मंत्रिणा बहुजीववधं मत्वा वटगुंदकैर्निर्बीजैः सशीर्षं स्थालं भृत्वा नृपाग्रे मुक्तम् । राजा तु मदरातीनां चक्षूंषीमानीति क्रोधबुद्ध्या हन्ति । एवं षोडशवर्षान्ते रौद्रध्यानेन मृत्वा सप्तमावनौ गतः ।

वटगुंदकमर्दनरौद्रमतिर्द्विजचक्षुर्विघातं दधन् हृदये ।
अनुबन्धनहिंसनबुद्धिभराञ्जरमो नरदेव इतो नरके ।।१।।

३६. अनाभोगध्याने श्रीसंवेगरंगशालायां प्रसन्नचन्द्रस्य कथानकम् ।

उग्गविसविसहराऽऽउल-घरं व पोयणपुराऽहिवो रज्जं ।
मोत्तुं वीरजिणंऽते, पसन्नचंदो विणिक्खंतो ।।१।।

विहरंतो जयगुरुणा, समं च रायग्गिंहम्मि संपत्तो ।
ओलंबियभुयपरिहो, उस्सग्गेण य ठिओ सम्मं ।।२।।

जिणवंदणऽट्ठपट्ठिय-सेणियनिवअग्गसेन्नगामीहिं ।
दिट्ठो-दुम्मुहसुमुहाऽ-भिहाणपुरिसेहिं दोहिं तओ ।।३।।

सुमुहेण जंपियं जयइ, एसो सहलं च जीवियमिमस्स ।
जो रज्जं तह वज्जिय, पव्वज्जं इय पवन्नो त्ति ।।४।।

तो दुम्मुहेण भणियं, भद्द ! अलं संकहाए एयस्स ।
जो असमत्थं पुत्तं, रज्जे ठविउं सयं कीबो ।।५।।

पासंडं पडिवन्नो, वेरिभया एवमेत्थ संवसइ ।
रज्जं सुओ पया वि य, तह पीडिज्जंति सत्तूहिं ।।६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं सोच्चा तक्खण-विस्सुमरियधम्मझाणपडिबंधो ।
साहू पसन्नचंदो, कुवियो चिंतेउमाऽऽढत्तो ।।७।।

को मइ जीवंतम्मि वि, मज्झ सुयं रज्जमऽवि य विद्दवइ ।
मन्ने सीमालमही-वईण दुव्विलसियं एयं ।।८।।

ता ते विद्धंसित्ता, करेमि सुत्थं ति पुव्वनाएण ।
उस्सग्गठियो वि रणेण, तेहिं सद्धिं समाऽऽवडिओ ।।९।।

धम्मज्झाणठियं पिब, अह तं दट्ठूण सेणिओ राया ।
अहह ! महप्पा कह वट्टइ त्ति, विम्हयरसाऽऽउलिओ ।।१०।।

भत्तिभरमुव्वहन्तो, सव्वाऽऽयरविहियतप्पयपणामो ।
चिंतइ एरिससुहझाण-संगओ जइ जियं चयइ ।।११।।

एसो महाऽणुभावो, उप्पज्जइ ता कहिं ति जिणनाहं ।
पुच्छिस्सं ति विभाविय, जयगुरुपासं समल्लीणो ।।१२।।

पुट्ठो य जएक्कपहू, पसन्नचंदो तहाविहे भावे ।
वट्टंतो मरिऊणं, उप्पज्जइ कत्थ मे कहसु ।।१३।।

भणियं पहुणा सत्तम !, नरए उप्पज्जइ त्ति तो राया ।
नूणं मए न सम्मं, सुयं ति चिंताऽऽउरो जाओ ।।१४।।

एत्थंतरम्मि मणसा, जुज्झंतेणं पसन्नचंदेणं ।
निट्ठियपहरणनिवहेण, सीसताणेण वि रिउस्स ।।१५।।

घायं काउमणेणं, सीसे हत्थो निवेसिओ सहसा ।
लुंचियचिहुरचयम्मि य, तम्मि छिक्कम्मि उवउत्तो ।।१६।।

समणो हं ति विसायं, कुणमाणो किं पि तं सुहं झाणं ।
पडिवन्नो स महप्पा, जेण लहुं केवली जाओ ।।१७।।

केवलिमहिमा य कया, संनिहियसुरेहिं दुंदुही पहया ।
पुट्ठं च सेणिएणं, किं तूरखो इमो भयवं ! ।।१८।।

भणियं जएक्कपहुणा, केवलिमहिमं पसन्नचंदस्स ।
देवा कुणंति एए, विम्हइओ सेणिओ ताहे ।।१९।।

[श्रीसंवेगरंगसाला श्लोक ५९२४ तः ५९४२]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

३७. ऋणाविलध्याने श्रीपिण्डनिर्युक्तिवृत्तौ तैलकर्षलस्थाःकथानकम् ।

कोशलाविषये कोऽपि ग्रामस्तत्र देवराजो नाम कुटुम्बी, सारिकाभिधा तस्य भार्या, तस्याश्च सम्मतप्रमुखा बहवः सुताः, सम्मतिप्रभृतयश्च प्रभूता दारिकाः, तच्च सकलमपि कुटुम्बं परमश्रावकं, तथा तस्मिन्नेव ग्रामे शिवदेवो नाम श्रेष्ठी, तस्य भार्या शिवा ।

अन्यदा च समुद्रघोषाभिधाः सूरयः समागच्छन्, तेषां समीपे जिनप्रणीतं धर्ममाकर्ण्य जातसंवेगः सम्मतो दीक्षां गृहीतवान्, कालक्रमेण च गुरुचरणप्रसादतोऽतीव गीतार्थः समजनि । स चान्यदा चिन्तयामास-यदि मदीयः कोऽपि प्रव्रज्यां गृह्णाति ततः शोभनं भवति, इदमेव हि, तात्त्विकमुपकारकरणं यत्संसारार्णवादुत्तारणमिति, तत एवं चिन्तयित्वा गुरूनापृच्छ्य निजबन्धुग्रामे समागमत् तत्र च बहिः प्रदेशे कमपि परिणतवयसं पृष्टवान् पुरुषं-यथाऽत्र देवराजाभिधस्य कुटुम्बिनः सत्कः कोऽपि विद्यते ? इति, स प्राह-मृतं सर्वमपि तस्य कुटुम्बं केवलमेका सम्मत्यभिधा विधवा पुत्रिका जीवतीति, ततः स तस्या गृहे जगाम, सा च भ्रातरमायान्तं दृष्ट्वा मनसि बहुमानमुद्वहन्ती वन्दित्वा कञ्चिकत्कालं पर्युपास्य च तन्निमित्तमाहारं पक्तुमुपतस्थे, साधुश्च तां निवारितवान्-यथा न कल्पतेऽस्माकमस्मन्निमित्तं किमपि कृतमिति, ततो भिक्षावेलायां सा दुर्गतत्वेनान्यत्र क्वचिदपि तैलमात्रमप्यलभमाना कथमपि शिवदेवाभिधस्य वणिजो विपणेस्तैल-पलिकाद्वयं दिने दिने द्विगुणवृद्धिरूपेण कालान्तरेण समानीय भ्रात्रे दत्तवती, भात्रा च तं वृत्तान्तमजानता शुद्धमिति ज्ञात्वा प्रतिजगृहे, सा च तद्दिनं भ्रातुः सकाशे धर्मं श्रुतवती, तेन न पानीयानयनादिना तत्तैलपलिकाद्वयं प्रवेशयितुं प्रपारितवती, द्वितीये च दिने भ्राता (यथा) विहारक्रमं गतः, ततस्तस्मिन्नपि दिने तद्वियोगशोकाकीर्णमानसतया न तत्तैलपलिकाद्वयं द्विगुणीभूतं प्रवेशयितुं शक्तवती, तृतीये च दिने कर्षद्वयमृणे जातं तच्चातिप्रभूतत्वान्न प्रवेशयितुं शक्तम्, अपिच भोजनमपि पानीयानयनादिना कर्त्तव्यं, ततो भोजनायैव यत्नविधौ सकलमपि दिनं जगामेति न ऋणं प्रवेशयितुं शक्नोति, ततो दिने दिने द्विगुणवृद्ध्या प्रवर्द्धमानमृणमपरिमितघटप्रमाणं जातं, ततः श्रेष्ठिना सा बभणे-यथा मम तैलं देहि यद्वा मे दासी भव, ततः सा तैलं दातुमशक्नुवती दासत्वं प्रतिपेदे, कियत्सु च वर्षेष्वतिक्रान्तेषु भूयोऽपि सम्मताभिधः साधुस्तस्मिन्नेव ग्रामे यथाविहारक्रममागमत्, सा च भगिनी स्वगृहे न दृष्टा, तत आगता सती पप्रच्छे, तया च प्राचीनः सर्वोऽपि व्यतिकरस्तस्मै न्यवेदि यावद्दासत्वं शिवदेवगृहे जातमिति, निवेद्य च स्वदुःखं रोदितुं प्रवृत्ता, ततः साधुरवोचत्-मा रोदीरचिरादहं त्वां मोचयिष्यामि, ततस्तस्या मोचनोपायं चिन्तयन् प्रथमतः शिवदेवस्यैव गृहे प्रविवेश, शिवा च तस्य भिक्षादानार्थं जलेन हस्तौ प्रक्षालयितुं लग्ना, तां च साधुर्निवारयामास,

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

यथैवमस्माकं न कल्पते भिक्षेति, ततः समीपदेशवर्त्ती श्रेष्ठी प्रोवाच-कोऽत्र दोषः ?, ततः साधुः कार्यविराधनादीन् दोषान् यथागमं सविस्तरमचीकथत् ततः स आदृतो भणति यथा भगवन् ! कुत्र युष्माकं वसतिर्येन तत्रागता वयं धर्मं शृणुमः ततः साधुरवादीत्-नास्ति मेऽद्यापि प्रतिश्रयः, ततस्तेन निजगृहैकदेशे वसतिरदायि, प्रतिदिनं च धर्मं शृणोति, सम्यक्त्वमणुव्रतानि च प्रतिपन्नानि, साधुश्च कदाचनापि वासुदेवादिपूर्वपुरुषाचीर्णाननेकानभिग्रहन् व्यावर्णयामास, यथा वासुदेवेनायमभिग्रहो जगृहे-यदि मदीयः पुत्रोऽपि प्रव्रज्यां जिघृक्षति ततोऽहं न निवारयामीत्यादि, एवं च श्रुत्वा शिवदेवोऽप्यभिग्रहं गृहीतवान्-यदि भगवन् ! मदीयोऽपि कोऽपि प्रव्रज्यां प्रतिपद्यते ततोऽहं न निवारयामीति, अत्रान्तरे च शिवदेवस्य तनयो ज्येष्ठः सा च साधुभगिनी सम्मतिः प्रवज्यां ग्रहीतुमुपतस्थे, श्रेष्ठिना च तौ द्वावपि विसर्जितौ, ततः प्रव्रज्यां प्रतिपन्नाविति ।

३८. वैरध्याने श्रीउपदेशमालाहेयोपादेयायां परशुरामसुभुमयोः वृत्तान्तः ।

गजपुरेऽनन्तवीर्यराजभार्याया भगिनी रेणुकाभिधाना परिणीता जमदग्नितापसेन । सा अन्यदाऽऽयाता गजपुरे भगिनीसमीपे राज्ञा च समुत्पादितस्तस्यास्तनयः, नीता ऋषिणा । तस्याश्च विद्याधरदत्तपरशुविद्यो रामः ज्येष्टतनय आसीत् । तेन कुलकलङ्कभूतेयमिति जातक्रोधेन व्यापादिता सा ससुता । तत् श्रुत्वा अनन्तवीर्येणागत्य ऋषेराश्रमो विनाशितः, रामेणापि तच्छिरश्छिन्नं परशुना, जातोऽनन्तवीर्यसुतः कार्त्तवीर्यो राजा तेनाकर्ण्य वृत्तान्तं जातमत्सरेणागत्य हतो यमदग्निः, रामेणाप्यसाविति । तद्भार्या सुताराऽऽपन्नगर्भा भयात्प्रपलायमाना गता तापसाश्रमम् । तत्र च विह्वलत्वात्पतितो निष्पन्नदारको भूमिं गृह्णन्नास्येन । कृतं तद्द्वारेण तस्य नाम सुभूम इति । रामेणापि गत्वाधिष्ठितं तद्राज्यं, क्रोधवशात् कृता सप्तकृत्वो निःक्षत्रिया वसुधा, भृतं प्रधानक्षत्रियदंष्ट्राणां स्थालम् । अन्यदा पृष्टस्तेन नैमित्तिकः कुतो मे मरणमिति । स प्राह-यत्सन्निधानादेताः स्थालस्थिता दंष्ट्राः पायसीभविष्यन्ति तत इति । ततस्तदुपलम्भार्थं कारितं तेन सिंहासनतस्याग्रतो निवेश्य स्थालमवारितसत्रम् । इतश्च नैमित्तिकसूचितसुतावरत्वान्मेघनादविद्याधरेण सेव्यमानो गतो वृद्धिं सुभूमः । स मातरमपृच्छत् किमियानेव लोक इति ? तत् श्रुत्वा वचो रुदितं तया, सोऽवोचद्-अम्ब किमेतत् ? तया कथितो वृत्तान्तः । ततोऽसावभिमानेन गतो गजपुरं, प्रविष्टः सत्रमण्डपम्, अधिष्ठितं सिंहासनं, पायसीभूता दंष्ट्रा भक्षयितुमारब्धाः, श्रुतं तद्रामेण, समागतस्तत्र स सबलः, ततः सुभूमपुण्यानुभावाद्यः प्राक् क्षत्रियसन्निधानेन जज्वाल स विध्यातः परशुः, प्रहरद्बलं भग्नं मेघनादेन, परशुरामं प्रत्युपस्थितो भुक्त्वा गृहीतस्थालः सुभूमः, कृतं तदेवतया तच्चक्रम् ततस्तेन तं निपात्य राज्यमधिष्ठायैकविंशतिवारान्निर्ब्राह्मणीकृत्य पृथिवीं गतः सप्तमपृथिवीमिति ।।१५०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

३८. वैरध्याने श्रीउपदेशप्रासादे कृषीवलदृष्टान्तः ।

एकदा जंगमः कल्पतरुरिव मार्गे विहारं कुर्वन्महावीरजिनो गौतमं प्रत्युवाच-"हे वत्स ! योऽयं कृषीवलः पुरस्तात प्रेक्ष्यते, तस्य प्रतिबोधाय त्वं सत्वरं तत्र गच्छ, त्वत्तो महानस्य लाभो भावी" । तथेति प्रतिपद्य गौतमस्तत्रागत्येत्यलपत्-"हे भद्र ! तव समाधिर्वर्तते ? त्वं कस्मादनेकद्वीन्द्रियादि-जीवानां (विराधनामयेन) कृषिकर्मणा मुधा पापानि करोषि ? कथं पापकुटुम्बार्थमात्माऽनर्थे निपात्यते ? । यतः-

संसारमावन्न परस्स अट्ठा, साहारणं जं च करेइ कम्मं ।
कम्मस्स ते तस्स उ वेयकाले, न बंधवाबंधवयं उविंति ।।१।।

तस्मात्तपस्यापोतमादाय भवोदधेः समुत्तर इति सद्वाक्यपीयूषैः सिक्तस्तं जगौ-"स्वामिन् ! अहं विप्रः सप्तकन्यकादीनां दुष्पूरोदरपूर्त्त्यर्थमनेकपापकर्माणि करोमि । अतः परं त्वमेव मम भ्राता माता चासि । यदादिशसि तत्कुर्वे, नान्यथा पूज्यवचः करिष्ये" । ततः सोऽपि तदर्पितं साधुवेषं स्वीचक्रे । गृहीतव्रतं तं सहादाय गौतमो जिनाभिमुखं चचाल । तदा सोऽवदत्-'पूज्य ! कुत्र गम्यते ? गौतमोऽवक्-'यत्र मे गुरवः सन्ति तत्र' । सोऽवादीत्-'सुरासुरपूज्यानां भवतामपि पूज्यास्ते तु कीदृशा भविष्यन्ति ?' । तदा तस्याग्रेऽर्हद्गुणाः प्रोक्ताः । तच्छ्रुत्वा तेन सम्यक्त्वमर्जितं, पुनर्जिनसमृद्ध्यवलोकनाद्विशेषेण प्राप्तम् । ततो क्रमेण सपरिच्छदं श्रीवीरं यावदद्राक्षीत्तावत्तस्य मनसि द्वेषः समभूत् । गौतमः प्राह-'भो मुने ! श्रीवीरं वन्दस्व' । सोऽपि गणधरं प्रत्याह-"भवदीयोऽयं गुरुश्चेत्तदा मम प्रव्रज्यायाः प्रयोजनं नास्ति, तव शिष्यत्वभवनेनालं, इमं वेषं गृहाण, अहं स्वमन्दिरे यास्यामि" । इत्युक्त्वा यदा त्यक्तवेषोऽसौ मुष्टिं बद्ध्वा प्रणष्टवान्, तदा तादृक् तस्य चेष्टितं वीक्ष्य सर्वेऽपीन्द्राद्या हसन्तः प्राहुः-'अहो ! इन्द्रभूतिना वरीयान् शिष्य उपार्जितः । एतदद्भुतं वीक्ष्य मनाग् लज्जितमना गौतमो वीरं तद्वैरकारणं पप्रच्छ । स्वामी तं प्रत्याह-"हे वत्स ! अनेनार्हद्गुणचिन्तनैर्ग्रन्थिभेदः कृतः । तेन तस्य तव च महान् लाभोऽभूत् । यन्मां वीक्ष्यास्य द्वेषो जातस्तत्स्वरूपं शृणु-

पुरा पोतनपुरे प्रजापतिनृपाङ्गजस्त्रिपृष्ठाख्यो वासुदेवोऽहमभवम्, तदा त्रिखण्डाधिपः प्रत्यर्धचक्री अश्वग्रीवाह्वोऽभूत् । अन्यदा स्वसंसदि तेन स्वनिमीलनं निमित्तज्ञं प्रति पृष्टम् । सोऽपि त्रिपृष्ठहस्तात् त्वन्मृत्युर्भावीत्यब्रवीत् । ततोऽन्वहं स त्रिपृष्ठस्योपरि द्वेषं वहन् मारणोपायांश्चक्रे । ते तु विफला जज्ञिरे । अन्यदा तत्पुरो वने शालिक्षेत्रमनुष्येषूपद्रवं कुर्वन्तं सिंहं हन्तुं न केनापि समर्थ्यते, तदा तदुपद्रवनिवारणायार्धचक्रिनृपाज्ञया स्वस्ववारके नृपाः स्थितिं कुर्वन्ति । अन्येद्युः

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रजापतिनृपस्य वारकोऽभवत् । तदा पितरं निषिध्य तत्र त्रिपृष्ठस्तदुपद्रवं रक्षितुं सारथियुतो रथमारुह्य ययौ । तेनालापितमात्रोऽसौ सिंहस्तं प्रत्यधावत् । तदा त्रिपृष्ठः शुक्तिसंपुटवत्तस्यौष्ठयामलं द्विधा कृत्वा सिंहमर्धमृतं चक्रे । ततः सिंहः स्वं निनिन्द-'हहा ! नृमात्रेणाहं हतः' । तदा मधुरवाचा सारथिस्तमसान्त्वयत्-"हे सिंह ! वासुदेवोऽयं भविता । रंकमात्रमिमं मा जानीहि । पुरुषेन्द्रस्य हस्तेन मृतश्चेत् किं विषीदसि ? । मर्त्यलोकेऽयमेव सिंहोऽस्ति, भवान् पुनस्तिर्यग्योनौ" । इति वाक्येन हृष्टः सिंहः समाधिना निमीलनं प्राप्तः । ततस्ते त्रयोऽपि भवाम्भोधौ भ्रामं भ्रामं क्रमादत्राभवन् । यस्त्रिपृष्ठजीवः सोऽहं जातः, सिंहजीवस्तु कृषीवलो जातः, सारथेर्जीवस्तु भवानिन्द्रभूतिर्जातः । पुरा मधुरया वाचा त्वयासौ प्रीणितो मया च हतः । तदत्र भवनाटके स्नेहवैरयोः कारणं ज्ञेयम् । परं त्वयं शुक्लपाक्षिको जातः ।

३८. वैरध्याने श्रीउपदेशप्रासादे सुदर्शनप्रबन्धः ।

चम्पायामृषभदासः श्रेष्ठी । तस्यार्हद्दासी स्त्री सुशीलाभवत् । अन्येद्युर्माघमासे सुभगाख्यस्तन्महिषीपालः श्रेष्ठीमहिषीश्चारयित्वा गृहमागच्छन् सायमपावृतं प्रतिमास्थं शीतार्तं मुनिं पथि दृष्ट्वा तस्य श्लाघां विधाय गृहमागत्य निशामतिवाह्य सवेलमुत्थाय महिषीः पुरस्कृत्य गच्छन् तथास्थं मुनिं वीक्ष्य तत्पार्श्वे निषण्णः । इत उदिते रवौ स चारणमुनिः 'नमो अरिहंताणं' इत्युक्त्वा दिवमुत्पतितः । ततस्तेन तत्पदं व्योमगामिविद्यामंत्रमिव मत्वा चित्ते न्यस्तं । तदेव सोऽर्हत्सन्निधौ अन्येद्युः पठति स्म । तद्ध्यानपरं तं दृष्ट्वा श्रेष्ठी पप्रच्छ-'कुत इदं त्वया प्राप्तं ?' तेनोक्तं-'मुनेः' इत्युक्ते सर्ववृत्तान्ते च तुष्टः श्रेष्ठी तं संपूर्णं नमस्कारमपाठयत् ।

इतस्तद्गुणनं कुर्वतस्तस्य क्रमाद्वर्षाकालः समेतः । ततो मेघेनैकार्णवे महीमंडले कृते स महिषीर्लात्वा वनं गतः । अन्तराले नदीपूरमागता । अथ तेन व्योमविद्याबुद्ध्या तदेव स्मरता नद्यां झंपा दत्ता । अन्तराले स कीलकविद्धो मृत्वा तस्यैव श्रेष्ठिनः सुदर्शनाख्यः सुतो जातः । क्रमात् पितृभ्यां मनोरमामिभ्यसुतां विवाहितः । इतस्तस्य कपिलेन नृपपुरोधसा समं निविडा प्रीतिरभूत् । अन्यदा पत्युक्तद्गुणश्रवणानुरक्ता तत्पत्नी कपिला कामातुरा सुदर्शनसौधे समेत्य 'तवाद्य सुहृदो वपुरपाटवमस्त्यतस्त्वया सुखपृच्छार्थं शीघ्रं मद्गृहे समेतव्यं' इत्युक्त्वा तं गुप्तगृहान्तर्नीत्वा द्वारं दत्त्वा त्रपां त्यक्त्वा रतार्थं प्रार्थयामास । ततः परस्त्रीरतौ षंढः स श्रेष्ठी शीलरक्षार्थं 'षंढोऽहमस्मि मुग्धे, किं वृथा मां प्रार्थयसि ?' इत्युक्त्वा निर्गत्य गृहमागतः ।

अन्यदा नृपः सपुरोधःसुदर्शनः क्रीडितुमुद्यानं गतः । यानारूढाभया राज्ञ्यपि कपिलया समं वनमगात् । इतः कपिला सुदर्शनप्रियां सुतषट्कयुतां पथि दृष्ट्वा 'केयं स्त्री ?' इत्यभयामपृच्छत् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तयोक्तं-'इयं श्रेष्ठिस्त्री, एते तत्सुताः' । ततः कपिलया तद्वृत्तान्तो मूलतः प्रोक्तः । अथ सा देव्या प्रोचे-त्वं मुग्धाऽनेन दंभेन वञ्चिता' । ततस्तयोक्तं-'देवि ! तवापि वैदग्ध्यं तदा वेद्मि, चेदनेन समं रमसे' । इति तद्वचः श्रुत्वा देव्याङ्गीकृतम् ।

एकदा राजादौ वने रंतुं गते शून्यगृहे कायोत्सर्गस्थं कामयक्षमूर्तिदंभेन यानारूढं कारयित्वा पंडिताख्यया स्वधात्र्यानाय्य स्वभुवनान्तः प्रच्छन्नं क्षिप्त्वा सा कामविभ्रमादिदर्शनपूर्वमत्यर्थं प्रार्थितवती । तथापि तन्मनो न मनागपि चलितम् । ततस्तया स्तनोपपीडं तस्य सर्वांगीणमालिंगनं दत्तम् । तथापि न क्षुब्धं चेतः । ततः कुपितया तया पूच्चक्रे । तच्छ्रुत्वारक्षकैः स धृत्वा राज्ञोऽग्रे नीतः । पृष्टेनापि तेन तस्यां कृपया मौनमाश्रितम् । ततो दोषं संभाव्य रुष्टेन राज्ञा 'एष विडम्ब्य पुरे भ्रामयित्वा मार्यतां' इति रक्षका आदिष्टाः । तैस्तथा कृत्वा नीयमानस्तत्प्रियया दृष्टः । तदा सा जिनाग्रे कायोत्सर्गं चकार कलंकोत्तरणं यावत् । इतस्ते तं शूलिकायां न्यधुः । सा च स्वर्ण-सिंहासनमभूत् । अथ तैस्तद्वधार्थं खड्गप्रहारा मुक्तास्ते च कंठे हारत्वं, मौलौ मौलितां, कर्णयोः कुंडलत्वं, करचरणे च कटकत्वं भेजिरे । आरक्षकैस्तद्वित्रं राज्ञे ज्ञापितम् । ततो राज्ञा तत्रागत्य श्रेष्ठी सत्कृत्य स्वहस्तिनमारोप्य समहोत्सवं स्वगृहे नीतः । तज्ज्ञातं ज्ञात्वा तया कायोत्सर्गो मुक्तः । अथ राजा तन्मुखाद्राज्ञीवृत्तं ज्ञात्वा श्रेष्ठिवचनादभयाया अभयं दत्त्वा श्रेष्ठिनं हस्तिस्कन्ध-मारोप्य स्वगृहे प्रैषीत् । तद्वृत्तं विज्ञायाभया स्वमुद्बध्य मृता । पंडिता पाटलीपुरे वेश्यान्तिकेऽगमत् ।

अथ सुदर्शनो भवविरक्तो गृहीतव्रतो विचरन् पाटलीपुरे गतः । तत्र पंडितया प्रतिलाभमिषेण स्वगृहे नीत्वा द्वारं पिधाय कदर्थितोऽपि नाचलत् । ततः सायं विमुक्तो निर्गत्य वने गत्वा स्मशानान्तः प्रतिमया स्थितः । तत्रापि व्यन्तरीभूतया तयाभयाराज्ञ्या प्राग्वैरादनेके उपसर्गाः कृताः । तथापि तन्मनो न चलितम् । स मुनिः शुभध्यानात् केवलज्ञानमासाद्य देशनां ददौ । तदाऽभयापि सम्यक्त्वं प्राप । पंडितापि प्रतिबोधिता । एवं केवलपर्यायं चिरं प्रपाल्य शिवं गतः ।

३९. वितर्कध्याने श्रीउपदेशप्रासादे चाणक्यस्य ज्ञातम् ।

गोल्लदेशे जैनश्चणकनामा विप्रोऽभूत् । तस्य भार्या चणेश्वरी । तयोः सुतश्चाणाक्यः गर्भाद्दशनैः सह जातः । अन्यदा तद्गृहे ज्ञानी मुनिराहारार्थमागात् । दम्पती मुनिं नत्वा पप्रच्छतुः-"हे भगवन् ! असौ सदन्तो जातोऽस्ति तस्य को हेतुः ?" । मुनिः स्माह-"बालोऽयं नृपो भविता" । तच्छ्रुत्वा चणको विषणो दध्यौ-"मत्सुतो राज्यारम्भैरधोगतिं मा यासीत्" इति ध्वात्वा दन्तान् घृष्ट्वा साधुभ्यः सोऽवक्। साधुः स्माह-"तर्हि सचिवेशो भावी ।" ततश्चाणाक्यः क्रमेण सकलकलासमुद्रोऽभूत् । यौवने विप्रकन्यां पर्यणैषीत् । निर्धनोऽपि हि संतोषतो द्रव्यार्थं महाप्रयत्नं नाकरोत् । अन्यदा तत्प्रिया

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भ्रातुर्विवाहे पितृगृहेऽगात्, परं निर्धनत्वेन भ्रातृजायादयोऽस्याः प्रतिपत्तिं न चक्रिरे, भोजनादावपि पङ्क्तभेदं व्यधुः, ततोऽतिदौःस्थ्याल्लज्जिता पत्युर्गृहेऽगात् । ततः शोकभरां तां वीक्ष्य भर्त्रा सनिर्बन्धं पृष्टा मुक्ताव्यूहोपममश्रुव्रजं मुञ्चन्ती स्माह तं पराभवम् । तच्छ्रुत्वा चाणक्यो दध्यौ-

कलावान् कुलवान् दाता, यशस्वी रूपवानपि । विना श्रियं भवेन्मर्त्यो, निस्तेजाः क्षीणचन्द्रवत् ।।१।।

नन्दभूपो विप्राणां धनं बहुलं ददाति इति विमृश्य स पाटलिपुरं द्राग् जगाम । तत्र राजसभायां गत्वा नृपासनमशिश्रियत् । अथ नन्दनृप एकेन सिद्धपुत्रेण निमित्तज्ञेन संयुत उपागमत् । तत्रस्थं चाणाक्यं वीक्ष्य सिद्धपुत्रोऽब्रवीत्-"असौ विप्रो नन्दवंशस्य च्छायामाक्रम्य तिष्ठति" । ततश्चाणाक्यमुर्वीशदास्युवाच-"भगवन् ! इदं द्वितीयं सिंहविष्टरमध्यास्स्व" । सोऽवक्-"अस्मिन्नासने मत्कमण्डलुः स्थास्यति" । इत्युत्वा तत्र तं न्यस्याद्यमासनं न त्यक्तवान् । ततस्तृतीयं दण्डेन चतुर्थं चाक्षमालया पञ्चमं ब्रह्मसूत्रेण सोऽरुणत् ! ततो दासी जगौ-"अहो अस्य धाष्ट्यं जडत्वं च" । स रुष्टोऽंह्रिणा तामाहत्य सर्वसमक्षमित्युवाच-

कोशैश्च भृत्यैश्च निबद्धमूलं, पुत्रैश्च मित्रैश्च विवृद्धशाखम् ।
उत्पाट्य नन्दं परिवर्तयामि, महाद्रुमं वायुरिवोग्रवेगः ।।१।।

अनेन भिक्षुणा किं स्यादिति राज्ञाऽप्युपेक्षितः स निरगात्, भ्रमंश्च नन्दभूपतेर्मयूरपोषकग्रामेऽगात् । तत्र परिव्राजकवेषेणाभ्रमत् । तत्र ग्रामणीपुत्र्याश्चन्द्रपानदोहदोऽजनि, तं पूरयितुं कोऽपि नाशकत् । ततः पित्रादिभिश्चाणाक्यः प्रोक्तः, सोऽवक्-"तत्सुतं मम दत्त चेत्तदाहं पूरयामि" । "अपूर्णदोहदागर्भान्विता मा म्रियताम्" इति विमृश्य तैस्तस्य वचनं स्वीकृतम् । अथ स सच्छिद्रं पटमण्डपमचीकरत्, तस्योपरि प्रच्छन्नं शनैः शनैश्छिद्रपिधायकं नरममुञ्चत्, तस्य च्छिद्रस्याधस्तात् स्थालं पयोभृतं न्यधात्, निशीथे कार्तिकीचन्द्रस्तत्र प्रतिबिम्बितः, चान्द्रं प्रतिबिम्बमन्तर्वन्त्याः प्रदर्श्य स पिबेत्यूचे, ततस्तुष्टा सा तत्पातुं प्रचक्रमे, चन्द्रपानधिया स्थालपयः सा यथा यथाऽपात् तथा तथोपरिस्थो नरो मण्मपच्छिद्रं पिदधे । ततो दोहदे पूर्णे सा समये सुतं सुषुवे । चाणाक्यस्तु द्रव्यार्जनं प्रारेभे । तस्य पुत्रस्य चन्द्रगुप्त इति नाम कृतम् । ततः प्राप्तप्रौढवयाः स बालः शिशुभिः सह भूपलीलया क्रीडति, देशपुरगोकुलहयगजामात्यादीन् स्थापयति । तत्र भ्रमन् चाणक्य एत्य प्राह-"हे बाल! ममापि किञ्चिद्देहि" । चन्द्रोऽवदत्-"इमाः सुरभीर्गृहाण" । स स्माह-"एता गृह्णन् बिभेमि" । चन्द्रोऽवक्-"मा भैषीः, वीरभोग्या भूरियं" । ततो हृष्टः स तस्य कुलादिकमन्येभ्यो ज्ञात्वा स्वकीयं बालं निर्धार्येत्यूचे-"हे वत्स ! एहि राज्यं ददामि" । तच्छ्रुत्वा द्रुतमायातं तं हत्वा द्राक् पलायिष्ट। ततः सेनां कृत्वा पाटलिपुरं रुद्धम् । नन्देन तत्सैन्यं क्षणेन जितम् । चन्द्रगुप्तश्चाणाक्येन समं

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पलायत । ततो नन्दाश्चवारास्तत्पृष्ठ आजग्मुः, तेषां मध्य एकोऽश्चवारो दूरात्ताभ्यां दृष्टः । नतश्चाणाक्यश्चन्द्रं सरसि संगोप्य स्वयं रजककर्म प्रारेभे । इतश्च सोऽश्चवारस्तं पप्रच्छ-"चन्द्रगुप्तो व्रजन्नत्र त्वया दृष्टः ?" । सोऽप्यूचे-"अत्र सरसि प्रविष्टोऽस्ति" । ततः स कौपीनमात्रभृज्जले विवेश । तदा चाणाक्यस्तस्यैव खड्गेन तच्छिरोऽच्छिनत् । ततश्चन्द्रं तस्मिन्नश्चे आरोप्य स पुरतोऽचालीत् । स चन्द्रं पप्रच्छ-"हे वत्स ! यदा मया सादी सरसि प्रेषितस्तदा त्वया किं ध्यातम् ?" । "हे पूज्य ! उत्तमाः कुर्वन्ति तच्छ्रेष्ठमेवे"ति विनयवाक्यात्स हृष्टः । ततश्चन्द्रं क्षुधा बाधितं ज्ञात्वा स्वयं भोजनग्रहणार्थं व्रजन् पथि अनन्तरभुक्तकरम्बकं विप्रमेकं वीक्ष्य चाणाक्यस्तस्योदरं विदार्य तद्भोज्यं हृत्वा चन्द्रमभोजयत् । सोऽपि क्षुधितस्तद्रसविपर्ययं नाज्ञासीत् । अथ मौर्ययुक्तः । स दिनात्यये एकत्र ग्रामे भिक्षायै भ्रमन् रोरगृहे ययौ । तदा वृद्धयैकया स्वछालानां भूयसामुष्णा रब्बा परिवेषिता । एकः शिशुः क्षुधितो रब्बायां करं प्राक्षिपत्, तेन दग्धाङ्गुलिरुच्चैरुरोद, तं वृद्धाऽभाषत-"रे मूढ ! चाणाक्यवत्त्वमपि जडोऽसि" । तच्छ्रुत्वा भिक्षुणा पृष्टम्-"हे मातः ! त्वया चाणाक्यनिदर्शनमत्र कथं चक्रे" । सा तं स्माह-"यथा पूर्वं चाणाक्यो बाह्यं देशमसाधयन् पाटलिपुरं रुन्धानो मूढो विगोपनां प्राप तथैव बालकोऽपि शनैः परितोऽलिहन् मध्य एव पाणिं क्षिपन्नत्युपहासमासदत्" । तद्वाक्यं श्रुत्वा शिक्षां सत्यां निर्धार्य चाणाक्यो भ्रमन् क्रमात् पर्वताभिधेन राज्ञा समं गाढमैत्रीं विदधे । अन्येद्युस्तं नृपं स स्माह-"चेत्समीहसे तदा नन्दमुन्मूल्य तद्राज्यं विभज्यादद्वहे" । ततः ससैन्यः पर्वतकश्चन्द्रगुप्तान्वितश्चाणाक्यवाक्यान्नन्ददेशस्य साधनं प्रारेभे । तदैकं पुरं बलाद्ग्रहीतुमक्षमं मत्वा भिक्षुवेषभृच्चाणाक्यस्तत्र विवेश । प्रविश्य च वास्तूनि संप्रेक्षमाणः सप्रभावाः सप्त देवीरिन्द्रकुमारिका अपश्यत्, तासां प्रभवादभङ्गं तत्पुरमवबुध्य 'मयैताः कथमुच्छाप्याः ?" इति यावता विममर्श तावता पुररोधार्ता नागरास्तं पप्रच्छुः-"भगवन् ! अयं पुररोधः कदा प्रयास्यति ?" । सोऽवक्-"यावदमूः देवीनां प्रतिमा अत्र भवन्ति तावत्पुररोधक्षतिः कुतः" ?। ततो धूर्तप्रतारिताः पौराः तस्मात् स्थानात्ताः क्षिप्रमुदपाटयन् । ततः शीघ्रं तत्पुरं ताभ्यां गृहीतम् । इच्छं नन्ददेशं प्रसाध्य नन्दपुरमवेष्ट्यताम् । तदा च क्षीणपुण्यत्वात् चाणाक्यस्यान्तिके नन्दो धर्मद्वारमयाचत । स स्माह-"त्वमेकेन रथेन यन्नेतुमीशस्तदादाय निर्भयः पुरान्निर्याहि" । नन्दोऽपि भार्याद्वयं कन्यामेकां सारधनं च रथेऽधिरोप्य नगरान्निर्ययौ, चन्द्रगुप्तादयः पुरे प्रवेष्टुमागताः । तदा नन्दसुताऽनुरागपरा चन्द्रं पश्यति, तदा नन्दोऽवक्-"हे पुत्रि ! यद्यसौ स्वामी तव रोचते तदाङ्गीकुरु" । तेनेत्युक्ता सा चन्द्रगुप्तरथे यावदारोढुमुपचक्रमे तावच्चक्रारका नवाभज्यन्त । चन्द्रोऽमङ्गलकरीं तां ज्ञात्वा न्यवारयत् । तं प्रति चाणाक्यः स्माह-"वत्स ! मा मा निषेधय, अनेन निमित्तेन नव पुरुषान् यावत्ते वंशो भावी" । ततश्चन्द्रस्तां रथेऽधिरोप्य नन्दगृहे ययौ

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चाणक्य-पर्वतकसहितः । तत्रैका कन्याऽभवत्, आजन्म तां नन्दः शनैर्विषमं विषमभोजयत् । तां वीक्ष्य पर्वतको विषयार्तोऽङ्गसङ्गं चकार । तेन विषव्याप्तश्चन्द्रं जगौ-"सद्यः कञ्चित्प्रतिकारं कुरु" । स प्रतिक्रियाकरणोद्यतोऽभूत्, तदा चाणाक्येन भ्रूसंज्ञया निषिद्धः शिक्षितश्च, यतः-

तुल्यार्थं तुल्यसामर्थ्यं, मर्मज्ञं व्यवसायिनम् । अर्धराज्यहरं मित्रं, यो न हन्यात्स हन्यते ।।१।।

ततः स पर्वतो नामशेषतां प्रपेदे । तस्य राज्यं चन्द्रगुप्ताधीनं जातम् । अथ चन्द्रगुप्तराज्ये नन्दनराश्चौर्यं व्यधुः । ततश्चाणाक्योऽन्यं कञ्चिदारक्षकममार्गयत् । ततो भ्रमन्नलदाह्वकुविन्दस्य गृहेऽगात् । तं मर्कोटकगृहेष्वग्निं क्षिपन्तं ददर्श । चाणाक्यः किं करोषीति तमप्राक्षीत् । कुविन्दः स्माह-"मत्सूनोर्दंशदायिनो दुष्टानेतान्मर्कोटकान् सान्वयान् हन्तुं बिलेष्वहमनलं प्रक्षिपामि" । इति तस्य गिरा तं कर्मठं सोद्यमं ज्ञात्वा तस्मै पुराध्यक्षतां चन्द्रगुप्तादददापयत् । एवं मौर्यस्य राज्यं निष्कण्टकं जातम् ।

४०. हिंसाध्याने श्रीयोगशास्त्रव्याख्यायां कालसौकरिकस्याख्यानकम् ।

अन्यदा श्रीमहावीरो विहरन् परमेश्वरः । जगत्पूज्यः पुरे तस्मिन्नागत्य समवासरत् ।।१।।
श्रुत्वा स्वामिनमायातं जङ्गमं कल्पपादपम् । कृतार्थमानी तत्रागान्मुदितः श्रेणिको नृपः ।।२।।
यथास्थानं निषण्णेषु देवादिषु जगद्गुरुः । प्रारेभे दुरितध्वंसदेशनीं धर्म्मदेशनाम् ।।३।।
तदा कुष्ठगलत्कायः कश्चिदेत्य प्रणम्य च । निषसादोपतीर्थेशमलर्क इव कुट्टिमे ।।४।।
ततो भगवतः पादौ निजपूयरसेन सः । निःशङ्कश्चन्दनेनेव चर्चयामास भूयसा ।।५।।
तद्वीक्ष्य श्रेणिकः क्रुद्धो दध्यौ वध्योऽयमुत्थितः । पापीयान् यज्जगद्भर्त्तर्य्यमाशातनापरः ।।६।।
अत्रान्तरे जिनेन्द्रेण क्षुते प्रोवाच कुष्ठिकः । म्रियस्वेत्यथ जीवेति श्रेणिकेन क्षुते सति ।।७।।
क्षुतेऽभयकुमारेण जीव वा त्वं म्रियस्व वा । कालसौकरिकेणापि क्षुते मा जीव मा मृथाः ।।८।।
जिनं प्रति म्रियस्वेति वचसा रुषितो नृपः । इतः स्थानादुत्थितोऽसौ ग्राह्य इत्यादिशद् भटान् ।।९।।
देशनान्ते महावीरं नत्वा कुष्ठी समुत्थितः । रुरुधे श्रेणिकभटैः किरातैरिव सूकरः ।।१०।।
स तेषां पश्यतामेव दिव्यरूपधरः क्षणात् । उत्पपाताम्बरे कुर्वन्नर्कबिम्बविडम्बनाम् ।।११।।

[योगशास्त्र द्वितीयप्रकाश मूलश्लोक-३० वृत्तौऽऽन्तरश्लोक ५ तः १५]

अथोचे श्रेणिकः स्वाभिन्नमङ्गल्यं प्रभोः क्षुते । एषोऽन्येषां तु मङ्गल्या-ऽमङ्गल्यानि जगाद किम् ।।१२।।
अथाचचक्षे भगवान् किं भवेऽद्यापि तिष्ठसि । शीघ्रं मोक्षं प्रयाहीति मां म्रियस्वेत्युवाच सः ।।१३।।
स त्वां जगाद जीवेति जीवतस्ते यतः सुखम् । नरके नरशार्दूल मृतस्य हि गतिस्तव ।।१४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जीवन् धर्म्मं विधत्ते स्याद्विमानेऽनुत्तरे मृतः । जीव म्रियस्व वेत्येवं तेनाऽभयमभाषत ।।१५।।
जीवन् पापपरो मृत्वा सप्तमं नरकं व्रजेत् । कालसौकरिकस्तेन प्रोचे मा जीव मा मृथाः ।।१६।।
तच्छ्रुत्वा श्रेणिको नत्वा भगवन्तं व्यजिज्ञपत् । त्वयि नाथे जगन्नाथ कथं मे नरके गतिः ।।१७।।
बभाषे भगवानेवं पुरा त्वमसि भूपते । बद्धायुर्नरके तेन तत्रावश्यं गमिष्यसि ।।१८।।
शुभानामशुभानां वा फलं प्राग्बद्धकर्मणाम् । भोक्तव्यं तद् वयमपि नान्यथा कर्त्तुमीश्महे ।।१९।।
आद्यो भाविजिनचतुर्विंशतौ त्वं भविष्यसि । पद्मनाभाभिधो राजन् खेदं मा स्म कृथास्ततः ।।२०।।
श्रेणिकोऽथावदन्नाथ किमुपायोस्ति कोऽपि सः । नरकाद् येन रक्ष्येऽहमन्धकूपादिवान्धलः ।।२१।।
भगवान् व्याजहारेदं साधुभ्यो भक्तिपूर्वकम् । ब्राह्मण्या चेत् कपिलया भिक्षां दापयसे मुदा ।।२२।।
कालसौकरिकात् सूनां विमोचयसि वा यदि । तदा ते नरकान्मोक्षो राजन् जायेत नान्यथा ।।२३।।
सम्यगित्युपदेशं स हृदि हारमिवोद्वहन् । प्रणम्य श्रीमहावीरं चचाल स्वाश्रयं प्रति ।।२४।।

[मूलश्लोक-३० वृत्तौऽऽन्तरश्लोक-८३ तः ९५]

राजा ययाचे कपिलां साधुभ्यः श्रद्धयाऽन्विता । भिक्षां प्रयच्छ निर्भिक्षां त्वां करिष्ये धनोज्झयैः ।।२५।।
कपिलोचे विधत्से मां सर्वां स्वर्णमयीं यदि । हिनस्मि वा तथाप्येतदकृत्यं न करोम्यहम् ।।२६।।
कालसौकरिकोऽप्यूचे राज्ञा सूनां विमुञ्च यत् । दास्येऽहमर्थमर्थस्य लोभात् त्वमसि सौनिकः ।।२७।।
सूनायां ननु को दोषो यया जीवन्ति मानवाः । तां न जातु त्यजामीति कालसौकरिकोऽवदत् ।।२८।।
सूनाव्यापारमेषोऽत्र करिष्यति कथं न्विति । नृपः क्षिप्त्वाऽन्धकूपे तमहोरात्रमधारयत् ।।२९।।
अथ विज्ञपयामास गत्वा भगवते नृपः । सोऽत्याजि सौनिकः सूनामहोरात्रमिदं विभो ।।३०।।
सर्वज्ञोऽभिदधे राजन्नन्धकूपेऽपि सोऽवधीत् । शतानि पञ्च महिषान् स्वयं निर्माय मृण्मयान् ।।३१।।
तद् गत्वा श्रेणिकोऽपश्यत् स्वयमुद्विविजे ततः । धिगहो मे पुरा कर्म्म, नान्यथा भगवद्गिरः ।।३२।।
पञ्च पञ्च शतान्यस्य महिषान्निघ्नतोऽन्वहम् । कालसौकरिकस्योच्चैः पापराशिरवर्द्धत ।।३३।।
इहापि रोगास्तस्याऽऽसन् दारुणैरतिदारुणाः । पर्यन्तनरकप्राप्तेरुपर्युत्कलितैरघैः ।।३४।।
हा तात हा मातरिति व्याधिबाधाकदर्थितः । वध्यमानसूकरवत् कालसौकरिकोऽरटत् ।।३५।।
सोऽङ्गना-तूलिका-पुष्प-वीणा-क्वणित-मार्जिताः । दृष्टि-त्वग्-नासिका-कर्ण-जिह्वाशूलान्यमन्यत ।।३६।।
ततस्तस्य सुतस्तादृक् स्वरूपं सुलसोऽखिलम् । जगाद जगदाप्तायाऽभयायाऽभयदायिने ।।३७।।
ऊचेऽभयस्त्वत्पिता यञ्चक्रे तस्येदृशं फलम् । सत्यमत्युग्रपापानां फलमत्रैव लभ्यते ।।३८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथाऽप्यस्य कुरु प्रीत्यै विपरीतेन्द्रियार्थताम् । अमेध्यगन्धविध्वंसे भवेन्नृजलमौषधम् ।।३९।।
अथैत्य सुलसस्तं तु कटुतिक्तान्यभोजयत् । अपाययदपोऽत्युष्णास्तप्तत्रपुसहोदराः ।।४०।।
भूयिष्ठविष्ठया सुष्ठु सर्वाङ्गीणं व्यलेपयत् । ऊर्द्ध्वकण्टकमय्यां च शय्यायां पर्यसूषुपत् ।।४१।।
श्रावयामास चक्रीवत्-क्रमेलकरवान् कटून् । रक्षो-वेताल-कङ्कालधोररूपाण्यदर्शयत् ।।४२।।
तैः प्रीतः सोऽब्रवीत् पुत्रं चिरात् स्वाद्वद्य भोजनम् । शीतं वारि मृदुः शय्या सुगन्धि च विलेपनम् ।।४३।।
शब्दः श्रुतिसुधाऽमूनि रूपाण्येकं सुखं दृशोः ।
भक्तेनापि त्वयाऽस्मात् किं वञ्चितोऽस्मि चिरं सुखात् ।।४४।।
तच्छ्रुत्वा सुलसो दध्याविदमत्रैव जन्मनि । अहो पापफलं घोरं नरके किं भविष्यति ।।४५।।
सुलसे चिन्तयत्येवं स मृत्वा प्राप दारुणम् । सप्तमे नरके स्थानमप्रतिष्ठानसंज्ञितम् ।।४६।।

[मूलश्लोक-३० वृत्तौऽऽन्तरश्लोक १०७ तः १२८]

४१. हासध्याने श्रीमद्भावविजयकृतश्रीउत्तराध्ययनवृत्तौ श्रीचण्डरुद्राचार्यशिष्यकथा ।

उज्जयिन्यां पुरि स्नात्रो-द्याने नन्दनसन्निभे । चण्डरुद्राभिधः सूरिः सगच्छः समवासरत् ।।१।।
ऊनाधिकक्रियादोषान्, स्वगच्छीयतपस्विनाम् । दर्शं दर्शं स चाकुप्यत्, प्रकृत्याप्यतिरोषणः ।।२।।
भूयसां वारणं ह्येषां, मयैकेनातिदुष्करम् । परं रोषातिरेकान्मे, स्वहितं न हि जायते ।।३।।
ध्यात्वेति सूरिरेकान्ते, तस्थौ सद्ध्यानहेतवे ।
तत्रिं विहाय शिष्याणां, स्वाध्यायध्यानतत्परः ।।४।। (युग्मम्)
इतश्चोज्जयिनीवासी, व्यवहारिसुतो युवा । आगात्कुंकुमलिप्ताङ्गो, नवोढस्तत्र मित्रयुक् ।।५।।
साधून् दृष्ट्वा परीहासपूर्वकं तान् प्रणम्य च । सोऽवादीद्भगवन्तो मे, धर्मं ब्रूत सुखाकरम् ।।६।।
वैहासिकोऽयमिति ते, ज्ञात्वा नो किञ्चिदूचिरे । ततो भूयः स निर्ग्रन्थान्, सोपहासमभाषत ।।७।।
दौर्भाग्याद्भार्यया त्यक्तो, विरक्तोऽहं गृहाश्रमात् । तत् प्रसद्य भवांभोधितारकं दत्त मे व्रतम् ।।८।।
धूर्त्तः प्रतारयत्यस्मान्नर्मवाक्यैर्मुहुर्मुहुः । तद्घृष्यतामसौ सम्यक्, चिन्तयित्वेति ते जगुः ।।९।।
गुरोरधीना न वयं, स्वयं दीक्षादि दद्महे । तदाश्रय व्रताय त्वमस्मद्गुरुमितः स्थितम् ।।१०।।
श्रुत्वेति सवयस्योऽथ, सोऽव्रजत्सूरिसन्निधौ । अब्रवीत्तं च वन्दित्वा, सोपहासं कृताञ्जलिः ।।११।।
गृहव्यापारतो भग्नो, लग्नोऽस्मि त्वत्पदाब्जयोः । तत्प्रव्राजय मां स्वामिंस्तिष्ठामि ससुखं यथा ।।१२।।
सहास्यामिति तद्वाचं, श्रुत्वा कोपातिरेकतः । सूरिर्जगौ व्रतेच्छुश्चेत्तदा भस्मानय द्रुतम् ।।१३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततस्तत्सुहृदैकेनानीते भस्मनि साधुराट् । तं गृहीत्वा स्वबाहुभ्यां, लोचं कृत्वा ददौ व्रतम् ।।१४।।
तद्विलोक्य विषण्णास्तद्वयस्यास्तमथाभ्यधुः । मित्र ! सद्यः पलायस्व, धाम यामो वयं यथा ।।१५।।
आसन्नसिद्धिकः सोऽथ, लघुकर्मेत्यचिन्तयत् । कथं गच्छाम्यहं गेहं, स्ववाचा स्वीकृतव्रतः ।।१६।।
प्रमादसङ्गतेनापि, या वाक् प्रोक्ता मनस्विना । सा कथं दृषदुत्कीर्णाक्षरालीवाऽन्यथा भवेत् ।।१७।।
नर्मणापि मया लब्धं, रक्षणीयं ततो व्रतम् । जहाति द्युमणिं को हि, विनायासमुपस्थितम् ।।१८।।
ध्यात्वेति भावसाधुत्वं, स सुधीः प्रत्यपद्यत । यथास्थानं ततो जग्मुस्तद्वयस्या विषादिनः ।।१९।।
विनेयोऽथावदत्सूरिं, भगवन् ! बन्धवो मम । श्रामण्यं मोचयिष्यन्ति, तद्यामोऽन्यत्र कुत्रचित् ।।२०।।
गच्छो महानसौ गच्छन्, प्रच्छन्नमपि यज्जनैः । ज्ञायते तद् द्वयोरेवाऽऽवयोर्गमनमर्हति ।।२१।।
सूरिः प्रोवाच यद्येवं, तदाऽध्वानं विलोकय । यथा रजन्यां गच्छमः, सोऽप्यालोक्य तमाययौ ।।२२।।
प्रतस्थेऽथ निशीथिन्यां, सूरिर्नूतनशिष्ययुक् । पुरो याहीति गुरुणा, चोक्तः शिष्यो ययौ पुरः ।।२३।।
अपश्यन्निशि वृद्धत्वात्, स्थाणुना स्खलितो गुरुः । वेदनाविह्वलो जज्ञे, ज्वलद्रोषभराकुलः ।।२४।।
हा दुष्टशिष्य ! सन्मार्गो, न व्यलोकीति विब्रुवन् । दण्डेन शिष्यं शिरसि, कृतलोचे जघान सः ।।२५।।
तत्प्रहारस्फुटन्मौलिर्निर्गच्छद्रुधिरोऽपि सः । न व्यब्रवीन्नाप्यकुप्यत्, प्रत्युतैवमचिन्तयत् ।।२६।।
स्वगच्छमध्ये ससुखं, तिष्ठन्तोऽमी महाशयाः । अधन्येन मया दुःखभाजनं विहिता हहा ! ।।२७।।

आजन्मसौख्यदाः शिष्या, गुरोः स्युः कोऽपि धीधनाः ।
आद्य एव दिनेऽहं तु, जातोऽसातकरो गुरोः ।।२८।।

स्थाण्वादिना गुरोः पीडा, माभूद्भूयोऽपि भूयसी । ध्यायन्निति प्रयत्नेन, स चचाल शनैः शनैः ।।२९।।
तस्यैवं व्रजतः शुद्धाशयस्य समतानिधेः । महात्मनः समुत्पेदे, निशायामेव केवलम् ।।३०।।
अथ प्रभाते संजातेऽभ्युदिते च दिवाकरे । सूरिणा ददृशे शिष्यो, रुधिरालिप्तमस्तकः ।।३१।।
ततः शान्तरसाचांतस्वान्तः सूरिरचिन्तयत् । अहो ! नवीनशिष्यस्याऽप्यमुष्य क्षान्तिरुत्तमा ।।३२।।
क्रोधाध्मातेन मयका, दण्डेनैवं हतोऽपि यत् । नातनोद्वाङ्मनोदेहै-र्वैगुण्यं किञ्चिदप्यसौ ।।३३।।
चिरप्रव्रजितस्यापि, रोषदोषांश्च जानतः । प्राप्ताचार्यपदस्यापि, धिग्मे प्रबलकोपताम् ! ।।३४।।
इयच्चिरं सुदुष्पालं, पालितं मयका व्रतम् । परं तन्निष्फलं जज्ञे, कोपात्तन्मेऽमुना कृतम् ।।३५।।

.भावनाभिरिति भावितचित्तः, सोऽपि केवलमवाप मुनीन्द्रः ।
एवमुत्कटरुषोऽपि गुरोः स्युर्मोक्षदाः सविनयाः सुविनेयाः ।।३६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

४१. हासध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रे श्रीवज्रबाहुकथानकम् ।

इतश्च मिथिलापुर्यां हरिवंशे महीपतिः । आसीद्वासवकेत्वाख्यो विपुला तस्य च प्रिया ।।१।।
तयोः सूनुरनूनश्रीर्बभूव भुवि विश्रुतः । प्रजानां जनक इव जनको नाम पार्थिवः ।।२।।
इतश्च पुर्ययोध्यायामृषभस्वामिराज्यतः । इक्ष्वाकुवंशान्तर्भूतादित्यवंशेषु राजसु ।।३।।
यातेषु केषुचिन्मोक्षं स्वर्गं यातेषु केषुचित् । सङ्ख्यातीतेषु विंशस्यार्हतस्तीर्थे प्रसर्पति ।।४।।
बभूव विजयो राजा हिमचूला च तत्प्रिया । तयोरभूतां द्वौ पुत्रौ वज्रबाहुपुरन्दरौ ।।५।।
इतश्चाभून्नागपुरे पुरे राजेभवाहनः । चूडामणिश्च तत्पत्नी तत्पुत्री च मनोरमा ।।६।।
गत्वोद्यद्यौवनां वज्रबाहुः परिणिनाय ताम् । महेन महता श्वेतमरीचिरिव रोहिणीम् ।।७।।
भक्त्या च श्यालेनोदयसुन्दरेणानुगामिना । मनोरमामथादाय प्रतस्थे स्वपुराय सः ।।८।।
स गच्छन्नन्तरापश्यत्तपस्तेजोभिरीश्वरम् । वसन्ताद्रिस्थमुदयाचलस्थमिव भास्करम् ।।९।।
मोक्षाध्वमीक्षकमिवोत्पश्यमातापनापरम् । गुणसागरनामानं तपस्यन्तं महामुनिम् ।।१०।। युग्मम्।।
मयूर इव जीमूतं तं दृष्ट्वा जातसम्मदः । कुमार इदमाह स्म धृत्वा सपदि वाहनम् ।।११।।
अहो महात्मा कोऽप्येष वन्द्य एव महामुनिः । चिन्तामणिरिव मया दृष्टः पुण्येन भूयसा ।।१२।।
उवाच चैवमुदयसुन्दरोऽथ कुमार किम् । आदित्ससे परिव्रज्यां सोऽवदच्चित्तमस्ति मे ।।१३।।
उदयो नर्मणा भूयः प्रोचे यद्यस्ति ते मनः । तदद्य मा विलम्बस्व सहायोऽहमपीह ते ।।१४।।
कुमारो व्याजहारैवं मर्यादामिव वारिधिः । मा त्याक्षीः स्वामिमां सन्धां सोऽप्योमेवेत्यभाषत ।।१५।।
कुमारो वाहनान्मोहादिवोत्तीर्यारुरोह तम् । वसन्तशैलमुदयसुन्दरादिभिरावृतः ।।१६।।
वज्रबाहुमथावादीदिभवाहननन्दनः । स्वामिन्मा प्रव्राजीरद्य धिग्मे नर्माभिभाषणम् ।।१७।।
नर्मोक्तिरावयोरासीत् को दोषस्तद्व्यतिक्रमे । नर्मोक्तिर्न हि सत्यैव प्रायो धवलगीतवत् ।।१८।।
भविष्यसि सहायस्त्वं व्यसनेष्वखिलेष्वपि । इत्यकाण्डेऽपि मा भाङ्क्षीरस्मत्कुलमनोरथान् ।।१९।।
इदमद्यापि माङ्गल्यं तव हस्तेऽस्ति कङ्कणम् । तद्विवाहफलं भोगान् सहसा कथमुज्झसि ।।२०।।
सांसारिकसुखास्वादवञ्चितेयं मनोरमा । जीविष्यति कथं नाथ त्वया तृणवदुज्झिता ।।२१।।
वज्रबाहुकुमारोऽथ जगादोदयसुन्दरम् । सुन्दरं मर्त्यजन्मद्रोः फलं चारित्रलक्षणम् ।।२२।।
नर्मोक्तिरपि तेऽस्मासु बभूव परमार्थसात् । शुक्तिषु स्वातिजीमूतवारि मौक्तिकसादिव ।।२३।।
त्वत्स्वसा च कुलीना चेत्तत्प्रव्रज्यां ग्रहीष्यति । नो चेदस्याः शिवः पन्था भोगैः पुनरलं मम ।।२४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद्व्रतायानुमन्यस्व मां त्वमप्यनयाहि नः । कुलधर्मः क्षत्रियाणां स्वसन्धापालनं खलु ।।२५।।
उदयं प्रतिबोध्यैवं वज्रबाहुरुपाययौ । सागरं गुणरत्नानां महर्षिं गुणसागरम् ।।२६।।
तत्पादान्ते वज्रबाहुः परिव्रज्यामुपाददे । उदयो मनोरमाथ कुमाराः पञ्चविंशतिः ।।२७।।
वज्रबाहुं प्रव्रजितं श्रुत्वा विजयभूपतिः । वरं बालोऽप्यसौ नाहमिति वैराग्यमासदत् ।।२८।।
ततश्च विजयः पुत्रं राज्ये न्यस्य पुरन्दरम् । निर्वाणमोहस्य मुनेः पार्श्वे व्रतमुपाददे ।।२९।।
पुरन्दरोऽपि स्वे राज्ये पृथिवीकुक्षिजं सुतम् । न्यस्त कीर्तिधरं क्षेमङ्करर्ष्यन्तेऽभवद्यतिः ।।३०।।

[सप्तमपर्वे चतुर्थसर्गस्य १ तः ३० श्लोकाः]

४३. प्रद्वेषध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रे मरुभूतिकमठयोः चरित्रम् ।

अस्यैव जंबूद्वीपस्य क्षेत्रेऽस्ति भरताभिधे । नगरं पोतनपुरं स्वःखंडमिव नूतनम् ।।१।।
निषेवितं राजहंसैः श्रीसंकेतनिकेतनम् । आपगायाः पद्मखंडमिव तन्मंडनं भुवः ।।२।।
इभ्या बभासिरे तत्र श्रिया श्रीदानुजा इव । कल्पद्रुमस्य सोदर्या इवौदार्येण भूयसा ।।३।।
तदभूदमरावत्यास्तस्य वाप्यमरावती । प्रतिच्छन्दतया वाचामगोचरमर्द्धिकम् ।।४।।
अर्हत्पादारविन्दालिररविन्दोऽभिधानतः । तत्राभूद्भूपतिः स्थानं श्रियः पतिरिवार्णसाम् ।।५।।
स दोष्मसु यथैवैकस्तथैवाभूद्विवेकिषु । यथा लक्ष्मीवतां धुर्यस्तथैव हि यशस्विनाम् ।।६।।
यथा हि द्रविणं दीनानाथदुःस्थितजन्तुषु । अहोरात्रं संविभेजे पुमर्थेषु तथैव सः ।।७।।
राज्ञस्तस्यानुरूपोऽभूज्जीवाजीवादितत्त्ववित् । परमश्रावको विश्वभूतिर्विप्रः पुरोहितः ।।८।।
कमठो मरुभूतिश्चानुद्धराकुक्षिसंभवौ । उभौ ज्यायः कनीयांसावभूतां तस्य चात्मजौ ।।९।।
बभूव वरुणा नाम कमठस्य सधर्मिणी । वसुन्धरा मरुभूते रूपलावण्यशालिनी ।।१०।।
द्वावधीतकलौ तौ च द्वावप्यर्थार्जनक्षमौ । बभूवतुर्मिथः स्निग्धौ पित्रोरानन्दकारणम् ।।११।।
स्मरन् पञ्चपरमेष्ठिनमस्कारं समाहितः । विश्वभूतिर्विपद्याभूत् सौधर्मे प्रवरः सुरः ।।१२।।
तद्वियोगज्वराक्रान्ता तस्य पत्न्यप्यनुद्धरा । शुक्तपोभ्यां शोषितांगी नमस्कारपरा मृता ।।१३।।
पित्रोः परेतकार्याणि चक्राते भ्रातरौ च तौ । क्रमादभूतां चाशोकौ हरिश्चन्द्रर्षिबोधितौ ।।१४।।
गृहकार्येषु तत्रास्थात्कमठः कर्मठः सदा । विपन्ने पितरि प्रायो ज्यायान् पुत्रो धुरन्धरः ।।१५।।
मरुभूतिस्तु संसारासारत्वविदुरः सदा । विमुखो विषयोभ्योऽभूत् सन्न्यस्त इव भोजनात् ।।१६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्वाध्यायपौषधादानविधिनिष्ठः समाहितः । तस्थिवान् पौषधागारेऽहोरात्रानतिवाहयन् ।।१७।।
युग्मम्।।

प्रपद्य सर्वसावद्यविरतिं गुरुसन्निधौ । विहरिष्यामीति मतिर्मरुभूतेः सदाभवत् ।।१८।।
प्रमादमदिरोन्मादी सदा मिथ्यात्वमोहितः । परस्त्रीद्यूतसंसक्तः स्वच्छन्दः कमठस्त्वभूत् ।।१९।।
वसुन्धरा मरुभूतेर्भार्या सा नवयौवना । अभूज्जगन्मोहकरी विषवल्लीव जंगमा ।।२०।।
सा पुनर्भावयतिना स्वप्नेऽपि मरुभूतिना । पयसा मरुवल्लीव नास्पृश्यत कदाचन ।।२१।।
विषयेच्छुस्ततः सा चासंप्राप्तपतिसंगमा । अरण्यमालतीप्रायं मन्यते स्म स्वयौवनम् ।।२२।।
स्त्रीलंपटः प्रकृत्यापि कमठो वीक्ष्य वीक्ष्य ताम् । आललापानुरागेण निर्विवेकः स्नुषामपि ।।२३।।
तां रहःस्थां च कमठो दृष्ट्वान्येद्युरदोऽवदत् । कृष्णपक्षेन्दुलेखेव किं सुभ्रु क्षीयतेऽन्वहम् ।।२४।।
ह्रिया न चेत्कथयसि ज्ञातं दुःखं तथापि ते । मुग्धो मदनुजो मन्ये क्लीबमानोऽत्र कारणम् ।।२५।।
श्रुत्वेति वचनं तस्यामर्यादं जातवेपथुः । पलायितुं प्रववृते भ्रश्यत्संव्यानकुन्तला ।।२६।।
कमठोऽपि हि धावित्वा पाणिना तामधारयत् । ऊचे च मुग्धे किमियमस्थाने तव भीरुता ।।२७।।
श्लथं बधान धम्मिल्लं स्रस्तं संस्थापयांशुकम् । इत्युक्त्वा स तथा चक्रेऽनिच्छन्त्या अपि हि स्वयम् ।।२८।।
साप्यूचे ज्येष्ठ किमिदं पूज्यस्त्वं विश्वभूतिवत् । कुलद्वयकलंकाय न ते न मम साध्विदम् ।।२९।।
स्मित्वा च कमठः स्माह मौग्ध्यान्मा स्म ब्रवीरिदम् । मा निजं यौवनं मोघीकुरु भोगविवर्जितम् ।।३०।।
मयापि सह मुग्धाक्षि भुंक्ष्व वैषयिकं सुखम् । क्लीबेन किं तेन मरुभूतिनाद्यापि यत्स्मृतिः ।।३१।।
नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ।।३२।।
भृशं भोगेष्वुरग्रेपि तेनेत्युक्ता तु साग्रतः । स्वांके निवेशितात्याक्षील्लज्जां मर्यादया सह ।।३३।।
अथ तां रमयामास कमठो मन्मथातुरः । नित्यमेवं तयोरासीद्गुप्तगुप्तो रहः क्षणः ।।३४।।
तं ज्ञात्वा वरुणा त्यक्तकरुणारुणलोचना । ईर्ष्यापरवशा चख्यावशेषं मरुभूतये ।।३५।।
उवाच मरुभूतिस्तामार्ये नार्ये भवत्यदः । अनार्यचरितं जातु संताप इव शीतगौ ।।३६।।
एवं तेन निषिद्धापि साख्यत्तच्च दिने दिने । कः परप्रत्ययात्प्रत्येत्विति सोऽपि व्यचिन्तयत् ।।३७।।
साक्षात्कर्तुं स्वयमथ संभोगविमुखोऽपि सन् । गत्वोचे कमठं यास्याम्यहं ग्रामाय संप्रति ।।३८।।
इत्युक्त्वागान्मरुभूतिर्नक्तं च पुनराययौ । श्रान्तकर्पटिकीभूय वेषभाषाविपर्ययात् ।।३९।।
ययाचे कमठं दूराध्वगस्य मम देहि भोः । आश्रयं स्वाश्रय इति ददौ सोऽप्यविशंकितः ।।४०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तद्दर्शितगवाक्षेऽस्थाद्वयाजनिद्रामुपेत्य सः । दुश्चेष्टितं तयोर्द्रष्टुकामः कामान्धयोस्तयोः ।।४१।।
मरुभूतिर्गतो ग्राममिति तावप्यशंकितौ । वसुन्धरा कमठश्च रेमाते दुर्मती चिरम् ।।४२।।
ददर्शादर्शनीयं तन्मरुभूतिस्तथा स्थितः । लोकापवादभीरुस्तु विरुद्धं न समाचरम् ।।४३।।
गत्वा तदाख्यदखिलं सोऽरविन्दाय भूभुजे । दुर्नयानसहिष्णुः सोऽप्यारक्षानेवमादिशत् ।।४४।।
पुरोहितसुतत्वेनावध्योऽयं दुश्चरित्रकृत् । निर्वास्यः खरमारोप्य कमठः सविडंबनम् ।।४५।।
तेऽपि रासभमारोप्य रसद्विरसडिंडिमम् । चित्रितांगं धातुरसैः कमठं निरवासयन् ।।४६।।
पौरलोकैर्वीक्ष्यमाणोऽधोमुखः कमठोऽपि हि । अशक्नुवन् प्रतिकर्तुं ससंवेगो वनं ययौ ।।४७।।
अथाभवत्तपस्वी स शिवतापससन्निधौ । आरेभे च तपो बालं कमठस्तत्र कानने ।।४८।।
मरुभूतिश्चानुशिष्ये धिङ्मया किमिदं कृतम् । नरेन्द्राय यदाख्यायि भ्रातुः स्खलितचेष्टितम् ।।४९।।
इदं मदीयं स्खलितं महत्तत्स्खलितादपि । तद्गत्वा क्षमयाम्यद्य ज्यायांसं भ्रातरं निजम् ।।५०।।
ध्यात्वेति भूभुजं पृष्ट्वा वार्यमाणोऽपि तेन सः । जगाम कमठं तस्य पादयोर्निपपात च ।।५१।।
स्मरन् विडंबनां पूर्वां तत्कालं कमठः क्रुधाः । शिलामुत्क्षिप्य चिक्षेप नमतस्तस्य मूर्धनि ।।५२।।
प्रहारार्तस्य तस्योपर्यादाय पुनरेव ताम् । शिलां चिक्षेप कमठो नरके स्वमिवाभिनत् ।।५३।।
तत्प्रहाररुजा सार्तध्यानो मृत्वाभवत्करी । स विन्ध्यपर्वते यूथनाथो विन्ध्य इवोच्चकैः ।।५४।।

[नवमपर्वे द्वितीयसर्गस्य ३ तः ५६ श्लोकाः]

४३. प्रद्वेषध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रमध्येश्रीवीरं प्रति गोपस्य दृष्टान्तः ।

ग्रामं षण्मानिनामानं जगाम भगवानपि । बहिश्च कायोत्सर्गेण तस्थौ ध्यानपरायणः ।।१।।
वेद्यं कर्म तदोदीर्णं प्रभोर्विष्णुभवाऽर्जितम् । शय्यापालश्रवःक्षिप्ततप्तत्रपुनिबन्धनम् ।।२।।
शय्यापालस्य जीवोऽपि गोपालस्तत्र सोऽभवत् । स्वाम्यन्तिके वृषान्मुक्त्वा गोदोहादिकृते ययौ ।।३।।
चरन्तः स्वेच्छया ते च प्राविशन्नटवीं वृषाः । क्षणात्सोऽप्याययौ गोपोऽपश्यन्नुक्षणोऽवदत्प्रभुम् ।।४।।
देवार्य ! क्व ममोक्षाणः ? किं न ब्रूषे मुनिब्रुव ! । न श्रृणोषि वचः किं वा कर्णरन्ध्रे वृथैव तत् ।।५।।
अवादिनि प्रभावेवमत्यन्तकुपितोऽथ सः । अक्षिपत्काशशलाके स्वामिनः कर्णरन्ध्रयोः ।।६।।
शलाके ताडिते तेन तथा ते मिलिते मिथः । अखंडैकशलाकत्वं बिभरांचक्रतुर्यथा ।।७।।
मा कृक्षत् कीलकावेतौ कोऽपीति स्वधिया कुधीः । तत्कीलकबहिर्भागं छित्त्वा गोपालको ययौ ।।८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रणष्टमायामिथ्यादिशल्योऽपि श्रुतिशल्यभाग् । अकम्पितः शुभध्यानादपापां मध्यमां ययौ ।।९।।
पारणार्थं प्रभुस्तत्र सिद्धार्थवणिजो गृहे । जगाम भगवांस्तेन भक्त्या न प्रतिलाभितः ।।१०।।
पूर्वायातस्तत्र वैद्यः सिद्धार्थस्य सुहृत्प्रियः । खरकाख्यः प्रभुं प्रेक्ष्य सूक्ष्मधीरब्रवीदिदम् ।।११।।
अहो भगवतो मूर्तिः संपूर्णा सर्वलक्षणैः । परं शल्यवती चेयं म्लानत्वेनोपलक्ष्यते ।।१२।।
सिद्धार्थः संभ्रामादूचे यद्येवं तन्निरूपय । सम्यग्भगवतो देहे क्व शल्यं हन्त तिष्ठति ? ।।१३।।
वैद्योऽपि निपुणं पश्यन्नखिलं स्वामिनो वपुः । ददर्श कर्णयोः कीलौ सिद्धार्थस्याप्यदर्शयत् ।।१४।।
सिद्धार्थोऽथावदत् केनाप्यपवादादभीरुणा । नरकादप्यभीतेन चक्रेऽदः कर्म दारुणम् ।।१५।।
कृतं वा तस्य पापस्य कथयाऽप्यनया सखे ! नाथस्य शल्योद्धाराय प्रयतस्व महामते ! ।।१६।।
स्वामिनः कर्णयोः शल्ये पीडा तु महती मम । विलम्बं न सहेऽत्रार्थे सर्वस्वमपि यातु मे ।।१७।।
कर्णाभ्यां विश्वनाथस्योद्धृतयोरिह शल्ययोः । मन्ये भवमहाम्भोधेरावामेव समुद्धृतौ ।।१८।।
वैद्योऽप्युवाच नाथोऽयं विश्वत्राणक्षयक्षमः । कर्मक्षयायोपैक्षिष्ट तं नाऽशक्त्याऽपकारिणम् ।।१९।।
कथं चिकित्सनीयोऽयं निरपेक्षो वपुष्यपि । यः कर्मनिर्जरालुब्धो वेदनां साधु मन्यते ।।२०।।
सिद्धार्थोऽप्यवदत् केयं वाचोयुक्तिस्तवाधुना । न काले वचसामेषां चिकित्स्यो भगवान् खलु ।।२१।।
तयोर्ब्रुवाणयोरेवं निरपेक्षः प्रभुर्ययौ । तस्थौ च बहिरुद्याने शुभध्यानपरायणः ।।२२।।
सिद्धार्थखरकौ तौ च गृहीत्वा भेषजादिकम् । तत्रोद्याने त्वरावन्तौ भगवन्तमुपेयतुः ।।२३।।
तैलद्रोण्यां विनिवेश्य तैलेनाभ्यज्य च प्रभुम् । संवाहकैर्बलीयोभिस्तावमर्दयतामथ ।।२४।।
श्लेथेषु मर्दनात्संधिष्वोजस्विपुरुषैः प्रभोः । संदंशाभ्यामकृष्येतां युगपत्कर्णकीलकौ ।।२५।।
कीलद्वयं सरुधिरं निर्ययौ कर्णरन्ध्रयोः । अवशिष्टं वेदनीयं कर्म साक्षादिव प्रभोः ।।२६।।
तथाऽभूद्वेदना कीलकर्षणेन यथा प्रभुः । ररास भैरवारावं वज्राहत इवाचलः ।।२७।।
नाऽस्फुटत् स्वामिमाहात्म्यात्तेन नादेन मेदिनी । विपद्यपि हि नाऽर्हन्तः परोपद्रवकारिणः ।।२८।।
संरोहण्या रोहयित्वा कर्णौ नाथं प्रणम्य च । क्षमयित्वा च सिद्धार्थखरकौ गृहमीयतुः ।।२९।।
वेदनामपि तौ भर्तुः कृतवन्तौ शुभाशयौ । बभूवतुः सुरलोकश्रीभाजनमुभावपि ।।३०।।
दुष्टाशयस्तु गोपालो विधाय स्वामिवेदनाम् । सप्तमावनिदुःखानां भाजनं समजायत ।।३१।।

[दशमे पर्वणि चतुर्थसर्गस्य ६१८ तः ६४८ श्लोकाः]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

४४. परुषध्याने श्रीउपदेशमालाहेयोपादेयाटीकायां ब्रह्मदत्तकथानकम् ।

मृते ब्रह्मराजे तत्पत्नी चुलिनी दीर्घनाम्ना तन्मित्रेण सह विनष्टा । विज्ञाता धनुमन्त्रिणा, व्युत्पादितस्तेन तत्सुतो ब्रह्मदत्तः काक-कोकिलादिसङ्ग्रहणदर्शनेन, दत्तश्च सहचरस्तस्य वरधनुरात्मतनयः । तयापि कुतश्चिद् ज्ञात्वा तं व्यतिकरं चिन्तितं भविष्यति मे रतिविघ्नः ततोऽमुमेव ब्रह्मदत्तं व्यापादयामीति जनापवादक्षालनार्थमुद्ग्राहितः काञ्चित्कन्यकां, प्रवेशितः पूर्वरचिते जतुगृहे, दापितोऽलक्षितोऽग्निः, मन्त्रिणा प्राग्रचितप्रयोगेण निष्कासितो भूमिखातेन गतो देशकालिकयेति ।।

४४. परुषध्याने श्रीउपदेशमाला-पुष्पमालाग्रन्थबृहद्वृत्तौ युगबाहुवृत्तम् ।

अत्थि अवंतीजणवयसारं नयरं सुंदसणं नाम । महिमहिलाए मुहंपिव सुहालयं दीहरच्छं च ।।१।।
तत्थ नरिंदो नामेण मणिरहो जलनिहिव्व वररयणो । कयलच्छीहरावासो मयरहिओ बहुपयाहारो ।।२।।
तस्सेव लहू भाया जुगबाहू नाम आसि जुयराया । नामेण मयणरेहा इमस्स भज्जा गुणग्घविया ।।३।।
जीस रूवं दट्ठुं दड्ढो मयणग्गिणा स मयणोऽवि । जणवायं चिय मन्ने जं दड्ढो सो उमावइणा ।।४।।
अह कत्थइ वीसत्थं पिच्छन्तो मणिरहो तयं हियए । ईसाइ व मयणेणं निहओ बाणेहिं चिंतेइ ।।५।।
घेत्तव्वा ताव मए एसा नियमेण ता पलोभेमि । आमिसपासनिबद्धो कज्जमकजं च कुणइ जणो ।।६।।
तो पुप्फफलविलेवणतंबोलाईणि तीइ पट्ठवइ । सावि हु अदुट्ठभावा गिण्हइ जेट्ठप्पसाउत्ति ।।७।।
अह अन्नदिणे दूई पट्ठविया नरवेरण तं भणइ । भद्दे ! तुह गुणनिवहे रत्तो राया इई वयइ ।।८।।
तं रमसु मं जहिच्छं पडिवज्जसु सयलरज्ज सामित्तं । जिणवयणभावियमणा तत्तो जंपइ मयणरेहा ।।९।।
अन्नंमिवि परदारे सप्पुरिसाणं न वच्चइ मणंपि । जं पुण बहूजणम्मिवि कामपवित्ती महापावं ।।१०।।

सीलं चिय पढमगुणो नारीणं जइ न सोऽवि मह हुज्जा ।
ता के गुणा य अन्ने अणुरज्जइ जेसु नरनाहो ? ।।११।।

जुवरायगेहिणीए महड्ढियं चेव रज्जसामित्तं । मा वा होउ तयं मे जं भग्गे होइ सीलम्मि ।।१२।।

जत्थ य कालकलानलजालानिवहेहिं डज्झए निच्चं ।
जोव्वणजीयलालं तत्थ अकज्जेसु को रमइ ? ।।१३।।
जइ अ अणाइंमि भवे तित्तिं न गओ सिऽणंतनारीहिं ।
एत्थ य बहुयाइ तओ एक्काए मए न तप्पिहिसि ।।१४।।
तुच्छाणं कामाण य कज्जे पाविहिसि तिहुअणे अयसं ।
घोरे य पडिसि नरए दुहाडं किणिउं सहत्थेण ।।१५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ता विरम अकज्जेसुं ठविऊण मणम्मि गरुयसंतोसं । इहरा न भोगतण्हा नियत्तए हवइ बहुयं च ।।१६।।
इच्चाइ तीइ भणियं दूई परिकहइ मेइणीवइणो । तहवि इमो न नियत्तो गहिओ कामग्गहेणऽहियं ।।१७।।
वयणाइं हियएहिं सुहासियाइंपि निपुणबुद्धीहिं । मयणभुयंगमविसभावियाण न कमंति हियएसु ।।१८।।
ता चिंतइ गयलज्जो जीयंते मह कणिट्ठबंधुम्मि । धेत्तुं इमा न तीरइ ता तं हणिउं हढेणावि ।।१९।।
गिण्हामि इमं इय चिंतिऊण छिड्डाइं बंधुणो नियइ । इत्थंतरे पयट्टो वसंतसमओ परमरम्मो ।।२०।।

तथाहिं-

घणसहयारसरसबहुमंजरिपसरियबहुलपरिमलो,
परिमलमिलियभमिरभमरावलिकलरवसवणसुहयरो ।
सुहयरमहुरपउरपरहुयरवमुच्छियपहीयजणमणो,
जणमणहरणु मयणसंजीवणु सहइ वसंतरिउ महो ।।१।।

किंच-

जे कप्पूरपरागसंगसुहया एलावणंदोलिणो,
गोलानीलतरंगभंगसिसिरा लीलासरुल्लासिणो ।
कन्नाडीकुरुलोहनट्टगुरुणो कामानलुद्दीविणो,
ते मंदं मलयद्दिमज्झपवहा वायंति जत्थानिला ।।२।।
वीणावेणुमुयंगसद्दसुहयं गेयं जहिं गिज्जए,
उच्छंगीकयकामिणी इय सुहं दोलासु सेविज्जए ।
सोऊणं कलकंठकूजियरवं माणं खणेणुज्झिउं,
आलिंगंति सुनिब्भरं पिययमं थोरत्थणीओ जहिं ।।३।।
अपरं च-कुरुवयतरुणो फुल्लंति जत्थ आलिंगणेण तरुणीणं ।
तरुणिपयपहरतुट्ठा असोयतरुणोऽवि वियसंति ।।४।।

तरुणीमइरागंडूसतोसिया केसरावि कुसुमंति । चंपयतरुणो फुल्लंति सुरहिजलदोहलेहिं च ।।५।।
विकसंति तिलयतरुणो तरुणिकडक्खेहिं पेक्खिया जत्थ । पुल्लंति विरहिरुक्खा सोऊणं पंचमुग्गारं ।।६।।
एगिंदियावि एवं कमसो फरिसाइएहिं विसएहिं । हीरंति तओ तेहिं कह न छलिज्जंति पंचिंदी ? ।।७।।
पवणंदोलियमंजीरपसरंतरयच्छलेण सहयारा । हिट्ठा इव महुरज्जे धूलीकीलाए कीलंति ।।८।।
दट्ठूण विरहिणीहिं जलियंपिवकुसुमियं पलासवणं । दहणभएण व सित्तो देहो नयणंसुसलिलेहिं ।।९।।
न रमंति कन्नियारे भमरा वण्णुज्जलेऽवि असुअंधे । रूवेण किं व कीरइ ? गुणेहिं छेया हरिज्जंति ।।१०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अपिच-जहिं सोहहिं कुसुमियकंचणारपुन्नायनायफुल्लिय अपार ।
मचकुंदकुसुमपरिमलु अणंतु, पसरइ असेस वासिय दियंतु ।।११।।
बहुकुसुमियाओ नोमालियाओ, महमहहिं सुअंधओ पाडलाओ ।
एलालवंगकक्कोलियाओ, रेहंति दक्खक्खज्जूरियाओ ।।१२।।
अन्नेवि कयलियनालियरपमुह, जहिं सहहिं विसेसिण रुक्ख विविह ।
जा सयमवि गयणुम्मत्तु नाइ मंडय तिलयण पियरुक्खराइं ।।१३।।
गायइ व विहंगमकलरवेहिं, नच्चइ व विडविपल्लवकरेहिं ।
हसइ व फुल्लमाल्लियविसेण, कूजइव मत्तकोइलरवेण ।।१४।।
हक्कारइ चलभुयलयाहिं, पढइ व्व महुलसुयसारियाहिं ।
फलभरनमततरुसिंहरएहिं, पणमइ व पियह पयपंकयेहिं ।।१५।।

मयरंउरसिण बहुपूरिएहिं, रुयइ व्व गलंतिहिं सुभणुस्सेहिं । तहिं दिंति लोय बहु चच्चरीओ, वज्जंति तत्थ आवाणयाइं, परिलुढियभत्तबहुपाणयाइं, आहरणविलेवणभूसियाइं, रइनिब्भरुकीलहिं मिहुणयाइं, नियकंतिहिं सह पुरभामिणीओ, मज्जंति सुरहिं सुहकामिणीओ, इय हरिसपबंधिहिं सयलसमिद्धिहिं निग्र २ पिययमजणकलिओ उज्जाणिहिं पत्तओ, मयणुम्मत्तउ कीलइ सव्वुवि जणु मिलिउ ।।१६।।

तो गंतूणं उज्जाणपालओ चूयमंजरीहत्थो । विन्नवइ निवं एयं गाहं पढिऊण जह देव ! ।।१७।।
चंपयगोरीसयवत्तलोयणा तिलयरेहिरी पत्ता । उज्जाणे महुलच्छी कयसंकेयव्व सह तुमए ।।१८।।

तत्तो वसंतसमए नाएवि निवो पउरअणुक्खित्तो ।
न गओ बहिं गओ पुण जुगबाहू पिययमासहिओ ।।१९।।

कीलंतस्स य एयस्स तत्थ रयणी समागया तत्तो । कयलीहरए रइसुहमणुहविउं निब्भरं सुत्तो ।।२०।।
एयं च अवसरं जाणिऊण परिवारतुच्छयाईयं । खग्गसद्दाओ राया तत्थ पविट्ठो समागंतु ।।२१।।
ता अगणिऊण अयसं मज्जायं छड्डिउं विगयधम्मो । खग्गेण हणइ गीवाइ भायरं निग्घिणो एसो ।।२२।।
तत्तो य मयणरेहाइ कूइए मिलिय पाहरियवग्गे । कवडुत्तरं च काउं किंपिनरिंदो गओ सगिहं ।।२३।।
तत्तो अच्चावत्थं (व्वावण्णं) जुगबाहुं जाणिउं मयणरेहा । होऊण कन्नमूले भणइ तयं महुरवयणेहिं ।।२४।।

भो भो ! तुमं महायस ! खणंपि खयं मणम्मि मा कुणसु ।
नियकम्मपरिणइच्चिय जमिहं अवरज्झए न परो ।।२५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

जं जेण कयं कम्मं अन्नभवे इह भवे य जीवेणं । तं तेण वेइयव्वं निमित्तमित्तं परो होइ ।।२६।।

कंठट्ठिए य जीए पओसमिण्हिं करेसि जइवि तुमं ।
तहवि परत्त न किंचिवि तं पुण हारिहिसि परलोयं ।।२७।।

ता वीर ! कुरु समाहिं अरहंताई य सरणमणुसरसु । छिंद ममत्तं मेत्तिं च कुणसु सव्वेसु सत्तेसु ।।२८।।

गरिहिसु नियदुच्चरियं सव्वं सिद्धाइसक्खियं काउं । खामेसु सयलसत्त तुमंपि तह खमसु सव्वेसिं ।।२९।।

अरिहं देवो गुरुणो सुसाहुणो जिणमयं चिंय पमाणं । जम्मंतरेऽवि एयं मह होज्ज इमंति चिंतेसु ।।३०।।

पाणिवहालियपरधणमेहुण्णपरिग्गहाइवेरमणं । तिविहं तिविहेण तहा पडिवज्जसु जावजीवाए ।।३१।।

अट्ठारसण्ह संमं पावट्ठाणाण तह पडिक्कमसु । भावेसु भवसरूवं अणुसरसु मणे नमोक्कारं ।।३२।।

जओ-पंचनमोक्कारसमा अंते वच्चंति जस्स दस पाणा ।
सो जइ न जाइ मुक्खं अवस्स वेमाणिओ होइ ।।३३।।

अम्मापियरो मित्तं पुत्तकलत्ताइं सयणवग्गो य । विहडइ सव्वंपि इमं होइ सहाओ परं धम्मो ।।३४।।

भावेऊणं संमं चिंतेऊणं च नरयदुक्खाइं । सव्वत्थ अपडिबद्धो अहियाससु दुहमिणं सम्मं ।।३५।।

दुलहा पुणो महायस ! जिणधम्मनरत्तणाइसामग्गी ।
ता खणमेक्कं समचित्तयाए परिगिण्ह तीए फलं ।।३६।।

इय तीए सिसिरवयणामएहिं विज्झायकोवजलणेण । पडिवन्नं तेण इमं सव्वं सीसे कयंजलिणा ।।३७।।

तत्तो पइसमयं वड्ढमाणसंवेयरसजुओ मरिउं । पडिवन्नभावचरणो उप्पन्नो बंभलोयम्मि ।।३८।।

४४. परुषध्याने श्रीआवश्यकनिर्युक्तिहारीभद्रीयवृत्तौ श्राविकाख्यानकः ।

एगा सावित्रिगा तीसे भत्ता मिच्छादिट्ठी अन्नं भज्जं आणेउं मग्गइ, तीसे तणएण न लहइ से सवत्तगंति, चिंतेइ किह मारेमि ?, अण्णया कण्हसप्पो घडए छुभित्ता आणीओ, संगोविओ, जिमिओ भणइ - आणेहि पुप्फाणि अमुगे घडए ठवियाणि, सा पविट्ठा, अंधकारंति नमोक्कारं करेइ, जइवि मे कोइ खाएज्जा तोवि मे मरंतीए नमोक्कारो ण नस्सहिति, हत्थो छूढो, सप्पो देवयाए अवहिओ, पुष्पमाला कया, सा गहिया, दिन्ना य से, सो संभंतो चिंतइ अन्नाणि, कहियं, गओ पेच्छइ घडगं पुष्पगंधं च, णवि इत्थ कोइ सप्पो, आउट्टो पायपडिओ सव्वं कहेइ खामेइ य, पच्छा सा चेव घरसामिणी जाया ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

४५. भयध्याने श्रीउपदेशमालाहेयोपादेयावृत्तौ सोमिलप्रबन्धः ।

द्वारवत्यां कृष्णस्य मातुर्देवक्या निजतनयपीयमानस्तनीं काञ्चिन्नारीं उपलभ्य सञ्जातमौत्सुक्यं, यदुत धन्यास्ताः एव प्रमदा यासां दुग्धलुब्धमुग्धस्मेरमुखैर्वल्गच्छिरोधरैस्तनयैः स्तनौ पीयते, मम पुनर्मन्दभाग्याया नैतत्सम्पन्नमिति सविषादा च दृष्टा कृष्णेन, सप्रणिपत्याह-अम्ब ! किमेतत् ? ततः कथितं तया निजाकूतम् । पूरयामि ते मनोरथानित्यभिधायाराधितस्तेन देवः । देवः प्राह- भविष्यति तनये दिवश्च्युतः, केवलं जन्मान्तराभ्यस्तकुशलकर्मत्वान्न चिरं गृहे स्थास्यतीति । तदाकर्ण्य कथितं कृष्णेन देवक्याः प्रतिपन्नम् तया । ततो गजस्वप्नसूचित आविर्भूतो गर्भः, जातः क्रमेण दारकः, प्रतिष्ठितं नाम गजसुकुमार इति । प्रासो यौवनमुद्वाहितः सोमिलब्राह्मणसुतां माता-पितृभ्यां, स पुनरिन्द्रजालमिव जगदसारं मन्यमानो विडम्बनाप्रायं वैषयिकं सुखं चिन्तयन् कारागृहमिव गृहं तदनुरोधात् तावन्तं कालमधिवसति स्म । पश्चान्निवेद्य स्वाभिप्रायं तयोः सम्भाव्य च नानोपायैः विमुक्तस्ताभ्यां कृष्णेन च भगवदरिष्टनेमिपादमूले निष्क्रान्तोऽभ्यस्तद्विविधशिक्षोऽन्यदा द्वारवत्यामेव स्मशाने स्थितः कायोत्सर्गेण कथञ्चित्तद्देशमागतेन दृष्टः सोमिलेन । मद्दुहितरं परिणीय त्यक्तवानयं दुष्टात्मेति समुल्लसितोऽस्य क्रोधः ।

ततः कृत्वा मृत्तिकया शिरसो वेष्टनं, प्रक्षिप्य तत्र ज्वलिताङ्गारानपक्रान्तोऽसावितरस्यापि अहो ! मन्निमित्तमयं वराकः कश्चित्प्रपतिष्यति घोरे नरके' इति भावनासमीरणसन्धुक्षिते ज्वलति ज्वलने तत्सहाय इव प्रबुद्धः शुक्लध्यानज्वलनः, दग्धं इतरेण शरीरमिव घातिकर्मचतुष्टयं, समुत्पन्नं केवलज्ञानम्, अध्यासिता शैलेशी, समाप्तमायुष्कं, सम्प्राप्तः परमपदमिति । द्वितीयदिने समागतो विष्णुर्भगवद्वन्द्वनार्थं, वन्दितः सह मुनिभिर्भगवान् । पश्चात् क्व गजसुकुमार इति तस्य वदतो भगवतोक्तं साधितं तेन स्वकार्यम् । विष्णुराह- कथं ? ततः कथितो भगवता तद्वृत्तान्तः, विष्णुराह केनेदमनुष्ठितं ? भगवान् आह- 'यस्य त्वां दृष्ट्वा शिरो विदलिष्यति', प्रविशता दृष्टो भयेन प्रपलायमानः सोमिलः । कृष्णदर्शनादाविर्भवद्भयोत्कर्षस्य दीर्णं तस्य मस्तकमिति ।।

२८,४२,४६. युद्धध्याने, प्रहासध्याने, रूपध्याने च श्रीउपदेशमालाटीकागतं चण्डप्रद्योतस्य कथानकम् ।

सुंसुमारनगरे धुंधुमारराजसुतया अङ्गारवत्या वादे तिरस्कृतनिष्कासितया परिव्राजिकया दर्शिततद्रूपाऽऽक्षिप्तचित्तेन दूतप्रेषणाऽदानाक्रुद्धेनोज्जयिन्या आगत्य चण्डप्रद्योतराजेन रुद्धं तन्नगरं, विषण्णेन राजा किमत्र भविष्यतीति पृष्टो नैमित्तिकः, स प्राह–निरूप्य कथयामि, गतो निमित्तग्रहणार्थं, त्रासितानि तेन रममाणानि डिम्भरूपाणि, इतश्च वारत्तकनामा मुनिस्तत्रैव नागगृहे

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स्थित आसीत्, तन्मूलं गतानि कथञ्चित्तानि, तेनोक्तं-मा भैषुरिति, इतरेणापि श्रुतं तद्वाक्यं, कथितं राज्ञः, गृहीत्वा तदर्थं जातावष्टम्भेन दत्त्वाऽवस्कन्दं गृहीतश्चण्डप्रद्योतः, तेन आनीत स्वगेहमुक्तश्च किमिदानीं भवतः क्रियते ? स प्राह-यद्भवद्गृहमागतानां युज्यते तत्कुरु ? ततो वशीकृतेषु नीचेषु कृपावन्तः सन्त इत्यालोच्य दत्ता अङ्गारवती तस्मै । स तया सह भ्रमन्नगरेऽल्पसामग्रीकं तदवलोक्य तां पृष्टवान् कथमहं गृहीत इति, सा प्राह-निमित्तबलेन, स प्राह-कथं ?, ततः कथितस्तया मुनिवृत्तान्तः । अन्यदा स वारत्तकमुनिर्दर्शितस्तया तस्य, ततोऽसौ लोकसमक्षं हासगर्भं तमब्रवीत् नैमित्तकक्षपकः ! नमस्ते । ततः क्व मया निमित्तं प्रयुक्तमित्युक्तो मुनिर्जन्मप्रभृति स्वापराधेषु आः! ज्ञातं दारक ! मा भीर्दानमिति । ततो जातपश्चात्तापो दत्वालोचनां प्रतिकान्त इति ।

४७. आत्मप्रशंसाध्याने श्रीपरिशिष्टपर्वोक्तः शकटालमन्त्रिदृष्टान्तः ।

कल्पकः पुनरुत्पन्नानेकपुत्रो धियांनिधिः । सुचिरं नन्दराजस्य मुद्राव्यापारमन्वशात् ।।१।।
नन्दस्य वंशे कालेन नन्दाः सप्ताभवन्नृपाः । तेषां च मन्त्रिणोऽभूवन्भूयांसः कल्पकान्वयाः ।।२।।
ततस्त्रिखण्डपृथिवीपतिः पतिरिव श्रियः । समुत्खातद्विषत्कन्दो नन्दोऽभून्नवमो नृपः ।।३।।
विशङ्कटः श्रियां वासोऽसङ्कटः शकटो धियाम् । शकटाल इति तस्य मन्त्र्यभूत्कल्पकान्वयः ।।४।।
तस्य लक्ष्मीवती नाम लक्ष्मीरिव वपुष्मती ! सधर्मचारिण्यभवच्छीलालङ्कारधारिणी ।।५।।
तयोश्च ज्येष्ठतनयो विनयालङ्कृतोऽभवत् । अस्थूलधीः स्थूलभद्रो भद्राकारनिशाकरः ।।६।।
भक्तिनिष्ठः कनिष्ठोऽभूच्छ्रीयको नन्दनस्तयोः । नन्दराड्हृदयामन्दानन्दगोशीर्षचन्दनः ।।७।।
पुरेऽभूत्तत्र कोशेति वेश्या रूपश्रियोर्वशी । वशीकृतजगच्चेता बभूव जीवनौषधिः ।।८।।
भुञ्जानो विविधान्भोगान्स्थूलभद्रो दिवानिशम् । उवास वसथे तस्या द्वादशाब्दानि तन्मनाः ।।९।।
श्रीयकस्त्वङ्गरक्षोऽभूद्भूरिविश्रम्भभाजनम् । द्वितीयमिव हृदयं नन्दस्य पृथिवीपतेः ।।१०।।
तत्र चासीद्वररुचिर्नाम द्विजवराग्रणीः । कवीनां वादिनां वैयाकरणानां शिरोमणिः ।।११।।
स्वयङ्कृतैर्नवनवैरष्टोत्तरशतेन सः । वृत्तैः प्रवृत्तोऽनुदिनं नृपावलगने सुधीः ।।१२।।
मिथ्यादृगिति तं मन्त्री प्रशशंस न जातुचित् । तुष्टोऽप्यस्मै तुष्टिदानं न ददौ नृपतिस्ततः ।।१३।।
ज्ञात्वा वररुचिस्तत्र दानाप्रापणकारणम् । आराधयितुमारेभे गृहिणीं तस्य मन्त्रिणः ।।१४।।
सन्तुष्टया तयान्येद्युः कार्यं पृष्टोऽब्रवीदिदम् । राज्ञः पुरस्तान्मे काव्यं तव भर्ता प्रशंसतु ।।१५।।
तया तदुपरोधेन तद्विज्ञप्तोऽवदत्पतिः । मिथ्यादृष्टेरमुष्याहं प्रशंसामि कथं वचः ।।१६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तयोक्तः साग्रहं मन्त्री तत्तथा प्रत्यपद्यत । अन्धस्त्रीबालमूर्खाणामाग्रहो बलवान्खलु ।।१७।।
राज्ञः पुरस्तात्पठतः काव्यं वररुचेस्ततः । अहो सुभाषितमिति वर्णयामास मन्त्रिराट् ।।१८।।
दीनारशतमष्टाग्रं ततोऽस्मै नृपतिर्ददौ । राजमान्यस्य वाचापि जीव्यते ह्यनुकूलया ।।१९।।
दीनाराष्टोत्तरशते दीयमाने दिने दिने । किमेतद्दीयत इति भूपं मन्त्री व्यजिज्ञपत् ।।२०।।
अथोचे नृपतिर्मन्त्रिन्! दद्मोऽस्मै त्वत्प्रशंसया । वयं यदि स्वयं दद्मो दद्मः किं न पुरा ततः ।।२१।।
मन्त्र्यप्यूचे मया देव ! प्रशंसा नास्य निर्मिता । काव्यानि परकीयाणि प्राशंसिषमहं तदा ।।२२।।
पुरो नः परकाव्यानि स्वकीकृत्य पठत्ययम् । किमेतत्सत्यभावेनेत्यभाषत नृपस्ततः ।।२३।।
एतत्पठितकाव्यानि पठन्तीर्बालिका अपि । दर्शयिष्यामि वः प्रातरित्यूचे सचिवोऽपि च ।।२४।।
यक्षा यक्षदत्ता भूता भूतदत्तैणिका तथा । वेणा रेणेति सप्तासन्प्राज्ञाः पुत्र्यस्तु मन्त्रिणः ।।२५।।
गृह्णाति ज्यायसी तासां सकृदुक्तं तथेतराः । द्वित्र्यादिवारक्रमतो गृह्णन्ति स्म यथाक्रमम् ।।२६।।
राज्ञः समीपं सचिवो द्वितीयेऽह्नि निनाय ताः । तिरस्करिण्यन्तरिताः समुपावेशयच्च सः ।।२७।।
अष्टोत्तरशतं श्लोकान्स्वयं निर्माय नैत्यिकान् । ऊचे वररुचिस्तास्तु यथाज्येष्ठमनूचिरे ।।२८।।
ततो वररुचे रुष्टो राजा दानं न्यवारयत् । उपायाः सचिवानां हि निग्रहानुग्रहक्षमाः ।।२९।।
ततो वररुचिर्गत्वा यन्त्रं गङ्गाजले व्यधात् । तन्मध्ये वस्त्रवद्धं च दीनारशतमष्टयुक् ।।३०।।
प्रातर्गङ्गामसौ स्तुत्वा यन्त्रमाक्रामदंह्रिणा । दीनारास्ते च तत्पाणावुत्पत्य न्यपतंस्ततः ।।३१।।
स एवं विदधे नित्यं जनस्तेन विसिष्मिये । तच्च श्रुत्वा जनश्रुत्या राजाशंसत मन्त्रिणे ।।३२।।
इदं यद्यस्ति सत्यं तत्प्रातर्वीक्षामहे स्वयम् । इत्युक्तो मन्त्रिणा राजा तत्तथा प्रत्यपद्यत ।।३३।।
दत्त्वा शिक्षां चरः सायं प्रेषितस्तत्र मन्त्रिणा । शरस्तम्बनिलीनोऽस्थात्पक्षीवानुपलक्षितः ।।३४।।
तदा वररुचिर्गत्वा छन्नं मन्दाकिनीजले । दीनाराष्टोत्तरशतग्रन्थिं न्यस्य ययौ गृहे ।।३५।।
तज्जीवितमिवादाय दीनारग्रन्थिमादरात् । चरः समर्पयामास प्रच्छन्नं वरमन्त्रिणे ।।३६।।
अथ गुप्तात्तदीनारग्रन्थिर्मन्त्री निशात्यये । ययौ राज्ञा समं गङ्गामागाद्वररुचिस्तदा ।।३७।।
द्रष्टुकामं नृपं दृष्ट्वोत्कृष्टमानी सविस्तरम् । स्तोतुं प्रववृते गङ्गां मूढो वररुचिस्ततः ।।३८।।
स्तुत्यन्तेऽचालयद्यन्त्रं यदा वररुचिः परम् । दीनारग्रन्थिरुत्पत्य नापतत्पाणिकोटरे ।।३९।।
ग्रन्थिं गवेषयामास पाणिना तज्जले ततः । सोऽस्थादपश्यंस्तूष्णीको धूर्तो घृष्टो हि मौनभाक् ।।४०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इत्यूचे च महामात्यः किं ते दत्ते न जाह्नवी । न्यासीकृतमपि द्रव्यं गवेषयसि यन्मुहुः ।।४१।।
उपलक्ष्य गृहाणेदं निजद्रव्यमिति ब्रुवन् । सोऽर्पयामास दीनारग्रन्थिं वररुचेः करे ।।४२।।
दीनारग्रन्थिना तेनोत्सर्पिहृद्ग्रन्थिनेव सः । दशामासादयामास मरणादपि दुःसहाम् ।।४३।।
विप्रतारयितुं लोकं सायमत्र क्षिपत्यसौ । द्रव्यं प्रातः पुनर्गृह्णातीत्यूचे सचिवो नृपम् ।।४४।।
साधु जातमिदं छन्नेत्यालपन्मन्त्रिपुङ्गवम् । विस्मयस्मेरनयनः स्ववेश्मागान्महीपतिः ।।४५।।
अमर्षणो वररुचिः प्रतीकारं विचिन्तयन् । गृहस्वरूपं सचिवस्यापृच्छच्चेटिकादिकम् ।।४६।।
तस्याथ कथयामास काचित्सचिवचेट्यदः । भूपतिः श्रीयकोद्वाहे भोक्ष्यते मन्त्रिवेश्मनि ।।४७।।
सज्ज्यते चात्र शस्त्रादि दातुं नन्दाय मन्त्रिणा । शस्त्रप्रियाणां राज्ञां हि शस्त्रमाद्यमुपायनम् ।।४८।।
समासाद्य छलज्ञस्तच्छलं वररुचिस्ततः । चणकादि प्रदायेति डिम्भरूपाण्यपाठयत् ।।४९।।
न वेत्ति राजा यदसौ शकटालः करिष्यति । व्यापाद्य नन्दं तद्राज्ये श्रीयकं स्थापयिष्यति ।।५०।।
स्थाने स्थाने पठन्ति स्म डिम्भा एवं दिने दिने । जनश्रुत्या तदश्रौषीदिति चाचिन्तयन्नृपः ।।५१।।
बालका यच्च भाषन्ते भाषन्ते यच्च योषितः । उत्पातिकी च या भाषा सा भवत्यन्यथा न हि ।।५२।।
तत्प्रत्ययार्थं राज्ञाथ प्रेषितो मन्त्रिवेश्मनि । पुरुषः सर्वमागत्य यथादृष्टं व्यजिज्ञपत् ।।५३।।
ततश्च सेवावसरे मन्त्रिणः समुपेयुषः । प्रणामं कुर्वतो राजा कोपात्तस्थौ पराङ्मुखः ।।५४।।
तद्भावज्ञोऽथ वेश्मैत्यामात्यः श्रीयकमब्रवीत् । राज्ञोऽस्मि ज्ञापितः केनाप्यभक्तो विद्विषन्निव ।।५५।।
असावकस्मादस्माकं कुलक्षय उपस्थितः । रक्ष्यते वत्स ! कुरुषे यद्यादेशमिमं मम ।।५६।।
नमयामि यदा राज्ञे शिरश्छिन्द्यास्तदासिना । अभक्तः स्वामिनो वध्यः पितापीति वदेस्ततः ।।५७।।
यियासौ मयि जरसाप्येवं याते परासुताम् । त्वं मत्कुलगृहस्तम्भो भविष्यसि चिरं ततः ।।५८।।
श्रीयकोऽपि रुदन्नेवमवदद् गद्गदस्वरम् । तात ! घोरमिदं कर्म श्वपचोऽपि करोति किम् ? ।।५९।।
अमात्योऽप्यब्रवीदेवमेवं कुर्वन्विचारणाम् । मनोरथान्पूरयसि वैरिणामेव केवलम् ।।६०।।
राजा यम इवोद्दण्ड; सकुटुम्बं न हन्ति माम् । यावत्तावन्ममैकस्य क्षयाद्रक्ष कुटुम्बकम् ।।६१।।
मुखे विषं तालपुटं न्यस्य नंस्यामि भूपतिम् । शिरः परासोर्मे छिन्द्याः पितृहत्या न ते ततः ।।६२।।
पित्रैवं बोधितस्तत्स प्रतिपेदे चकार च । शुभोदर्काय धीमन्तः कुर्वन्त्यापातदारुणम् ।।६३।।
भवता किमिदं वत्स ! विहितं कर्म दुष्करम् । ससम्भ्रममिति प्रोक्तो नृपेण श्रीयकोऽवदत् ।।६४।।
यदैव स्वामिना ज्ञातो द्रोह्ययं निहतस्तदा । भर्तृचित्तानुसारेण भृत्यानां हि प्रवर्तनम् ।।६५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भृत्यानां युज्यते दोषे स्वयं ज्ञाते विचारणा । स्वामिज्ञाते प्रतीकारो युज्यते न विचारणा ।।६६।।
कृतौर्ध्वदेहिकं नन्दस्ततः श्रीयकमब्रवीत् । सर्वव्यापारसहिता मुद्रेयं गृह्यतामिति ।।६७।।
अथ विज्ञपयामास प्रणम्य श्रीयको नृपम् । स्थूलभद्राभिधानोऽस्ति पितृतुल्यो ममाग्रजः ।।६८।।
पितृप्रसादान्निर्बाधं कोशायास्तु निकेतने । भोगानुपभुञ्जानस्य तस्याब्दा द्वादशागमन् ।।६९।।
आहूयाथ स्थूलभद्रस्तमर्थं भूभुजोदितः । पर्यालोच्यामुमर्थं तु करिष्यामीत्यभाषत ।।७०।।
अद्यैवालोचयेत्युक्तः स्थूलभद्रो महीभुजा । अशोकवनिकां गत्वा विममर्शेति चेतसा ।।७१।।
शयनं भोजनं स्नानमन्येऽपि सुखहेतवः । कालेऽपि नानुभूयन्ते रोरैरिव नियोगिभिः ।।७२।।
नियोगिनां स्वान्यराष्ट्रचिन्ताव्यग्रे च चेतसि । प्रेयसीनां नावकाशः पूर्णकुम्भेऽम्भसामिव ।।७३।।
त्यक्त्वा सर्वमपि स्वार्थं राजार्थं कुर्वतामपि । उपद्रवन्ति पिशुना उद्बद्धानामिव द्विकाः ।।७४।।
यथा स्वदेहद्रविणव्ययेनापि प्रयत्यते । राजार्थे तद्वदात्मार्थे यत्यते किं न धीमता ।।७५।।
विचिन्त्यैवं व्यधात्केशोत्पाटनं पञ्चमुष्टिभिः । रत्नकम्बलदशाभी रजोहरणमप्यथ ।।७६।।
ततश्च स महाभागो गत्वा सदसि पार्थिवम् । आलोचितमिदं धर्मलाभः स्तादित्यवोचत ।।७७।।
ततः स राजसदनाद् गुहाया इव केसरी । निःससार महासार; संसारकरिरोषणः ।।७८।।
किमेष कपटं कृत्वा यायी वेश्यागृहं पुनः । इत्यप्रत्ययतः क्ष्मापो गवाक्षेण निरैक्षत ।।७९।।
प्रदेशे शवदुर्गन्धेऽप्यविकूणितनासिकम् । यान्तं दृष्ट्वा स्थूलभद्रं नरेन्द्रोऽधूनयच्छिरः ।।८०।।
भगवान्वीतरागोऽसावस्मिन्धिग्मे कुचिन्तितम् । इत्यात्मानं निनिन्दोच्चैर्नन्दस्तमभिनन्दयन् ।।८१।।
स्थूलभद्रोऽपि गत्वा श्रीसम्भूतिविजयान्तिके दीक्षां सामायिकोच्चारपूर्विकां प्रत्यपद्यत ।।८२।।
गृहीत्वा श्रीयकं दोष्णि ततो नन्दः सगौरवम् । मुद्राधिकारे निःशेषव्यापारे सहिते न्यधात् ।।८३।।
चकार श्रीयको राज्यचिन्तामवहितः सदा । साक्षादिव शकटालः प्रकृष्टनयपाटवात् ।।८४।।
स नित्यमपि कोशाया विनीतः सदने ययौ । स्नेहाद् भ्रातुस्तत्प्रियापि कुलीनैर्बहुमन्यते ।।८५।।
स्थूलभद्रवियोगार्ता श्रीयकं प्रेक्ष्य सारुदत् । इष्टे दृष्टे हि दुःखार्ता न दुःखं धर्तुमीशते ।।८६।।
ततस्तां श्रीयकोऽवोचदार्ये ! किं कुर्महे वयम् । असौ वररुचिः पापोऽघातयज्जनकं हि नः ।।८७।।
अकाण्डोत्थितवज्राग्निप्रदीपनसहोदरम् । स्थूलभद्रवियोगं च भवत्या अकरोदयम् ।।८८।।
त्वज्जाम्यामुपकोशायां यावद्रक्तोऽस्त्यसौ खलः । तावत्प्रतिक्रियां काञ्चिद्विचिन्तय मनस्विनि ! ।।८९।।
तदादिशोपकोशां यत्प्रतार्य कथमप्यसौ । विधीयतां वररुचिर्मद्यपानरुचिस्त्वया ।।९०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

प्रेयोवियोजनाद्वैराद्दाक्षिण्याद्देवरस्य च । तत्प्रतिज्ञाय सा सद्योऽप्युपकोशां समादिशत् ।।९१।।
कोशायाश्च निदेशेनोपकोशा तं तथाभ्यधात् । यथा पपौ सुरामेष स्त्रीवशैः क्रियते न किम् ? ।।९२।।
सुरापानं वररुचिः स्वैरं भट्टोऽद्य कारित; उपकोशेति कोशायै शशंसाथ निशात्यये ।।९३।।
अथ कोशामुखात्सर्वं शुश्राव श्रीयकोऽपि तत् । मेने च पितृवैरस्य विहितं प्रतियातनम् ।।९४।।
शकाटालमहामात्यात्ययात्प्रभृति सोऽप्यभूत् । भट्टो वररुचिर्भूपसेवावसरतत्परः ।।९५।।
स प्रत्यहं राजकुले सेवाकाले समापतन् । राज्ञा च राजलोकैश्च सगौरवमदृश्यत ।।९६।।
अन्यदा नन्दराड्मन्त्रिगुणस्मरणविह्वलः । सदसि श्रीयकामात्यं जगादैवं सगद्गदम् ।।९७।।
भक्तिमाञ्शक्तिमान्नित्यं शकटालो महामतिः । अभवन्मे महामात्यः शक्रस्येव बृहस्पतिः ।।९८।।
एवमेव विपन्नोऽसौ दैवादद्य करोमि किम् ? । मन्ये शून्यमिवास्थानमहं तेन विनात्मनः ।।९९।।
उवाच श्रीयकोऽप्येवं किं देवेह विदध्महे । इदं वररुचिः सर्वं पापं व्यधित मद्यपः ।।१००।।
सत्यमेष सुरां भट्टः पिबतीति नृपोदिते । श्वोऽमुं दर्शयितास्मीति श्रीयकः प्रत्यभाषत ।।१०१।।
श्रीयकश्च द्वितीयेऽह्नि सर्वेषामीयुषां सदः । स्वपुंसा शिक्षितेनाग्र्यं पद्ममेकैकमार्पयत् ।।१०२।।
तत्कालं मदनफलरसभावनयाञ्चितम् । दुरात्मनो वररुचेरर्पयामास पङ्कजम् ।।१०३।।
कुतस्त्यमद्भुतामोदमिदमित्यभिवर्णिनः । घ्रातुं राजादयो निन्युर्नासाग्रे स्वं स्वमम्बुजम् ।।१०४।।
सोऽपि भट्टोऽनयद् घ्रातुं घ्राणाग्रे पङ्कजं निजम् । चन्द्रहाससुरां सद्यो रात्रिपीतां ततोऽवमत् ।।१०५।।
धिगमुं शीधुपं ब्रह्मबन्धुं बन्धवधोचितम् । सर्वैरित्याक्रुश्यमानो निर्ययौ सदसोऽथ सः ।।१०६।।
ब्राह्मणा याचितास्तेन प्रायश्चित्तमचीकथन् । तापितत्रपुणः पानं सुरापानाघघातकम् ।।१०७।।
मूषया तापितमथ पपौ वररुचिस्त्रपु । प्राणैश्च मुमुचे सद्यस्तत्प्रदाहभयादिव ।।१०८।।

४७. आत्मप्रशंसाध्याने श्रीपरिशिष्टपर्वोक्तं कोशारथिकयोः कथानकम् ।

राज्ञा प्रदत्ता कोशापि तुष्टेन रथिनेऽन्यदा । राजायत्तेति शिश्राय विना रागेण सा तु तम् ।।१।।
स्थूलभद्रं विना नान्यः पुमान्कोऽपीत्यहर्निशम् । सा तस्य रथिनोऽभ्यर्णे वर्णयामास वर्णिनी ।।२।।
रथी गत्वा गृहोद्याने पर्यङ्के च निषद्य सः । तन्मनोरञ्जनायेति स्वविज्ञानमदर्शयत् ।।३।।
माकन्दलुम्बीं बाणेन विव्याध तमपीषुणा । पुङ्खेऽन्येन तमप्यन्येनेत्याहस्तं शरालयभूत् ।।४।।
वृन्तं छित्त्वा क्षुरप्रेण बाणश्रेणिमुखस्थिताम् । लुम्बीं स्वपाणिनाकृष्यासीनस्तस्यै समार्पयत् ।।५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इदानीं मम विज्ञानं पश्येत्यालप्य सापि हि । व्यधत्त सार्षपं राशिं तस्योपरि ननर्त च ।।६।।
सूचीं क्षिप्ता तत्र राशौ पुष्पपत्रैः पिधाय ताम् । सा ननर्त च नो सूच्या विद्धा राशिश्च न क्षतः ।।७।।
ततः स ऊचे तुष्टोऽस्मि दुष्करेणामुना तव । याचस्व यन्ममायत्तं ददामि तदहं ध्रुवम् ।।८।।
सोवाच किं मयाकारि दुष्करं येन रञ्जितः । इदमप्यधिकं नास्मात्किमभ्यासेन दुष्करम् ।।९।।
किं चाम्रलुम्बीछेदोऽयं नृत्तं चेदं न दुष्करम् । अशिक्षितं स्थूलभद्रो यच्चक्रे तत्तु दुष्करम् ।।१०।।
अभुक्त द्वादशाब्दानि भोगान्यत्र समं मया । तत्रैव चित्रशालायामस्थात्सोऽखण्डितव्रतः ।।११।।
दुग्धं नकुलसञ्चारादिव स्त्रीणां प्रचारतः । योगिनां दुष्यते चेतः स्थूलभद्रमुनिं विना ।।१२।।
दिनमेकमपि स्थातुं कोऽलं स्त्रीसन्निधौ तथा । चतुर्मासीं यथातिष्ठत्स्थूलभद्रोऽक्षतव्रतः ।।१३।।
आहारः षड्रसश्चित्रशालावासोऽङ्गनान्तिके । अप्येकं व्रतलोपायान्यस्य लौहतनोरपि ।।१४।।
विलीयन्ते धातुमयाः पार्श्वे वह्नेरिव स्त्रियाः । स तु वज्रमयो मन्ये स्थूलभद्रमहामुनिः ।।१५।।
स्थूलभद्रं महासत्त्वं कृतदुष्करदुष्करम् । व्यावर्ण्य युक्ता मुद्रैव मुखे वर्णयितुं परम् ।।१६।।
रथिकोऽप्यथ पप्रच्छ य एव वर्ण्यते त्वया । को नाम स्थूलभद्रोऽयं महासत्त्वशिरोमणिः ।।१७।।
साप्यूचे शकटालस्य नन्दभूपालमन्त्रिणः । तनयः स्थूलभद्रोऽयं तवाग्रे वर्णयामि यम् ।।१८।।
तच्छ्रुत्वा सोऽपि सम्भ्रान्त इत्युवाच कृताञ्जलिः । एषोऽस्मि किङ्करस्तस्य स्थूलभद्रमहामुनेः ।।१९।।
संविग्नं साथ तं ज्ञात्वा विदधे धर्मदेशनाम् । प्रत्यबुध्यत सद्बुद्धिर्मोहनिद्रामपास्य सः ।।२०।।
प्रतिबुद्धं च तं बुद्ध्वा साख्यन्निजमभिग्रहम् । तच्छ्रुत्वा विस्मयोत्फुल्ललोचनः सोऽब्रवीदिदम् ।।२१।।
बोधितोऽहं त्वया भद्रे ! स्थूलभद्रगुणोक्तिभिः । यास्यामि तस्य पन्थानं भवत्यैवाद्य दर्शितम् ।।२२।।
कल्याणमस्तु ते भद्रे ! पालय स्वमभिग्रहम् । उक्त्वैवं सद्गुरोः पार्श्वे गत्वा दीक्षां स आददे ।।२३।।
भगवान्स्थूलभद्रोऽपि तीक्ष्णं व्रतमपालयत् । द्वादशाब्दप्रमाणश्च दुष्कालः समभूत्तदा ।।२४।।

[परिशिष्ट पर्व १७० तः १९३ श्लोकाः]

४८. परनिन्दाध्याने श्रीउपदेशमालापुष्पमालायां कूरगडुवृत्तम् ।

गच्छम्मि सरवरम्मि व कत्थइ पउमव्व पत्तसिरिनिलओ ।
आसि खमओ गुणड्ढो मासं मासेण सो खमइ ।।१।।

अन्नम्मि व पारणए भिक्खायरियाइ खुड्डगेण समं । वच्चंतो कहवि पमायओ य मंडुक्कियं हणइ ।।२।।
तो खुड्डएण कहियं महरिसि ! तुब्भेहिं चंपिया एसा । मंडुक्कियाओ तत्थ य वासारत्तोत्ति बहुयाओ ।।३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संसत्ताओ ताओ चिट्ठंति तह (हा मया) अणेगाओ ।
अह खमओ परिकुविओ पभणइ रे दुट्ठ ! एसाऽवि ।।४।।
किं मूढ ! मए निहया एसा अन्नावि किं मए हणिया ? ।
तो भावं नाऊणं तुसिणीओ खड्डओ थक्को ।।५।।

अह आवस्सयकाले सत्थावत्थंति खुड्डओ खमयं । पभणइ तं मंडुक्कि आलोयय महरिसि ! इयाणिं ।।६।।

तो अहिययरं पज्जलियकोवजलणो भणेइ सो खमओ ।
रे रे दुट्ठ ! न मुंचसि अज्जवि तमलीयनिब्बंधं ।।७।।

इय भणमाणो बहुकोवपरवसो खेलमल्लयं धेत्तुं । धावइ खुड्डगसमुहो आवडिओ अंतरा खंभे ।।८।।
मम्मपएसे निहओ किसो य पाणेहिं तो परिच्चत्तो । तो उप्पन्नो कत्थइ रन्ने दिट्ठीविसजुयाणं ।।९।।
पुव्वभवम्मि विराहियसामन्नणं कुले भुयंगाणं । जाईसरणं च इमाण अत्थि चिन्तंति तो एवं ।।१०।।
दिट्ठीविसेणं मा होउ घायणं पाणिणं तओ रत्तिं । हिंडंति इमे सव्वे भुजंति य फासुयाहारं ।।११।।
एत्तो य वसंतउरे पुत्तो अरिदमणनरवरिंदस्स । खद्धो भुयंगमेणं मओ य तो नरवरो कुविओ ।।१२।।
मारइ मारावेइ य भुयगे सव्वेऽवि अभिणिविट्ठमणो । जो य भुयंगं हणिउं तस्सावयवं पदंसेइ ।।१३।।
दीणारं देइ निवो तस्स तओ अन्नया परिभमंतो । एक्को गारुडिओ ताण नियइ रेहाओ भुयगाणं ।।१४।।
ता चिंतइ सो नूणं निसाए हिंडंति केऽवि इह भुयगा । लग्गो य तयणुसारेण पासिउं बिल्लदुवारेसु ।।१५।।

पक्खिवइ ओसहीओ ताण पभावेण तेसि भुय गाणं ।
निग्गच्छंताण सिरे छिंदइ सो उण खमगभुयगो ।।१६।।

मा कोई मए दट्ठो मरिज्ज इय गरुयधम्मबुद्धीए । पुच्छेणं निग्गच्छइ अहोमुहो तो स गारुडिओ ।।१७।।
निग्गयनिग्गयमेत्तं छिंदइ देहं तओ य दढदुक्खे । उप्पज्जंते चिंतइ सो भुयगो परमसंविग्गो ।।१८।।
रे जीव ! पुरा विहियं जं तुमए दुक्करं तवोकम्मं । पसमालंकरणेणं जइ तं समलंकियं हुज्जा ।।१९।।
तो पाविज्ज तुमंपि हु सिवसोक्खं जं पुणो इमं दुक्खं । तं केवलकोवफलं इय मुणिउं तो इयाणिंपि ।।२०।।
अज्जवि करेह तं चेव उवसमं सयलधम्मसारंति । इहरा भमिहिसि नरगाइतिक्खदुक्खं भवं भीमं ।।२१।।
कित्तियमित्तं च इमं छेयणदुक्खं अणाइसंसारे । पावियअणंतदुक्खस्स तुज्झ अवसस्स इहयं तु ? ।।२२।।

खणमित्तसहियदुक्खो पुरओ पाविहिसि तुममणंतसुहं ।
जह पत्त पुव्वमुणीहि पसमवसओ अणंतेहिं ।।२३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इय भावितो सोऽवि हु गारुडिएणं भुयंगमो निहओ ।
सव्वेऽवि दंसिया नर वइस्स लद्धं उचियदव्वं ।।२४।।

एत्थंतरे नरवइं वारेई नागदेवया कावि । होही नरवर ! पुत्तो विरमसु सप्पवहपावाओ ।।२५।।
मरिउं च खमगभुयगो पुत्तत्ताए निवस्स उप्पन्नो । ठवियं च नागदत्तोत्ति तस्स नामं गुणनिहिस्स ।।२६।।
वड्ढइ य तत्थ एसो देहोवचएण उवसमेणं तु । पुव्वभवब्भासाओ य रूवसोहग्गकलिओऽवि ।।२७।।
कामत्थेसु न रज्जइ बहु मन्नइ धम्ममेव परिसत्थं । साहूणं च सयासे गयस्स अह अन्नया तस्स ।।२८।।
जायं जाईसरणं पियराइं मोइऊण तो एसो । संविग्गो पव्वइओ विहिणा गरुयाए रिद्धीए ।।२९।।
पालइ य निक्कलंकं सामन्नं केवलं च भुक्खालू । तो भुंजइ दो तिन्निऽवि वोर निरवज्जमाहारं ।।३०।।
तम्मि य गच्छे खवगा विज्जंति महातवस्सिणो चउरो । चउमासियतेमासियदोमासियमासभोई य ।।३१।।
दट्ठूण ते विचिंतइ खुड्डओ सहलजीवियमिमेसिं । जे कम्मसेलकुलिसं करंति एवं तवोकम्मं ।।३२।।
अहयं तु मंदभग्गो जो पइदियहंपिऽणेगवाराओ । पढणसवणपलिमंथं भुंजामि असारमाहारं ।।३३।
पत्ताएवि हु एरिस सामग्गीए सकम्ममलपडलं । तवहुयवहेण दहिउं कणयं व न जीव ! जइ सुद्धो ।।३४।।

ता कत्थ गओ सुज्झिहिसि हंत ? इय भावणाएँ सुद्धमणो ।
होइ इमेणवि मह ताव निज्जरा इय विचिंतेउं ।।३५।।

वेयावच्चे खवगाण गिण्हए नियममेस गुरुमूले । कुव्वंतस्स य निच्चं तमन्नदियहम्मि आगंतुं ।।३६।।
खवगे अइक्कमित्ता सव्वेवि हु देवयाए पणिवइओ । सो चेव खुड्डओ तो नियत्तए जाव सा तत्तो ।।३७।।
चउमासियखवगेणं धरिउं वत्थंचलम्मि कोवेण । भणिया पावे ! कडपूयणे तुमं किमिह पत्तासि ? ।।३८।।

वंदसि तिकालभोइं एयं जं लंघिउं महाखवगे ।
तो पभणइ देवता तं तवस्सि ! किं कुप्पसि अकज्जं ? ।।३९।।

वंदामि भावखवगं न दव्वखवगंति सा य भावखमा ।
जाणह तुब्भे सयमेव अप्पणो जारिसी अत्थि ।।४०।।

दव्वखवगा उ लोए दारिद्दछुहाइपीडिया सुलहा । पत्ताइं दव्वखवगत्तणाइं पुव्विं चऽणंताइं ।।४१।।

जंपि तिकालं भुंजइ एसोत्ति भणेसि मच्छरो सोऽवि ।
उववासो च्चिय निच्चं एरिसयाणं जओ भणियं ।।४२।।

निरवज्जाहाराणं साहूणं निच्चमेव उववासो । उत्तरगुणवड्ढिकए तहवि हु उववासमिच्छंति ।।४३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सत्तीए तवो य जिणेहिं भासिओ तं च गोवए न इमो ।
तो किह तवेण हीणो एसोऽह समहिया तुब्भे ? ।।४४।।

इय एवमाइजुत्तीहिं खुड्डुयं देवया पसंसेउं । हिट्ठा य तग्गुणेहिं गया पभाए य दोसीणं ।।४५।। धेत्तूणं आहारं समागओ खुड्डओ निमंतेइ । चाउम्मासियखवगं कुविओ य पडिग्गहे तस्स ।।४६।। सो थुक्कइ सेसेहिवि निमंतिएहिं कहंचि तत्थेव । संविग्गो उण खुड्डो मिच्छुक्कडपुव्वयं भणइ ।।४७।। धिद्धी मज्झ पमाओ खवगाणं खेल्लमल्लओ न कओ । असमाहिकारणमहं जाओ एमाइ अप्पाणं ।।४८।। निंदंतो जाव तयं आहारं भुजिउं पयट्टो सो । ता चउहिं खवगेहिं पडिसिद्धो चिंतए एवं ।।४९।।

आहारमेत्तकज्जे तल्लिच्छोऽहं पसुव्व सयकालं ।
एए उ महाखवगा तहा व सिण्हा (तवस्सिणो हाऽ) हिपोउव्व ।।५०।।

उव्वेयकारओऽहं जाओ एएसि सम्मिह तम्हा । मिच्छामिदुक्कडं मे काहं न पुणो य असमाहिं ।।५१।। इय उवसमेण सो भावणाए तह पगरिसं गओ कहवि । जह पयडियभुवणयलं उप्पन्नं केवलं नाणं ।।५२।। सुरहिपवणो पयट्टो वुट्ठं गंधोदयं कुसुमवुट्ठी । मुक्का य सुरवरेहिं निवेसिओ कणयकमलम्मि ।।५३।। इय ससुरिंदसुरेहिं विहियाए वित्थरेण महिमाए । धम्मं कहेइ नाणी भणइ य तो देवया खवगे ।।५४।। पिच्छह भो माहप्पं तिकालभोइस्स ते य तो सव्वे । निंदंता नियकोवं तस्सोवसमं च सलहंता ।।५५।। तह कहवि गया परमं संवेयं पाउणंति जह विमलं । केवलनाणं पंचवि सिद्धा य कमेण विहुयरया ।।५६।।

इय कोवेणं दुक्खं इमोऽवि पत्तो पुणो खमाए उ ।
नमिओ सुरेहिं तम्हा कुणसु खमं हणसु कोवं च ।।५७।।

४९. परगर्हाध्याने श्रीमद्भावविजयकृतश्रीउत्तराध्ययनवृत्तौ गोष्ठामाहिलकथा ।

"अथो चतुरशीत्याढ्यैर्वर्षाणां पञ्चभिः शतैः । श्रीवीरमुक्तेर्जातस्य सप्तमस्योच्यते कथा ।।१।।"
"तथाहि"-देवेन्द्रवन्दिताः पूर्वोदिताः श्रीआर्यरक्षिताः । पुरं दशपुरं जग्मुरन्यदा गच्छसंयुताः ।।२।।
तेषां शिष्यास्त्रयोऽभूवन्, विशेषेण विचक्षणाः । तेषु दुर्बलिकापुष्पमित्रनामादिमो मतः ।।३।।
द्वैतीयिकस्तु सूरीणां, सोदरः फल्गुरक्षितः । तृतीयस्त्वभवद्गोष्ठामाहिलः सूरिमातुलः ।।४।।
तदा च मथुरापुर्यामाययौ कोऽपि नास्तिकः । नास्त्यात्मेत्यादिभिर्वाक्यैर्लोकान् व्युद्ग्राहयन् बहून् ।।५।।
तत्र चाऽभूत्साधुसङ्घो, न पुनः कोऽपि वादकृत् । नास्तिकस्तु स निग्राह्यः कथञ्चिल्लोकवञ्चकः ।।६।।
इति वादिनमानेतुं, सङ्घः स मथुरास्थितः । श्रमणान् प्राहिणोत् श्रीमदार्यरक्षितसन्निधौ ।।७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इति व्यज्ञपयंस्तेऽपि, गत्वा श्रीआर्यरक्षितान् । लोकान् व्युद्ग्राहयत्युच्चैर्मथुरापुरि नास्तिकः ।।८।।
तत्तं जेतुं स्वयं पूज्या, नगरीं पावयन्तु ताम् । प्रेषयन्त्वथवा कञ्चिद्विनेयं वादिजित्वरम् ।।९।।
ततस्ते सूरयस्तत्र, वृद्धत्वाद्गन्तुमक्षमाः । वादलब्धिधरं गोष्ठामाहिलं प्रैषयंस्तदा ।।१०।।
सोऽपि तत्रागमत्सत्राऽऽह्वातुमागतसाधुभिः । वादे निरुत्तरीचक्रे, तञ्च चार्वाकमुग्रधीः ।।११।।
जितकाशी सूरिपार्श्वे, वियासुरपि स व्रती । सङ्घाग्रहवशात्तत्र, चतुर्मासीमवास्थितः ।।१२।।
इतश्च विश्ववन्द्याः श्रीआर्यरक्षितसूरयः । निजायुः प्रान्तमासन्नंविज्ञायैवमचिन्तयन् ।।१३।।
योग्यस्यैव विनेयस्य, प्रदेया गणधारिता । अयोग्यस्य तु तद्दाने, दातुर्दोषो भवेन्महान् ।।१४।।

यदाहुः-"वूढो गणहरसद्दो, गोअमाईहिं धीरपुरिसेहिं ।
जो तं ठवेइ अपत्ते, जाणंतो सो महापावो ! ।।१५।।"

तदाचार्यपदं देयं, योग्यस्यैव विवेकिना । अयोग्यस्तु न तस्यार्हः, पायसस्येव वायसः ।।१६।।
योग्यस्तु मम शिष्येषु, गुणरत्नमहोदधिः । अस्ति दुर्बलिकापुष्पमित्रनामा महाशयः ।।१७।।
सर्वेषामात्तदीक्षाणां, मद्बन्धूनां तु सर्वथा । श्रीफल्गुरक्षितो गोष्ठामाहिलो वाऽस्ति सम्मतः ।।१८।।
कांक्षन्ति गणधारित्वं, स्वजनत्वाद्धि ते तयोः । सम्यग्जानन्ति न त्वेषां, त्रयाणां गौणमन्तरम् ।।१९।।
ततस्तदन्तरं प्रोच्य, सर्वर्षीणां निजे पदे । शिष्यं दुर्बलिकापुष्पमित्राख्यं स्थापयाम्यहम् ।।२०।।
विमृश्येत्यखिलान् साधून्, समाहूय मुनीश्वरः । वल्लतैलाज्यकुम्भानां, दृष्टान्तानित्यवोचत ।।२१।।
वल्लकुम्भाद्यथा रिक्तिकर्तुं नीचैर्मुखीकृतात् । निष्पावा निखिला मध्यगता निर्यान्ति सत्वरम् ।।२२।।
एवं दुर्बलिकापुष्पमित्रनाम्नो महामतेः । जातोऽस्मि श्रुतसूत्रार्थदाने वल्लघटोपमः ।।२३।।
अधोमुखीकृतात्तैलघटात्तैलं यथा द्रुतम् । निर्याति भूरि किञ्चित्तु, तिष्ठत्यपि घटाश्रितम् ।।२४।।
फल्गुरक्षितसंज्ञस्य, श्रुताम्नायार्पणे तथा । जातोऽस्म्यहं तैलकुम्भसन्निभो भो महर्षयः ।।२५।।
अवाङ्मुखीकृतादाज्यकुम्भात्तु स्तोकमेव हि । घृतं निर्याति भूयस्तु, तिष्ठत्येव घटान्तरे ।।२६।।
एवं जातोऽस्म्यहं गोष्ठामाहिलाभिधसन्मुनेः । श्रीमत्सिद्धान्तसूत्रार्थदाने घृतघटोपमः ।।२७।।
तदयं श्रुतपाथोधिपारदृश्वा गुणोदधिः । अस्तुदुर्बलिकापुष्पमित्रर्षिर्वो गणाधिपः ।।२८।।
इयत्कालं मदादेशो, युष्माभिर्मानितो यथा । अतः परं तथा मान्यं, वचोऽमुष्य गणेशितुः ।।२९।।
अकृतेऽपि मदादेशे, जातु कोपो न मे भवेत् । अयं तु स्तोकमप्यागो, न कस्यापि सहिष्यते ।।३०।।
इत्युक्ते सूरिभिः सर्वे, प्रत्यपद्यन्त तत्तथा । ततो दुर्बलिकापुष्पमित्रमित्थं जगौ गुरुः ।।३१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गुणित्वाद्वत्स ! गच्छोऽयं, त्वदङ्के स्थाप्यते मया । तदसौ भवता मद्वत्पालनीयो महामते ! ।।३२।।
श्रीफल्गुरक्षिते गोष्ठामाहिले च यथा मया । प्रवृत्तं भवताऽप्येवं, वर्त्तितव्यं, विशेषतः ।।३३।।
इत्युक्त्वा स्थापयित्वा च, तं मुनीन्द्रं निजे पदे । विहितानशनाः स्वर्गं, जग्मुः श्रीआर्यरक्षिताः ।।३४।।
श्रीआर्यरक्षिताचार्यान्, समाकर्ण्य दिवङ्गतान् । गोष्ठामाहिलनामापि, ययौ दशपुरे द्रुतम् ।।३५।।
न्यधीयत निजे पट्टे, शिष्यः को नाम सुरिभिः ? । इति चागतमात्रोऽपि, सोऽप्राक्षीदखिलान् मुनीन् ।।३६।।
ततोऽभ्युत्थाय ते कुम्भदृष्टान्तांस्तानुदीर्य च । श्रीमदुर्बलिकापुष्पमित्राख्यं सूरिमूचिरे ।।३७।।
तन्निशम्योद्गतामर्षो, माहिलः सर्वसाधुभिः । इहैव तिष्ठतेत्युक्तोऽप्यनिच्छिन्निर्ययौ बहिः ।।३८।।
पूर्वोपाश्रयपार्श्वस्थे, स्थित्वा सोपाश्रये पृथक् । प्रावर्तिष्ठान्यसाध्वादीन्, व्युद्ग्राहयितुमुच्चकैः ।।३९।।
व्युद्ग्राहयितुमैशिष्ट, न पुनः कञ्चनापि सः । ततः सोऽन्वेषयामास, सूरीणां छिद्रमन्वहम् ।।४०।।
इतश्च पुष्पमित्राख्यसूरयोप्यर्थपौरुषीम् । सर्वर्षीणां पुरश्चक्रुः, श्रुतार्थकथनात्मिकाम् ।।४१।।
सूरीणां सन्निधानेऽर्थं, शृणुतेति महर्षिभिः । तदा प्रोक्तो माहिलर्षिर्दर्पाविष्टोऽब्रवीदिति ।।४२।।
निष्पावकुम्भकल्पस्य, तस्याभ्यर्णे महाधियः!। यूयमेव श्रुताम्नायान्, गृह्णीत निखिलानपि ।।४३।।
पूर्वं कर्म प्रवादाख्यमष्टमं सूरयस्तु ते । अध्यापयन्तो वन्ध्यादिसाधूनामभवंस्तदा ।।४४।।
तत्रावन्ध्यमतिर्वन्ध्योऽन्यदाधीत्यानुचिन्तयन् । त्रैविध्यं कर्मबन्धस्य, व्याचख्याविति तद्यथा ।।४५।।
जीवैर्हि बध्यते कर्म, बद्धं स्पृष्टं निकाचितम् । तत्र बद्धं यथा सूचीकलापस्तन्तुवेष्टितः ।।४६।।
स्पृष्टं यथा सूचिकास्ताः, किट्टेनैकत्वमाश्रिताः । निकाचितं यथा तापकुट्टनैरेकतां गताः ।।४७।।
बध्नात्येवं पूर्वमात्मा, रागादिपरिणामतः । प्रदेशैः सकलैः कर्म, विज्ञानावरणादिकम् ।।४८।।
तदेव कुरुते स्पृष्टं, तत्परीणामवृद्धितः । संक्लिष्टात्तु परीणामात्तत्करोति निकाचितम् ।।४९।।
तत्र बद्धं याति नाशमुपायैर्निन्दनादिभिः । प्रायश्चित्ताद्युपायैस्तु, स्पृष्टं कर्म निवर्तते ।।५०।।
निकाचितं तु यत्कर्म, जीवैः सुदृढबन्धनात् । उदयेनैव तत्प्रायो, वेद्यते नान्यथा पुनः ।।५१।।
इत्यनुप्रेक्षमाणं तं, गोष्ठामाहिल इत्यवक् । मैवं वादीर्यदस्माभिर्गुरुभ्यो नेदृशं श्रुतम् ।।५२।।
यदि स्यादात्मना कर्म, बद्धं स्पृष्टं निकाचितम् । तदा तदपृथग्भावान्मोक्षस्तस्य कथं भवेत् ? ।।५३।।
वन्ध्योऽभ्यधात्कथं तर्हि, सम्बन्धो जीवकर्मणोः । तत इत्यलपद्गोष्ठामाहिलः कल्पनापटुः ।।५४।।
वन्ध्योऽभ्यधात्कथं तर्हि, सम्बन्धो जीवकर्मणोः । तत इत्यलपद्गोष्ठामाहिलः कल्पनापटुः ।।५४।।
यथा कञ्चुकिनो देहं, बहिः स्पृशति कञ्चुकः । वपुषा सह सम्बद्धो, न त्वसौ जातु जायते ।।५५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

एवं कर्मापि जीवेन, स्पृष्टं बद्धं पुनर्न तत् । यस्तु तन्मन्यते बद्धं, तस्य न स्याद्भवक्षयः ।।५६।।
एतावदेव गुरुभिः, प्रोक्तं नः पाठनक्षणे । एष सूरिस्तु तत्तत्त्वं, नैव जानाति किञ्चन ।।५७।।
जाताशङ्कस्ततो गत्वा, वन्ध्यः सूरीन्द्रसन्निधौ । निवेद्य माहिलव्रचः, किं तथ्यमिति पृष्टवान् ? ।।५८।।
सूरयः प्रोचुरुक्तं हि, प्राग्मया तथ्यमेव ते । माहिलस्य तु गीर्नैव, युक्ता युक्तिविरोधतः ।।५९।।
जीवो हि स्वावगाहिभिव्याप्त एवाम्बरे स्थितम् । गृह्णाति कर्मदलिकं, जातु न त्वन्यदेशगम् ।।६०।।
तथा च वह्न्यःपिण्डवदैक्यं जीवकर्मणोः । स्यान्न तु स्पृष्टमात्रत्वं, देहकञ्चुकवत्तयोः ।।६१।।
अथात्मान्यप्रदेशस्थं, कर्मादायानुवेष्टयेत् । यद्यात्मानं तदा तस्य, घटते कञ्चुकोपमा ।।६२।।
किन्तु स्यादपसिद्धान्तस्तदा सूत्रविरोधतः । सूत्रे ह्यन्यप्रदेशस्थकर्मादानं निषिध्यते ।।६३।।
किञ्च कञ्चुकवत्कर्म, चेद्बहिःस्थितमात्मनि । वेदनापि तदा कर्मनिमित्तान्तः कथं भवेत् ? ।।६४।।
अथ संचारिभावात्स्यात्कर्म मध्येपि संस्थितम् । इत्यन्तर्वेदनापि स्यादिति चेत्तेन मन्यते ।।६५।।
तर्हि कञ्चुककल्पत्वं, कर्मणो व्याहतं स्फुटम् । कञ्चुको हि बहिः स्पृष्ट, एव स्यान्न तु मध्यगः ।।६६।।
तदा च युगपन्न स्याद्बहिर्मध्ये च वेदना । कर्मणो बहिरन्तर्वा, सम्बन्धाद्वेदना कृतः ।।६७।।
संचारित्वाच्च तत्कर्म, न गच्छति भवान्तरे । जीवेन सह देहस्थनिःश्वासादिसमीरवत् ।।६८।।
सर्वैर्जीवप्रदेशैस्तन्निबद्धं कर्म मन्यताम् । रागादिबन्धहेतूनां, सद्भावात्सकलात्मनि ।।६९।।
न चाविभागसम्बन्धात्पार्थक्यं जीवकर्मणोः । नैव भावीति विज्ञेयं, तद्वाक्याकर्णनात्त्वया ।।७०।।
यतोऽविभागसम्बन्धवतोरप्यश्महेमयोः । पृथग्भावो जायमानः, प्रत्यक्षेण निरीक्ष्यते ।।७१।।
इत्यादिभिः सूरिवाक्यैर्वन्ध्यो निःशङ्कतां गतः । माहिलायाऽवदत्तानि, द्रुतं गत्वा तदन्तिके ।।७२।।
तथापि स शठश्चित्तान्नात्याक्षीत्तं कदाग्रहम् । क्षोभनां पुनरन्यत्र, करिष्यामीति चिन्तयन् ।।७३।।
अन्यदा नवमं पूर्वं, प्रत्याख्यानाभिधं पठन् । वन्ध्यसाधुर्मुनेः प्रत्याख्यानमेवमवर्णयत् ।।७४।।
यावज्जीवं सर्वमेव, प्राणिप्राणातिपातनम् । त्रिविधं त्रिविधेनाङ्गी, प्रत्याख्याति व्रतीभवन् ।।७५।।
इत्याद्याकर्ण्य तं गोष्ठामाहिलः प्रोचिवानिति । परिमाणयुतं प्रत्याख्यानं साधोर्न युज्यते ।।७६।।
यावज्जीवमिति प्रोक्ते, कालमानमुरीकृतम् । तथा चाग्रे हनिष्यामीत्याशंसादूषणं भवेत् ।।७७।।
तस्मादपरिमाणेन, प्रत्याख्याम्यखिलं वधम् । त्रिविधं त्रिविधेनेति, वाच्यं स्वीकुर्वता व्रतम् ।।७८।।
एवं वदन्तं तं वन्ध्योऽभ्यधादिति महामतिः । आशंसा किं कालमानाज्जायते वाञ्छयाऽथवा ? ।।७९।।
आद्ये पक्षे मुनेरद्धाप्रत्याख्यानं वितन्वतः । पौरुष्यादिपदोच्चारेऽप्याशंसा स्यादनाहता ! ।।८०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पौरुष्यादिपदेनाद्धाप्रत्याख्यानेऽपि निश्चितम् । यामादिकं कालमानमेव यस्मादुदीर्यते ।।८१।।
अथ तत्रापि पदं तन्नो वाच्यमिति चेत्तदा । भवेदनशनापत्तिः, प्रव्रज्यादिन एव हि ! ।।८२।।
न च साधोर्भवेन्नाद्धाप्रत्याख्यानमिति त्वया । वक्तव्यमपसिद्धान्तदोषापत्तिर्यतो भवेत् ।।८३।।
सिद्धान्ते हि जिनैरद्धाप्रख्याख्यानं तपस्विनाम् । कर्तव्यत्वेन कथितं, दशद्याऽनागतादिकम् ।।८४।।
वाञ्छारूपो द्वितीयोऽपि, पक्षो नो युज्यते क्वचित् । मुनेरन्यभवेऽवद्यसेवाश यत्र विद्यते ।।८५।।
अन्यच्चापरिमाणत्वं, प्रत्याख्यानस्य यत्पुरा । त्वया प्रोक्तं तदपि नो, युक्तं युक्तिविरोधतः ।।८६।।
क्रियमाणेऽपरिणामप्रत्याख्याने हि जायते । अनागताद्धा सर्वापि, प्रत्याख्यानस्य गोचरः ।।८७।।
तदा चायुःक्षयादेवभवं गतवतो यतेः । सावद्यसेवनेऽवश्यं, व्रतभङ्ग प्रसज्यते ! ।।८८।।
अथ यावच्छक्ति यस्मात्, प्रत्याख्यानं विधीयते । तस्मादपरिमाणत्वमिति चेदभिधीयते ।।८९।।
तर्हि शक्तिमितं प्रत्याख्यानमङ्गीकृतं स्वयम् । तथा चापरिमाणत्वस्वीकारस्तस्य नोचितः ।।९०।।
किञ्चाशंसावशान्नैव, यावज्जीवेति पठ्यते । व्रतभङ्गभयात्किन्तु, यावज्जीवेति पठ्यते ।।९१।।
आशंसारहितत्वेन, तत्सावधिकमप्यहो । प्रत्याख्यानं न दोषाय, कायोत्सर्गनिदर्शनात् ।।९२।।
इत्यादिवन्ध्यवचनं, न यदा स्वीचकार सः । तदा सर्वेऽपि मुनयस्तमेवं प्रोचिरे मुहुः ।।९३।।
महात्मन्नित्थमेवेदं, वन्ध्यवाक्यमुरीकुरु । एवमेवैतदुक्तं श्रीआर्यरक्षितसूरिभिः ।।९४।।
अन्येऽपि स्थविरा अन्यगच्छीया ये बहुश्रुताः । तेऽपि पृष्टा जगुः प्रत्याख्यानं सावधिकं ध्रुवम् ।।९५।।
तथाऽपि माहिलो नैव, तं कदाग्रहमत्यजत् । आग्रहो ह्यङ्गिनां प्रायोऽसाध्यः स्यात्क्षयरोगवत् ।।९६।।
तानित्यूचे च नो यूयं, तत्त्वं जानीथ किञ्चन । तीर्थङ्करैर्हि भावोऽयं, कथितोऽस्ति मदुक्तवत् ।।९७।।
ततः साध्वादिकः सर्वसङ्घः प्रष्टुं जिनेश्वरम् । उद्दिश्य शासनसुरीं, कायोत्सर्गं विनिर्ममे ।।९८।।

सुरी साऽप्याऽऽययौ ब्रूत, किं करोमीति वादिनी ? ।
सङ्घ स्माहेति पृच्छ त्वं, गत्वा सीमन्धराधिपम् ।।९९।।

किं गोष्ठामाहिलमुनिरुदीरयति सूनृतम् । सङ्घो दुर्बलिकापुष्पमित्रादिः सकलोऽथवा ? ।।१००।।
ततो देव्यवदद्दत्त, कायोत्सर्गबलं मम । यथाऽनेकसुराकीर्णे, मार्गे स्यां गन्तुमीश्वरी ।।१।।
सङ्घेनाऽथ कृते कायोत्सर्गे शासनदेवता । गत्वा विदेहे सङ्घोक्तयुक्त्याऽप्राक्षीज्जगत्प्रभुम् ।।२।।
शशंस शम्भुशक्रोऽथ, सङ्घोऽसौ वक्ति सूनृतम् । माहिलस्त्वनृतं ब्रूते, निह्नवो ह्येष सप्तमः ।।३।।
तदाकर्ण्याऽऽगता देवी, सङ्घमेवमवोचत । कायोत्सर्गं पारयित्वा, भाषितं शृणुताऽर्हतः ।।४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

सङ्घः सत्यो माहिलस्तु, निह्नवोऽनृतभाषकः । तयेत्युक्तेऽवदद्गोष्ठामाहिलोऽतिकदाग्रही ! ।।५।।

असौ वराकी स्वल्पर्द्धीस्तत्र गन्तुं क्व शक्नुयात् ? ।
तत्कल्पितमियं वक्ति, न पुनर्जिनभाषितम् ! ।।६।।

ततस्तं पुष्पमित्राख्यसूरयोऽप्येवमूचिरे । सम्यक् श्रद्धेहि नोचेत्त्वं, सङ्घबाह्यः करिष्यसे ! ।।७।।

तथापि तत्तन्मतमत्यजन्तं, चकार सङ्घोऽखिलसङ्घबाह्यम् ।
व्युद्ग्राहयन् सोऽपि जनाननेकान्, बभ्राम भूमौ गतबोधिरत्नः ! ।।१०८।।

५०. परिग्रहध्याने श्रीउपदेशप्रासादकथितस्य चारुदत्तस्य दृष्टान्तः ।

चम्पायां भानुश्रेष्ठी वसति, तस्य पुत्रश्चारुदत्तः, स यौवनेऽनुरूपकन्यां परिणायितः, क्रमाद्विषयविरक्तः स्त्रियं नेच्छति, पश्चाच्चारुदत्तश्चातुर्यं शिक्षितुं गणिकागृहे मुक्तः, शनैः शनैस्तदासक्तो जातो गृहमपि तत्याज, द्वादशवर्षान्ते पित्रा स्वायुः प्रान्ते आकार्य पुत्रस्योक्तं–"आजन्म त्वया मत्कथितं न कृतं, अतः परमेत्कुरु, सङ्कटेऽयं नमस्कारः स्मर्त्तव्यः, ततो मातापित्रोः स्वर्गमनानन्तरं तेन सर्वस्वं निर्गमितं, पत्नी तु स्वपितुर्गृहे गता, ततः श्वशुरधनं लात्वा वार्द्धौ यानारूढः श्रिये चचाल । यानं भग्नम् । पुण्यात्फलकं प्राप्य निःसृत्य मातुलगृहे ययौ । तस्माद्धनं लात्वा मार्गे गच्छतो धाट्या धनं हृतम् । ततः पृथिवीं भ्रमतस्तस्य कश्चिद्योगी मिलितः । तेनार्द्धार्द्धभागं कृत्वा मञ्चिकारूढो रसकूपिकायां मुक्तः । तेन रसेन कुम्भो भृतः, स कुम्भो मञ्चिकामाकृष्य योगिना गृहितः । ततो मञ्चिका मध्ये क्षिप्ता, तद्रसकुम्भं लात्वा स योगी नष्टः, तत्रैकस्य म्रियमाणस्य नरस्य नमस्कारो दत्तः । तत्र दिनत्रयं क्षुधितो गोधापुच्छयोगेन कष्टात्ततो निर्ययौ । अग्रे गच्छतस्तस्य मातुलपुत्रो रुद्रदत्तो मिलितः, तेन प्रोक्तं–'मेषद्वयं गृह्यते, स्वर्णद्वीपे च गम्यते' । ततो मेषद्वयं गृहीतम् । ततः समुद्रतटे गतौ । रुद्रदत्तः प्राह–"एतद्द्वयं हत्वा भस्त्रिकामध्ये गृहीतक्षुरिकाभ्यामावाभ्यां प्रविश्यते । ततो भारण्डा मांसबुध्ध्योत्पाट्य स्वर्णद्वीपे नयन्ति । तत्रस्थं हेमानेष्यते" । चारुदत्त आह-'जीववधः कथं क्रियते ?' रुद्रदत्तेन शीघ्रं स्वउरभ्रो हतः, यावच्च द्वितीयं हन्ति तावच्चारुदत्तेन नमस्कारं श्रावितो मेषोऽनशनं ग्राहितः । ततो द्वावपि तयोर्भस्त्रिके प्रविष्टौ । भारण्डाभ्यामुत्पाटिते भस्त्रिके । मार्गे चारुदत्तभस्त्रिका पक्षिमुखात्सरसि पपात । ततो निर्गतः स स्थाने स्थाने भ्रमन्नेकं विद्याचरणर्षिं दृष्ट्वा प्रणम्य स्थितः । मुनिः प्राह-'अत्र मानुष्याद्यप्राप्ये स्थले त्वं कुतः समागाः ?' तेन स्वदुःखे प्रोक्ते मुनिना षष्ठं व्रतं वर्णितम् । तेन स्वीकृतम् । इतश्चैको देवोऽभ्येत्य चारुदत्तं नत्वा साधुं ववन्दे । तदा वन्दनागताभ्यां विद्याभृद्भ्यां पृष्टं-'भो देव साधुं मुक्त्वा पूर्वं गृहस्थः कथं वन्दितस्त्वया ?' ततो देवोऽवक्-"पूर्वं पिप्पलादर्षिर्बहुजनान् यज्ञं कारयित्वा पापशास्त्रं प्ररूप्य श्वभ्रं गतः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तदुत्पत्तिस्तु द्वितीयव्रतकथनावसरे प्रोक्तास्ति । श्वभ्रान्निर्गत्य पञ्चसु भवेषु छागो जातः । यज्ञेषु हुतः । षष्ठे भवे चारुदत्तेनानेनानशनं ग्राहितः नमस्कारं श्रावितच्छागः । तन्महिम्ना मृत्वा स्वर्गं गतः । स चाहं देवः । ज्ञानेन स्वगुरुदत्तधर्मवाक्यकथनाय चात्रागाम् । तेनायं पूर्वं वन्दितः पश्चाच्च साधुः" एवं श्रुत्वा चारुदत्तोऽपि वैराग्याद्दीक्षां जग्राह । तपस्तप्त्वा स्वर्गं गतः ।

५१. परपरिवादध्याने श्रीआख्यानकमणिकोशे सुभद्रासम्बन्धः ।

अंगाजणवयचूडामणि व्व पायारपरिगया आसि । चंपा नामेण पुरी सिरीए सिंगारगेह व्व ।।१।।
तत्थऽत्थि विजियसत्तू जियसत्तू नरवई नयनरिंदो । जिणसासणाणुरत्तो जिणदत्तो नाम सेट्ठी वि ।।२।।

तस्सऽत्थि पवरदुहिया दुहियाण दुहाण दलणदुल्ललिया ।
ललियकर-चरणकमला कमलालंकियतणुलया य ।।३।।

सच्छासया सुभद्दा नामेण मणुन्नसीलकुलभवणं । जिणचलणकमलसेवापरायणा रायहंसि व्व ।।४।।
सा अन्नया कयाई कीलंती नियगिहम्मि सच्छंदं । दिट्ठा तज्जनियभत्तसेट्ठिसुयबुद्धदासेण ।।५।।
तं दट्ठूण विचिंतइ तज्जन्नियसावओ नियचित्ते । एयाए अहो ! रूवं मोहइ भुवणत्तयजणं पि ।।६।।

ता किं एसा पायालकन्नया ? पणइणी अह भवस्स ? ।
किं वा वम्महदइया ? उआहु अमरंगणा का वि ? ।।७।।

एवं विचिंतयंतो विद्धो वम्महसरेण हिययम्मि । तव्वरणत्थं पेसइ नियपुरिसे नियगिहे गंतुं ।।८।।
काउं जिणदत्तो वि हु पडिवत्तिं ताण पुच्छए कज्जं । सिट्ठं च तेहिं सव्वं भणियं तो सेट्ठिणा एवं ।।९।।
तम्मि कुल-रूव-जोव्वण-लावन्नाई समग्गमवि अत्थि । होज्ज परमवरधम्मत्तणेण नेहो न एयाण ।।१०।।
अवरोप्परं पि कलहो होही सयधम्मसंथवेण सया । ता नियधूयं न हु देमि तेहिं तो बुद्धदासस्स ।।११।।
गंतुं गिहम्मि कहियं तं सोउं सो वि चिंतए हियए । मायाए सावयत्तं सिक्खेमि अहं इमीए कए ।।१२।।

साहुसमीवे गंतुं तयणु इमो पणमिऊणिमं भणइ ।
मह कहह नियधम्मं भयवं ! भवभमणभीयस्स ।।१३।।

तो साहूहिं समग्गो कहिओ जिणनाहदेसिओ धम्मो ।
सो वि तयं पडिवज्जइ भवोहभीओ व्व कवडेणं ।।१४।।

तस्साणुदिणं जिणनाहधम्मसवणेण भावियमणस्स ।
सम्मं चिय परिणमिओ मणम्मि जिणदेसिओ धम्मो ।।१५।।

तो वंदिउं मुणिंदे पभणइ भयवं ! सुणेह मह वयणं । पडिवन्नो जिणधम्मो आसि मए कन्नयाकज्जे ।।१६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इण्हिं सो च्चिय धम्मो परिणमिओ मज्झ सुद्धभावेण । सब्भावो संजाओ कवडं चिय पुव्वपुन्नेहिं ।।१७।।

ता अन्नं पि हु भयवं ! कहेह तो मुणिवरेहिं सव्वं पि ।
बारसविहे वि सावयधम्मे सम्मं स सिक्खविओ ।।१८।।

जाओ विसिट्ठसड्ढो गाढं जिणसासणम्मि अणुरत्तो । जिणपूयण-गुरुवंदण-सज्झाय-ज्झाणउज्जुत्तो ।।१९।।

एवंविहसावयगुणसंपन्नो जाव ता सयं चेव । दिन्ना जिणदत्तेणं नियधूया बुद्धदासस्स ।।२०।।

महईए विभूईए परिणीया तेण हिट्ठहियएण । तो उवभुंजइ एसो विसयसुहं तीए संजुत्तो ।।२१।।

अह अन्नया कयाई भणिओ जामाउएण जिणदत्तो । मोक्कलसु नियं धूयं नेमि जहा नियगेहम्मि ।।२२।।

तो जंपइ जिणदत्तो तत्थ गयाए इमाए तुह सयणा । दाहिस्संति कलंकं विप्पडिवत्तीए धम्मस्स ।।२३।।

तो आह बुद्धदासो इमीए भिन्नं गिहं करिस्सामि । तो जिणदत्तेण सुया सम्माणेऊण पट्ठविया ।।२४।।

नीया य नियभवमम्मि तेण नवनेहनिब्भरमणेण । दिन्नं भिन्नं भवणं तीए तओ बुद्धदासेण ।।२५।।

तयणु सुभद्दाभवणे मुणिणो निच्चं पि भत्त-पाणट्ठा ।
पविसंति वहंति पुणो पओसमियराणि तीए तओ ।।२६।।

अक्खंति बुद्धदासस्स भाउजाया इयाणि मिलिऊण । तुह दइया दुस्सीला चिट्ठइ जम्हा जईहिं समं ।।२७।।

निसुणित्तु तओ नियकन्नकडुयवयणाणि भणिउमाढत्तो । मा एरिसं पयंपह संभवइ न एयमेईए ।।२८।।

अवि नहयलाओ निवडइ रविरहरयणं कहं पि दिव्ववसा ।
तह वि सुभद्दा सीलस्स खंडणं कुणइ न कया वि ।।२९।।

अवि उप्पज्जइ गयणंगणम्मि वियसंतकमलवणसंडं ।
तह वि सुभद्दा सीलस्स खंडणं कुणइ न कया वि ।।३०।।

अवि कहवि जए जायइ पुत्तो बंझाए विहिनिओगेण ।
तह वि सुभद्दा सीलस्स खंडणं कुणइ न कया वि ।।३१।।

अवि कह वि उवरि वच्चइ वसुहा गयणं पि जाइ पायालं ।
तह वि सुभद्दा सीलस्स खंडणं कुणइ न कया वि ।।३२।।

तत्तो विलक्खवयणाणि ताणि जायाणि विहियमोणाणि ।
अह अन्नया सुभद्दाभवणम्मि समागओ साहू ।।३३।।

निप्पडिकम्मसरीरो दुक्करएकल्लपडिमपडिवन्नो । दिट्ठं तीए पविट्ठं तन्नयणे अणुयतणकणुयं ।।३४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चिंतइ य जहा एसो निप्पडिकम्मो मुणी महासत्तो । मा विणसउ ता एयस्स नयणमेएण कणुएण ।।३५।।
इय चिंतिउं सुभद्दाए झत्ति लहुयत्तयाए साहुस्स । दिंतीए तीए भिक्खं कणुयं जीहाए संगहियं ।।३६।।
तत्तो य सुभद्दाभालरुइरसिंदूरविरइओ तिलओ । संकतो साहुनिडालमंडले दोहिं वि न नाओ ।।३७।।
दट्ठूण साहुभाले तिलयं उवलद्धछलपवेसाओ । तीए नणंदा-सासुय-भाउज्जायाओ मिलियाओ ।।३८।।
अक्खंति बुद्धदासस्स पेच्छ नियभारियासुसीलत्तं । सेवडयनिडालम्मिं पेच्छियतिलयस्स पडिबिंबं ।।३९।।
तो जाव बुद्धदासो जोयइ ता तं तहट्ठियं दट्ठुं । संजायपच्चओ सो झत्ति विरत्तो कलत्तम्मि ।।४०।।
तन्नाऊण सुभद्दाए चिंतियं पेच्छ केरिसं जायं ? । जायं मज्झ कलंकं मुणिणो वि महाणुभावस्स ।।४१।।

विसयमहाविसमोहियमणाण गिहवासबंधबद्धाण ।
जायंति कलंकाइं जियाण जं तं किमच्छरियं ? ।।४२।।
ईसा-विसाय-मय-मोह-माणमहियाण निहयबुद्धीण ।
जायंति कलंकाइं जियाण जं तं किमच्छरियं ? ।।४३।।
जं मज्झ विसयलालसमणाए गिहवासमहिवसंतीए ।
जाओ एस कलंको मणयं पि न मे इमं दुक्खं ।।४४।।
जं पुण मयंकमणिनिम्मलस्स जिणसासणस्स मालिन्नं ।
मह कज्जे संजायं तं दूमइ माणसे मज्झ ।।४५।।
ता जइ जिणिंदसासणमालिन्नं नो कहं पि अवणेमि ।
तो मज्झ मणसमाही न होज्ज मरणे वि नियमेण ।।४६।।

इय चिंतिऊण अत्थमिय दिणयरे भवणजिणवरिंदाण । रइउं पकिट्ठपूयं पमज्जिऊणं महीवीढं ।।४७।।
तयणु सुभद्दा गिण्हइ महापइन्नं न जाव मालिन्नं । अवणेमि पवयणाओ न ताव पारेमि उस्सग्गं ।।४८।।

जो जिणसासणभत्तो सो अमरो होउ मज्झ पच्चक्खो ।
अह न वि होही तो मे काउस्सग्गे वि सन्नासो ।।४९।।

इय जा काउस्सग्गेण संठिया सा खणंतरं ताव । उज्जोयंतो भवणं समागओ सुरवरो एक्को ।।५०।।
चलचवलकुंडलधरो निम्मलघोलंतमुत्तियकलावो । वरमउड-कडय-केऊर-कंकणाभरणदिप्पंतो ।।५१।।

दिट्ठो य सुभद्दाए तो भणिया तेण साविए ! कहसु ।
किं संभरिओ अहयं ? भणइ सुभद्दा तओ एवं ।।५२।।
जिणसासणमालिन्नं अवणेहि तओ य हरिसिओ अमरो ।
जंपइ सुंदरि ! इण्हिं खेयं मणयं पि मा कुणसु ।।५३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संपइ पुरीए चउरो पिहिऊणं गोउरे अहिट्ठिस्सं । तं मोत्तुं न हु अन्नो होही उग्घाडणसमत्थो ।।५४।।
गयणंगणम्मि ठाउं पभणिस्सं जा महासई का वि । सा उग्घाडउ चालणिकयसल्लिलेप्पं दुवाराइं ।।५५।।
उग्घाडिस्ससि तं चेव ताइं इय जंपिउं तओ तियसो । सोयामणिपुंओ इव झड त्ति अद्दंसणीहुओ ।।५६।।
तयणन्तरं सुभद्दा उस्सग्गं पारिऊण हिट्ठमणा । निग्गमइ निसं जाए पभायसमए पुरीलोओ ।।५७।।

उग्घाडइ जाव समुग्घडन्ति त कह वि नो कवाडाइं ।
फोडंतस्स वि फुट्टंति न उण वज्जं व लोयस्स ।।५८।।

ता सहसा उच्छलिओ रउद्दहाहारवो पुरजणस्स । आरसए एक्ककालं चउप्पयाणं समूहो वि ।।५९।।
तारिसरूवं नाऊण नरवई तयणु आउलीहूओ । चिंतइ एयं नणु दिव्वविलसियं किं पि संभविही ।।६०।।
तत्तो य पुहइपालो परिहित्ता उल्लसाडयं सेयं । धूवकडच्छुयहत्थो होउं पउरेहिं परियरिओ ।।६१।।

विन्नवइ विणयपुव्वं विहियपणामो सुकोमलगिराहिं ।
काउं महापसायं निसुणउ विन्नत्तियं मज्झ ।।६२।।

देवस्स दाणवस्स व भूयस्य व किन्नरस्स कस्स वि य ।
जस्स मए अवरद्धं खमउ समग्गं पि सो मज्झ ।।६३।।

तत्तो गयणे ठाऊण तेण अमरेण भणियमेयं भो ! । जा का वि इह पुरीए महासइत्तं समुव्वहइ ।।६४।।
सा रमणी चालणियापक्खित्तजलेण तिन्नि वाराओ । अच्छोडिउं कवाडे उग्घाडउ निव्वियप्पं ति ।।६५।।

तं निसुणिऊण अहमहमिगाए सव्वाओ पुरपुरंधीओ ।
राया-ऽमच्च-महायणभज्जाबहुयाओ वहुयाओ ।।६६।।

कयन्हाण-मंगलाओ महासईगव्वमुव्वहंतीओ । चालणिजलपक्खिवणे विग्गुत्ताओ समग्गाओ ।।६७।।
विग्गुत्ताओ जा सव्वनयरिनारीओ रायपज्जन्तं । ताव सुभद्दा सासुयपभिईण पुरो भणइ एवं ।।६८।।

अणुजाणसु अंब ! ममं अहमवि एयं जहा परिक्खेमि ।
हसिऊण तओ सव्वाओ ताओ एवं पयंपंति ।।६९।।

जाण कवाडाण कए विग्गुत्ताओ महासईओ वि । उग्घाडसि ताणि तुमं नूणं जा समणपरिभुत्ता ।।७०।।
ताण निवारंतीण वि संगहिया तीए चालणी पवरा । तीए जलं पक्खित्तं परिगलइ न बिंदुमित्तं पि ।।७१।।

जायाणि कसिणवयणाणि ताणि सव्वाणि तो सुभद्दा वि ।
नियकरयलकयचालिणिसलिला चलिया निवसयासे ।।७२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भूवालो वि सुभद्दं दट्ठुं करकलियचालिणीसल्लिं । अब्भुट्ठिओ सपउरो संचलिओ सम्मुहो तीए ।।७३।।

धरविलुलियसिरकमलो पणमित्तु महासईचरणकमलं ।
पभणइ माइ ! महासइ ! महापसायं करेऊण ।।७४।।

उग्घाडेसु कवाडे पुरीपओलीण ता सुभद्दा वि । पुव्वदुवारं पत्ता अणुगम्मंती नरिंदेण ।।७५।।

एत्थंतरे महासइ कोउयअक्खित्तमाणसा गयणे । संपत्ता सुर-किन्नर-विज्जाहर-असुरसंघा य ।।७६।।

तयणंतरं सुभद्दाए तिन्नि वाराओ चालणिजलेण । अच्छोडिए कवाडे काऊणं जिणनमोक्कारं ।।७७।।

उग्घाडिए कवाडे झड त्ति चिक्कारगहिरनिग्घोसे । उच्छलिए जयसद्दे सिद्धिं सुरदुंदुहिसरेण ।।७८।।

मुक्का य कुसुमवुट्ठी सुरेहिं परिमलभमंतभमरउला । जयउ सुभद्दासीलं ति जंपिउं तीए सिरउवरे ।।७९।।

तो भणइ पुहइपालो धन्ना सि तुमं महासईतिलए ! । जीए सीलेणेवं अमरा वि कुणंति सन्निज्झं ।।८०।।

तं जयउ जए सीलं जस्स पभावेण तवइ तरणी वि ।
वरिसइ य नियसमयम्मि जलहरो अमयधाराहिं ।।८१।।

तयणंतरं सुभद्दा भूवइपज्जंतपउरपरियरिया । गंतूण समुग्घाडइ दाहिण-पच्छिमपओलीओ ।।८२।।

तत्तो उत्तरदारं जलेण अभिसिंचिउं भणइ एवं । उग्घाडउ सा एयं जा वहइ महासईगव्वं ।।८३।।

अज्ज वि चंपानयरीए सा तह च्चेव चिट्ठइ पओली ।
तयणु सुभद्दा जिणनाहमंदिरं पइ समुच्चलिया ।।८४।।

सलहिज्जंती सुरवरगणेहिं विज्जाहरेहिं थुव्वंती ।
वंदीहिं पढिज्जंती गिज्जंती अमररमणीहिं ।।८५।।

पणमिज्जंती नायरजणेहिं जिणपवयणं पभावंति ।
जिणमंदिरम्मि पत्ता थुणिऊण जिणेसरं तत्थ ।।८६।।

तत्तो गंतुं वसहीए साहुणो वंदिऊण भत्तीए ।
संचलिया नियभवणे धरणियले निहियनियनयणा ।।८७।।

नच्चिरविलासिणीसुं परिवज्जिरगहिरतूरनियरेसुं । गिज्जंतचच्चरीसुं संपत्ता नियभवणम्मि ।।८८।।

तो पणमिऊण राया तग्गुणरंजियमणो गओ सगिहं ।
सीलेण सुभद्दाए दइओ वि अईव अणुरत्तो ।।८९।।

इय सा सीलपहावा सलाहणिज्जा सयाण लोयाण ।
भोत्तूण विसयसोक्खं उववन्ना तियसलोगम्मि ।।९०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

५२. परदूषणध्याने श्रीआवश्यकहारिभद्रीयवृत्तौ अङ्गऋषिकथा ।

चंपाए कोसिअज्जो नाम उवज्झाओ, तस्स दो सीसा-अंगरिसी रुद्दओ य, अंगओ भद्दओ, तेण से अंगरिसी नामं कयं, रुद्दओ सो गंठिछेदओ, ते दोवि तेण उवज्झाएण दारुगाणं पट्ठविया, अंगरिसी अडवीओ भारं गहाय पडिएति, रुद्दओ दिवसे रमित्ता वियाले संभरियं ताहे पहाविओ अडविं, तं च पेच्छइ दारुगभारएण एन्तगं, चिंतेइ य-निच्छूढोमि उयज्झाएणंति, इओ य जोइजसा नाम वच्छवाली पुत्तस्स पंथगस्स भत्तं नेऊण दारुगभारएण एइ, रुद्दएण सा एगाए खड्डाए मारिया, तं दारुगभारं गहाय अण्णेण मग्गेण पुरओ आगओ उवज्झायस्स हत्थे धुणमाणो कहेइ-जहा णेण तुज्झ सुंदरसीसेण जोइजसा मारिया, रमणविभासा, सो आगओ, धाडिओ वणसंडे चिंतेइ-सुहज्झवसाणेण जाती सरिया संजमो केवलनाणं देवा महिमं करेंति, देवेहिं कहियं, जहा एएण अब्भक्खाणं दिन्नं, रुद्दगो लोगेण हीलिज्जइ, सो चिंतेइ-सच्चं मए अब्भक्खाणं दिन्नं, सो चिंतेंतो संबुद्धो पत्तेयबुद्धो, इयरो बंभणो बंभणी य दोवि पव्वइयाणि, उप्पण्णणाणाणि सिद्धाणि चत्तारिवि।

५३. आरम्भध्याने श्रीआवश्यकहारिभद्रीयवृत्तिकथितं कुरुडोत्कुरुडयोराख्यानकम् ।

चउत्थं करडओकुरुडा दोसट्टियरुवज्झाया, कुणालाणयरीए निद्धमणमूले वसही, वरिसासु देवयाणुकंपणं, नागरेहि निच्छुहणं, करडेण रूसिएण वुत्तं - 'वरिस देव ! कुणालए,' उक्कुरुडेण भणियं - 'दस दिवसाणि पंच य' पुणरवि करडेण भणियं - 'मुट्ठिभेत्ताहिं धाराहिं' उक्कुरुडेण भणियं - 'जहा रत्तिं तहा दिवं' एवं वोत्तूणमवक्कंता, कुणालाएवि पण्णरसदिवसअणुबद्धवरिसणेणं सजाणवया (सा) जलेण उक्कंता तओ ते तइयवरिसे साएए णयरे दोऽवि कालं काऊण अहे सत्तमाए पुढवीए काले णरगे बावीससागरोवमट्ठिईआ णेरइया संवृत्ता । कुणालणयरीविणासकालाओ तेरसमे वरिसे महावीरस्स केवलणाणसमुपत्ती ।

३४, ५३. अनर्थदण्डध्याने आरम्भध्याने च श्रीत्रिषष्टिशलाकापुरुषचरित्राऽन्तर्गता द्वीपायन-शाम्बयोः कथा ।

श्रीनेमिनाथमन्येद्युर्देशनान्ते जनार्दनः । नमस्कृत्य विनीतात्मा पप्रच्छेति कृतांजलिः ।।१।।
द्वारकाया यदूनां च मम च स्यात् क्षयः कथम् । हेतोः कुतोऽप्यन्यकृतः स्वयं कालवशेन वा ।।२।।
अथाख्यद्भगवान् शौर्यपुरस्य बहिराश्रमे । पराशर इति नाम्ना प्रथितस्तापसाग्रणीः ।।३।।
कन्यां नीचकुलां काञ्चिद्यमुनाद्वीपके गतः । स सिषेवे सुतश्चाभूत्तयोर्द्वैपायनाह्वयः ।।४।।
परिव्राड् ब्रह्मचारी च दान्तश्च यदुसौहृदात् । निवसंस्तत्र शांबाद्यैर्मद्यांधैर्निहनिष्यते ।।५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

स क्रुद्धो धक्ष्यति पुरीं द्वारकां यदुभिः सह । जरत्कुमारात् स्वभ्रातुस्तव चान्तो भविष्यति ।।६।।
अरे कुलांगारकोऽयमित्यन्तः कलुषाशयैः । जराकुमारो ददृशे यदुभिः सकलैरपि ।।७।।
भूत्वापि वसुदेवस्य सूनुः किं भ्रातृघात्यहम् । तत्सर्वथान्यथा कर्तुं यतेऽहमिति चिन्तयन् ।।८।।
उत्थाय नेमिं नत्वा च जारेयस्तूणयुग्मभूत् । कोदंडी कृष्णरक्षार्थं वनवासमशिश्रयत् ।।९।।
द्वैपायनोऽपि तच्छ्रुत्वा लोकश्रुत्वा प्रभोर्वचः । द्वारकाया यदूनां च रक्षार्थं वनवास्यभूत् ।।१०।।
कृष्णोऽपि स्वामिनं नत्वा विवेश द्वारकां पुरीम् । मद्यमूलो ह्यनर्थः स्यादिति मद्यं न्यवारयत् ।।११।।
कृष्णाज्ञया समीपाद्रौ कदम्बवनमध्यतः । कादंबर्यां कन्दरायां शिलाकुंडेषु भूरिशः ।।१२।।
पुराकृतानि मद्यानि सर्वे द्वारवतीजनाः । गृहश्रोतोजलमिव नीत्वा नीत्वा प्रतत्यजुः ।।१३।।
सिद्धार्थः सारथिर्भ्राता बलदेवमथावदत् । पुर्याः कुलस्य चेदृक्षां कथं द्रक्ष्यामि दुर्दशाम् ।।१४।।
तस्मान्मां विसृज स्वामिपादान्तेऽहं यथा व्रतम् । अधुनैव हि गृह्णामि कालक्षेपं सहे न हि ।।१५।।
उदश्रुस्तं बलोऽयूचे भ्रातर्युक्तं वदस्यदः । विस्रष्टुमक्षमेणापि विसृष्टोऽसि मयानघ ।।१६।।
तपस्तप्त्वा विपन्नस्त्वं देवीभूतो विपद्गतम् । संबोधयेः समये मां भ्रातृस्नेहमिमं स्मरन् ।।१७।।
आमेत्युदीर्य सिद्धार्थः प्राव्राजीत् स्वामिनोऽन्तिके । षण्मासीं च तपस्तीव्रं तप्त्वा मृत्वा दिवं ययौ ।।१८।।
इतश्च या शिलाकुंडेष्वासीत् क्षिप्ता सुरा जनैः । नानाद्रुपुष्पसंपातात्तदा स्वाद्वी बभूव सा ।।१९।।
तदा च मासे वैशाखे कोऽपि शांबस्य पूरुषः । अटन् ययौ तत्र तृषा तां च दृष्ट्वा सुरां पपौ ।।२०।।
ततः प्रमुदितस्तेन दृतिमापूर्य सीधुना । ययौ वेश्मनि शांबस्य तच्चोपायनमार्पयत् ।।२१।।
तत्सीधु दृष्ट्वा सामोदं सप्रमोदो हरेः सुतः । पायं पायं जगादैवं कुत्र लब्धमिदं त्वया ।।२२।।
सोऽप्याख्यत्सीधु तत्रस्थं शांबोऽप्यह्नि द्वितीयके । समं कुमारैर्दुर्दान्तैर्ययौ कांदबरीं गुहाम् ।।२३।।
कादंबरीगुहायोगान्नाम्ना कादंबरीं सुराम् । तां प्रेक्ष्य शांबो मुमुदे तृषितो निम्नगामिव ।।२४।।
भृत्यैरानाय्य तां शांबः पुष्पितद्रुवनान्तरे । बद्धापानः पपौ मित्रभ्रातृभ्रातृव्यसंयुतः ।।२५।।
चिरात्प्राप्तेति जीर्णेति सद्द्रव्यैः संस्कृतेति च । पिबन्तस्तां सुरां ते तु न तृप्तिमुपलेभिरे ।।२६।।
द्वैपायनर्षिं ध्यानस्थमग्रे तं गिरिमाश्रितम् । ददृशुर्मद्यपानोन्धाः क्रीडन्तस्ते कुमारकाः ।।२७।।
शांबो बभाषे स्वानित्थमयं मे नगरीं कुलम् । हन्ता तद्धन्यतामेष हनिष्यति हतः कथम् ।।२८।।
ततस्ते कुपिताः सर्वे लेष्टुभिः पादताडनैः चपेटाभिर्मुष्टिभिश्च तमाजघ्नुर्मुहुर्मुहुः ।।२९।।
पातितं तं महीपृष्ठे मृतप्रायं विधाय ते । ययुः पुरीं द्वारवतीं विविशुः स्वस्ववेश्मसु ।।३०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तच्चाज्ञासीच्चरैः कृष्णो दध्यौ चैवं विषादभाक् । अहो दुर्दांततामीषां कुमाराणां कुलान्तकृत् ।।३१।।
ततः कृष्णः सरामोऽगात्तत्र द्वैपायनं मुनिम् । अपश्यत् कोपरक्ताक्षं महाहिमिव दृग्विषम् ।।३२।।
महामात्र इव व्यालमतिमात्रभयंकरम् । त्रिदंडिनं सान्त्वयितुं तमारेभे जनार्दनः ।।३३।।
क्रोध एव महाशत्रुर्यो दुःखं नेह केवलम् । प्रदत्ते किं तु सततं जन्मलक्षेषु जन्मिनः ।।३४।।
अज्ञानैर्मद्यपानान्धैरपराद्धं ममात्मजैः । तत्सहस्व महर्षे त्वममर्षो युज्यते न ते ।।३५।।
कृष्णेनेत्युच्यमानोऽपि नाशाम्यत् स त्रिदंडिकः । इत्यूचे च कृतं कृष्ण भवतः सान्त्वभाषितैः ।।३६।।
यत्पुत्रैस्ताड्यमानेन निदानं विहितं मया । सलोकां द्वारकां दग्धुं न मोक्षोऽत्र युवां विना ।।३७।।
कृष्णं न्यषेधद्रामोऽपि मा बान्धव मुधैव हि । परिव्राजमनुनयामुकं वारितवामकम् ।।३८।।
वक्राङ्घ्रिनासिकाहस्ताः स्थूलोष्ठोदरनासिकाः । विलक्षणाक्षा हीनाङ्गाः शान्तिं यान्ति न जातुचित् ।।३९।।
अस्मिन् खलूक्त्वा तद्भ्रातर्न नाशो भाविवस्तुनः । सर्वज्ञभाषितं चापि सर्वथा नान्यथा भवेत् ।।४०।।
ततश्च शोकसन्तप्तः कृष्णः स्वसदनं ययौ । द्वैपायननिदानं च द्वारिकायां प्रकट्यभूत् ।।४१।।
अघोषयद्द्वितीयेऽह्नि नगर्यामिति शार्ङ्गभृत् । विशेषाद्धर्मनिरतास्तिष्ठतातः परं जनाः ।।४२।।
तथारेभे जनः सर्वोऽप्युपेत्य भगवानपि । श्रीनेमिः समवासार्षीत्तत्र रैवतकाचले ।।४३।।
तत्र गत्वा च नत्वा च कृष्णः शुश्राव देशनाम् । जगन्मोहमहानिद्राविद्रावणरविप्रभाम् ।।४४।।
प्रद्युम्नशाम्बौ निषध उल्मुकः सारणादयः । कुमाराः प्राव्रजन् केऽपि श्रुत्व तां धर्मदेशनाम् ।।४५।।
रुक्मिणीजाम्बवत्याद्या बह्वयश्च यदुयोषितः । स्वामिनः पादपद्मान्ते भवोद्विग्नाः प्रवव्रजुः ।।४६।।
आचख्यौ कृष्णपृष्टश्च सर्वज्ञो भगवानिदम् । द्वैपायनो द्वादशेऽब्दे धक्ष्यति द्वारिकामिमाम् ।।४७।।
दध्यौ च कृष्णो धन्यास्ते समुद्रविजयादयः । येऽग्रेऽपि प्राव्रजन् धिङ्मां राज्यलुब्धमदीक्षितम् ।।४८।।
ज्ञात्वा तदाशयं स्वामी प्रोचे कृष्ण कदापि हि । न शार्ङ्गिणः प्रव्रजन्ति निदानेन कृतार्गलाः ।।४९।।
गच्छन्त्यवश्यं तेऽधस्तात्त्वं गामी वालुकाप्रभाम् । श्रुत्वेति कृष्णः सद्योऽपि नितान्तविधुरोऽभवत् ।।५०।।
भूयोऽभ्यधत्त सर्वज्ञो मा विषीद जनार्दन । तत उद्धृत्य मर्त्यस्त्वं भावी वैमानिकस्ततः ।।५१।।
च्युत्वा भाव्यत्र भरते गंगाद्वारपुरेशितुः । जितशत्रोः सुतोऽर्हंस्त्वं द्वादशो नामतोऽममः ।।५२।।
ब्रह्मलोकं बली गामी मर्त्यो भावी ततश्च्युतः । ततोऽपि देवश्रुत्वा स भाव्यत्र भरते पुमान् ।।५३।।
उत्सर्पिण्यां प्रसर्पन्त्यां पृथिवीश जनार्दन । तीर्थनाथस्य ते तीर्थे स मोक्षमुपयास्यति ।।५४।।
इत्युदित्वा जगन्नाथो विहरन्नन्यतो ययौ । तं नत्वा वासुदेवोऽपि जगाम द्वारिकां पुरीम् ।।५५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तथैव घोषणां कृष्णः पुनः पुर्यामकारयत् । विशेषतो धर्मनिष्ठो लोकः सर्वो बभूव च ।।५६।।
मृत्वा द्वैपायनोऽप्यग्निकुमारेषूदपद्यत । सस्मार पूर्ववैरं च द्वारकामाजगाम च ।।५७।।
चतुर्थषष्ठाष्टमादिरतं तत्राखिलं जनम् । देवपूजाप्रसक्तं चापश्यद्द्वैपायनोऽसुरः ।।५८।।
धर्मप्रभावतस्तत्रोपसर्गं कर्तुमक्षमः । छिद्राण्यन्वेषयन् सोऽस्थाद्वर्षाण्येकादशोग्रधीः ।।५९।।
प्राप्तेऽब्दे द्वादशे लोको दध्यौ यत्तपसामुना । भ्रष्टो द्वैपायनो नष्टो जितश्चेति रमामहे ।।६०।।
रन्तुं प्रवृत्तास्ते स्वैरं मद्यपा मांसखादिनः । लेभेऽवकाशं छिद्रज्ञस्तदा द्वैपायनोऽपि हि ।।६१।।
उत्पाता विविधाश्चैवं कल्पान्तोत्पातसन्निभाः । प्रादुरासन् द्वारकायामन्तकद्वारदर्शिनः ।।६२।।
निपेतुरुल्का निर्घाताश्चाभवन् भूरकम्पत । ग्रहाश्च मुमुचुर्धूमं धूमकेतुविडम्बकम् ।।६३।।
अङ्गारवृष्टिं विदधे सच्छिद्रं रविमंडलम् । अकस्मादुपरागश्च चन्द्रमार्तंडयोरभूत् ।।६४।।
अट्टहासं लेप्यमयाश्चक्रुर्वेश्मसु पुत्रकाः । उद्भ्रूका जहसुश्चापि चित्रालिखितदेवताः ।।६५।।
पुर्यन्तः श्वापदाश्चेरुः स च द्वैपायनासुरः । शाकिनीभूतवेतालादिभिः परिवृतोऽभ्रमत् ।।६६।।
स्वप्नेष्वपश्यन् पौराः स्वं रक्ताम्बरविलेपनम् । पङ्कमग्नं कृष्यमाणं दक्षिणाभिमुखं तथा ।।६७।।
प्रणेशुः सीरचक्रादिरत्नानि बलकृष्णयोः । ततो विचक्रे संवर्तं वातं द्वैपायनासुरः ।।६८।।
स सर्वतोऽप्याजहार पुर्यां काष्ठतृणादिकम् । जनान् प्रणश्यतो दिग्भ्योऽप्यानीय न्यक्षिपत्पुरे ।।६९।।
दिग्भ्योऽष्टाभ्योऽपि वातेन तेनोन्मूलितशाखिना । अपूर्यत समग्रापि दारुभिर्द्वारका पुरी ।।७०।।
षष्टिं बाह्याः कुलकोटी र्द्वासप्ततिं तु मध्यगाः । संपिंड्य द्वारकापुर्यां सोऽसुरोऽग्निमदीपयत् ।।७१।।
धगग्धगिति जज्वाल क्षयानल इवानलः । नीरन्ध्रैर्धूमसन्तानैर्विश्वमप्यन्धकारयन् ।।७२।।
पदमप्यक्षमा गन्तुं मिथो निगडिता इव । सबालवृद्धास्ते पौराः पींडीभूयावतस्थिरे ।।७३।।
वसुदेवं देवकीं च रोहिणीं च रथे हरिः । आरोपयत् सरामोऽथ तानाक्रष्टुं प्रदीपनात् ।।७४।।
न चेलुस्तुरगास्तत्र न चेलुर्वृषभा अपि । सुरेण स्तंभितास्तेन वार्तिकेणेव पन्नगाः ।।७५।।
ततः स्वयं बलोपेन्द्रौ तमाचकृषतू रथम् । भग्नमक्षयुगं सद्यस्तऽत्तडिति कांडवत् ।।७६।।
तथापि तौ स्वसामर्थ्यात्तं द्वारे निन्यतू रथम् । पाहि हा राम हा कृष्णेत्याक्रन्दैर्दीनमानसौ ।।७७।।
अथ द्वारं कपाटाभ्यां झटित्येवासुरः प्यधात् । रामः पार्ष्णिप्रहारेणाभांक्षीत्तौ मृत्कपालवत् ।।७८।।
भुवा ग्रस्त इव रथस्तथपि निरगान्न हि । सोऽपि देवोऽवदद्रामकृष्णौ किं मोह एष वाम् ।।७९।।
अहो पुरापि युवयोराख्यातं यद्युवां विना । न मोक्षः कस्यचिदिह विक्रीतं हि तपो मया ।।८०।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

ततस्ते पितरोऽवोचन् हे वत्सौ गच्छतं युवाम् । युवाभ्यां ननु जीवद्भ्यां जीवन्ति यदवोऽखिलाः ।।८१।।
कृतेन पौरुषायत्तं युवाभ्यां कृतमेव हि । बलीयसी पुनरियं दुर्लंघ्या भवितव्यता ।।८२।।
दीक्षा श्रीनेमिपादान्तेऽस्मकाभिर्भाग्यवर्जितैः । नोपात्तानुभविष्यामः फलमद्य स्वकर्मणाम् ।।८३।।
इत्युक्तेऽपि यदा रामकृष्णौ नागच्छतां तदा । वसुदेवो देवकी च रोहिणी चैवमूचिरे ।।८४।।
अतः परं नः शरणं श्रीनेमिस्त्रिजगद्गुरुः । वयं चतुर्विधाहारप्रत्याख्यानमकृष्महि ।।८५।।
अर्हतः सिद्धसाधूंश्च धर्मं चार्हदुदीरितम् । अतः परं प्रपन्नाः स्मः शरणं शरणेच्छवः ।।८६।।
न वयं कस्यचित् कोऽपि नास्मदीय इति स्वयम् । विहिताराधनास्तस्थुर्नमस्कारपरायणाः ।।८७।।
तेषु द्वेपायनोऽथाग्निं ववर्षानलमेघवत् । विपद्य च ययुः स्वर्गं वसुदेवादयस्त्रयः ।।८८।।
रामकृष्णौ बहिः पुर्या जीर्णोद्यानेऽथ जग्मतुः । दह्यमानां पुरीं तत्र स्थितौ द्वावप्यपश्यताम् ।।८९।।
माणिक्यभित्तयोऽभूवंश्चूर्णसादश्मखंडवत् । गोशीर्षचन्दनस्तंभा भस्मसाच्च पलालवत् ।।९०।।
प्राकारकपिशीर्षाणि तडत्तडिति तुत्रुटुः । तलान्यपि निकेतानां फडप्फडिति पुस्फुटुः ।।९१।।
ज्वालानां नान्तरं तत्राभूज्जलानामिवार्णवे । एकानलमभूत्सर्वमेकार्णवमिव क्षये ।।९२।।
ज्वालाहस्तैर्ननर्तेव जगर्जेवानलः स्वनैः । धूमव्याजात्पौरमत्स्येष्वानायमिव चानयत् ।।९३।।
अथोचे सीरिणं कृष्णो धिग्धिक् क्लीब इवाधुना । अहं तटस्थः पश्यामि दह्यमानां निजां पुरीम् ।।९४।।
यथा नालं पुरीं त्रातुं तथा न द्रष्टुमुत्सहे । आर्य ब्रूहि क्व गच्छावो विरुद्धं सर्वमावयोः ।।९५।।
बभाषे बलभद्रोऽपि सुहृत्सम्बन्धिबान्धवाः । अस्माकं पाण्डुतनयास्तद्यावस्तन्निकेतनम् ।।९६।।
कृष्णोऽप्यूचे तदानीं ते मया निर्विषयीकृताः । कथं तद्धाम्नि यास्यावः स्वापकारेण लज्जितौ ।।९७।।
ऊचे रामोऽप्युपकारं सन्तो दधति चेतसि । कदापि कुस्वप्नमिव नापकारं स्मरन्ति तु ।।९८।।
अनेकधा सत्कृतास्ते कृतज्ञाः पांडुसूनवः । पूजामेव करिष्यन्ति भ्रातर्विमृश मान्यथा ।।९९।।
इत्युक्तः सीरिणा शार्ङ्गी प्राचलत्पूर्वदक्षिणाम् । उदिदश्य पांडवपुरीं तां पांडुमथुराभिधाम् ।।१००।।

५४. संरम्भध्याने श्रीआवश्यकहारिभद्रीयवृत्तौ क्षुल्लकमुनेः प्रबन्धः ।

सागेयं णयरं, पुंडरिओ राया, कंडरिओ जुवराया, जुवरन्नो देवी जसभद्दा, तं पुंडरीओ चंकमंती दट्ठूण अज्झोववन्नो, नेच्छइ, तहेव जुवराया मारिओ, सावि सत्थेण समं पलाया, अहुणोववन्नगब्भा पत्ता य सावत्थिं, तत्थ य सावत्थीए अजियसेणो आयरिओ, कित्तिमत्ती मयहरिया, सा तीए मूले तेणेव कमेण पव्वइया जहा धारिणी तहा विभासियव्वा, नवरं तीए दारओ न छड्डिओ खुड्डगकुमारोत्ति

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

से नामं कयं, सो जोव्वणत्थो जाओ, चिंतेइ-पव्वज्जं न तरामि काउं, मायरं आपुच्छइ-जामि, सा अणुसासइ तहवि न ठाइ, सा भणइ-तो खाइ मन्निमित्तं बारस वरिसाणि करेहि, भणइ-करेमि, पुन्नेसु आपुच्छइ, सा भणइ-मयहरियं आपुच्छामि, तीसेवि वारस वरिसाणि, ताहे आयरियस्सवि वयंणेण बारस, उवज्झायस्स बारस, एवं अडयालीसं वरिसाणि अच्छा विओ तह वि न ठाइ, विसज्जिओ, पच्छा मायाए भण्णइ-मा जहिं वा तहिं वा वच्चाहि, महल्लपिया तुज्झ पुंडरीओ राया, इमा ते पितिसंतिया मुद्दिया कंबलरयणं च मए निंतीए नीणीयं एयाणि गहाय वच्चाहित्ति, गओ णयरं, रण्णो जाणसालाए आवासिओ कल्ले रायाणं पेच्छिहामित्ति, अब्भंतरपरिसाए पेच्छणयं पेच्छइ, सा नट्टिया सव्वरत्तिं नच्चिऊण पभायकाले निद्दाइया, ताहे सा धोरिगिणी चिंतेइ-तोसिया परिसा बहुगं च लद्धं जइ एत्थ वियट्टइ तो धरिसियामोत्ति, ताहे इमं गीतियं पगाइया-

'सुट्ठु गाइयं सुट्ठु नच्चियं सुट्ठुवाइयं साम सुंदरि ।
अणुपालिय दीहराइयओ सुमिणंते मा पमायए ।।१।।

इयं निगदसिद्धैव, एत्थंतरे खुड्डएण कंबलरयणं छूढं, जसभद्देण जुवराइणा कुंडलं सयसहस्समोल्लं, सिरिकंताए सत्थवाहिणीए हारो सयसहस्समोल्लो, जयसंधिणा अमच्चेण कडगो सयसहस्समोल्लो, कण्णवालो मिंठो तेण अंकुसो सयसहस्सो, कंबलं कुंडल (कडयं) हारेगावलि अंकुसोत्ति एयाइ सहसहस्समोल्लाइ, जो य किर तत्थ तूसइ वा देइ वा सो सव्वो लिखिज्जइ, जइ जाणइ तो तुट्ठो अह न याणइ तो दंडो तेसिंति सव्वे लिहिया, पभाए सव्वे सद्दाविया, पुच्छिया, खुड्डगो ! तुब्भे कीस दिन्नं ?, सो जहा पियामारिओ तं सव्वं परिकहेइ जाव न समत्थो संजममणुपालेउं, तुब्भं मूलमागओ रज्जं अहिलसामित्ति, सो भणइ-देमि, सो खुड्डगो भणइ-अलाहि, सुमिणंतयं वट्टइ, मरिज्जा, पुव्वकओवि संजमो नासिहित्ति, जुवराया भणइ-तुमं मारेउं मग्गामि थेरो राया रज्जं न देइत्ति, सोवि दिज्जंतं नेच्छइ, सत्थवाहभज्जा भणइ-बारस वरिसाणि पउत्थस्स, पहे वट्टइ, अन्नं पवेसेमि वीमंसा वट्टइ, अमच्चो-अण्णरायाणएहिं समं घडामि, पच्चंतरायाणो हत्थिमेठं भणंति-हत्थिं आणेहि मारेह वत्ति, भणंति ते तहा करेहित्ति भणिया नेच्छंति, खुड्डगकुमारस्स मग्गेण लग्गा पव्वइया ।

५६. अधिकरणध्याने श्रीआख्यानकमणिकोशे नन्दमणिकारवृत्तान्तः ।

रमणीयदेउला-ऽऽरामराइए पुरवरम्मि रायगिहे । सिरिवीरनाहकमलमहुयरो सेणिओ राया ।।१।।
मणियारवणियवग्गस्स अग्गणी गुणमणीनईनाहो । सेट्ठी नंदो नामेण माणणीओ निवस्सऽत्थि ।।२।।
अह अन्नया य भुवणेक्कबंधवं वद्धमाणजिणनाहं । समवसरियं निसामिय समागओ वंदणत्थमिमो ।।३।।
भूमीमिलंतभालोऽभिवंदिउं जिणवरं समुवविट्ठो । विहिया तिलोयगुरुणा तत्तो सद्देसणा तस्स ।।४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

तं निसुणिऊण नंदो गिहत्थधम्मं दुवालसविहं पि ।
पडिवज्जिऊण तह पणमिऊण सामिं गिहं पत्तो ।।५।।

सम्मं गिहत्थधम्मं परिपालइ वड्ढमाणपरिणामो । संसारुत्तिन्नं पिव अप्पाणं मन्नमाणो सो ।।६।।

अह अन्नया असंजयजणस्स संसग्गओऽणुदिवसं पि ।
विरहम्मि सुविहियाणं सिढिलीहूयम्मि सम्मत्ते ।।७।।

जायम्मि जेट्ठमासे पोसहसालाए पोसहपरस्स । कयअट्ठमतवचरणस्स नंदमणियारसेट्ठिस्स ।।८।।

तन्हा-छुहाकिलंतस्स वासणा एरिसा समुप्पन्ना । ते धन्ना सप्पुरिसा ते च्चिय जीवंतु जियलोए ।।९।।

काराविया‌ओ जेहिं पुक्खरिणी‌ओ सुसीयलजलाओ ।
जासु जणो वहइ जलं पियइ तहा मज्जइ जहिच्छं ।।१०।।

ता अहमवि नरनाहं आपुच्छिय कारवेमि पोक्खरिणिं । इय चिंतिउं पभाए पारित्ता पोसहं सेट्ठी ।।११।।

परिहियवलक्खवत्थो पाहुडहत्थो निवं समल्लीणो । तप्पुरओ उवणेउं उवायणं तेण विन्नत्तं ।।१२।।

देव ! तुहाणुन्नाए पुरपरिसरमेइणीए पोक्खरिणिं । काउमभिप्पाओ मे तोऽणुन्नाओ नरिंदेण ।।१३।।

तत्तो य तेण हिंताल-ताल-ताली-तमालप्पमुहेण । सुसिणिद्धबहलसच्छायवच्छनियरेण परियरिया ।।१४।।

मुत्ताहलावलीविमलसलिलसंभारपूरिया परमा । कलहंसावलिविलसंतबहलकल्लोलपरिकलिया ।।१५।।

कल्हार-कमल-कुवलयपरायविच्छुरियनीरसंभारा । मयरंदमत्तभमरउलरोलमुहलियदिसावलया ।।१६।।

परिभमिरगरुयकरिमयर-मच्छ-मंडुक्क-कच्छवऽच्छन्ना । कारविया पोक्खरिणी नंदा नामेण नंदेणं ।।१७।।

पहियजणदाणसाला वि परिसरे तीए कारिया रम्मा । अप्पाणं कयकिच्चं तक्करणे मन्नमाणेण ।।१८।।

मज्जंतो भुंजंतो जलं पियंतो य तत्थ कीलंतो । कुणइ गुणग्गहणं से समग्गलोगो वि अन्नोन्नं ।।१९।।

नंदमणियारसेट्ठी सो च्चिय धन्नो जयम्मि सो जियउ ।
जेणेसा कारविया पोक्खरिणी सिसिरजलभरिया ।।२०।।

इय निसुणंतो नंदो मुन्नइ अप्पाणममयसित्तं व्व । अहवा सगुणथुईए हरिसिज्जइ को न जियलोए ? ।।२१।।

एवं वच्चंते केत्तियम्मि कालम्मि असुहदोसेण । तस्स सरीरे सोलस संकंता दुस्सहा रोगा ।।२२।।

पच्चक्खाओ वेज्जेहिं तयणु गुरुरोगवेयणक्कंतो । मरिउं नियपोक्खरिणीए ददुरो सन्निओ जाओ ।।२३।।

धन्नो स नंदसेट्ठी पोक्खरिणी जेण कारिया एसा । इय जणसाहुक्कारं सोउं सो सुमरए जाइं ।।२४।।

विन्नायपुव्वजम्मो विचिंतए फुरियगरुयसंवेगो ।
अहह ! अणज्जेण मए कह अप्पा पाडिओ पावे ? ।।२५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

लद्धूण वि भुवणनमिज्जमाणपयपंकयं जिणं वीरं ।
धम्ममवि भुवणगुरुणो सयासओ तस्स नाऊण ।।२६।।
सव्वं पि हारियं नियमईए मूढेण किह मए तइया ? । एयं तु मज्झ जायं मिच्छत्तफलं अहन्नस्स ।।२७।।
ता अज्ज वि किंपि सुहं करेमि जह होइ सुगइगमणं मे ।
इय चिंतिय छट्ठतवोऽभिग्गहमेसो सया कुणइ ।।२८।।
पारइ य फासुएणं आहारेणं सजाइजोग्गेण । इय धम्मज्झाणपरस्स तस्स कालो वइक्कंतो ।।२९।।
अवरम्मि अवसरे वद्धमाणसामी समोसढो तत्थ । मज्जंतो पोक्खरिणीए तीए लोओ समुल्लवइ ।।३०।।
गुणसिलए उज्जाणे चलह लहुं वीरवंदणनिमित्तं । इय निसुणिऊण सो ददुरो वि संजायभत्तिभरो ।।३१।।
समवसरणम्मि चलिओ समुल्ललंतो इमं विचिंतंतो । भूमिलियभालवट्ठो वीरजिणिंदं नमिस्सामि ।।३२।।
तत्तो य रह-तुरंगम-गयघड-सुहडोहघडियपरिवेढो । नमणत्थं वीरजिणस्स निग्गओ सेणिओ राया ।।३३।।
तस्सेगयरतुरंगमखुरेण पहओ स ददुरो मग्गे । तग्घायपीडिओ सो सरिऊण जिणेसरं वीरं ।।३४।।
विहियाणसणो मरिउं जाओ ददुरवडिंसयविमाणे । सो ददुरंकदेवो तओ य सिज्झिस्सइ विदेहे ।।३५।।

५७. असमाधिमरणध्याने श्रीमद्भावविजयकृतश्रीउत्तराध्ययनवृत्तौ स्कन्दकाचार्यकथानकम् ।

अभून्नगर्यां श्रावस्त्यां, जितशत्रुर्महीपतिः । सधर्मचारिणी तस्य, धारिणी संज्ञिकाऽभवत् ।।१।।
गौरीशयोः स्कन्द इव, स्कन्दकोऽभूत्सुतस्तयोः । पुरन्दरसुतादेश्या, पुरन्दरयशाः सुता ।।२।।
तदा दण्डकि भूपोऽभूत्कुम्भकारकृते पुरे । पुरोहितस्तु तस्याऽऽसीदभव्यः पालकाभिधः ! ।।३।।
तेन दण्डकिसंज्ञेन, भूभृता भूरिभूतिना । पुरन्दरयशाः कन्या, पितृभ्यां पर्यणायि सा ।।४।।
अन्यदा सुव्रतस्वामी, भव्याम्भोजनभोध्वगः । श्रावस्त्यां समवासार्षीत्सुरासुरनमस्कृतः ।।५।।
धन्यंमन्यः स्कन्दकोऽगात्तं नन्तुं परमेश्वरम् । श्रुत्वा तद्देशनां श्राद्धधर्मञ्च प्रत्यपद्यत ।।६।।
पुरोधाः पालकः सोऽथ, कुम्भकारकृतात्पुरात् । केनचिद्राजकार्येण, श्रावस्त्यामन्यदाऽऽययौ ।।७।।
स च भूपसभामध्ये, कुर्वन्निर्ग्रन्थगर्हणाम् । द्रुतं निरुत्तरीचक्रे, स्कन्दकेन महाधिया ।।८।।
पापः प्राप ततो द्वेषं, पालकः स्कन्दकोपरि । अपकर्त्तुम्पुनः किञ्चित्तस्य न प्राभवत्तदा ।।९।।
कृतप्रस्तुतकृत्योऽथ, पालकः स्वास्पदं ययौ । जगाम न तु तच्चित्तात्कोपः स्कन्दकगोचरः ।।१०।।
अथ श्रीसुव्रतस्वामिपादान्ते दान्तमानसः । प्राव्राजीत्स्कन्दकः साकं, मर्त्यानां पञ्चभिः शतैः ।।११।।
क्रमाद्बहुश्रुते जाते, स्कन्दके सुव्रतप्रभुः । तस्मै शिष्यतया तानि, पञ्च साधुशतान्यदात् ।।१२।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अन्येद्युः सुव्रतार्हन्तं, स्कन्दकः पृष्टवानिति । व्रजाम्यहं स्वसुर्देशमादेशः स्याद्यदि प्रभोः ।।१३।।
जगौ जगत्प्रभुस्तत्रोत्पत्स्यते मारणान्तिकः । सर्वेषामुपसर्गो वस्तच्छ्रुत्वा स्कन्दकोऽवदत् ।।१४।।
आराधनासाधको हि, नोपसर्गस्तपस्विनाम् । दुःखायते महानन्दमहानन्दाभिलाषिणाम् ! ।।१५।।
ततो ब्रूहि प्रभो ! तस्मिन्नपसर्ग उपस्थिते । आराधका भविष्यामो, वयं यद्वा विराधकाः ? ।।१६।।
स्वामी स्माह त्वां विनाऽन्ये, सर्वेप्याराधका इति । स्कन्दकस्तन्निशम्येति, व्यमृशद्धृशमुत्सुकः ।।१७।।
आराधका इयन्तः स्युर्विहारे यत्र साधवः । नूनं स शुभ एवेति, विचिन्त्य स्कन्दकोऽचलत् ।।१८।।
क्रमाद्गत्वा कुम्भकारकृते स सपरिच्छदः । उद्याने समवासार्षीत्तमश्रौषीच्च पालकः ।।१९।।
ततः प्राग्वैरशुद्ध्यर्थमुद्याने तत्र पालकः । प्रच्छन्नं गोपयामास, विविधायुधधोरणीम् ।।२०।।
इति दण्डकिराज्ञे चाऽषडक्षीणमुवाच सः । जितः परीषहैरत्र, स्कन्दकोऽस्ति समागतः ।।२१।।
अयं स्वयं महावीर्यश्चण्डदोर्दण्डविक्रमैः । साधुवेषधरैर्युक्तो, भटानां पञ्चभिः शतैः ।।२२।।
उद्याने गोपितैः शस्त्रप्रकरैरतिदारुणैः । त्वां वन्दितुं गतं हत्वा, राज्यमेतद्ग्रहीष्यति ! ।।२३।। (युग्मम्)
प्रत्ययश्चेन्न ते स्वामिन्नस्मिन्मद्वचने भवेत् । तदा तद्गोपितास्त्राणि, गत्वोद्यानं विलोकय ! ।।२४।।
एवं व्युद्ग्राहितस्तेन तदुद्यानं गतो नृपः । स्थानेषु पालकोक्तेषु, नानास्त्राणि निरैक्षत ! ।।२५।।
दृष्ट्वा तानि नृपः क्रुद्धो, मुनीन्सर्वानबन्धयत् । अकार्यं विद्यते किञ्चिन्नाऽविमृश्य विधायिनाम् ।।२६।।
पापस्य पालकस्यैव, तान्निबद्ध्यार्पयन्नृपः । यत्तुभ्यं रोचते तत्त्वमेषां कुर्या इति ब्रुवन् ! ।।२७।।
मूषकानिव मार्जारस्तान् प्राप्य मुदितोऽथ सः । संयतान् संयतान्मर्त्यपीडायन्त्रान्तिकेऽनयत् ।।२८।।
इति प्रोचे च रे ! यूयमिष्टं स्मरत दैवतम् । इदानीं पीडयिष्यामि, यन्त्रेणानेन वोऽखिलान् ।।२९।।
ततस्ते साधवो धीरा, ज्ञातोपस्थितमृत्यवः । जीविताशा मृत्युभीतिविप्रमुक्ता मनस्विनः ।।३०।।
गृहीतालोचना सम्यक्, मैत्रीभावमुपागताः । पर्यन्ताराधनां सर्वे, विदधुर्विधिपूर्वकम् ! ।।३१।। (युग्मम्)
मर्त्तव्यं कातरेणापि, धीरेणापि च भूस्पृशा । द्विधापि नियते मृत्यौ, धीरैर्भाव्यं मनस्विभिः ।।३२।।

इत्यादि वदतोत्साह्यमानाः स्कन्दकसूरिणा ।
अभवंस्ते विशेषेण, स्वदेहेऽपि गतस्पृहाः ! ।।३३।। (युग्मम्)

क्रूराशयः क्रूरकर्मा, क्रूरगीः पालकस्ततः । एकैकं श्रमणं यन्त्रे, क्षेपं क्षेपमपीडयत् ।।३४।।
पीड्यमानान् विनेयान् स्वान्, वीक्ष्यान्तर्दह्यतामयम् । इति स स्कन्दकं यन्त्रपार्श्वे बद्धमधारयत् ।।३५।।

पीड्यमानानगाराङ्गोच्छलच्छोणितबिन्दुभिः ।
समन्तादिम्रयमाणोऽपि, नाऽकुप्यत्स्कन्दकः पुनः ! ।।३६।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

किन्तु साम्यसुधास्पन्दभावितैः समयोचितैः । वाक्यैर्निर्यामयामास, तानेवं स महाशयः ! ।।३७।।
"भिन्नः शरीरतो जीवो, जीवाद्भिन्नश्च विग्रहः । विदन्निति वपुर्नाशेऽप्यन्तः खिद्येत कः कृती ? ।।३८।।
किञ्चाखिलो विपाकोऽयमस्ति स्वकृतकर्मणः । दुःखाय नोपसर्गस्तत्सतां कर्मजिघांसताम् ।।३९।।
अवश्यं नाशिनो बाह्यस्याङ्गस्याऽस्य कृते ततः । कोपः कार्यो नान्तरङ्गध्रुवधर्मधनापहः ।।४०।।"
स्कन्दकेनेति निर्याम्यमाना निर्मलमानसाः । महात्मनो विपक्षे च, मित्रे च समदृष्टयः ।।४१।।

यन्त्रपीडनपीडां तां, क्षममाणाः क्षमाधनाः ।
केवलं प्राप्य कैवल्य-सुखं ते लेभिरे क्रमात् ! ।।४२।। (युग्मम्)

द्रुतं हतेषु तेनैवं, ह्यूनपञ्चशतर्षिषु । एकं क्षुल्लकमुद्दिश्य, पालकं स्कन्दकोऽदत् ।।४३।।
अनुकम्प्यमिमं बालं, पीड्यमानं निरीक्षितुम् । नाहं शक्ष्यामि नियतं, पूर्वं पीडय मां ततः ! ।।४४।।
तच्छ्रुत्वा पालकस्तस्य, भूरि दुःखविधित्सया । गुरोः पश्यत एव द्राक्, प्राक् तं बालमपीडयत् ! ।।४५।।
शुक्लध्यानसुधासारशान्तकर्महुताशनः । बालः सोऽपि महासत्त्वो, महानन्दमविन्दत ! ।।४६।।
तद्वीक्ष्य स्कन्दकाचार्यः, क्रुद्धोऽन्तर्ध्यातवानिति । अनेन सपरीवारः, पापेनाऽस्मि विनाशितः ! ।।४७।।
क्षुल्लकोऽपि हि मद्वाचा, क्षणमेकं न रक्षितः । निग्राह्य एव पापोऽसौ, तन्मया गर्वपर्वतः ।।४८।।
अयं भूपोऽपि निग्राह्योऽस्मद्विनाशनिबन्धनम् । उपेक्षाकारिणोऽस्माकं, वध्या जानपदा अपि ! ।।४९।।
तद्दुष्करस्य चेदस्य, भवेन्मत्तपसः फलम् । तदाहं दाहकोऽमीषां, भूयासं भाविजन्मनि ! ।।५०।।
इत्थं कृतनिदानः स, पीडितस्तेन दुर्धिया । मृत्वा वह्निकुमारेषु, सुरोऽभूत्परमर्द्धिकः ।।५१।।
पुरन्दरयशास्तत्र, दिने चैवमचिन्तयत् । कुतो हेतोः पुरीमध्ये, न दृश्यन्तेऽद्य साधवः ! ।।५२।।
इतश्च स्कन्दकमुने रजोहरणमुत्तमम् । रक्ताभ्यक्तं कर इति, जगृहे गृध्रपक्षिणा ।।५३।।
तद्रजोहरणं च द्राग्, भवितव्यनियोगतः । पुरः पुरन्दरयशोदेव्या गृध्रो न्यपातयत् ।।५४।।
तच्चादायोद्वेष्टयन्ती, सा स्वयं परिकर्मितम् । काम्बलं खण्डमद्राक्षीद्भ्रातुः प्रव्रजतोर्पितम् ।।५५।।
चिह्नेन तेन च ज्ञात्वा, सोदरादीन्मुनीन् हतान् । महतीमधृतिं प्राप्ता, साऽवादीदिति भूपतिम् ।।५६।।
रे साधुद्विष्ट ! पापिष्ठ !, विनंक्ष्यत्यधुना भवान् । महर्षीणां सुराणां च नह्यवज्ञा शुभावहा ! ।।५७।।
इत्युदीर्येति दध्यौ चाऽधुनाऽहं व्रतमाददे । अलं संसारवासेनाऽमुना दुःखौघदायिना ! ।।५८।।
चिन्तयन्तीति सा देवैः, सुव्रतस्वामिसन्निधौ । नीताऽऽदाय परिव्रज्यां, परलोकमसाधयत् ! ।।५९।।
ज्ञात्वाऽथाऽवधिना प्राच्यं, स्ववृत्तं स्कन्दकामरः । क्रोधाध्मातो देशयुक्तमधाक्षीन्मंक्षु तत्पुरम् ।।६०।।
ततोऽरण्यमभूद्देशभूमौ दण्डकिभूपतेः । अद्यापि दण्डकारण्यमिति तत्प्रोच्यते बुधैः ।।६१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

५८. कर्मोदयप्रत्ययध्याने श्रीआख्यानकमणिकोसे विष्णोः प्रबन्धः ।

कन्हस्स कालपासेहिं कड्ढिओ कलियकंडकोयंडो ।
पत्तो तम्मि पएसे जराकुमारो कयंतो व्व ।।१।।

आरोविऊण धणुहरमायन्नं कड्ढिउं कढिणकंडं । कन्हो मिगबुद्धीए विद्धो वाममि पायतले ।।२।।

तत्तो भयरहिएणं ससंभमं उट्ठिऊण भणियमिमं ।
भो भो ! किल केणाहं विद्धो बाणेण पायतले ? ।।३।।

ता साहउ नियवंसं नियनामं नियकुलं नियं कज्जं ।
जेण मए न कया वि हु अयाणिओ पहयपुव्वो त्ति ।।४।।

हा हा ! धिसि धिसि ! मम चेट्ठियस्स एसो हु माणुसो कोइ ।
हरिणजुवाणो न हु होइ एस इय खिज्जिउं बहुयं ।।५।।

वंसाइयं च पुच्छइ ता तं उवसप्पिऊण साहेमि ।
भो भो ! अहयं हरिवंससंभवो जायवसगोत्तो ।।६।।

नामं जराकुमारो पुहईएक्कल्लवीरचरियस्स । जायवचित्थयनहयलमयंकवसुदेवतणयस्स ।।७।।

रुरु-हरिण-सीह-सद्दूलभीसणे काणणम्मि कण्हस्स ।
जीवियसमस्स रक्खत्थमेत्थ निवसामि अइदुहिओ ।।८।।

इयमायन्निय कण्हो जराकुमारो त्ति एस नाऊण । उग्घाडियदुहनियरो एवं भणिउं सढात्तो ।।९।।

ए ! एहि एहि भायर ! परोवयारेक्करसिय ! परिरंभ ।
एसो सोहं कण्हो तुहमप्पाणस्स वि य दुहओ ।।१०।।

तेणुत्तं परिरंभणमुचियं पजलियचियानलस्स महं ।
निल्लक्खणस्स न उणो पसत्थलक्खणवओ भवओ ।।११।।

पियबंधवस्स जीवियसमस्स बारसमवरिसमिलियस्स ।
कण्हस्स मए भयवं ! विहियमणज्जेण पाहुन्नं ।।१२।।

पावस्स किं न निवडइ गयणाओ मज्झ मत्थए वज्जं ! ।
जइ वा सो वि हु संकइ फंसभयाओ जओ भणियं ।।१३।।

एरिसकम्मरयाणं जं न पडइ खडहडंतयं वज्जं ! ।
तं नूणमिमो चिंतइ छिविउमिमे कत्थ सुज्झिस्सं ? ।।१४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इय खिज्जिऊण बहुयं कंठम्मि विलग्गिऊण कन्हस्स ।
उम्मुक्कमहाधाहं कलुणसरं रोविउं लग्गो ।।१५।।

हा कन्हं ! हा जणद्दण ! हा जायवगयणमंडणमयंक ! ।
हा ! कहमिहमायाओ नं बंधव-बंधुजणरहिओ ? ।।१६।।

किं वा विसामि जलणे ? किं वा पविसामि गुविलपायाले ? ।
कत्थ गओ सुज्झिस्सं ? कस्स मुहं दरिसइस्सामि ? ।।१७।।

आसंसारमकित्ती संजाया मज्झ मंदभग्गस्स । जह नियभाया कन्हो जराकुमारेण निहओ त्ति ।।१८।।

नियवइयरो य एसो जराकुमारस्स पुच्छमाणस्स ।
कहिओ कण्हेण तहिं सव्वो आगमणवुत्तंतो ।।१९।।

इय पलवंतो एसो बाहजलापुन्नदीणनयणजुओ । भणिओ जणद्दणेणं अवसर तं मज्झ पासाओ ।।२०।।

हिययाओ कुत्थुभमणिं पायतलाओ समुद्धरिय बाणं । पच्छाहुत्तपएहिं पयाहि तं पंडुमहुराए ।।२१।।

जइ पुण कहमवि एही बलभद्दो तो तुमं पि मारिहिही ।
मा वयउ विणासं जायवाण वंसो निरवसेसो ।।२२।।

पुव्वोइयवुत्तंतो बारवईए विणासपज्जंतो । मज्झ वि मरणं एवं कहियव्वं पंडुपुत्ताणं ।।२३।।

एवं बहुप्पयारं रुयमाणो पन्नवित्तु कन्हेण । कहमवि किच्छेण तया जराकुमारो विणिग्गमिओ ।।२४।।

कण्हो वि बाणपहरुत्थवेयणाविहुरविग्गहावयवो । वेरग्गभावियमणो चिंतिउमेवं समाढत्तो ।।२५।।

पेच्छाऽहो ! मम तारिसनिरुवमहरिवंससंभविस्सावि ।
तारिससिणिद्धबंधवसहस्सपरिवारियस्सावि ।।२६।।

खणमेत्तेण वि दुद्धरविहाणवसवत्तिणो ममेयाणिं ।
एगाणियस्स मरणं हरिणस्स व जायमुत्तं च ।।२७।।

खणदंसियसुरसरिवित्थराइं खणसुन्नरन्नसरिसाइं ।
एयाइं ताइं कम्मिंदयालिणो जीव ! ललियाइं ।।२८।।

ता अलमिमिणा परिचिंतिएण कज्जम्मि देमि नियमणं ।
भावियजिणवयणाणं जियाण परिदेवणमजुत्तं ।।२९।।

संपइ नेमिजिणेसरपमुहाणं मज्झ तित्थनाहाणं । पाया सरणं निज्जियजम्मण-मरणाण सिद्धाणं ।।३०।।

साहूण नाण-दंसण-चरणजुयाणं गओ सरणमिण्हिं । केवलिपन्नत्तस्स वि धम्मस्स महाणुभावस्स ।।३१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

इय चउसरणगओ हं सम्मं निंदामि दुक्कडं इण्हिं । सुकडं अणुमोएमो सव्वं चिय ताण पच्चक्खं ।।३२।।
पंचप्पयारमइयारजायमेसिं समक्खमालोए । वयपरिणामो पुण मज्झ जाणमाणस्स वि न जाओ ।।३३।।
ते धन्ना कयपुन्ना संबकुमाराइया मह कुमारा । रुप्पिणिपामोक्खाओ पियाओ मे निबिडनेहाओ ।।३४।।
जे चइऊणं घरवासमेरिसं दुक्खसंतइनिहाणं । जिणपासे पव्वइया ता तेसिं वयाणिमणुसरिमो ।।३५।।
संगामपमुहपावं समायरंतेण के वि जे जीवा । इहभव-अन्नभवेसु वि दुक्खविया ते खमावेमि ।।३६।।
अन्नं च सरणमिण्हिं विसेसओ मज्झ मरणसमयम्मि । जिणसासणस्स सारो परमेट्ठीणं नमोक्कारो ।।३७।।
एवं मुहुत्तमेगं जावऽच्छइ सुद्धमणपरीणामो । तावासुहकम्मवसा सरियं दीवायणरिसिस्स ।।३८।।
पेच्छ अहो ! तेण तया कुलिंगिमेत्तेण तुच्छरूवेण । भुवणे अगंजियस्स वि माणमरट्टो महं भग्गो ।।३९।।

जं मह पेच्छंतस्स वि दड्ढा नयरी सुरिंदपुरिसरिसा ।
पिय-माइ-सयणवग्गो विणासिओ पावकम्मेण ।।४०।।
ता जइ पेच्छामि तयं संपयमवि पावकारिणमणज्जं ।
कड्ढे मि तदुदराओ तो हं सकलंतरं सव्वं ।।४१।।
एवं वहगयहियओ पुणरवि जाओ किलिट्ठपरिणामो ।
जारिसिया इह व गई मई वि मरणम्मि तारिसिया ।।४२।।

रुद्दज्झाणोवगओ सुमरंतो वइरभावमणवरयं । मरिऊण समुप्पन्नोऽसुहलेसो वालुयपभाए ।।४३।।

[श्रीआख्यान० श्लोक २६९ तः ३११]

५९. ऋद्धिगौरवध्याने श्रीत्रिषष्टिशलाकापुरुषचरित्रमध्येदशार्णभद्रराजर्षिकथानकम् ।

इतश्च पुर्याश्चम्पायाः सुरासुरसमावृतः । क्रमेण विहरन् प्राय दशार्णविषयं प्रभुः ।।१।।
दशार्णपुरमित्यस्ति नाम्ना तत्र महापुरम् । दशार्णभद्र इत्यासीत्तत्र राजा महर्द्धिकः ।।२।।
सभासीनं तदा सायं तमेत्योचुश्चरा इदम् । वीरो जिनपतिः प्रातः समेष्यति पुरेऽत्र ते ।।३।।
बभार तद्गिरा हृष्टो राजा रोमाञ्चकंचुकम् । विदूरः स्तनितेनेव रत्नांकुरकदम्बकम् ।।४।।
सभासमक्षमूचे च तया ऋद्ध्या प्रगे प्रभुम् । वन्दिष्ये न यथा कश्चिद्ववन्दे त्रिजगत्यपि ।।५।।
इत्युदित्वा च मंत्र्यादीन् विसृज्य सकलानपि । जगामान्तःपुरगृहं दशार्णपुरभूपतिः ।।६।।
वन्दिष्य एवमेवं च स्तोष्ये प्रातर्जगद्गुरुम् । इति चिन्तापरोऽनैषीत् कथंचिद्यामिनीं स ताम् ।।७।।
रवावनुदयत्येव स पार्थिवरविस्ततः । आहूय नगराध्यक्षप्रभृतीनेवमादिशत् ।।८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मद्धाम्नः स्वामिसमवसरणस्य तथाऽन्तरे । मद्यानयोग्यं कर्तव्यं सर्वद्धर्या मार्गभूषणम् ।।९।।
इतश्च तत्र भगवान् पुराद्वहिरुपाययौ । देवैश्च तत्र समवसरणं च व्यरच्यत ।।१०।।

तद्राजशासनं तेऽपि राजाऽऽयुक्ताः क्षणाद्व्यधुः ।
वचसा भूभुजां सिद्धिर्मनसेव दिवौकसाम् ।।११।।

अशामि कुंकुमाम्भोभी रजस्तद्राजवर्त्मनः । अकारि तन्मार्गमही पुष्पप्रकरदन्तुरा ।।१२।।
स्थाने स्थाने व्यधीयन्त काञ्चनस्तम्भतोरणाः । मञ्चाश्च सञ्चिताः स्वर्णभाजनश्रेणिशोभिताः ।।१३।।
विचित्राश्चित्रकत्वरिभश्चीनवासोभिराचिताः । उद्दामराश्चामरैश्च रत्नादर्शैः सुदर्शनाः ।।१४।।

उद्गन्धयो गन्धपुटापुटिकाभिः सहस्रशः ।
स्तम्भैर्वर्त्माभितो न्यस्तैरबध्यन्त च मालिकाः ।।१५।। (युग्मम्)

उद्दंडैर्मंडपैर्मेघाडम्बरश्रीविडम्बिभिः । मुक्तोच्चूलवदुल्लोचैरेकच्छायं व्यधीयत ।।१६।।
पदे पदे मुमुचिरे धूपघट्यः सपावकाः । निक्षिप्तागुरुकर्पूरधूमांकुरितमण्डपाः ।।१७।।
एवं दिवः खंडमिव कृत्वा मार्गं नियोगिनः । राज्ञे व्यज्ञपयन् स्वामिदर्शनौत्सुक्यधारिणे ।।१८।।
स्नात्वा राजाऽपि दिव्यांगरागः सर्वांगभूषणः । शुचिवस्त्रधरः स्रग्वः गजमारोहदुत्तमम् ।।१९।।
मूर्ध्नि श्वेतातपत्रेण चामराभ्यां च पार्श्वयोः । राजमानो राजवर्यः सुरराज इवाचलत् ।।२०।।
महार्ध्यभूषणधरैः सामन्ताद्यैः सहस्रशः । सोऽन्वगम्यत भूपालः स्वै रूपैरिव वैक्रियैः ।।२१।।
सद्यस्तमनुचेलुश्च चलश्चामरराजिताः । पराजितशचीरूपा अन्तःपुरमृगीदृशः ।।२२।।
बन्दिवृन्दैः स्तूयमानो गीयमानश्च गायनैः । दर्श्यमानस्वविज्ञानो मार्गालंकारकारिभिः ।।२३।।
निरन्तरैर्नृपच्छन्नैर्भवन्नूतनमंडपः । क्रमेण प्राप समवसरणं स महीपतिः ।।२४।।
स त्रिः प्रदक्षिणीकृत्य ववन्दे परमेश्वरम् । आसांचक्रे यथास्थानं चाऽऽस्थाने ऋद्धिगर्वितः ।।२५।।
तस्यर्द्धिगर्वं विज्ञाय तत्प्रबोधनहेतवे । अम्भोमयं विकृतवान् विमानं पाकशासनः ।।२६।।
स्फटिकाच्छजलप्रान्तविकटाम्भोजसुन्दरम् । मरालसारसस्वानप्रतिस्वानसमाकुलम् ।।२७।।
सुरद्रुमलताश्रेणिपतत्कुसुमशोभितम् । नीलोत्पलै राजमानमिन्द्रनीलमणीमयैः ।।२८।।
नलिनीषु मरकतमयीषु परिवर्तिभिः । विभ्राजमानमधिकं स्वणाम्भोजैर्विकस्वरैः ।।२९।।

लोलकल्लोलमालाभिः पताकामालभारिणम् ।
जलकान्तविमानं तं शक्रोऽध्यास्त सुरैः सह ।।३०।। (चतुर्भिः कलापकम्)

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चामरैरमरस्त्रीभिर्वीज्यमानः सहस्रशः । गन्धर्वारब्धसंगीतदत्तकर्णो मनाग्मनाक् ।।३१।।
स्वामिपादपवित्रायां दत्तदृष्टिरधो भुवि । मर्त्यलोकमवातारीदमर्त्याधिपतिस्ततः ।।३२।। (युग्मम्)
नालेन मारकतेन राजितेष्वम्बुजन्मसु । सौवर्णेषु न्यस्तपादं सपादिमिव पर्वतम् ।।३३।।
मणीमयदन्तकोशैर्दन्तैरष्टभिरूर्जितम् । देवदूष्यच्छन्नपृष्ठं प्रष्ठं त्रिदशदन्तिनाम् ।।३४।।
पूर्वारूढसुरस्त्रीभिर्दत्तहस्तावलम्बनः । मर्त्यलोकावतीर्णोऽथाध्यारुरोह पुरन्दरः ।।३५।।
(त्रिभिर्विशेषकम्)

आगादथोपसमवसरणं भक्तिभावितः । जिनेन्द्रपादान् वन्दारुर्वृन्दारकशिरोमणिः ।।३६।।
जलकान्तविमानान्तर्लीलापुष्करिणीषु च । संगीतकानि कमले कमले चाथ जज्ञिरे ।।३७।।
प्रतिसंगीतकं चेन्द्रानुरूपविभवः सुरः । सामाजिकोऽभवद्दिव्यरूपनेपथ्यसुन्दरः ।।३८।।
एकैकस्य च देवस्य परिवारो महर्द्धिकः । मघोन इव संजज्ञे विश्वविस्मयकारणम् ।।३९।।
विमानर्द्ध्या तया शक्रः स्वयमेव विसिष्मिये । का कथा पुनरन्येषां तस्मादूनोनसंपदाम् ।।४०।।
तत्र स्थितैर्नरसुरैर्विस्मितैर्वीक्षितो हरिः । प्रभुं पृथ्वीलुलद्धारः प्रणनाम पुनः पुनः ।।४१।।
दशार्णभद्रः शक्रस्य तया ऋद्ध्याऽथ दृष्टया । नगरर्द्ध्या ग्राम्य इव स्तंभितांगोऽभवत् क्षणम् ।।४२।।
दशार्णभद्रो दध्यौ च विस्मयस्मेरलोचनः । अहो शक्रविमानस्य शोभेयं भुवनोत्तरा ।।४३।।
अहो रुचिरगात्रत्वं सुरेन्द्रकरिणोऽस्य च । अहो विभवविस्तारः पुरुहूतस्य कोऽप्यसौ ।।४४।।
स्वसंपदोऽभिमानोऽयं व्यधायि धिगहो मया । मम शक्रस्य चैतद्धि गोष्पदाब्ध्योरिवान्तरम् ।।४५।।
अमुना ऋद्धिगर्वेण स्वात्मा तुच्छीकृतो मया । कूपभेक इवाभूवं प्रागदृष्टेदशर्द्धिकः ।।४६।।
एवं भावयतस्तस्य वैराग्यं गच्छतः शनैः । परिणामः शुभतरो बभूवेत्यल्पकर्मणः ।।४७।।
ऋद्धया यद्यप्यनेनाहं विजितोऽस्मि बिडौजसा । प्रव्रज्याग्रहणादद्य पराजेष्ये तथाऽप्यमुम् ।।४८।।
न केवलं विजेष्येऽमुं व्रतादानेन संप्रति । कर्मारीनपि जेष्यामि भवभ्रमणकारिणः ।।४९।।
विवेकी चिन्तयित्वैवं दशार्णपुरभूपतिः । तत्रस्थ एव व्युमुचत् किरीटकटकादिकम् ।।५०।।
दशार्णभद्रः कर्मद्रुमूलानीव समन्ततः । उञ्चखानाथ शिरसः पंचभिर्मुष्टिभिः कचान् ।।५१।।
शक्रे संपश्यमानेऽथ विस्मयस्मेरचक्षुषि । स गत्वा गणभृत्पार्श्वे यतिलिंगमुपाददे ।।५२।।
गत्वा प्रदक्षिणापूर्वमपूर्वोत्साहसाहसः । दशार्णभद्रश्रमणो जगन्नाथमवन्दत ।।५३।।
शक्रो बभाषे महात्मन्नहो किमपि पौरुषम् । तवेदममुनाऽजैषीर्मामप्यन्यस्य का कथा ।।५४।।
इत्युक्त्वा तं नमस्कृत्य शक्रः स्वस्थानमभ्यगात् । मुनिर्दशार्णभद्रोऽपि सम्यग्व्रतमपालयत् ।।५५।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

६०. रसगौरवध्याने श्रीउपदेशप्रासाददर्शितं जितशत्रुनृपसुबुद्धिमन्त्रिवृतम् ।

चंपायां जितशत्रुर्नृपः । तस्य सुबुद्धिर्मंत्री सम्यग्जिनमतज्ञः । एकदा नृपो दिव्यरसवतीं सरसां कारयित्वा बहुसामन्तयुतो भुक्त्वा रसगृध्नुः 'अहो रसोऽहो गन्धः' इत्यादिवाक्यैः श्लाघां चकार । सुबुद्धिं विनाऽन्येऽपि सर्वे तथैव श्लाघां चक्रुः । ततो राज्ञा मंत्री पृष्टः-'त्वं किं न प्रशंससि ?' । सोऽवक्-"राजन् ! शुभाशुभवस्तुषु मम विस्मयो न । यतः पुद्गलाः सुगन्धा दुर्गन्धाः सुरसा अपि विरसा भवन्ति वैपरीत्येन वा । ततो निन्दाप्रशंसे न युक्ते" । राजा तत्र श्रद्धत्ते । अन्यदा राजा राजपाटिकायां गच्छन् मार्गे परिखोदकं बहुजीवाकुलं दुर्गन्धं सूर्यातपक्वथितं दृष्ट्वा नासिकां वस्त्रेण पिधाय 'अहो दुर्गन्धनिन्द्यं जलं' इत्यवादीत् । मंत्री प्राह-'राजन् ! मा जलं निन्द, कालप्रयोगेणाभव्यमपि भव्यतया परिणमति' । राज्ञा नांगीकृतम् । ततो मंत्रिणा रहः परिखोदकं वस्त्रगलितं स्वाप्तनरैः कोरकघटे क्षेपितं कतकचूर्णादिना च निर्मलीकृतम् । पुनर्गलितं नव्यघटेषु क्षिप्तं । एवमेकविंशत्या दिनैस्तन्नीरं स्वच्छसुखादुशीतलं लोकोत्तरप्रायमजायत । ततः सुरभिवास्यं कृत्वा नृपजलरक्षकेभ्यो दत्तम् । समये राज्ञः समीपे तैरुपनीतम् । नृपस्तस्य जलस्य लोकोत्तरगुणानुपलभ्य तान् प्रपच्छ-'केदं प्राप्तं ?' ते प्रोचुः-'मंत्रिणाऽर्पितं' । राज्ञा मंत्री पृष्टः प्राह-'राजन् यद्यभयं ददासि तदा जलोत्पत्तिं वदामि' । राज्ञाऽभये दत्ते मंत्री यथावृत्तं प्रोवाच । नृपो न श्रद्धत्ते । ततो मंत्रिणा तदध्यक्षं पूर्वोक्तविधिना कृतम् । राजा वीक्ष्य विस्मितः प्राह-'कथं त्वयैतज्ज्ञातं ?' । सोऽवदत्--"राजन् ! जिनागमश्रुतादिश्रद्धया च पुद्गलपरिणामोऽयमेवेति । हे नृप ! पुद्गलानामचिन्तनीया शक्तिः अनेकधा परिणमनस्वभावस्तिरोभावत्वेन वर्तते । स च ज्ञानिनां ज्ञान आविर्भवति । परंतु छद्मस्थानां ज्ञानावरणादिकर्मावृतानां सम्यगुपलब्धिर्न जायते । तथापि श्रुतवचोभिरवश्यं श्रद्धेयैव । यत इहलोके द्विविधाऽनुपलब्धिर्भवति । तत्रैकाऽसतो वस्तुनो यथा शशशृंगादीनां द्वितीया तु सतामप्यर्थानामनुपलब्धिर्भवति । सात्राष्टविधा । तथाहि-अतिदूरात् प्रथमा, सा त्रिविधा देशकालस्वभावविप्रकर्षात् अनुपलब्धिः । तत्र कश्चिन्नरो ग्रामान्तरं गतो न दृश्यते, तत्कथं नास्ति सः ? अस्त्येव, परं देशविप्रकर्षान्नोपलब्धिः । एवं समुद्रस्य परित्तं पर्यन्तः मेर्वादिकं च सदपि नोपलभ्यते । तथा कालेन विप्रकर्षात् अतीता निजपूर्वजादयो भविष्यत्पद्मनाभादयो जिना नोपलभ्यन्ते । तथा स्वभावविप्रकर्षात् नभोजीवपिशाचादयो न दृश्यन्ते, न च ते न सन्तीति १ । तथाऽतिसामीप्यात् यथा नेत्रकज्जलं नोपलभ्यते, तत्कथं नास्ति ? अस्त्येव २ । तथेन्द्रियघातात् । यथान्धबधिरादयो रूपशब्दादीन्नोपलभन्ते, तत्किं न सन्ति ? सन्त्येव ३ । तथा मनोऽनवस्थानात् यथाऽनवस्थितचेता गजमपि गतं न पश्यति, तत्किं नास्ति ? अस्त्येव ४ । तथा सौक्ष्म्यात् यथा जालान्तरगतत्रसरेणवः परमाणुद्व्यणुकादयो वा सूक्ष्मनिगोदादयो नोपलभ्यन्ते, तत्किं न सन्ति ?

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

भयझाणंमि वि भद्दो, **गयसुकुमालस्स** उवघाई ।। २३ ।।

अप्पपसंसाझाणे, **रहकारो** अंबलुंबि तोडिंतो ।
परनिंदाए **खवगो, कूरगडू** पइ पडिनिविट्ठो ।। २४ ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परगरिहाए **गुट्ठा-माहिलगो** पूसमित्तअहिखवगो ।
परिगहज्झाणे **कुंचग-सिट्ठी** तह **चारुदत्तो** य ।। २५ ।।
परपरिवाए सस्सू, **सुभद्दंदोसं** असंतयं दिंती ।
परदूसणंमि रूद्दो, **अंगंमि** सदोषमाहिंतो ।। २६ ।।
आरंभे उद्दवए, दीवायणग्गाय**करडकरडत्ति** ।
संरंभे संकप्पे, **खुहगकुमारो** उदाहरणं ।। २७ ।।
पावाणुमोयणंमी, उवरोहावरोहिणो उवज्झस्स ।
धण्णत्ति संसगजणो, नायव्वो होइ आहरणं ।। २८ ।।
आरामादहिगरणे, **नंदगमणियारसिट्ठि**आहरणं ।
असमाहि-मरणंमी, **खंदगं** पइ **पालगो** नेओ ।। २९ ।।
कम्मोदयंमि **कण्हो,** पुव्वं सुभभावओ वि पज्झंते ।
कम्मोदयपच्चयओ, असुहंझाणं झियायंतो ।। ३० ।।
इड्ढीगारवझाणे, **दसन्नभद्दो** नरेसरो नेओ ।
रसगारवंमि राया, **जियसत्तू** उदगनाउत्तो ।। ३१ ।।
सायागारवझाणे, दिट्ठंतो इत्थ होइ नायव्वो ।
'नरयत्थो ससिराया', इव गाहुत्तो ससीराया ।। ३२ ।।
अव्वेरमणंझाणे, पुत्ताणं अविरइं अहिलसंता ।
उसुयारुत्तभिगुजसा, **मूअलगभाया** यविन्नेउ ।। ३३ ।।
झाणे अमुत्तिमरणंमि, मुत्तिविग्घे नियाणकरणंमि ।
चित्तेण निसिद्धो वि हु, तच्चित्तो होइ **संभूओ**।। ३४ ।।
कत्थवि रूवंझाणे, अहियपयं दीसए अ तदो तम्मि ।
सगरो [सरूवे] सणंकुमारो, पररूवे सगड **गोवालो** ।। ३५ ।।
इय तेवट्ठीझाणा, [यथा] सोदाहरणा य कित्तिया अ ।
केसिंचि अट्टझाणे, अवतारो केसिं रूद्दम्मि ।। ३६ ।।
सव्वत्थ बिंदुलोवं, पाइयभावाउ इत्थ काऊणं ।
अण्णाझाणेन्ते यं, थोवं पाढो विकत्थे व ।। ३७ ।।

[त्रिषष्टिध्यानकथानककुलकं समाप्तम्]

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परिशिष्टम्-६

मूलश्लोकाऽकारादिः

अक्कंडेऽचिरभाविय ।।५४।।
अस्संजममन्नाणं मिच्छत्तं ।।३१।।
आया हु महं नाणे ।।२५।।
आराहणोवउत्तो कालं ।।६२।।
आलोइय निस्सल्लो ।।७।।
आसुक्कारे मरणे ।।६।।
आहारनिमित्तेणं मच्छा ।।५२।।
इच्छामि भंते उत्तमट्ठं...गद्य ।।११।।
इय बालपंडियं ।।१०।।
उड्ढमहे तिरियंमिवि मयाणि ।।४७।।
उव्वेयणयं जाई मरणं ।।४८।।
एगो मे सासओ अप्पा ।।२७।।
एगो वच्चइ जीवो ।।२६।।
एगंमिवि जम्मि पए ।।६०।।
एयं सव्वुवएसं ।।५८।।
एयं पच्चक्खाणं जो ।।७०।।
एस करेमि पणामं ।।१२।।
कंदप्पदेवकिब्बिस ।।४०।।
का देवदुग्गई का अबोहि ।।३९।।
चिरउसियबंभयारी ।।६८।।
जइ उप्पज्जइ दुक्खं ।।४९।।
जह बालो जंपंतो ।।३३।।
जं किंचि वि दुच्चरियं ।।१९।।
जं च दिसावेरमणं ।।४।।
जिणवयणे अणुरत्ता ।।४४।।
जे पुण अट्ठमईया ।।३७।।
जे पुण गुरुपडिणीया ।।४३।।
जो भत्तपरिन्नाए ।।८।।
तणकट्ठेहि व अग्गी ।।५१।।
तम्हा चंदगविज्झं ।।५५।।
ता एगंपि सिलोगं जो ।।६१।।
तिविहं भणंति मरणं ।।३६।।
देसिक्कदेसविरओ ।।१।।
धीरेण वि मरियव्वं ।।६५।।
धीरो जरमरणविउ ।७१।।
नमुत्थु धुयपावाणं ।।१८।।
न हु तम्मि देसकाले ।।५९।।
नाणस्स दंसणस्स य ।।६७।।
नाणंमि दंसणंमि य तवे ।।३४।।
निक्कसायस्स दंतस्स ।।६९।।
निंदामि निंदणिज्जं ।।३२।।
पंच य अणुव्वयाइं ।।२।।
पाणवह मुसावाए ।।३।।
पुव्विं कयपरिणामे ।।५३।।
बज्झं अब्भिंतरं उवहिं ।।२०।।
बालमरणाणि बहुसो ।।४५।।
बाहिरजोगविरहिओ ।।५६।।
भोगणं परिसंखा ।।५।।
ममत्तं परिवज्जामि ।।२४।।
मरणे विराहिए देवदुग्गई ।।३८।।
मिच्छदंसणरत्ता ।।४१।।
मूलगुणे उत्तरगुणे ।।२९।।
रागं बंधं पओसं ।।२३।।
रागेण व दोसेण व जं भे ।।३५।।
लद्धं अलद्धपुव्वं ।।६४।।
वेमाणिएसु कप्पोवगेसु।।९।।
संजोगमूला जीवेण ।।२८।।
संसारचक्कवालंमि ।।५०।।
सत्त भए अट्ठ मए ।।३०।।
सत्थग्गहणं विसभक्खणं ।।४६।।
समणोत्ति अहं पढमं ।।६३।।
सम्मद्दंसणरत्ता ।।४२।।
सम्मं मे सव्वभूएसु ।।२२।।
सम्मं मे सव्वभूएसु ।।१४।।
सव्वं पाणारंभं ।।१३।।
सव्वं चाहारविहिं ।।१५।।
सव्वं पाणारंभं पच्च ।।२१।।
सव्वदुक्खपहीणाणं ।।१७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

परिशिष्टम्-७

दिगम्बरीयमूलाचारग्रन्थाऽर्न्तगताः

श्रीआतुरप्रत्याख्यानप्रकीर्णकगाथाः ।

आतुर० गा० १७

प्रत्याख्यानसंस्तरस्तवप्रतिपत्तृभ्यां सहाभेदं कृत्वात्मनः ग्रंथकर्ता प्रत्याख्यानसंस्तरस्तवनामधेय-द्वितीयाधिकारार्थमाह । अथवा षट्काला यतीनां भवन्ति तत्रात्मसंस्कारसल्लेखनोत्तमार्थकालास्त्रयः आराधनायां कथ्यते । शेषा दीक्षाशिक्षागणपोषणकाला आचारे, तत्राद्येषु त्रिषु कालेषु यद्युपस्थितं मरणं तत्रैवंभूतं परिणामं विदधेऽहमित्यत आह-

सव्वदुक्खप्पहीणाणं सिद्धाणं अरहदो णमो ।
सद्दहे जिणपण्णत्तं पच्चक्खामि य पावयं ।।३७।।

सव्वदुक्खप्पहीणाणं-सर्वाणि च तानि दुःखानि च सर्वदुःखानि समस्तद्वन्द्वानि तैः प्रहीणा रहिताः। अथवा सर्वाणि दुःखानि प्रहीणानि येषां ते सर्वदुःखप्रहीणास्तेभ्यः । **सिद्धाणं**-सिद्धेभ्यः सम्यक्त्वाद्यष्टगुणैश्वर्येभ्यः । **अरहदो**-अर्हद्भ्यश्च नवकेवललब्धिप्राप्तेभ्यश्च चशब्दोऽनुक्तोऽपि द्रष्टव्यः । **णमो**-नमो नमोऽस्ति तेभ्यः । **सद्दहे**-श्रद्दधे रुचिं कुर्वे । **जिणपण्णत्तं**-कर्मारातीन् जयन्तीति जिनाः तैः प्रज्ञप्तं कथितं जिनप्रज्ञप्तं जिनकथितम् । **पच्चक्खामि**-प्रत्याख्यामि परिहरे । पावयं-पापकंदुःखनिमित्तम् । सर्वद्वंद्वरहितेभ्यः सिद्धेभ्योऽर्हद्भ्यो नमोस्तु । सर्वज्ञपूर्वक आगमो यतोऽस्तस्तन्नमस्कारानन्तरमागमश्रद्धानं श्रद्दधे जिनप्रज्ञप्तमित्युक्तं सम्यक्त्वपूर्वकं च, यतः आचरणमतः प्रत्याख्यामि सर्वपापकमित्युक्तम् । अथवा क्त्वान्तोऽयं नमःशब्दः प्राकृते लोपबलेन सिद्धः । सिद्धानर्हतश्च नमस्कृत्वा जिनोक्तं श्रद्दधे पापं च प्रत्याख्यामीत्यर्थः । अथवा मिङन्तोऽयं नमःशब्दः तेनैवं सम्बन्धः कर्तयः-सर्वदुःखप्रहीणान् सिद्धान् अर्हतश्च नमस्यामि जिनागमं च श्रद्दधे। पापं च प्रत्याख्यामीत्येकक्षणेऽनेकक्रिया एकस्य कर्तुः संभवन्ति इत्यनेकान्तद्योतनार्थमनेन न्यायेन सूत्रकारस्य कथनमिति ।।

आतुर० गा० १८

भक्तिप्रकर्षार्थं पुनरपि नमस्कारमाह-

णमोत्थु धुदपावाणं सिद्धाणं च महेसिणं ।
संथरं पडिवज्जामि जहा केवलिदेसियं ।।३८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

अथवा प्रत्याख्यानसंस्तरस्तवौ द्वावधिकारौ, द्वे शास्त्रे वा गृहीत्वा एकोऽयं अधिकारः कृतः, कुतो ज्ञायते नमस्कारद्वितयकरणादिति । **णमोत्थु**-नमोऽस्तु । **धुदपावाणं**-धुतं विहतं पापं कर्म यैस्ते धुतपापस्तेभ्यः । **सिद्धाणं** च-सिद्धेभ्यश्च । **महेसिणं**-महर्षिभ्यश्च केवलर्द्धिप्राप्तेभ्यः । **संथरं**-संस्तरं सम्यग्दर्शनज्ञानचारित्रतपोमयं भूमिपाषाणफलकतृणमयं वा । **पडिवज्जामि**-प्रपद्ये अभ्युपगच्छामि । **जहा**-यथा । **केवलिदेसियं**-केवलिभिर्दृष्टः केवलिज्ञानिभिः प्रतिपादितमित्यर्थः । धुतपापेभ्यः सिद्धेभ्यो महर्षिभ्यश्च नमोऽस्तु । केवलिदृष्टं संस्तरं प्रतिपद्येऽहमिति पूर्ववत्सम्बन्धः कर्तव्यः । सिद्धानां नमस्कारो मङ्गलादिनिमित्तं महर्षीणां च तदनुष्ठितत्वाच्चेति ।

आतुर० गा० १९

प्रतिज्ञानिर्वहणार्थमाह-

जं किंचि मे दुच्चरियं सव्वं तिविहेण वोसरे ।
सामाइयं च तिविहं करेमि सव्वं णिरायारं ।।३६।।

जं किंचि-यत्किंचित् । **मे**-मम । **दुच्चरियं**-दुश्चरितं पापक्रियाः । **सव्वं**-सर्वं निरवशेषम् । **तिविहेण**-त्रिविधेन मनोवचनकायैः । **वोसरे**-व्युत्सृजामि परिहरामि । **सामाइयं च**-सामायिकं समन्वीभावं च । **तिविहं**-त्रिप्रकारं मनोवचनकायगतं कृतकारितानुमतं वा । **करेमि**-कुर्वेऽहम् । **सव्वं**-सर्वं सकलम् । **णिरायारं**-आकारान्निर्गतं निराकारं निर्विकल्पम् । समस्ताचरणं निर्दोषं यत्स्तोकमपि दुश्चरितं तत्सर्वं व्युत्सृजामि त्रिविधेन, सामायिकं च सर्वं निरतिचारं निर्विकल्पं च यथा भवति तथा करोमीत्यर्थः, दुश्चरित्रकारणं यत् तत्सर्वं त्रिप्रकारैः मनोवाक्कायैः परिहरामीति ।

आतुर० गा० २०

उत्तरसूत्रमाह-

बज्झब्भंतरमुवहिं सरीराइं च सभोयणं ।
मणसा वचि कायेण सव्वं तिविहेण वोसरे ।।४०।।

बज्झं-बाह्यं क्षेत्रादिकम् । **अब्भंतरं**-अभ्यन्तरमन्तरंगं मिथ्यात्वादि । **उवहिं**-उपधिं परिग्रहम् । **सरीराइं च**-शरीरमादिर्यस्य तच्छरीरादिकम् । **सभोयणं**-सह भोजनेन वर्तत इति सभोजनं आहारेण सह । **मणसा वचि काएण**-मनोवाक्कायैः । **सव्वं**-सर्वम् । **तिविहेण**-त्रिप्रकारैः कृतकारितानुमतैः । वोसरे-व्युत्सृजामि । बाह्यं शरीरादि सभोजनं परिग्रहं, अन्तरंगं च मिथ्यात्वादिकं सर्वं त्रिप्रकारैर्मनोवाक्कायैः परिहरामीत्यर्थः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० २१

सव्वं पाणारंभं पच्चक्खामि अलीयवयणं च ।
सव्वमदत्तादाणं मेहूण परिग्गहं चेव ।।४१।।

सव्वं पाणारंभं-सर्वं प्राणारम्भं जीववधपरिणामम् । **पच्चक्खामि**-प्रत्याख्यामि दयां कुर्वेऽहम् । **अलीयवयणं च**-व्यलीकवचनं च । **सव्वं**-सर्वम् । **अदत्तादाणं**-अदत्तस्यादानं ग्रहणमदत्तादानम् । **मेहूण**-मैथुनं स्त्रीपुरुषाभिलाषम् । **परिग्गहं चेव**-परिग्रहं चैव बाह्याभ्यन्तरलक्षणम् । सर्वं हिसाऽस्तयस्तेयाब्रह्ममूर्च्छास्वरूपं परित्यजामीत्यर्थः ।

आतुर० गा० २२

सामायिकं करोमीत्युक्तं तत्किं स्वरूपमित्यतः प्राह-

सम्मं मे सव्वभूदेसु वेरं मज्झं ण केणवि ।
आसा वोसरित्ताणं समाहिं पडिवज्जए ।।४२।।

सम्मं-समता सदृशत्वम् । **मे**-मम । **सव्वभूदेसु**-सर्वाणि च तानि भूतानि च सर्वभूतानि तेषु शत्रुमित्रादिषु प्राणिषु । **वेरं**-वैरं शत्रुभावः । **मज्झं**-मम । **ण केणं वि**-न केनापि । **आसा**-आशाः तृष्णाः । **वोसरित्ता**-व्युत्सृज्य परित्यज्य । **अणं**-इमम् । **समाहिं**-समाधिं समाधानम् । **पडिवज्जामि (पडिवज्जए)**-प्रतिपद्येऽहम् । वैरं मम न केनापि सह यतः समता मे सर्वभूतेषु अतः आशा व्युत्सृज्य समाधिं प्रतिपद्येऽहमिति ।

आतुर० गा० २३

नं केवलं वैरं त्यजामि, वैरनिमित्तं च यत् तत्सर्वं त्यजामीत्यतः प्राह्-

रायबंधं पदोसं च हरिसं दीणभाववयं ।
उस्सुगत्तं भयं सोगं रदिमरदिं च वोसरे ।।४४।।

रायबंधं-रागस्य रागेण वा बन्धो रागबन्धः स्नेहानुबन्धस्तम् । **पदोसं च**-प्रद्वेषमप्रीतिं च । **हरिसं**-हर्षं लाभादिना आनन्दम् । **दीणभाववयं**-दीनभावं याञ्चादिना करुणाभिलाषदैन्यं च । **उस्सुगत्तं**-उत्सुकत्वं सरागमनसान्यचिन्तनम् । **भयं**-भीतिम् । **सोयं**-शोकं इष्टवियोगवशादनुशोचनम् । **रइं**-रतिमभिप्रेतप्राप्तिम् । **अरइं**-अरतिं अभिप्रेताऽप्राप्तिम् । **वोसरे**-व्युत्सृजामि । रागानुबन्धद्वेषहर्षदीनभावमुत्सुकत्वभयशोकरत्यरतिं च त्यजामीत्यर्थः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० २४

ममत्तिं परिवज्जामि णिम्ममत्तिमुवट्ठिदो ।
आलंबणं च मे आदा अवसेसाइं वोसरे ।।४५।।

ममत्तिं-ममत्वम् । **परिवज्जामि**-परिवर्जामि परिहरेऽहम् । **णिम्ममत्तिं**-निर्ममत्वमसंगत्वम् । **उवट्ठिदो**-उपस्थितः। यदि सर्वं भवता त्यज्यते किमालम्बनं भवष्यतीत्यत आह-**आलंबणं च**-आलम्बनं चाश्रयः । **मे**-मम । **आदा**-आत्मा । **अवसेसाइं**-अवशेषाणि अधिकानि । **वोसरे**-व्युत्सृजामि । किं बहुनोक्तेनान्तज्ञानदर्शनसुखवीर्यरत्नत्रयादिकं मुक्त्वान्यत्सर्वं त्यजामीत्यर्थः ।

आतुर० गा० २५

आत्मा च भवता किमिति कृत्वा न परित्यज्यते इत्यत आह-

आदा हु मज्झ णाणे आदा मे दंसणे चरित्ते य ।
आदा पच्चक्खाणे आदा मे संवरे जोए ।।४६।।

आदा-आत्मा । **हु**-स्फुटं । **मज्झ**-मम । **णाणे**-ज्ञाने । **आदा**-आत्मा । **मे**-मम । **दंसणे**-दर्शने तत्त्वार्थश्रद्धाने आलोके वा । **चरित्ते य**-चारित्रे च पापक्रियानिवृत्तौ । **आदा**-आत्मा । **पच्चक्खाणे**-प्रत्याख्याने । **आदा**-आत्मा । **मे**-मम । **संवरे**-आस्रवनिरोधे । **जोए**-जोगे शुभव्यापारे ।।

आतुर० गा० २६

एओ य मरइ जीवो एओ य उववज्जइ ।
एयस्स जाइमरणं एओ सिज्झइ णीरओ ।।४७।।

एओ य-एकश्चासहायश्च । **मरइ**-म्रियते शरीरत्यागं करोति । **जीवो**-जीवः चेतनालक्षणः । **एओ य**-एकश्च । **उववज्जइ**-उत्पद्यते । **एयस्स**-एकस्य । **जाइ**-जातिः । **मरणं**-मृत्युः । **एओ**-एकः । **सिज्झइ**-सिद्धयति मुक्तो भवति । **णीरओ**-नीरजाः कर्मरहितः ।

आतुर० गा० २७

एओ मे सस्सओ अप्पा णाणदंसणलक्खणो ।
सेसा मे बाहिरा भावा सव्वे संजोगलक्खणा ।।४८।।

एओ-एकः । **मे**-मम । **सस्सओ**-शाश्वतो नित्यः । **अप्पा**-आत्मा । **णाणदंसणलक्खणो**-ज्ञानं च दर्शनं च ज्ञानदर्शने ते एव लक्षणं यस्यासौ ज्ञानदर्शनलक्षणः । **सेसा मे**-शेषाः शरीरादिका

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

मम। **बाहिरा**–बाह्या अनात्मीयाः । **भावा**–पदार्थाः । **सव्वे**–सर्वे समस्ताः । **संजोगलक्खणा–संयोगलक्षणाः।** अनात्मनीनस्यात्मभावः संयोगः, संयोग एव लक्षणं येषां ते संयोगलक्षणा विनश्वरा इत्यर्थः। ज्ञानदर्शनचारित्रप्रत्याख्यानसंवरयोगेषु ममात्मैव, यतो म्रियते उत्पद्यते च एक एव, यतः एकस्य जातिमरणे, यतः एकश्च नीरजाः सन् सिद्धिं याति, यतः शेषाश्च सर्वे भावाः संयोगलक्षणा बाह्या यतः, अत एक एवात्मा ज्ञानदर्शनलक्षणः नित्यो ममेति ।

आतुर० गा० २८

अथ किमिति कृत्वा संयोगलक्षणो भावः परिहियते इति चेदत आह–

संजोयमूलं जीवेण पत्तं दुक्खपरंपरं ।
तम्हा संजोयसंबंध सव्वं तिविहेण वोसरे ।।४९।।

संजोयमूलं–संयोगनिमित्तम् । **जीवेण**–जीवेन । **पत्तं**–प्राप्तं, लब्धम् । **दुक्खपरंपरं**–दुःखानां परम्परा दुःखपरम्परा क्लेशनैरन्तर्यम् । **तम्हा**–तस्मात् । **संजोयसंबंध**–संयोगसम्बन्धम् । **सव्वं**–सर्वम् । **तिविहेण**–त्रिविधेन मनोवचनकायैः । **वोसरे**–व्युत्सृजामि । संयोगहेतोर्जीवेन यतो दुःखपरम्परा प्राप्ता, तस्मात् संयोगसम्बन्धं सर्वं त्रिविधेन व्युत्सृजामीत्यर्थः ।

आतुर० गा० २९

पुनरपि दुश्चरित्रस्य परिहारार्थमाह–

मूलगुणउत्तरगुणे जो मे णाराहिओ पमाएण ।
तमहं सव्वं णिंदे पडिक्कमे आगममिस्साणं ।।५०।।

मूलगुण उत्तरगुणे–मूलगुणाः प्रधानगुणाः, उत्तरगुणा अभ्रावकाशादयो मूलगुणदीपकास्तेषु मध्ये। **जो मे**–यः कश्चिन्मया । **णाराहिओ**–नाराधितो नानुष्ठितः । **पमाएण**–प्रमादेन केनचित्कारणान्तरेण सालसभावात् । **तमहं**–तच्छब्दःपूर्वक्रान्तपरामर्शी, तदहं मूलगुणाद्यनाराधनम् । **सव्वं**-सर्वम् । **णिंदे**-निन्दामि आत्मानं जुगुप्से । **पडिक्कमे**–प्रतिक्रमामि निर्हरे न केवलमतीतवर्तमानकाले **आगमिस्साणं**–आगमिष्यति च काले । ये गुणास्तेषां मध्ये यो नाराधितो गुणस्तमहं सर्वं निन्दयामि प्रतिक्रमामि चेति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर. गा. ३०

प्रमादाः पुनः किं न परिह्रियन्त इति चेन्न तानपि परिहरामीत्यत आह-

सत्त भए अट्ठ मए सण्णा चत्तारि गारवे तिण्णि ।
तेत्तीसाच्चासणाओ रायद्दोसं च गरिहामि ।।५२।।

सत्तभए-सप्तभयानि । **अट्ठमए**-अष्टौ मदानि । **सण्णा चत्तारि**-संज्ञाश्चतस्रः आहारभयमैथुनपरिग्रहाभिलाषान् । **गारवे**-गौरवाणि ऋद्धिरससातविषयगर्वान् । **तिण्णि**-त्रीणि । **तेत्तीसाच्चासणाओ**-त्रिभिरधिका त्रिंशत् त्रयस्त्रिंशत् पदार्थैः सह सम्बन्धः । त्रयस्त्रिंशतां पदार्थानां, **अच्चासणा**-आसादनाः परिभवास्तास्त्रयस्त्रिंशदासादनाः, अथवा तन्निमित्तत्वात् ताच्छब्द्यन्ते । **रायद्दोसं च**-रागद्वेषौ च, आत्मनीनानात्मनीनवस्तुप्रीत्यप्रीति । **गरिहामि**-गर्हे नाचरामीत्यर्थः । सप्तभयाष्टमदसंज्ञागारवाणि त्रयस्त्रिंशत्पदार्थासादनं च रागद्वेषौ च त्यजामीत्यर्थः ।

आतुर० गा० ३१

तथा-

अस्संजममण्णाणं मिच्छत्तं सव्वमेव य ममत्तिं ।
जीवेसु अजीवेसु य तं णिंदे तं च गरिहामि ।।५१।।

अस्संजमं-असंयमं पापकारणम् । **अण्णाणं**-अज्ञानं अश्रद्धानपूर्वकवस्तुपरिच्छेदम् । **मिच्छत्तं**-मिथ्यात्वमतत्त्वार्थश्रद्धानम् । **सव्वमेव य**-सर्वमेव च । **ममत्तिं**-ममत्त्वमनात्मीये आत्मीयभावम् । **जीवेसु अजीवेसु य**-जीवाजीवविषयं च । **तं णिंदे**-तं निन्दामि । **तं च**-तच्च । **गरिहामि**-गर्हेऽहं परस्य प्रकटयामि । मूलोत्तरगुणेषु मध्ये यन्नाराधितं प्रमादतोऽतीतानागतकाले तत्सर्वं निन्दामि प्रतिक्रमामि च । असंयमाज्ञानमिथ्यात्वादि जीवाजीवविषयं ममत्वं च सर्वं गर्हे निन्दामि चेति प्रमाददोषेण दोषास्त्यज्यन्ते ।

आतुर० गा० ३२

आत्मसंस्कारकालं नीत्वा संन्यासालोचनार्थमाचार्यः प्राह-

णिंदामि णिंदणिज्जं गरहामि य जं च मे गरहणीयं ।
आलोचेमि य सव्वं सब्भंतरबाहिरं उवहिं ।।५५।।

णिंदामि-निन्दामि आत्मन्याविष्करोमि । **णिंदणिज्जं**-निन्दनीयं आत्माविष्करणयोग्यम् । **गरहामि य**-गर्हे च आचार्यादीनामाविष्करोमि प्रकटयामि । **जंच**-यच्च । **मे**-मम । **गरहणीयं-**

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

गर्हणीयं परप्रकाशयोग्यम् । **आलोचेमि य**–आलोचयामि चापनयामि चारित्राचारालोचनापूर्वकं गर्हणं वा करोमि । **सव्वं**-सर्वं निरवशेषम् । **सब्भंतरबाहिरं**–साभ्यन्तरबाह्यम् । **उवहिं**–उपधिं च परिग्रहं च । यन्निदनीयं तन्निन्दामि, यद् गर्हणीयं तद् गर्हामि, सर्वं बाह्याभ्यतरं चोपधिं आलोचयामीति ।

आतुर० गा० ३३

कथमालोचयितव्यमिति चेदत आह–

जह बालो जंप्पंतो कज्जमकज्जं च उज्जुयं भणदि ।
तह आलोचेयव्वं माया मोसं च मोत्तूण ।।५६।।

जह–यथा । **बालो**–बालः पूर्वापरविवेकरहितः । **जंप्पंतो**–जल्पन् । **कज्जं**–कार्यं स्वप्रयोजनम्। **अकज्जं च**–अकार्यं अप्रयोजनं अकर्तव्यं च । **उज्जुयं**–ऋजु अकुटिलम् । **भणइ**-भणति। **तह**–तया। **आलोचेयव्वं**–आलोचयितव्यम् । **मायामोसं च**–मायां मृषां च अपह्नवासत्यं च । **मोत्तूण**--मुक्त्वा। यथा कश्चिद्बालो जल्पन् कुत्सितानुष्ठानमकुत्सितानुष्ठानं च ऋजु भणति, तथा मायां मृषां च मुक्त्वा लोचयितव्यमिति ।

आतुर० गा० ३४

यस्यालोचना क्रियते स किंगुणविशिष्ट आचार्य इति चेदत आह–

णाणम्हि दंसणम्हि य तवे चरित्ते य चउसुवि अकंपो ।
धीरो आगमकुसलो अपरस्साई रहस्साणं ।।५७।।

णाणम्हि–ज्ञाने । **दंसणम्हि य**–दर्शने च । **तवे**–तपसि । **चरित्ते य**–चरित्रे च । **चउसुवि**–चतुर्ष्वपि । **अकंपो**–अकंपोऽधृष्यः । **धीरो**–धीरो धैर्योपेतः । **आगमकुसलो**–आगमकुशलः स्वसमयपरसमयविचारदक्षः । **अपरिस्साई**–अपरिश्रावी आलोचितं न कस्यचिदपि कथयति । **रहस्साणं**–रहसि एकान्ते भवानि रहस्यानि गुह्यानुष्ठितानि । ज्ञानदर्शनतपश्चारित्रेषु चतुर्ष्वपि सम्यक्स्थितो यो रहस्यानामपरिश्रावी धीरश्चागमकुशलश्च यस्तस्य आलोचना कर्तव्या नान्यस्येति ।

आतुर० गा० ३५

आलोचनानन्तरं क्षमणं कर्तुकामः प्राह–

रागेण य दोसेण य जं मे अकदण्हुयं पमादेण ।
जो मे किंचिवि भणिओ तमहं सव्वं खमावेमि ।।५८।।

रागेण य–रागेण च मायालोभाभ्यां स्नेहेन वा । **दोसेण य**–द्वेषेण च क्रोधमानाभ्यां अप्रीत्या

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

वा । **जंमे**-यन्मया **अकदण्हुअं**-अकृतज्ञत्वं युष्माकमयोग्यमनुष्ठितम् । **पमादेण**-प्रमादेन । **जो मे**-यो मया। **किंचिवि**-किंचिदपि । **भणिओ**-भणितः । **तमहं**-तं जनं अहम् । **सव्वं**-सर्वम् । **खमावेमि**-क्षमयामि संतोषयामि । रागद्वेषाभ्यां मनागपि यन्मया कृतमकृतज्ञत्वं योऽपि मया किंचिदपि भणितस्तमहं सर्वं मर्षयामीति ।

आतुर० गा० ३६

क्षमणं कृत्वा क्षपकः संन्यासं कर्तुकामो मरणभेदान् पृच्छति कति मरणानि ? आचार्यः प्राह-

तिविहं भणंति मरणं बालाणं बालपंडियाणं च ।
तइयं पंडियमरणं जं केवलिणो अणुमरंति ।।५९।।

तिविहं-त्रिविधं त्रिप्रकारम् । **भणंति**-कथयन्ति । **मरणं**-मृत्युम् । **बालाणं**-बालानां असंयत-सम्यग्दृष्टीनाम् । **बालपंडियाणं च**--बालाश्च ते पंडिताश्च बालपंडिताः । संयतासंयता एकेन्द्रियाविरतेर्बालाः द्वीन्द्रियादिवधविरताः पंडिताः । **तइयं**-तृतीयम् । **पंडियमरणं**-पंडितमरणं पंडितानां मरणं देहपरित्यागः देहस्यान्यथाभावो वा पंडितमरणम् । **जं**-यत् येन वा । **केवलिणो**-केवलं शुद्धं ज्ञानं विद्यते येषां केवलिनः । **अणुमरंति**-अनुम्रियन्ते अर्हद्भट्टारका गणधरदेवाश्च त्रिप्रकारं मरणं भणन्ति । प्रथमं बालमरणं बालजीवस्वामित्वात्, द्वितीयं बालपंडितमरणं बालपंडितस्वामित्वात्, तृतीयं पंडितमरणं येन केवलिनोऽनुम्रियन्ते । संयताश्च पंडितपंडित-मरणस्यात्रैव पंडितेन्तर्भावः सामान्यसंयमस्वामित्वाभेदादिति । अन्यत्र बालबालमरणमुक्तं तदत्र किमिति कृत्वा नोक्तं तेन प्रयोजनाभावात् । ये अकुटिला ज्ञानदर्शनयुक्तास्ते एतैर्मरणैर्म्रियन्ते ।

आतुर० गा० ३७

अन्यथाभूताश्च कथमित्युत्तरसूत्रमाह-

जे पुण पणट्ठमदिया पचलियसण्णा य वक्कभावा य ।
असमाहिणा मरंते ण हु ते आराहया भणिया ।।६०।।

जे पुण-ये पुनः । **पणट्ठमदिया**-प्रणष्टा विनष्टा मतिर्येषां ते प्रणष्टमतिकाः अज्ञानिनः । **पचलियसण्णा य**-प्रचलिता उद्गता संज्ञा आहारभयमैथुनपरिग्रहाभिलाषा येषां ते प्रचलितसंज्ञकाः । **वक्कभावा य**-कुटिलपरिणामाश्च । **असमाहिणा**-असमाधिना आर्त-रौद्रध्यानेन । **मरंते**-म्रियन्ते भवान्तरं गच्छन्ति । **ण हु**-न खलु । **आराहया**-आराधकाः कर्मक्षयकारिणः । **भणिया**-भणिताः कथिताः । ये प्रणष्टमतिकाः प्रचलितसंज्ञा वक्रभावाश्च ते असमाधिना म्रियन्ते स्फुटं न ते आराधका भणिता इति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० ३८

यदि मरणकाले विपरिणामः स्यात्ततः किंस्यादिति पृष्टे आचार्यः प्राह–

मरणे विराहिए देवदुग्गई दुल्लहा य किर बोही ।
संसारो य अणंतो होइ पुणो आगमे काले ।।६१।।

मरणे-मृत्युकाले । **विराहिए**–विराधिते विनाशिते मरणकाले सम्यक्त्वे विराधित इत्यर्थः मरणकाले सम्यक्त्वस्य यद्विराधनं तन्मरणस्यैव साहचर्यादिति । अथवार्तरौद्रध्यानसहितं यन्मरणं तत्तस्य विराधनमित्युक्तम्। **देवदुग्गई**–देवदुर्गतिः भवनवासिवानव्यन्तरज्योतिष्कादिषूत्पत्तिः । **दुल्लहा य**–दुर्लभा दुःखेन लभ्यते इति दुर्लभा च । **किर**–किल । अयं किलशब्दोऽनेकेष्वर्थेषु विद्यते, तत्र परोक्षे द्रष्टव्यः आगमे एवमुक्तमित्यर्थः । **बोही**–बोधिः सम्यक्त्वं रत्नत्रयं वा । **संसारो य**–संसारश्च चतुर्गतिलक्षणः । **अणंतो**–अनन्तः अर्द्धपुद्गलप्रमाणः कुतोऽस्यानन्तत्वं ? केवलज्ञानविषयत्वात् । **होइ**–भवति । **पुणो**–पुनः । **आगमे काले**–आगमिष्यति समये । मरणकाले सम्यक्त्वविराधने सति, दुर्गतिर्भवति, बोधिश्च दुर्लभा, आगमिष्यति काले संसारश्चानन्तो भवतीति ।

आतुर० गा० ३९

अत्रैवाभिसम्बन्धे प्रश्नपूर्वकं सूत्रमाह–

का देवदुग्गईओ का बोही केण ण बुज्झए मरणं ।
केण व अणंतपारे संसारे हिंडए जीओ ।।६२।।

का देवदुग्गईओ–का देवदुर्गतयः किंविशिष्टा देवदुर्गतयः । **का बोही**–का बोधिः । **केण व**-केन च । **ण बुज्झए**-न बुध्यते । **मरणं**–मृत्युः । **केण व**–केन च कारणेन । **अणंतपारे**–अनन्तोऽपरिमाणः पारः समाप्तिर्यस्यासौ अनन्तपारस्तस्मिन् । **संसारे**–संसरणे । **हिंडए**–हिण्डते गच्छति । **जीवो**–जीवः। हे भट्टारक ! का देवदुर्गतयः का च बोधिः, केन च परिणामेन न बुध्यते मरणं, संसारे च केन कारणेन परिभ्रमति जीवः ?

आतुर० गा० ४०

क्षपकेण पृष्टः आचार्यः प्राह–

कंदप्पमाभिजोग्गं किव्विस सम्मोहमासुरत्तं च ।
ता देवदुग्गईओ मरणम्मि विराहिए होंति ।।६३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

द्रव्यभावयोरभेदं कृत्वा चेदमुच्यते । **कंदप्पं**-कंदर्पस्य भावः कान्दर्पमुपप्लवशीलगुणः । **आभिजोग्गं**-अभियोगस्य भावः आभियोग्यं तन्त्रमन्त्रादिभीरसादिगार्द्ध्यम् । **किव्विस**-किल्विषस्य भावः कैल्विष्यं प्रतिकूलाचरणम् । **सम्मोहं**-स्वस्य मोहः स्वमोहस्तस्य भावः स्वमोहत्वं, शुनो मोह इव मोहो वेदोदयो यस्य स श्वमोहस्तस्य भावः श्वमोहत्वं सह मोहेन वा वर्तते इति तस्य भावः समोहत्वं मिथ्यात्वभावनातात्पर्यम् । **आसुरत्तं च**-असुरत्वं च-असुरस्य भावः असुरत्वं रौद्रपरिणामसहिताचरणम् । **ता**-एताः । **देवदुग्गईओ**-देवदुर्गतयस्तैर्गुणैस्ताः प्राप्यन्ते इतिकृत्वा तद्व्यपदेशः, कारणे कार्योपचारात् । **मरणम्मि**-मरणे मृत्युकाले सम्यक्त्वे, **विराहिए**-विराधिते परिभूते । **होंति**-भवन्ति । सम्यक्त्वे विनाशिते मरणकाले एताः कन्दर्पाभियोग्यकिल्विष-स्वमोहासुरदेवदुर्गतयो भवन्तीति ।

आतुर० गा० ४१

व्यतिरेकद्वारेण बोधिं प्रतिपादयन्नाह-

मिच्छादंसणरत्ता सणिदाणा किण्हलेसमोगाढा ।
इह जे मरंति जीवा तेसिं पुण दुल्लहा बोही ।।६९।।

मिच्छादंसणरत्ता-मिथ्यात्वदर्शनरक्ताः अतत्त्वार्थरुचयः । **सणिदाणा**-सह निदानेनाकांक्षया वर्तंत इति सनिदानाः । **किण्हलेसं**-कृष्णलेश्यां अनन्तानुबन्धिकषायानुरञ्जितयोगप्रवृत्तिम् । **ओगाढा**-आगाढा प्रविष्टा रौद्रपरिणामाः । **इह**-अस्मिन् । **जे**-ये । **मरंति**-म्रियन्ते प्राणांस्त्यजन्ति । **जीवा**-जीवाः प्राणिनः । **तेसिं**-तेषाम् । **पुण**-पुनः । **दुल्लहा**-दुर्लभाः । **बोही**--बोधिः सम्यक्त्वसहितशुभपरिणामः । इह ये जीवाः मिथ्यात्वदर्शनरक्ताः, सनिदानाः, कृष्णलेश्यां प्रविष्टाश्च म्रियन्ते तेषां पुनरपि, दुर्लभा बोधिः । उत्कृष्टतोऽर्धपुद्गलपरिवर्तनमात्रात्सम्यक्त्वा-विनाभावित्वाद्बोधेरतस्तादात्म्यं ततो बोधेरेव लक्षणं व्याख्यातमिति ।

आतुर० गा० ४२

अन्वयेनापि बोधेर्लक्षणमाह-

सम्मद्दंसणरत्ता अणियाणा सुक्कलेसमोगाढा ।
इह जे मरंति जीवा तेसिं सुलहा हवे बोही ।।७०।।

सम्मद्दंसणरत्ता-सम्यग्दर्शनरक्ताः तत्त्वरुचयः । **अणियाणा**-अनिदाना इहपरलोकाना-कांक्षाः । **सुक्कलेस्सं**-शुक्ललेश्याम् । **ओगाढा**-आगाढा प्रविष्टाः । **इह**-अस्मिन् । **जे**-ये । **मरंति**-म्रियन्ते । **जीवा**-जीवाः । **तेसिं**-तेषाम् । **सुलहा**-सुलभा सुखेन लभ्या । **हवे**-भवेत् ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

बोही-बोधिः । इह ये जीवाः सम्यग्दर्शनरक्ताः, अनिदानाः, शुक्ललेश्यां प्रविष्टाः सन्तो म्रियन्ते तेषां सुलभा बोधिरिति। यद्यपि पूर्वसूत्रेणास्यार्थस्य प्रतीतिस्तथापि द्रव्यार्थिकपर्यायार्थिकशिष्यसंग्रहार्थः पुनरारम्भः एकान्तमतनिराकरणार्थं च ।

आतुर० गा० ४३

संसारकारणस्वरूपं प्रतिपादयन्नाह-

जे पुण गुरुपडिणीया बहुमोहा ससबला कुसीला य ।
असमाहिणा मरंते ते होंति अणंतसंसारा ।।७१।।

जे पुण-ये पुनः । **गुरुपडिणीया**-गुरुणां प्रत्यनीकाः प्रतिकूलाः गुरुप्रत्यनीकाः । **बहुमोहा**-मोहप्रचुराः रागद्वेषाभिहताः । **ससबला**-सह शबलेन लेपेन वर्तन्ते इति सशबलाः कुत्सिताचरणाः। **कुसीला य**-कुशीलाः कुत्सितं शीलं व्रतपरिरक्षणं येषां ते कुशीलाश्च । **असमाहिणा**-असमाधिना मिथ्यात्वसमन्वितार्त्तरौद्रपरिणामेन । **मरंते**-म्रियन्ते । **ते**-ते । **होंति**-भवन्ति ते एवं विशिष्टाः । **अणंतसंसारा**-अनन्तसंसारा अर्धपुद्गलप्रमाणसंसृतयः । ये पुनः गुरुप्रतिकूलाः, बहुमोहाः कुशीलास्तेऽसमाधिना म्रियन्ते ततश्चानन्तसंसारा भवन्तीति ।

आतुर० गा० ४४

अथ परीतसंसाराः कथं भवन्तीति चेदतः प्राह-

जिणवयणे अणुरत्ता गुरुवयणं जे करंति भावेण ।
असबल असंकिलिट्ठा ते होंति परित्तसंसारा ।।७२।।

जिणवयणे-जिनस्य वचनमागमः तस्मिन्नर्हत्प्रवचने । **अणुरत्ता**-अनुरक्ताः सुष्ठु भक्ताः । **गुरुवयणं**-गुरुवचनमादेशं, **जे करंति**-ये कुर्वति, **भावेण**-भावेन भक्त्या मंत्रतंत्रशास्त्रानाकांक्षया। **असबल**-अशवला मिथ्यात्वरहिताः । **असंकिलिट्ठा**-असंक्लिष्टाः शुद्धपरिणामाः । **ते होंति**-ते भवन्ति । **परित्तसंसारा**-परीतः परित्यक्तः परिमितो वा संसारः चतुर्गतिगमनं येषां यैर्वा ते परीतसंसाराः परित्यक्तसंसृतयो वा । जिनप्रवचने येऽनुरक्ताः गुरुवचनं च भावेन कुर्वन्ति, अशबलाः, असंक्लिष्टाः सन्तस्ते परित्यक्तसंसारा भवन्तीति ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० ४५

यदि जिनवचनेऽनुरागो न स्यादतः किं स्यादतः प्राह-

बालमरणाणि बहुसो बहुयाणि अकामयाणि मरणाणि ।
मरिहंति ते वराया जे जिणवयणं ण जाणंति ।।७३।।

बालमरणाणि-बालानामतत्त्वरुचीनां मरणानि शरीरत्यागा बालमरणानि । **बहुसो**-बहुशः बहूनि बहुप्रकाराणि वा । **बहुआणि**-बहुकानि प्रचुराणि । **अकामयाणि**-अकामकृतानि अनभिप्रेतानि । **मरणाणि**-मृत्युन् । **मरिहंति**-मरिष्यन्ति मृत्युं प्राप्स्यन्तीत्यर्थः । **ते वराया**-त एवंभूता वराका अनाथाः । **जे जिणवयणं**-ये जिनवचनं सर्वज्ञागमम् । **ण जाणंति**-न जानन्ति नावबुध्यन्ते । ये जिनवचनं न जानन्ति ते वराका बालमरणानि बहुप्रकाराणि अकामकृतानि च बहूनि मरणानि प्राप्स्यन्तीति ।

आतुर० गा० ४६

अथ कानि तानि बालमरणानीत्यत आह-

सत्थग्गहणं विसभक्खणं च जलणं जलप्पवेसो य ।
अणयारभंडसेवी जम्मणमरणाणुबंधीणि ।।७४।।

सत्थग्गहणं-शस्त्रेणात्मनो ग्रहणं मारणं शस्त्रग्रहणम् । शस्त्रग्रहणादुत्पन्नं मरणमपि शस्त्रग्रहणं कार्ये कारणोपचारात् । **विसभक्खणं**-विषस्य मारणात्मकद्रव्यस्य भक्षणमुपयुंजनं विषभक्षणं तथैव सम्बन्धः कर्तव्यः । **च**-समुच्चयार्थः । **जलणं**-ज्वलनादग्नेरुत्पन्नं ज्वलनम् । **जलप्पवेसो य**-जले पानीये प्रवेशो निमज्जनं निरुच्छ्वासं जलप्रवेशश्च तस्माज्जातं स एव वा मरणम् । **अणयार-भण्डसेवी**-अनाचारभाण्डसेवी न आचारोऽनाचारः पापक्रिया स एव भाण्डं द्रव्यं तत्सेवत इत्यनाचारभाण्डसेवी मरणेन सम्बन्धः । अथवा पुरुषेण सम्बन्धः अनाचारभाण्डसेवी तस्य । **जम्मणमरणाणुबंधीणि**-जन्म उत्पत्तिः, मरणं मृत्युस्तयोरनुबन्धः सन्तानः स येषां विद्यते तानि जन्ममरणानुबन्धीनि संसारकारणानीत्यर्थः । एतानि मरणानि जन्ममरणानुबन्धीनि अनाचार-भाण्डसेवीनि यतोऽतो बालमरणानीति । अथवा अनाचारसेवीनि एतानि मरणानि संसारकारणानीति न सदाचारस्य ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० ४७

एवं श्रुत्वा क्षपकः संवेगनिर्वेदपरायण एवं चिन्तयति-

उड्ढमघो तिरियंहि दु कदाणि बालमरणाणि बहुगाणि ।
दंसणणाणसहगदो पंडियमरणं अणुमरिस्से ।।७५।।

उड्ढं-ऊर्ध्वं ऊर्ध्वलोके । **अधो**-अधसि अधोलोके नरकभवनव्यन्तरज्योतिष्ककल्पे । **तिरियंहि दु**-तिर्यक्षु च एकेन्द्रियादिपंचेन्द्रियपर्यन्तजातिषु । **कदाणि**-कृतानि प्राप्तानि बालमरणानि । **बहुगाणि**-बहूनि । **दंसणणाणसह**-दर्शनज्ञानाभ्यां सार्धं, गदो-गतः प्राप्तः, **पंडियमरणं**-पण्डितमरणं शुद्धपरिणामचारित्रपूर्वकप्राणत्यागम् । **अणुमरिस्से**-अनुमरिष्यामि संन्यासं करिष्यामि । ऊर्ध्वाधस्तिर्यक्षु च बहूनि बालमरणानि यतो मया प्राप्तानि, अतो दर्शनज्ञानाभ्यां सार्धं पण्डितमरणं गतोऽहं मरिष्यामीति ।

आतुर० गा० ४८

एतानि चाकामकृतानि मरणानि स्मरन् पण्डितमरणमनुमरिष्यामीत्यत आह-

उव्वेयमरणं जादीमरणं णिरएसु वेदणाओ य ।
एदाणि संभरंतो पंडियमरणं अणुमरिस्से ।।७६।।

उव्वेयमरणं-उद्वेगमरणं इष्टवियोगानिष्टसंयोगाभ्यां त्रासेन वा मरणम् । **जादीमरणं**-जातिमरणं उत्पन्नमात्रस्य मृत्युर्गर्भस्थस्य वा । **णिरएसु**-नरकेषु । **वेदणाओ य**-वेदनाश्च पीडाश्च । **एदाणि**-एतानि । **संभरंतो**-संस्मरन् । **पंडिदमरणं**-पण्डितमरणम् । **अणुमरिस्से**-अनुमरिष्यामि प्राणत्यागं करिष्यामि । एतानि उद्वेगजातिमरणानि नरकेषु वेदनाश्च संस्मरन् पण्डितमरणं प्राप्तः सन् प्राणत्यागं करिष्यामि ।

किमर्थं पंडितमरणं मरणेषु शुभतमं यतः-

एक्कं पंडिदमरणं छिंददि जादीसयाणि बहुगाणि ।
तं मरणं मरिदव्वं जेण मदं सुम्मदं होदि ।।७७।।

एक्कं-एकं । **पंडिदमरणं**-पंडितमरणम् । **छिंददि**-छिनत्ति । **जादीसयाणि**-जातिशतानि । **बहुगाणि**-बहूनि । **तं**-तत् तेन वा । **मरणं**-शरीरेन्द्रिययोर्वियोगः । **मरिदव्वं**-मर्तव्यं मरणं प्राप्तव्यम्। **जेण**-येन । **मदं**-मृतम् । **सुम्मदं**-सुष्ठुमृतम् । **होदि**-भवति । एकं पण्डितमरणं जातिशतानि बहूनि छिनत्ति यतोऽतस्तेन मरणेन मर्तव्यं येन पुनरुत्पत्तिर्न भवति तद्वानुष्ठातव्यं येन न पुनर्जन्म । किमुक्तं भवति-पंडितमरणमनुष्ठेयमिति ।।७७।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० ४९

यदि संन्यासे पीडा-क्षुधादिकोत्पद्यते ततः किं कर्तव्यमित्याह-

जइ उप्पज्जइ दुःखं तो दट्ठव्वो सभावदो णिरये ।
कदमं मए ण पत्तं संसारे संसरंतेण ।।७८।।

जइ-यदि । **उप्पज्जइ**-उत्पद्यते । **दुक्खं**-दुःखमसातम् । **तो**-ततः । **दट्ठव्वो**-द्रष्टव्यो मनसालोकनीयः । **सभावदो**-स्वभावतः स्वरूपं "दृश्यतेऽन्यत्रापि" इति तस्, प्राकृतबलादक्षराधिक्यं वा । णिरए नरकस्य नरके वा । **कदमं**-कियदिदं कतमत् । **मए**-मया । **ण पत्तं**-न प्राप्तम्। अथवा, अणं ऋण कृतं मया यत्तन्मयैव प्राप्तम् । **संसारे**-जातिजरामरणलक्षणे । **संसरंतेण**-संसरता परिभ्रमता । संन्यासकाले यदुत्पद्यते क्षुधादि दुःखं ततो नरकस्य स्वभावो द्रष्टव्यो यतः संसारे संसरता मया किमिदं न प्राप्तं यावता हि प्राप्तमेवेति चिन्तनीयमिति ।।७८।।

आतुर० गा० ५०

यथा प्राप्तं तथैव प्रतिपादयति-

संसारचक्कवालम्मि मए सव्वेवि पुग्गला बहुसो ।
आहारिदा य परिणामिदा य ण य मे गदा तित्ती ।।७९।।

संसारचक्कवालम्मि-संसारचक्रवाले चतुर्गतिजन्मजरामरणावर्ते । **मए**-मया । **सव्वेवि**-सर्वेऽपि। **पुग्गला**-पुद्गला दधिखंडगुडौदननीरादिका । **बहुसो**-बहुशः बहुवारान् अनन्तवारान् । **आहारिदा य**-आहृता गृहीता भक्षिताश्च । **परिणामिदा य**-परिणामिताश्च जीर्णाश्च खलरसस्वरूपेण गमिता इत्यर्थः । **ण य मे**-न च मम । **गदातित्ती**-गता तृप्तिः सन्तोषो न जातः, प्रत्युत आकांक्षा जाता । संसारचक्रवाले सर्वेऽपि पुद्गला बहुशः आहृताः परिणामिताश्च मया न च मम गता तृप्तिरिति चिन्तनीयम् ।

आतुर० गा० ५१

कथं न गता तृप्तिर्यथा-

तिणकट्ठेण व अग्गी लवणसमुद्दो णदीसहस्सेहिं ।
ण इमो जीवो सक्को तिप्पेदुं कामभोगेहिं ।।८०।।

तिणकट्ठेण व-तृणकाष्ठैरिव । **अग्गी**-अग्निः । **लवणसमुद्दो**-लवणसमुद्रः । **णदीसहस्सेहिं**-नदीसहस्रैश्चतुर्दशभिःसहस्रैर्द्विगुणद्विगुणैर्नदीनां समन्विताभिर्गङ्गासिंध्वादि-

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

चतुर्दशनदीभिः सागरो न पूर्णः । **ण इमो जीवो**-नायं जीवः । **सक्को**-शक्यः । **तिप्पेउं**-तृप्तुं प्रीणयितुम् । **कामभोगेहिं**-कामभोगैः, ईप्सितसुखाङ्गैराहारस्त्रीवस्त्रादिभिः । यथा अग्निः तृणकाष्ठैः, लवणसमुद्रश्च नदीसहस्रैः प्रीणयितुं न शक्यः तथा जीवोऽपि कामभोगैरिति ।।८०।।

आतुर० गा० ५२

किमिच्छामात्रेणाभुंजानस्यापि पापं भवतीत्याह-

आहारणिमित्तं किर मच्छा गच्छंति सत्तमिं पुढविं ।
सच्चित्तो आहारो ण कप्पदि मणसावि पत्थेदुं ।।८२।।

आहारणिमित्तं-आहारकारणात् । **किर**-किल आगमे कथितं नारुचिवचनमेतत् निश्चयवचनमेव। **मच्छा**-मत्स्याः । **गच्छंति**-यान्ति प्रविशन्ति । **सत्तमिं**-सप्तमीम् । **पुढविं**-पृथिवीं अवधिस्थानम् । **सच्चित्तो**-सह चित्तेन वर्तत इति सचित्तः सावद्योऽयोग्यः प्राणिघातादुत्पन्नः । **आहारो**-भोजनम् । **ण कप्पदि**-न कल्पते न योग्यो भवति । **मणसावि**-मनसापि चित्तव्यापारेणापि । **पत्थेदुं**-प्रार्थयितुं याचयितुम् । आहारनिमित्तं मत्स्याः शालिसिक्थादयो निश्चयेन सप्तमीं पृथिवीं गच्छन्ति यतोऽतो मनसापि प्रार्थयितुं सावद्याहारो न कल्पते इति ।।८२।।

आतुर० गा० ५३

यतो मनसापि सावद्याहारो न योग्योऽतो भवान् शुद्ध-परिणामं कुर्यादित्याचार्यः प्राह-

पुव्वं कदपरियम्मो अणिदाणो ईहिदूण मदिबुद्धी ।
पच्छा मलिदकसाओ सज्जो मरणं पडिच्छाहि ।।८३।।

पुव्वं कदपरियम्मो-पूर्वं प्रथमतरं कृतमनुष्ठितं परिकर्म तपोऽनुष्ठानं येनासौ पूर्वकृतपरिकर्मा आदावनुष्ठिततपश्चरणः । **अणिदाणो**-अनिदान इहलोकपरलोकसुखानाकांक्षः । **ईहिदूण**-ईहित्वा चेष्टित्वा उद्योगं कृत्वा । **मदिबुद्धी**-मतिबुद्धिभ्यां प्रत्यक्षानुमानाभ्यां परोक्षप्रत्यक्षसम्पन्नः । **पच्छा**-पश्चात् । **मलियकसाओ**-मथितकषायः क्षमासम्पन्नः । **सज्जो**-सद्यः तत्परः कृतकृत्यो वा । **मरणं**-समाधिमृत्युं स्वाध्यायमरणं वा । **पडिच्छाहि**-प्रतीच्छानुतिष्ठ । विपरिणामान्नरकं गम्यते यतोऽतः प्रत्यक्षपरोक्षप्रमाणाभ्यामागमे निश्चयं कृत्वा पूर्वकृतपरिकर्मानिदनश्च सन् मथितकषायश्च सन् सद्यः मरणं प्रतीच्छेति ।।८३।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० ५४

पुनरपि शिक्षां ददाति-

हंदि चिरभाविदा वि य जे पुरुसा मरणदेसयालम्मि ।
पुव्वकदकम्मगरुयत्तणेण पच्छा परिवडंति ।।८४।।

हंदि-जानीहि-सामान्यमरणं वा । **चिरभाविदावि य**-चिरभाविता अपि देशोनपूर्वकोटी कृताचरणा अपि । **जे**-यस्त्वं वा पुरुषैः सह सम्बन्धाभावात् । **पुरिसा**-पुरुषा मनुष्याः । **मरणदेशयालम्मि**-मरणकाले मरणदेशे वा अथवा मरणकाल एवानेनाभिधीयते । **पुव्वकद-कम्मगरुयत्तणेण**-पूर्वस्मिन् कृतं कर्म पूर्वकृतकर्म तेन गुरुकं तस्य भावः पूर्वकृतकर्मगुरुकत्वं तेनान्यस्मिन्नर्जितपापकर्मणा । **पच्छा**-पश्चात् । **परिवडंति**-प्रतिपतन्ति रत्नत्रयात् पृथग्भवन्ति यतः ।।८४।।

आतुर० गा० ५५

तह्मा चंदयवेज्झस्स कारणेण उज्जदेण पुरिसेण ।
जीवो अविरहिदगुणो कादव्वो मोक्खमग्गमि ।।८५।।

तम्हा-तस्मात् । **चंदयवेज्झस्स**-चंद्रकवेध्यस्य । **कारणेन**-निमित्तेन । **उज्जदेण**-उद्यतेन उपर्युक्तेन। **पुरिसेण**-पुरुषेण । **जीवो**-जीवः आत्मा। **अविरहिदगुणो**-अविरहितगुणोऽ-विराधितपरिणामः । **कादव्वो**-कर्तव्यः । **मोक्खमग्गम्मि**-मोक्षमार्गे सम्यक्त्वज्ञानचारित्रेषु । यतश्चिरभाविता अपि पुरुषा मरणदेशकाले पूर्वकृतकर्मगुरुकत्वेन पश्चात् प्रतिपतन्ति तस्मात् यथा चन्द्रकवेध्यनिमित्तं जीवोऽविरहितगुणः क्रियते तथोद्यतेन पुरुषेणात्मा मोक्षमार्गे कर्तव्य इत्येवं जानीहि निश्चयं कुर्विति ।।८५।।

आतुर० गा० ५६

कथं यत्नः क्रियते यावता हि तस्मिन् कालेऽभ्रावकाशादिकं न कर्तुं शक्यते इत्याह-

बाहिरजोगविरहिओ अब्भंतरजोगझाणमालीणो ।
जह तम्हि देसयाले अमूढसण्णो जहसु देहं ।।८६।।

बाहिरजोगविरहिदो-बाह्याश्च ते योगाश्च बाह्ययोगा अभ्रावकाशादयस्तै विरहितो हीनो बाह्ययोगविरहितः । **अब्भंतरजोगझाणमालीणो**-अभ्यंतरयोगं अन्तरंगपरिणामं ध्यानं एकाग्रचिन्तानिरोधनं आलीनः प्रविष्टः । **जह**-यथा । **तम्हि**-तस्मिन् । देसयाले-देशकाले

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

संन्यासकाले। **अमूढसण्णो**-अमूढसंज्ञः आहारादिसंज्ञारहितः । **जहसु**-जहीहि त्यज । **देहं**-शरीरम्। बाह्ययोगविरहितोऽपि, अभ्यन्तरध्यानयोगप्रविष्टः सन् तस्मिन् देशकाले अमूढसंज्ञो यथा भवति तथा शरीरं जहीहि ।।८६।।

आतुर० गा० ५७

अमूढसंज्ञके शरीरत्यागे सति किं स्यात् । इत्यतः प्राह-

हंतूण रागदोसे छेत्तूण य अट्ठकम्मसंखलियं ।
जम्मणमरणरहट्टं भेत्तूण भवाहि मुच्चिहसि ।।९०।।

हंतूण-हत्वा । **रागदासे**-रागद्वेषौ अनुरागाप्रीती । **छेत्तूण य**-छित्त्वा च । **अट्ठकम्मसंखलियं**-अष्टकर्मश्रृंखलाः । **जम्मणमरणहट्टं**-जन्ममरणारहट्टं जातिमृत्युघटीयंत्रम् । **भेत्तूण**-भित्त्वा । **भवाहि**-भवेभ्यो भवैर्वा । **मुच्चिहिसि**-मोक्ष्यसे मुञ्चसि वा । रागद्वेषौ हत्वा, अष्टकर्म श्रृंखलाश्च छित्त्वा जन्ममरणारहट्टं च भित्त्वा, भवेभ्यो मोक्ष्यसे इत्येतत्स्यादिति ।।९०।।

आतुर० गा० ५८

यद्येवं-

सव्वमिदं उवदेसं जिणदिट्ठं सद्दहामि तिविहेण ।
तसथावरखेमकरं सारं णिव्वाणमग्गस्स ।।९१।।

सव्वमिदं-सर्वमिमम् । **उवदेसं**-उपदेशमागमम् । **जिणदिट्ठं**-जिनदृष्टं कथितं वा । **सद्दहामि**-श्रद्दधे, तस्मिन्, रुचिं करोमीति । **तिविहेण**-त्रिविधेन । **तसथावरखेमकरं**-त्रसन्ति उद्विजन्तीति त्रसा द्वीन्द्रियादि पंचेन्द्रियपर्यन्ताः । स्थानशीलाः स्थावराः पृथिवीकायिकादिवनस्पतिपर्यन्ताः । अथवा त्रसनामकर्मोदयात् त्रसाः स्थावरनामकर्मोदयात्स्थावराः तेषां क्षेमं दयां सुखं करोतीति त्रसस्थावरक्षेमकरस्तं सर्वजीवदयाप्रतिपादकम् । **सारं**-प्रधानभूतं सारस्य कारणात्सारः । **णिव्वाणमग्गस्स**-निर्वाणमार्गस्य मोक्षवर्त्मनः । सम्यग्ज्ञानदर्शनचारित्राणां तस्मिन् सति तेषां सद्भावान्निर्वाणमार्गस्य सारं त्रसस्थावरक्षेमकरं च सर्वमिममुपदेशं जिनदृष्टं त्रिविधेन श्रद्दधेऽहमिति ।।९१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० ५९

तस्मिन् काले यथा द्वादशांगचतुर्दशपूर्वविषया श्रद्धा क्रियते तथा समस्तश्रुतविषया चिन्ता पाठश्च कर्तुं किं शक्यते ? इत्याह-

ण हि तम्हि देसयाले सक्को बारसविहो सुदक्खंधो ।
सव्वो अणुचिंतेदुं बलिणावि समत्थचित्तेण ।।९२।।

न-प्रतिषेधवचनं । **हि**-यस्मादर्थे । **तम्हि**-तस्मिन् । **देसयाले**-देशकाले । 'दिश् अतिसर्जने' दिश्यते अतिसृज्यो इति देशः शरीरं तस्य कालस्तस्मिन् शरीरपरित्यागकाले । **सक्को**-शक्यः । **बारसविहो**-द्वादशविधः द्वादशप्रकारः **सुदक्खंधो**-श्रुतस्कंधः श्रुतवृक्ष इत्यर्थः । **सव्वो**-सर्व समस्तम्। **अणुचिंतेदुं**-अनुचिन्तयितुं अर्थेन भावयितुं पठितुं च । **बलिणावि**-बलिनापि शरीरगतबलेनापि । **समत्थचित्तेण**-समर्थचित्तेन एकचित्तेन यतिना । तस्मिन् देशकाले बलयुक्तेन समर्थचित्तेनापि द्वादशविधं श्रुतस्कन्धं न शक्यमनुचिन्तयितुम् ।।९२।।

आतुर० गा० ६०

यतस्ततः किं कर्तव्यम् !

एक्कह्मि बिदियह्मि पदे संवेगो वीयरायमग्गम्मि ।
वच्चदि णरो अभिक्खं तं मरणंते ण मोत्तव्वं ।।९३।।

एक्कह्मि-एकस्मिन् नमोऽर्हद्भ्यः इत्येतस्मिन् । **विदियह्मि**-द्वयोः पूरणं द्वितीयं नमः सिद्धेभ्य इत्येतस्मिन् । **संवेओ**-संवेगः धर्मे हर्षः । **पदे**-अर्थपदे ग्रन्थपदे प्रमाणपदे वा पंचनमस्कारपदे च। अथवा एकम्हि बीजम्हिपदे-एकस्मिन्नपि बीजपदे यस्मिन्निति पाठान्तरम् । **वीयरागमग्गम्मि**-वीतरागमार्गे सर्वज्ञप्रवचने । **वच्चदि**-व्रजति गच्छति प्रवर्तते । **णरो**-नरेण सर्वसंगपरित्यागिना। **अभिक्खं**-अभीक्ष्णं नैरन्तर्येण। **तं**-तत् । **मरणंते**-मरणान्ते कण्ठगतप्राणेऽत्यसमये वा । **ण मोत्तव्वं**-न मोक्तव्यं न परित्यजनीयम् । एकपदे द्वितीयपदे वा पंचनमस्कारपदे वा वीतरागमार्गे यस्मिन् संवेगोऽभीक्ष्णं गच्छति तत्पदं मरणान्तेऽपि न मोक्तव्यं नरेण; नरो वा संवेगं यथा भवति तथा यस्मिन्पदे गच्छति प्रवर्तते तत्पदं तेन न मोक्तव्यमिति सम्बन्धः ।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० ६१

किमिति कृत्वा तन्न मोक्तव्यं यतः-

एदह्मादो एक्कं हि सिलोगं मरणदेसयालह्मि ।
आराहणउवजुत्तो चिंतंतो आराधओ होदि ।।९४।।

एदह्मादो-एतस्मात् श्रुतस्कन्धात् पंचनमस्काराद्वा । **एक्कं हि** - एकं ह्यपि एकमपि तथ्यम् । **सिलोगं**-श्लोकम् । **मरणदेसयालम्मि**-मरणदेशकाले । **आराहण उवजुत्तो**-आराधनया उपयुक्तः सम्यग्ज्ञानदर्शनचारित्रतपोनुष्ठानपरः । **चिंतंतो**-चिन्तयन् । **आराधओ**-आराधकः रत्नत्रयस्वामी। **होइ**-भवति सम्पद्यते । एतस्मात् श्रुतात् पंचनमस्काराद्वा मरणदेशकाले एकमपि श्लोकं चिन्तयन् आराधनोपयुक्तः सन् आराधको भवति यतस्ततस्त्वयेदं न मोक्तव्यमिति सम्बन्धः ।।९४।।

आतुर० गा० ६२

आराधनायाः किं फलं ? इत्यत आह-

आराहण उवजुत्तो कालं काऊण सुविहिओ सम्मं ।
उक्कस्सं तिण्णि भवे गंतूण य लहइ निव्वाणं ।।९७।।

आराहणउवजुत्तो-आराधनोपयुक्तः सम्यग्दर्शनज्ञानादिषु तात्पर्यवृत्तिः । **कालं काऊण**-कालं कृत्वा । **सुविहिओ**-सुविहितः शोभनानुष्ठानः । **सम्मं**-सम्यक् । **उक्कस्सं**-उत्कृष्टेन । **तिण्णि**-त्रीन्। **भवे**-भवान् । **गन्तूण य**-गत्वा च । **लहइ**-लभते । **णिव्वाणं**-निर्वाणम् । सुविहितः सम्यगाराधनोपयुक्तः कालं कृत्वा उत्कर्षेण त्रीन् भवान् प्राप्य ततो निर्वाणं लभते इति ।।९७।।

आतुर० गा० ६३

आचार्यानुशान्तिं श्रुत्वा शास्त्रं ज्ञात्वा क्षपकः कारणपूर्वक परिणामं कर्तुकामः प्राह-

समणो मेत्ति य पढमं बिदियं सव्वत्थ संजदो मेत्ति ।
सव्वं च वोस्सरामि य एदं भणिदं समासेण ।।९८।।

समणो मेत्ति य-श्रमणः समरसीभावयुक्तः, इति च । **पढमं**-प्रथमः । **बिदियं**-द्वितीयः । **सव्वत्थसंजदो**-सर्वत्रसंयतः । **मेत्ति**-मम इति । अथवा श्रमणे मम प्रथमं मैत्र्यम् । द्वितीयं च सर्वसंयतेषु । **सव्वं च**-सर्वं च । **वोस्सरामि य**-व्युत्सृजामि च । **एदं**-ऐतत् । **भणिदं**-भणितम्। **समासेण**-समासेन संक्षेपतः । प्रथमस्तावत् समानभावोऽहं द्वितीयश्च सर्वत्र संयतोऽतः सर्वमयोग्यं व्युत्सृजामि एतद्भणितं संक्षेपतो मयेति सम्बन्धः संक्षेपालोचनमेतत् ।।९८।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० ६४

पुनरपि दढपरिणामं दर्शयति

लद्धं अलद्धपुव्वं जिणवयणसुभासिंद अमिदभूदं ।
गहिदो सुग्गइमग्गो णाहं मरणस्स बीहेमि ।।९९।।

लद्धं-लब्धं प्राप्तम् । **अलद्धपुव्वं**-अलब्धपूर्वम् । **जिणवयणं**-जिनवचनम्। **सुभासिदं**-सुभाषितं प्रमाणनयाविरुद्धम् । **अभिदभूदं**-अमृतभूतं सुखहेतुत्वात् । **गहिदो**-गृहीतः । **सुग्गदिमग्गो**-सुगतिमार्गः। **णाहं मरणस्स बीहेमि**-नाहं मरणाद्बिभेमि । अलब्धपूर्वं जिनवचनं सुभाषितं अमृतभूतं लब्धं मया सुगतिमार्गश्च गृहीतोऽतः नाहं मरणाद् बिभेमीति ।।९९।।

आतुर० गा० ६५

अतश्च

धीरेण वि मरिदव्वं णिद्धीरेण वि अवस्स मरिदव्वं ।
जदि दोहिं वि मरिदव्वं वरं हि धीरत्तणेण मरिदव्वं ।।१००।।

धीरेण वि-धीरेणापि सत्त्वाधिकेनापि । **मरियव्वं**-मर्तव्यं प्राणत्यागः कर्तव्यः । **णिद्धीरेण वि**-निर्धैर्येणापि धैर्यरहितेनापि कातरेणापि भीतेनापि । **अवस्स**-अवश्यं निश्चयेन । **मरिदव्वं**-मर्तव्यम्। **जइदोहिं वि**-यदि द्वाभ्यामपि । **मरिदव्वं**-मर्तव्यं भवान्तरं गन्तव्यं विशेषाभावात् । **वरं**-श्रेष्ठम् । **हि**-स्फुटम् । **धीरत्तणेणं**-धीरत्वेन संक्लेशरहितत्वेन । **मरिदव्वं**-मर्तव्यम् । यदि द्वाभ्यामपि धैर्याधैर्योपेताभ्यां प्राणत्यागः कर्तव्यो निश्चयेन ततो विशेषाभावात् धीरत्वेन मरणं श्रेष्ठमिति ।।१००।।

आतुर० गा० ६६

क्षुधादिपीडितस्य यदि शीलविनाशे कश्चिद्विशेषो विद्यतेऽजरामरणत्वं यावता हि-

सीलेणवि मरिदव्वं णिस्सीलेणवि अवस्स मरिदव्वं ।
जह दोहिं वि मरियव्वं वरं हु सीलत्तणेण मरियव्वं ।।१०१।।

यदि द्वाभ्यामपि शीलनिःशीलाभ्यां मर्तव्यं अवश्यं वरं शीलत्वेन शीलयुक्तेन मर्तव्यमिति । व्रतपरिरक्षणं शीलं यदि सुशीलनिःशीलाभ्यां निश्चयेन मर्तव्यं शीलेनैव मर्तव्यम् ।।१०१।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० ६८

अत्र किं कृतो नियम ? इत्याह–

चिरउसिदबंभयारी पप्फोडेदूण सेसयं कम्मं ।
अणुपुव्वीय विसुद्धो सुद्धो सिद्धिं गदिं जादि ।।१०२।।

चिरउसिद–चिरं बहुकालं उषितः स्थितः । **बंभयारी**–ब्रह्म मैथुनानभिलाषं चरति सेवत इति ब्रह्मचारी चिरोषितश्च स ब्रह्मचारी च चिरोषितब्रह्मचारी । अथवा चिरोषितं ब्रह्म चरतीति । **पप्फोडेदूण**-प्रस्फोट्य निराकृत्य । **सेसयं कम्मं**–शेषं च कर्म ज्ञानावरणादि । **अणुपुव्वीय**-आनुपूर्व्या च क्रमपरिपाट्या अथवायुःक्षयाद्गुणस्थानक्रमेण वा । **विसुद्धो**-विशुद्धः कर्मकलंकरहितः । **सुद्धो**–शुद्धः केवलज्ञानादियुक्तः । **सिद्धिं गदिं जादिं**–सिद्धिं गतिं याति मोक्षं प्राप्नोतीत्यर्थः । अभग्नब्रह्मचारी शेषकं कर्म प्रस्फोट्य, असंख्यातगुणश्रेणिकर्मनिर्जरया च विशुद्धः संजातस्ततः शुद्धोभूत्वा सिद्धिं गतिं याति । अथवा अपूर्वापूर्वपरिणामसन्तत्या च विशुद्धः शुद्धः केवलोपेतः केवलज्ञानं प्राप्य परमस्थानं गच्छतीति ।।१०२।।

आतुर० गा० ६९

कुत ऐतदित्याह–

णिक्कसायस्स दंतस्स सूरस्स ववसाइणो ।
संसारभयभीदस्स पच्चक्खाणं सुहं हवे ।।१०४।।

णिक्कसायस्स–निष्कषायस्य कषायरहितस्य । **दंतस्स**–दान्तस्य दान्तेन्द्रियस्य । **सूरस्स**–शूरस्याकातरस्य । **ववसाइणो**–व्यवसायो विद्यतेऽस्येति व्यवसायी तस्य चारित्रानुष्ठानपरस्य । **संसारभयभीदस्स**–संसारभयभीतस्य संसाराद्भयं तस्माद्भीतस्त्रस्तः संसारभयभीतः तस्य ज्ञातचतुर्गतिदुःखस्वरूपस्य । **पच्चक्खाणं**–प्रत्याख्यानं आराधना । **सुहं**–सुखं सुखनिमित्तम् । **हवे**-भवेत् । यतो निष्कषायस्य, दान्तस्य, शूरस्य, व्यवसायिन, संसारभयभीतस्य, प्रत्याख्यानं सुखनिमित्तं भवेत्ततः तथाभूतो म्रियमाण आराधको भवतीति सम्बन्धः ।।१०४।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

आतुर० गा० ७०

उपसंहारद्वारेणाराधनाफलमाह-

एदं पच्चक्खाणं जो काहदि मरणदेसयालम्मि ।
धीरो अमूढसण्णो सो गच्छइ उत्तमं ठाणं ।।१०५।।

एदं-एतत् । **पच्चक्खाणं**-प्रत्याख्यानम् । **जो काहदि**-यः कुर्यात् । **मरणदेसयालम्मि**-मरणदेशकाले । **धीरो**-धैर्योपेतः । **अमूढसण्णो**-अमूढसंज्ञः आहारादिसंज्ञास्वलब्धः । **सोः**-सः । **गच्छदि**-गच्छति । **उत्तमं ठाणं**-उत्तमं स्थानं निर्वाणमित्यर्थः । मरणदेशकाले एतत्प्रत्याख्यानं यः कुर्यात् धीरोऽमूढसंज्ञश्च स गच्छत्युत्तमं स्थानमिति ।।१०५।।

आतुर० गा० ७१

अवसानमंगलार्थं क्षपकसमाध्यर्थं चाह-

वीरो जरमरणरिऊ वीरो विण्णाणणाणसंपण्णो ।
लोगस्सुज्जोययरो जिणवरचंदो दिसदु बोधिं ।।१०६।।

वीरो-वर्धमानभट्टारकः । **जरमरणरिऊ**-जरामरणरिपुः । **विण्णाणणाणसंपण्णो**-विज्ञानं चारित्रं, ज्ञानमवबोधस्ताभ्यां सम्पन्नो युक्तः। **वीरो**-वीरः । **लोगस्स**-लोकस्य भव्यजनस्य पदार्थानां वा । **उज्जोययरो**-उद्योतकरः प्रकाशकरः । **जिणवरचंदो**-जिनवरचन्द्रः । **दिसदु**-दिशतु ददातु । **बोधिं**-समाधिं सम्यक्त्वपूर्वकाचरणं वा । जिनवरचन्द्रो जरामरणशत्रुः चारित्रज्ञानादिसंयुक्तो लोकस्य चोद्योतकरो वीरो मह्यं दिशतु बोधिमिति सम्बन्धः ।।१०६।।

।। इति श्री वट्टकेराचार्यविरचितमूलाचारग्रन्थे श्रीवसुनन्दिसूरिरचिताचारवृत्तौ च बृहत्प्रत्याख्यानसंस्तरस्तवाधिकाराऽन्तर्गताः श्रीआतुरप्रत्याख्यानप्रकीर्णकतुल्यगाथाः ।।

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org

पू.आ.श्री विजय रामचन्द्रसूरिस्मृति-संस्कृतप्राकृत-ग्रंथमाला क्रमाङ्क

27

सन्मार्ग प्रकाशन

ISBN-978-81-87163-60-2

Jain Education International 2010_02 For Private & Personal Use Only www.jainelibrary.org